# अथतत्वानुसन्धानमद्वैतकौस्तुभटीकोपेतंप्रारभ्यते॥

॥ श्रीगुरुभ्योनमः॥ पूर्वीन्युनोग्रहेरस्वगुहापर्णादिनिर्जरैः॥ संस्तुनोऽसंस्तुनोरामोरामोऽथ ...तरम्॥ १॥ गुह्याशयागौरवभावमात्रानैसर्गतः सर्वजनाभिमान्याः॥ योगेश्व
...॥ नत्वादेशकपादाब्जंगणेशंहेनसाधुना॥ नायनेटिप्पणी काचिद्ब्रह्मशब्दार्थबोधनी॥ ३॥ मूर्ध्नीऽहं विदुषांप्रणम्यपरितःपादाविदं प्रार्थये॥ यन्मोरुधा
नामशुणपुनन ...नानकायानरकान्तकाये॥ २॥ तत्वपदार्थयोरत्रवाच्यलक्ष्यादिभेदतः॥ व्याख्यानत्वम
...ऽर्थनश्वगलिनस्यादत्रयद्यन्मया॥ तत्सर्वमिदंसुशोध्यकृपयापश्यन्तुसन्तोऽनघाः॥ दोषान्मेऽविगणय्यदूषणानिधेदोषेगुणारोपिणः॥ ४॥ तत्वपदार्थयोरत्रवाच्यलक्ष्यादिभेदतः॥ व्याख्यानत्वम्
अभीष्टसिद्धेकसाधनम्॥ ५॥ यः परमात्मेति॥ तत्सृष्ट्वातदेवानुप्राविशदितिश्रुत्यायःपरमेश्वरःप्रपञ्चंनिर्माय पुनस्तत्रप्रविष्टवानन्तंकृष्णंगोपीमनोहरंसनातनमहं वन्देइतियोजना गोपीमनोहरस्यकृष्ण
स्यप्रत्यगात्मत्वनसम्भवीत्यतोऽहयानन्देपरात्मनिगोपीमनोहरपदस्यलक्षणाकार्येत्यर्थीनथाचनानुपपन्नंप्रत्यगात्माभिन्नत्वमिति॥ अथवागोपायतिरक्षतिकारणरूपेणकार्यजातमितिगोपीमूलप्रकृतिःम
नस्तस्या आद्यंकार्यंतदुपलक्षितसर्वोऽपिकार्यवर्गोग्राह्यः गोपीचमनश्चगोपीमनसीतेकारणकार्यकलापेहरतिमोक्षदशायांस्वस्मिन्निवेशयतीतिगोपीमनोहरस्तम्॥ ॥ ॥ ॥

॥ ॐश्रीगणेशायनमः॥ यःपरमात्माजगत्सृष्ट्वाप्रविवेशपुनःस्वयं तंकृष्णंप्रत्यगात्मानंवंदेगोपीमनोहरं॥ १॥ यस्यप्रसादादहमद्वयात्माविश्वंसमस्तंमयिकल्पितंचतंसर्वलोकैकगुरुंसदाश्रीस्वयंप्रकाशंगुरुमानतोस्मि॥ २॥ गुरूणांचरणांभोजंप्रणिपत्यनिरंतरं तत्कृपालेशतोऽद्वैतचिंताकौस्तुभमारभे॥ ३॥ प्रारिप्सित

इतिमयाविज्ञानमितिशेषः॥ २॥ कर्तुमिच्छाविषयीभूतस्य॥ १॥

## ॐपरमात्मनेनमः ॐब्रह्माहंयत्प्रसादेनमयिविश्वंप्रकल्पितम्॥ ॥ ॥

हेयोपादेयगोचराबुद्धिःप्रेक्षा न ह्यन्॥ १॥

स्यग्रंथस्यनिर्विघ्नसमाप्तिकामनयागुरुप्रसादलभ्यतत्वानुसंधानलक्षणंमंगलमाचरन्नर्थात्प्रेक्षावत्प्रवृत्त्यंगमभिधेयादिसूचयन् यस्यदेवेपराभक्तिर्यथादेवे
तथागुरौतस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्यादिश्रुत्यागुरुभक्तेस्तत्वानुसंधानंप्रत्यंतरंगसाधनत्वावगमात्स्वगुरुंनमस्करोति ब्रह्मेति यस्यगुरोःप्रसा
देनब्रह्माहंतंगुरुंप्रणोमीतिसंबंधः अत्रब्रह्मशब्देनमायाविनिर्मुक्तमखंडचैतन्यमभिधीयते अहंशब्देनस्थूलसूक्ष्मकारणशरीरविनिर्मुक्तप्रत्यक्चैतन्यं
लक्षणयाप्रतिपाद्यते ब्रह्माहंशब्दयोःसामानाधिकरण्यात् ब्रह्मात्माभेदस्तत्वमस्यहंब्रह्मास्मीत्यादिमहावाक्यार्थःप्रकरणप्रतिपाद्योविषयःसूचितः तज्ज्ञाना
दज्ञाननिवृत्तिद्वारानंदावाप्तिःप्रयोजनं तत्कामोधिकारी प्रतिपाद्यप्रतिपादकभावःसंबंधश्चेति ब्रह्माहमिति तत्वानुसंधानमेवमंगलं तथाचस्मृतिःस्मृतेः सकलक
ल्याणभाजनंयस्यजायतेपुरुषस्त ... तंनित्यंव्रजामिशरणंहरिं॥ १॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलंयेषांहृदिस्थोभगवान्मंगलायतनोहरिः २ अशुभा
निनिराचष्टेतनोतिशुभसंततिंस्मृतिमात्रेणयत्पुंसांब्रह्मतन्मंगलंविदुः ३॥ हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः ४॥

तस्यमहात्मनःएतेप्रकृताप्रोक्ताअर्थाःस्वमेवप्रकाशन्तेइत्यर्थः॥ ६॥ यस्यहरेःस्मरणात्पुरुषःसकलकल्याणपात्रंभवतितंहरिंशरणंरक्षकंव्रजामीत्यर्थः॥ ३॥ ३॥

मंगलाविनापिसमाप्तिदर्शितत्वात्॥ ५॥ यथाकथंचित्॥ ५॥ स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगिकार्यकत्वमन्वयव्यभिचारत्वम् कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वं

एकवारंस्म॥ १॥ किरणावली॥ ३॥ तेनपुरुषेणमोक्षप्राप्तयर्थंप्रगाढगात्रिकाबन्धोबधइत्यर्थः॥ १॥

सकृदुच्चरितंयेनहरिरित्यक्षरद्वयं बधःपरिकरस्तेनमोक्षायगमनंप्रति ५ अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव६
इत्यादि ननुग्रंथारंभेमंगलाचरणमनुपपन्नंप्रमाणप्रयोजनयोरभावात् तथाहि नतावदत्रप्रत्यक्षंप्रमाणं मंगलाचरणकर्तव्यतायाअतींद्रियत्वात् किंच ना
स्तिकादिग्रंथस्यमंगलाचरणाभावेपिसमाप्तिदर्शनात् कृतेपिमंगलेक्वचिद्ग्रंथस्यसमाप्त्यदर्शनात् तस्मादन्वयव्यतिरेकव्यभिचारान्मंगलस्यप्रत्यक्षेणनिर्विघ्न
समाप्तिकारणत्वमवगंतुमशक्यं नाप्यनुमानंलिंगाभावात् नचशिष्टाचारात्तदनुमानमितिवाच्यं तस्यानिर्वचनात् नाप्यागमःप्रत्यक्षस्यतस्याऽभावात् अनुमाना
ऽसंभवोक्त्यानुमेयागमस्याप्यसंभवात् नाप्यर्थापत्तिः अन्यथोपपत्तेर्दर्शितत्वात् तस्मान्मंगलाचरणेनप्रमाणमस्तिनापिप्रयोजनंपश्यामःग्रंथसमाप्तेस्तेनवि
नापिसंभवेनतत्प्रयोजनत्वानुपपत्तेःविघ्नध्वंसस्यतुस्वतःसिद्धविघ्नविरहस्थलेऽसंभवेनतत्प्रयोजनत्वानुपपत्तेः तस्मात्प्रयोजनप्रमाणयोरभावान्मंगलाचरण
मनुपपन्नमिति अत्रोच्यते ग्रंथारंभेमंगलाचरणमवश्यंकर्तव्यं नचतत्रप्रमाणाभावः अनुमितश्रुतेरेवप्रमाणत्वात् नचानुमानासंभवःशिष्टाचारत्वेनतदनु

शिष्टाचारत्वस्य॥ ४ मंगलप्रतिपादकवेदस्य॥ ४॥ हेतुना॥ १

## श्रीमत्स्वयंप्रकाशाख्यंप्रणौमिजगतांगुरुम्॥ १॥ ॥ ॥

आद्यनिवचनंनास्तिकेऽतिप्रसक्तमतोद्वितीयमाहवेदेति॥

प्रमाऽविषयत्वंविधिमंतरागादितोऽप्राप्तत्वमितिभावः॥ २॥ अविरुद्धं॥ २

मानात् तथाहिमंगलंवेदबोधिताभीष्टोपायताकं अलौकिकाविगीतशिष्टाचारत्वाद्दर्शादिवत् मंगलत्वंनामविघ्नोत्सारणसाधारणकारणत्वं अतोनाश्रयासिद्धिः
अलौकिकत्वंनाम अन्वयव्यतिरेकाप्रमापितत्वं अविगीतत्वंनामवलवदनिष्टाननुबंधीष्टसाधनत्वंशिष्टत्वंनामक्षीणदोषपुरुषत्वं वेदप्रामाण्याभ्युपगंतृत्वंवा ततो
नस्वरूपासिद्धिःव्यभिचारोवा एवंचनिर्विघ्नसमाप्तिकामोमंगलमाचरेदित्यनुमितयाश्रुत्यामंगलस्याभीष्टनिर्विघ्नपरिसमाप्तिफलकत्वंनिश्चीयते तस्मात् नास्ति
नास्तिकादीनांमंगलाचरणाभावेपिजन्मांतरीयमंगलाद्ग्रंथसमाप्तिरुपपद्यते यत्रकृतेपिमंगलेसमाप्त्यभावस्तत्रविघ्नप्राचुर्यंबलवत्तरविघ्नोवावोध्यः तन्निवृत्तिस्तुमंगल
प्राचुर्याद्वाबलवत्तरमंगलाचरणाद्वाभवत्यतोनान्वयव्यतिरेकव्यभिचारः अथवामंगलाचरणस्यविघ्नध्वंसएवफलं नचस्वतःसिद्धविघ्नविरहवताकृतस्यमंगलस्य
फलाभावेनतत्साधनताबोधकश्रुतेरप्रामाण्यप्रसंगइतिवाच्यं स्वतःसिद्धपापविरहवतापापभ्रांत्याकृतस्यप्रायश्चित्तस्यपापनिवृत्तिलक्षणफलाभावेपिप्रायश्चित्तविधायकशास्त्रस्येवास्यापिप्रामाण्योपपत्तेः नचफलव्यभिचारशंकयामंगलाचरणेप्रवृत्तिर्नस्यादितिवाच्यं संशयादपिप्रवृत्त्युपपत्तेः एवमेप्रतिपत्यन्यथाप्रतिपत्ति

द्वितीयनिर्वचनान्नस्वरूपासिद्धोऽलौकिकावगीतेतिपदयुगान्नभोजनादौरात्रिश्राद्धादौ चव्यभिचारइत्यर्थः॥ व्यभि ... पूर्वोक्तानुमानेस्ववोधितकर्तव्यताकत्वसम्बन्धेनश्रुतेरेवसाध्यताश्रुतिसिद्धेचमङ्गलकर्तव्यंश्रुतिप्रतिपाद्यसमाप्तेकफ
... रणामिवस्वरूपासिद्धिवारकाणामपिविशेषणानांहेतुकुक्षिप्रविष्टानांसार्थकान्निवेशप्रमिश्राद्धिसमन्ततात्रदोषः॥ ५॥ लकत्वादित्यनुमानात् ... प्रकृतेष्टसिद्धिः॥ ५॥ अर्थाप्रतीतिः॥ २॥ विपर्ययः॥ २॥
मङ्गलजन्यविघ्नध्वंससत्वेपिसामग्र्यन्तराभावात्समाप्त्यभावोऽतोविघ्नध्वंससवमङ्गलफलमितिचनाम ... थवेति॥ प्रवृत्तेर्दृश्यफलम्॥ ३॥

संशयः ३॥ ब्रह्मस्वरूपत्वेसति ४॥ उत्तरस्फूर्तिः १ संयुक्तत्वात् २

प्रतिपत्त्यादिनिवृत्तिः शिष्टाचारः प्रतिभाते चेत्येवमादीनि बहूनि फलानि मंगलस्य संति एवं मंगलाचरणेन विघ्ननिवृत्तौ बुद्धिप्रतिभादि। दृष्टकारणकलापाद्ग्रंथस्य समाप्ति
र्भवति तस्मात्प्रमाणप्रयोजनयोः संभवात् ग्रंथारंभे मंगलाचरणमवश्यं कर्त्तव्यमिति ननु ब्रह्मात्मनोरैक्यमनुपपन्नं विरुद्धधर्माक्रांतत्वात् तथाहि श्रुत्यादिभिर्जगत्कल्प
नाधिष्ठानं सर्वज्ञं ब्रह्मावगम्यते जीवस्तद्विपरीतः कथं तयोरैक्यं स्यादित्याशंक्य जीवस्याहंपदवाच्यस्य वैपरीत्येप्यंतःकरणोपलक्षितस्य मायोपलक्षितेन तत्पदार्थेन
भेदाभावात्तस्यापि जगत्कल्पनाधिष्ठानत्वसंभवेन विरोधाभावादैक्यं संभवतीत्यभिप्रेत्याह मयीति मय्यंतःकरणोपलक्षिते तत्साक्षिणि विश्वं गिरिनद्यादिभेदभिन्नं
ब्रह्मांडांतं अध्यस्तं अध्यासं निरूपयिष्यति तथा च श्रुतिः मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितं मयि सर्वं लयं याति तद्ब्रह्माद्वयास्म्यहमित्यंतःकरणोपलक्षिते प्रती
चि सर्वकल्पनां दर्शयति एतेन प्रपंचस्य मिथ्यात्वमपि सूचितं तत्रानुमानमपि व्यावहारिकः प्रपंचो मिथ्या दृश्यत्वात् शुक्तिरूप्यवत् इत्यादि मिथ्यात्वसाधकं द्रष्टव्यं
शुक्तिरूप्यमग्रे निरूपयिष्यते ततश्च ब्रह्मात्मैक्यमुपपन्नमिति भावः अहंशब्दार्थविवेकपूर्वकं पूर्वमनुसंधितं ब्रह्मात्मतत्त्वं इष्टदेवतावाचकशब्देन निर्दिश्य पुन

इतिश्रुतिः कृष्ण

## देहोनाहं श्रोत्रवागादिकानि ॥ ॥ ६ ॥

स्तदनुसंदधाति देह इति स्वप्ने स्थूलदेहप्रतीतेरभावात् स्थूलदेहो न भवामीत्यर्थः ननु स्थूलोहं कृशोहमित्यादि अनुभवात्तदतिरिक्तस्यात्मनोऽननुभवात्स्वप्नेपि स्थूलोऽ
हमित्यनुभवस्य सार्वजनीनत्वात् स्थूलदेह एव आत्मेति चेन्न स्थूलशरीरस्योत्पत्तिविनाशवत्त्वेना नात्मत्वं आत्मत्वे कृतहानि अकृताभ्यागमप्रसंगात् स्थूलोहमित्याद्य
नुभवस्य भ्रमत्वेन तस्यात्मत्वासाधकत्वाद्देहातिरिक्तस्यात्मनः श्रुतिस्मृतीतिहासपुराणयुक्तिविद्वदनुभवसिद्धत्वेन तस्यापलापायोगात् स्वप्नेस्थूलोहमित्यनुभवस्य
जाग्रद्वासनाजन्यतया तद्विषयत्वादन्यथा वाराणस्यां स्वप्नः रामसेतौ रामनाथमनुभवन् प्रबुद्धस्तत्रैवावतिष्ठेत तस्मात्स्थूलशरीरस्य स्वप्नेऽभावादात्मनः स्वप्ने
प्यहमित्यनुभवादहं स्थूलदेहो न भवामि अस्तु तर्हींद्रियाण्यात्मा काणोहं मूकोहमित्यनुभवदर्शनात् प्राणसंवादादिषु इंद्रियाणां चेतनत्वावगमाच्चेति चेन्न करण
त्वेनवास्यादिवदिंद्रियाणामात्मत्वायोगात् करणकर्तृत्वयोर्विरुद्धत्वात् बहूनामिंद्रियाणामात्मत्वे विरुद्धाभिप्रायतया सद्यः शरीरपातप्रसंगात् योहमद्राक्षं सोहं स्पृ
शामीत्यात्मैक्यबाधप्रसंगाच्च प्राणसंवादस्याभिमानिनी देवताविषयत्वेनेंद्रियाणामात्मत्वासाधकत्वाच्च उत्पत्तिविनाशवत्त्वेन पूर्वोक्तदोषप्रसंगात् काणोहमि

स्थूलदेहस्य ४॥ प्राणैः सहयइन्द्रियाणांसंवादस्तस्यतदभिमानिनीदेवताविषयत्वमित्यर्थः २॥ शरीरस्यात्मत्वेतस्यविनाशवत्त्वेनकृतानांश्रौतस्मार्तकर्मणांविनाशः स्यात्॥ उत्पत्तिमत्त्वेनचाकृतानामेवफलज
मपात्वंस्यादित्यर्थः॥ ६॥ कृतहान्यादिः १

त्याद्यनुभवस्य भ्रमरूपत्वाच्च श्रुत्यादिभिस्तदतिरिक्तात्मप्रतिपादनादिंद्रियाण्यनात्मा अस्तु तर्हि प्राण आत्मा क्षुत्पिपासावानहमित्यनुभवदर्शनात् अन्योंतरा
त्मा प्राणमय इति श्रुतेः जाग्रदाद्यवस्थास्वनुवर्तमानत्वाच्चेति चेन्न तस्य वायुविकारत्वात्तत्त्वात्मत्वमित्यभिप्रेत्याह श्रोत्रमिति श्रोत्रमिति ज्ञानेंद्रियाणामुपल
क्षणं वागिति कर्मेंद्रियाणामुपलक्षणं आदिशब्देन मुख्यप्राणो गृह्यते तथा च ज्ञानेंद्रियकर्मेंद्रियमुख्यप्राणा न भवामि तेषां स्वप्नसुषुप्त्योर्लयदर्शनात् यद्यपि
परदृष्ट्या प्राणोऽनुवर्तते स्वप्नादौ तथापि स्वदृष्ट्यानुपलंभात् प्राणस्य लयाभिधानं द्रष्टव्यं तानि यदा गृहणाति अथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो
भवतीत्यादिश्रुतेः अन्यथा पूर्वोक्तदोषाऽनपायात् एतेन क्षुत्पिपासावानहमिति प्राणस्यात्मत्वानुभवो भ्रमतया परास्तः तस्मात्प्राणादीनामनात्मत्वमिति भावः अस्तु
तर्हि विज्ञानमात्मा कर्ता भोक्ताहमित्यनुभवदर्शनात् अन्योंतरात्मा विज्ञानमय इति श्रुतेरित्यत आह बुद्धिरिति बुद्धिरंतःकरणवृत्तिः इदमंतःकरणस्याप्युपल
क्षणं तथा चाहमंतःकरणतद्वृत्तिश्चैतदुभयं न भवामि तस्य भौतिकत्वेन जडत्वात् सुषुप्तौ लयदर्शनाच्च कर्ता भोक्ताहमित्यनुभवस्य भ्रमत्वेन तस्यात्मसाधकत्वा

## नाहं बुद्धिर्नाहमध्यासमूलं नाहं सत्यानंदरूपश्चिदात्मा मायासाक्षी कृष्ण एवाहमस्मि ॥ २ ॥

योगात् श्रुतेस्तत्र तात्पर्याभावात् अन्योंतर आत्मानंदमय इत्यतिरिक्तात्मश्रुतेः तथा चांतःकरणं तद्वृत्तिश्चानात्मेति भावः एतेन मनोमयकोशस्याप्यात्मत्वं परास्तं
अस्तु तर्हि सर्वाध्यासमूलमानंदमयशब्दवाच्यमज्ञानमात्माहमज्ञ इत्यनुभवादित्यत्राह अध्यासमूलमिति अध्यासो विपर्ययो मिथ्याज्ञानं अतस्मिंस्तद्बुद्धिरिति
यावत्। अयं विस्तरेणाग्रे निरूपयिष्यते तस्याध्यासस्य मूलं कारणमज्ञानं तथा चाहमध्यासकारणमज्ञानं न भवामि तस्य ज्ञाननिवर्त्यत्वाज्जडत्वात्समाधावप्र
तीयमानत्वादज्ञोहमित्यनुभवस्य भ्रांतित्वात् ब्रह्म पुच्छं प्रतिष्ठेत्यानंदमयकोशाधिष्ठानस्य तत्साक्षिणोऽतिरिक्तस्य प्रतिपादनेन श्रुतेरानंदमयस्यात्मत्वे तात्पर्यायो
गाच्चाज्ञानमनात्मेति भावः कस्तर्ह्यात्मा यस्य ब्रह्मत्वमनुभवस्यऽहं ब्रह्मास्मीति तत्राह सत्येति अज्ञानतत्कार्यसाक्षी आत्मा स एवाहमित्यनुभूयते तस्यैव ब्रह्मत्वमनु
भवाम्यहं ब्रह्मास्मीति किं तद्ब्रह्मेत्यत आह कृष्ण इति कृष्णः परं ब्रह्म कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति स्मरणात्
कृष्ण एवाहमस्मि इत्यभिप्रायः अयं भावः तत्सृष्ट्वा तदेवानुप्राविशदनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि स एष इह प्रविष्ट आप्रणखाग्रेभ्य इत्यादिश्रु

इतिवाक्येन २ भ्रांतित्वा ४ आनन्दः २॥ स एषः पूर्वोक्तः परमात्मा इह अस्मिन् शरीरे नखाग्रपर्यन्तं प्रविष्टोऽस्तीत्यर्थः॥ १॥

ग्यः अविक्रियोनित्यशुद्धबुद्धमुक्तस्वभाव आत्माऽनाद्यनिर्वचनीयमायाशक्त्याकाशादिस्थूलशरीरांतंसृष्ट्वा तदनुप्रविश्य तत्साक्षीभूत्वाऽविवेकात्तद्धर्मानात्मन्यारोप्याहंकर्ताभोक्तेतिसंसारमनुभवति श्रुत्याचार्यप्रसादेन विवेकात्तंपरित्यज्य स्वात्मसाक्षात्कारेण मायांविनाश्य परमानंदस्वरूपमनुभवतीति वदंति तत्तोन कोपि विरोधः एतच्चाग्रे स्फुटतरं व्युत्पादयिष्यते साक्षात्कर्तव्यस्य ब्रह्मणः स्वरूपतटस्थलक्षणे दर्शयति सत्येत्यादिना मायासाक्षित्वं तटस्थलक्षणं मायां साक्षादीक्षते भासयतीति मायासाक्षी मायां व्युत्पादयिष्यति अन्यत्स्वरूपलक्षणं कालत्रयाबाध्यः सत्य आनंदः सुखं निरतिशयसुखस्वरूपइत्यर्थः चिदात्मा ज्ञानस्वरूपः सत्यमिति मिथ्यावस्तुतादात्म्यं व्यावर्तयति आनंद इति दुःखतत्साधनतादात्म्यं व्यावर्तयति चिदात्मेति जडतादात्म्यं व्यावर्तयति तथाच सत्यज्ञानानंदस्वरूपः सर्वसाक्षी परमात्माहमस्मि तत्त्वमस्यहं ब्रह्मास्मीति श्रुतेरिति भावः अथातो ब्रह्मजिज्ञासेत्यत्र साधनचतुष्टयसंपत्त्यनंतरं ब्रह्मजिज्ञासासूत्रितातत्र विचारितं तत्त्वमस्यादिवाक्यजन्यमवगतिपर्यंतं ब्रह्मात्मैक्यगोचरं फलीभूतं ज्ञानमिच्छाकर्मतच्च पदार्थज्ञानाधीनं अविदितपदार्थस्य पुरुष

## अथमोक्षस्यवाक्यार्थज्ञानाधीनत्वात् तस्यच पदार्थज्ञानाधीनत्वात् तदर्थं तत्पदार्थं निरूपयामः ॥

स्यवाक्यार्थज्ञानानुदयात् तदपि पदार्थज्ञानं विचाराधीनमित्यर्थो हि विचारकर्तव्यतासूत्रितास च विचारो द्विविधः प्रधानविचारस्तत्सह ॥ ॥ कारिविचारश्चेति ज्ञानेनाप्तुमिष्टात्मत्वाद्ब्रह्मप्रधानं तद्विचारः प्रधानविचारः समन्वयादिविचारैर्विना ब्रह्मविचारासंभवात्समन्वयाविरोधसाधनफलविचारास्तत्सहकारिणः समन्वयो नाम ब्रह्मात्मैकत्वप्रतिपादकत्वेन वेदांतवाक्यानां समनुगतत्वं तात्पर्यमिति यावत् तद्विचारः शारीरकेप्रथमाध्याये कृतः श्रुतिविरोधे स्मृत्यादीनां प्रत्यक्षादीनां च आभासत्वाद्वेदांतसमन्वयस्य प्रमाणांतरेणाविरोधाभावोऽविरोधः सोपि द्वितीयाध्याये विचारितः द्विविधमपि साधनं तृतीये विचारितं द्विविधमपि फलं चतुर्थे विचारितं साधनमध्ये वाक्यार्थविचारस्य ज्ञानं प्रत्यंतरंगसाधनत्वात्तत् सहकारित्वेन पदार्थविचारस्याप्यंतरंगसाधनत्वात्पदार्थविचारं सप्रयोजनं प्रतिजानीते अथेति साधनचतुष्टयसंपत्त्यनंतरं तत्पदार्थं निरूपयाम इति संबधः ननु काकदंतपरीक्षावत्पदार्थनिरूपणस्य प्रयोजनशून्यत्वात्तन्निरूपणमसंगतमित्याशंक्याह तदर्थमिति पदार्थज्ञानार्थं प्रथमं तत्पदार्थं निरूपयामः क्रमेण त्वंपदार्थमपीति भावः ननु पदार्थज्ञानस्य सुखप्राप्तिदुःखनिवृत्त्योरन्य

विचारयामः२॥

भावपदार्थो द्वितीयोनापेक्षितइत्येव४॥ श्रुति४॥ अविद्याप्रतियोगिकायस्याः५॥ वाक्यार्थज्ञानं प्रतिपदजन्यपदार्थोपस्थितेः कारणत्वमित्यर्थः॥२

तरत्वाभावेन कथं पुरुषार्थत्वमित्याशंक्याह तस्येति तस्येति वाक्यार्थज्ञानं परामृश्यते ततश्च वाक्यार्थज्ञानस्य पदार्थज्ञानाधीनत्वादविदितपदार्थस्य वाक्यार्थज्ञानासंभवात्तदर्थं पदार्थज्ञानं संपादनीयं हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिहेत्यादिवचनादिति भावः वाक्यार्थज्ञानस्य वा कथं प्रयोजनवत्त्वं तस्मिन्सत्यपि संसारोपलंभादित्यत आह मोक्षस्येति ननु कोयं मोक्षः अज्ञाननिवृत्तिर्ब्रह्मभावो वा नाद्यः अज्ञाननिवृत्तेर्ब्रह्मस्वरूपापेक्षयाभिन्नत्वे अद्वैतश्रुतिविरोधापत्तेः न च श्रुतेर्भावाऽद्वैतपरत्वान्नोक्तदोष इति वाच्यं संकोचे मानाभावात् किंच ब्रह्मव्यतिरिक्तस्य कल्पितत्वनियमेनाविद्यानिवृत्तेरपि कल्पितत्वेन मिथ्यात्वापत्त्या मोक्षस्यानित्यत्वप्रसंगेनाऽविद्यायाः कल्पितत्वेन तत्प्रतियोगिकनिवृत्तेस्तत्सत्ताधीनसत्ताकतया सत्यत्वायोगेन मोक्षस्यानित्यत्वं स्यान्न चैतदिष्टं सर्वैर्मोक्षवादिभिर्मोक्षस्य नित्यत्वाभ्युपगमादन्यथा मुक्तानां पुनरुत्पत्तिप्रसंगात् न द्वितीयः मोक्षस्य ज्ञानसाध्यत्वं न स्यात् तस्मान्मोक्षस्यानिरूपणाद्वाक्यार्थज्ञानस्य तत्साधनत्वेन प्रयोजनवत्त्वं दुर्निरूप्यमिति अत्रोच्यते अविद्यानिवृत्तिरेव मोक्षः सा चाधिष्ठानब्रह्मस्वरूपैव कल्पितप्रतियोगिकाभावस्याधिष्ठानव्यतिरेकेण

अविद्यो३

## तत्पदार्थस्य लक्षणं द्विविधं तटस्थलक्षणं स्वरूपलक्षणं चेति सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणं॥

अथवेति मतान्तरेणपूर्वपक्षएव४ श्रवणमनननिदिध्यासनानां४ उपासना६

दुर्निरूपत्वात् नच मोक्षस्य ज्ञानसाध्यत्वं न स्यादिति वाच्यं नहि साध्यत्वं नाम मोक्षस्य जन्यत्वं ब्रह्मभावस्यानादिसिद्धत्वेनोत्पत्तेरनिरूपणात् किं तर्हि अभिव्यक्तिमात्रं अभिव्यक्तिर्नाम ज्ञानेन भ्रमतिरस्कारः अखंडैकरसानंदस्फूर्तिरिति यावत् तस्माद्वाक्यार्थज्ञानस्य मोक्षसाधनत्वमुपपन्नं ननु तस्मिन्सत्यपि संसारोपलंभात् कथं मोक्षसाधनत्वं तस्माच्छास्त्रेण ब्रह्म निश्चित्य यावज्जीवं कर्मानुतिष्ठन् ब्रह्मध्यानाभ्यासं कुर्यात्ततश्च ध्यानाभ्यासकर्मभ्यां मरणकाले शुद्धे मनस्यभ्यासपाटवेन चरमप्रत्ययः साक्षात्कार उदेति ततो मोक्षो भवति अथवा प्रसंख्यानं कर्तव्यं प्रसंख्यानं नाम शब्दयुक्तिप्रत्ययानामावृत्तिः तेनाऽसंसृष्टाऽद्वितीयब्रह्मसाक्षात्कारो भवति तदुक्तं शब्दयुक्तिप्रसंख्यानैरात्मना च मुमुक्षवः पश्यंति मुक्तमात्मानं प्रमाणेन च तुष्यदेति तस्माद्वाक्यार्थज्ञानान्मोक्ष इति मनोरथमात्रं किंतु यथोक्तप्रकारेणैव ब्रह्मसाक्षात्कारान्मोक्षः तथा च विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इत्येवमाद्याः श्रुतयोऽनुगृहीता भवंति तस्मान्मोक्षस्य वाक्यार्थज्ञानाधीनत्वमनुपपन्नमित्यत्रोच्यते चरमसाक्षात्कारात्कीदृशो मोक्षो भवतीति विवेक्त।

सिद्धांतेतुवाक्यार्थज्ञानार्थं मननादिकं एतन्मतेतु वाक्यार्थज्ञानादूर्ध्वं अपि इतिभेदः२॥ उपासना२॥ कर्म२॥ ॥३ चत्वारिपदानियस्मिन्इत्यभूतेन प्रमाणेनास्मिन्नेवश्लोके उक्तेन३॥

ण्यं अविद्यानिवृत्तिर्वा ब्रह्मभावो वा नाद्यः चरमप्रत्ययादविद्यानिवृत्तिर्भवति प्रथमप्रत्ययान्नेत्यत्र को हेतुः प्रत्ययत्वाविशेषात्। संसारोपलंभस्य ज्ञापक इति चेन्न तस्य साक्षात्कारोत्तरमपि प्रारब्धवशादप्युपपत्तेः किंच ब्रह्मविद्ब्रह्मैव भवति। तरति शोकमात्मविदित्यादिश्रुतिषु ज्ञानमात्रस्य मोक्षहेतुत्वं श्रूयते न तु ज्ञानोत्तरं किंचित्कर्तव्यमवगम्यते ततश्चरमस्यैव मोक्षहेतुत्वं न प्रथमस्येति कल्पनायां मानाभावात् ज्ञानेनाज्ञाननिवृत्तौ तत्कृतकर्तृत्वाद्यभिनिवेशस्यापि निवृत्तत्वात्तस्य विधिकिंकरत्वायोगेन ध्यानकर्मप्रवृत्त्यसंभवात् ब्रह्मणः प्रत्यग्रूपत्वेन नित्यापरोक्षतया प्रथमं परोक्षज्ञानं पश्चादपरोक्षज्ञानमिति कल्पनायां मानाभावाच्च अत एव न द्वितीयोपि चरमज्ञानेनेव प्रथमज्ञानेनापि ब्रह्मभावाभिव्यक्तेः संभवात् तस्मात्प्रथमो वा मध्यो वा चरमो वाऽसंदिग्धाविपर्यस्तो वाक्यजन्यप्रत्ययो मोक्षहेतुः अत एव न प्रसंख्यानविधिरपि विद्यां चाविद्यां चेति वाक्यस्योपासकविषयत्वात् तमेव धीरो विज्ञायेति वाक्यस्य साक्षात्कारोद्देशेन निदिध्यासनविधिपरत्वात्तस्मान्मोक्षस्य वाक्यार्थज्ञानाधीनत्वमुपपन्नमेवातो वाक्यार्थज्ञानं संपादनीयमिति भावः लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायात्ताभ्यां तत्प

यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति इति श्रुतेः ॥

दार्थं निरूपयितुं लक्षणं विभजते तत्पदार्थस्येति द्वैविध्यमाह तटस्थेति कादाचित्कत्वे सति व्यावर्तकत्वं तटस्थलक्षणं यथा पृथिवीलक्षणस्य गंधवत्त्वस्य। तस्य पृथिव्यां महाप्रलये उत्पत्तिक्षणे चाभावात् सकलकार्यविनाशस्यैव प्रलयत्वात् न्यायमते उत्पन्नं द्रव्यं क्षणमगुणं निष्ठतीति प्रथमक्षणे तैर्द्रव्यस्य निर्गुणत्वस्वीकारात् तस्मात्कादाचित्कत्वात् व्यावर्तकत्वाच्च पृथिव्या गंधवत्त्वं तटस्थलक्षणमेवं ब्रह्मणोपीत्युदाहरति सृष्टीति सृष्टिरुत्पत्तिः स्थितिः परिपालनं लयकारणत्वमित्युक्ते ब्रह्मण उपादानत्वमेव स्यात् यत्कार्यं यत्र लीयते तत्कार्यं प्रति तस्योपादानत्वनियमान्निमित्तकारणमन्यदेव स्यात् तथा चाद्वैतश्रुतिविरोधः स्यात् तदर्थमुक्तं स्थितीति स्थितिलयकारणत्वमिति उक्ते उत्पत्तिकारणं दंडादिवन्निमित्तकारणमन्यदेव स्यात्तथा च पूर्वोक्तदोषस्तद्व्यावृत्त्यर्थमुक्तं सृष्टीति सृष्टिस्थितिकारणत्वमित्युक्ते कुलालादिवद्ब्रह्मणो निमित्तकारणत्वमेव स्यादुपादानकारणमन्यदेव स्यात्तथा च सिद्धांतविरोध अत उक्तं लयेति सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणमित्युक्त्या ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं सिद्ध्यति एवंच प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादिति सिद्धांतो न विरुध्यते तथा च लक्षणस्यायं नि

ब्रह्म प्रकृतिरुपादानं च कारणं सोऽकामयतेति श्रुत्या कामयितृत्वश्रवणाच्च निमित्तमपि १॥ प्रत्यक्षादृष्टांतयोः सामंजस्यात् येनाश्रुतं श्रुतं भवतीति प्रतिज्ञा १॥ १ यथा सौम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्यादिति दृष्टांत इति॥ शा॥ सू०॥

कर्तृत्वं ५ कर्तृत्वे २

ष्कर्षः जगत्कर्तृत्वे सति जगदुपादानत्वं तटस्थलक्षणं ब्रह्मण इति जगदुपादानत्वं तटस्थलक्षणमित्युक्ते मायायामतिव्याप्तिः मायाविशिष्टस्य जगदुपादानतयाविशेषणीभूतमायाया अप्युपादानत्वावश्यंभावात् कार्यान्वितस्यैव विशेषणत्वात् मायां तु प्रकृतिं विद्यादित्यादिश्रुत्या मायायाः तदुपादानत्वावगमाच्च तत्रातिव्याप्तिवारणाय जगत्कर्तृत्वे सतीत्युक्तं लक्षणस्य त्रीणि दूषणानि भवंत्यव्याप्त्यतिव्याप्त्यसंभवाश्चेति लक्ष्यैकदेशे लक्षणस्यावर्तनमव्याप्तिः अलक्ष्ये लक्षणगमनमतिव्याप्तिः लक्ष्ये क्वाप्यवर्तनमसंभवः ततश्चातिव्याप्तेरपि दूषणत्वाद्विशेषणमर्थवत् कर्तृत्वं नाम उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं तच्चेतनस्यैव संभवतीति न मायायामतिव्याप्तिः नैवमुक्ते नैयायिकाभिमततटस्थेश्वरेऽतिव्याप्तिस्तस्य वेदांतासंमतत्वेनाऽलक्ष्यत्वात्तद्व्यावृत्त्यर्थमुत्तरदलं परमाणवो जगत्समवायिकारणमीश्वरो जगत्कर्तेति जगदुपादानजगत्कर्त्रोर्नैयायिकैर्भेदाभ्युपगमादस्माभिरभिन्ननिमित्तोपादानत्वांगीकारान्नातिव्याप्तिः ननु एकस्योपादानत्वं कर्तृत्वं च विरुद्धं तथा लोकेऽदर्शनात् न हि घटकर्ता कुलालो घटोपादानं घटोपादानभूतो वा मृत्पिंडो घटकर्ता किंतु मृत्पिंड उपादानं कुलालः क

तदुक्तं भगवता सूत्रकारेण ॥ ज०३०३

अभिन्ननिमित्तोपादानत्वं

र्तेत्येवमीश्वरोपि जगत्कर्ता तदन्यदुपादानं अन्यथा दृष्टविरोधापत्तेः दृष्टपूर्वकत्वाददृष्टकल्पनायाः ननु वयं न कल्पयामः तदैक्षत बहु स्यां प्रजायेयेत्यादिश्रुतिरेव बोधयतीति चेन्न दृष्टविरोधे श्रुतेरर्थांतरसंभवात्तस्मादभिन्ननिमित्तोपादानत्वमनुपपन्नमित्यत्र ब्रूमः। तदैक्षत बहु स्यां सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुत्या बहुभवनकामयितृत्वश्रवणेन चेतनस्य ब्रह्मण एवोपादानत्वं जगत्कर्तृत्वं चावगम्यते न च तद्बाधितुं युक्तं उपक्रमोपसंहारप्रभृतितात्पर्यलिंगैर्ब्रह्मणि वेदांततात्पर्यनिर्णीते सामान्यतो दृष्टानुमानेन श्रुत्यर्थबाधाऽयोगात् श्रुतिविरोधे प्रमाणांतराणामाभासत्वात् यदपि लोकेऽदर्शनादुपादाननिमित्तयोर्भेदोऽभ्युपेय इति तदसत् ऊर्णनाभ्यादेरभिन्ननिमित्तोपादानत्वस्य दृष्टत्वात् किंच यथा नैयायिकादिभिर्जीवात्मनो ज्ञानादिकं प्रत्युपादानत्वं निमित्तत्वं चाभ्युपगम्यते तथा ब्रह्मणस्तदुपपत्तेर्न कोपि दोषः तस्मादभिन्ननिमित्तोपादानत्वं ब्रह्मण इति सिद्धम् ब्रह्मणः सृष्ट्यादिकारणत्वे श्रुतिमुदाहरति यतो वेति तत्र सूत्रसंमतिमाह तदुक्तमिति ॥ ॥

सामान्यतो दृष्टं ज्ञाविज्ञातासाधारणधर्मकम् यथा रूपादिज्ञानं करणवत् क्रियात्वात् छिदादिवदित्यनुमानम् प्रकृते च कार्यं सावयवकारणकं कार्यत्वात् घटवदिति सामान्यतो दृष्टानुमानेन न श्रुतेर्बाध इति भावः ३॥ ॥ उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्॥ अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये॥४॥

समर्थ्यनि इतिपाठांतरं४॥ संशयः३ अथातोब्रह्मजिज्ञासेत्यस्मिन्नधिकरणे शास्त्रमनारंभणीयमिति पूर्वपक्षप्रयोजनमब्रह्माऽज्ञानत्वेन विषयत्वं ज्ञानत्वे प्रयोजनं अतः शास्त्रमारंभणीयम् ६॥

उत्पत्तिंचविनाशंचभूतानामागतिंगतिंवेत्तिविद्यामविद्यांचसवाच्योभगवानितिस्मोक्तलक्षणोभगवान्तेनचबह्वर्थसूचनात्सूत्रं यथाहुः लघूनिसूचितार्थ
निलध्वक्षरपदानिचसर्वतःसारभूतानिसूत्राण्याहुर्मनीषिण इतिसूत्रंकरोतीतिसूत्रकारस्तेनवादरायणाचार्येणेतियावत् समन्वयलक्षणेस्थितमधिकरण
मनुक्रमते तल्लक्षणंच विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरं प्रयोजनंचपंचैतेप्रांचोधिकरणंविदुरितिवदंति यतोवाइमानीत्यादिवाक्यंविषयः ब्रह्मणोल
क्षणंसमर्थयतिनवेतिसंशयः नसमर्थयतीति पूर्वपक्षः तथाहि जगतोऽनित्याशुचिदुःखजडपरिच्छिन्नत्वेन ब्रह्मणस्तद्विलक्षणत्वेन तत्कारणत्वायोगान्न
तटस्थलक्षणंभवतीति तथाब्रह्मणः स्वरूपलक्षणंचनसंभवतिनित्यशुद्धत्वादीनामप्रसिद्धत्वादिति वास्तवकारणत्वासंभवेपिकल्पितसर्पादेरज्वादे
रिवाध्यस्तजगज्जन्मादिकारणत्वंमायिकंब्रह्मणोनविरुध्यतेइत्युत्तरंभवति तस्माल्लक्षणंसंभवतीतिसिद्धांतः अस्याधिकरणस्यलक्षणविचारात्मकत्वेन
पूर्वाधिकरणपूर्वपक्षसिद्धांतयोर्यत्प्रयोजनंतदेवद्रष्टव्यं तदुक्तं आक्षेपेचापवादेचप्राप्तौलक्षणकर्मणिप्रयोजनंनवक्तव्यंयत्रकृत्वाप्रवर्तते इतिजन्मा

जन्माद्यस्ययतइति सत्यज्ञानानंदाः स्वरूपलक्षणं सत्यंज्ञानमनंतंब्रह्म आनंदोब्रह्मेतिव्यजानादित्यादिश्रुतेः ॥ ६ ॥

असाधारणधर्मोलक्षणमिति४

दिसूत्रस्यायमर्थः अस्यनामरूपाभ्यांव्याकृतस्याकाशादिप्रपंचस्य जन्मादिर्यस्यतत्तथाजन्मस्थितिभंगंयतः सर्वज्ञात्सर्वशक्तेःकारणाद्भवतितद्ब्रह्मेत्यनुषं
गेनयोजनासृष्टिस्थितिलयकारणत्वंब्रह्मणस्तटस्थलक्षणमितिफलितोर्थः स्वरूपलक्षणाऽपरिज्ञानेन तटस्थलक्षणमात्रेण
ब्रह्मज्ञातुमशक्यमितिस्वरूपलक्षणमाह सत्येतिस्वरूपसद्व्यावर्तकंस्वरूपलक्षणंयथापृथिव्याः पृथिवीत्वंजातिव्यक्त्योस्तादात्म्याभ्युपगमात् पृथिवीस्वरूप
त्वपृथिवीत्वंपृथिवीमितरेभ्योव्यावर्तयत्यतः पृथिव्याः पृथिवीत्वंस्वरूपलक्षणमेवसत्यज्ञानानंदादयः ब्रह्मणः ननुलक्ष्यलक्षणभावस्यभेदगर्भत्वात् ब्रह्मणोऽखंडै
करसत्वेनकथंसत्यादेर्लक्षणत्वमिति चेन्नैषदोषः काल्पनिकभेदाभ्युपगमेनतदुपपत्तेः तदुक्तम् आनंदोविषयानुभवोनित्यत्वंचेतिसंतिधर्माः ब्रह्मणोऽखंडै
दिवपृथगिवावभासंतइतिनचापृथक्त्वेतेषांपृथक्त्वावभासः किंप्रयुक्तइतिवाच्यं अंतःकरणतद्धर्मोपाधिवशात्पृथक्त्वावभासोपपत्तेः ॥ ६ ॥ ६ ॥ ६ ॥ २ ५

अनुपपत्तिबोधनमाक्षेपः उत्सर्गबाधकोऽपवादः पूर्वमप्रकृतार्थाःप्राप्तिः लक्षणाभिधानंलक्षणकर्मअभ्युपगमवादः कृत्वाचिंता इत्येतेषुपंचसुप्रयोजनंनवक्तव्यमेतेषांपूर्वप्रयोजनेनैवप्रयोजनवत्त्वात् शेषाविषयादयस्तुव
गौडपादाचार्येण ((तन्याएवेत्यर्थः ८॥

सुषुप्तौज्ञानप्रसंगवारणायवृत्तेरितितत्रापिस्वरूपेणवृत्तेःसत्वात्१॥ प्रीत्यादौकार्यतावच्छेदकगौरववारणायानुकूलेति२॥

तथाहि बाधाभावविशिष्टंसत्यं वृत्त्यवच्छिन्नंचैतन्यंज्ञानंप्रीत्यादिवृत्त्यवच्छिन्नआनंदः यद्वा व्यंजकवृत्त्युपहितंचैतन्यंज्ञानं अनुकूलवृत्त्युपहितमानंदस्तत्रतेषां
ब्रह्मणश्चवास्तवभेदाभावेप्यौपाधिकभेदसत्वाल्लक्ष्यलक्षणभावउपपद्यते एवंचसत्यंब्रह्मेत्युक्तेनैयायिकाभिमतसत्तासामान्येऽतिव्याप्तिर्लक्ष्यस्यब्रह्मणोज
डत्वप्रसंगश्च अतउक्तं ज्ञानमितिनावत्युक्तेपराभिमतात्मसमवेतज्ञानेऽतिव्याप्तिर्लक्ष्यब्रह्मणोऽनित्यत्वापुरुषार्थत्वप्रसंगश्चतन्निरसनायोक्तमानंदेति नचैवम
पुरुषार्थत्वाभावेब्रह्मणोऽनित्यत्वदुष्परिहरमितिवाच्यं सत्यमितिविशेषणेनतत्परिहारसंभवात् आनंदोब्रह्मेत्युक्तेविषयसुखेऽतिव्याप्तिर्लक्ष्यस्यजड
त्वप्रसंगश्च तन्निवारणाय ज्ञानमित्युक्तं लक्ष्यस्यानित्यत्वपरिहाराय सत्यमित्युक्तं ननुसत्यज्ञानानंदादिशब्दानांभिन्नार्थत्वेनाऽनंदादिगुणकंब्रह्मैवलक्ष्य
णवाक्येनप्रतिपाद्यतेनतत्रकथमखंडैकरसत्वंब्रह्मणइति चेन्नैवंसत्यंज्ञानमनंतंब्रह्म आनंदोब्रह्मेतिव्यजानात् विज्ञानमानंदंब्रह्मेत्येवमादिवाक्येषुस
त्यज्ञानानंदादिशब्दानाम भिन्नार्थत्वेनानंदादिशब्दानांसामानाधिकरण्येनाऽखंडैकरसानंदब्रह्मबोधकतयागुणगुणिभावकल्पनायांमानाभावात् नचैतेषामेका

उक्तंच आनंदादयः प्रधानस्येतितत्पादार्थः ॥ ६ ॥

गिरोपलक्षितपदानां५॥ लक्षणासद्भावस्यातिव्याप्तिनिराकरणस्य ४ घटमानयेत्यत्र घटकर्मताकसंसर्गकमानयनंनीलोत्पलमित्यत्रनीलविशिष्टमुत्पलमितिवत्१॥ चैतन्येवाच्यशक्तिसंपन्नानां२॥

कार्थप्रतिपादकत्वेपर्यायतास्यादितिवाच्यं वाच्यभेदस्योक्तत्वात् नन्वेवमपिलोकेवाक्यस्यसंसर्गविशिष्टान्यतरप्रतिपादकत्वदर्शनेनकथमखंडव्यक्तिप्रति
पादकत्वमिति चेन्न घटःसद्द्रव्यंपृथिवीप्रकृष्टप्रकाशश्चंद्रइत्यादिवाक्यानांलक्षणयाऽखंडव्यक्तिप्रतिपादकत्वदर्शनेनप्रकृतेपितत्संभवात् विशिष्टशक्तानांस
त्यादिपदानांअखंडचैतन्येभागलक्षणयास ____ त्यादिपदान्यखंडैकरसानंदव्यक्तिंबोधयंति नचैकेनपदेनतद्बोधसंभवेपदांतरवैयर्थ्यमितिवाच्यं पदस्यसार
कत्वेनवाक्यस्यैवानुभावकत्वात् प्रयोजनांतरस्यापिप्रतिपादितत्वाच्च अन्यथाब्रह्मणोऽद्वितीयत्वंनसिद्ध्येत्तदुक्तमेववाक्यस्याखंडार्थत्वम्॥ तदुक्तंसंसर्गाऽसंगिसम्य
ग्धीहेतुतायागिरामियंउक्ताखंडार्थतायद्वातत्प्रातिपदिकार्थतेति प्रातिपदिकार्थमात्रपरत्वं अखंडार्थत्वमितिचतुर्थपादार्थः तस्मात्सत्यज्ञानानंदाः स्वरूपलक्ष
णंब्रह्मणइत्यनवद्यं तत्रश्रुतिमुदाहरति सत्यमित्यादिना अंतःपरिच्छेदोनविद्यते यस्यतदनंतंत्रिविधपरिच्छेदशून्यमित्यर्थः तथाचोक्तं नव्यापित्वाद्देशतोंतो
नित्यत्वान्नापिकालतः नवस्तुतोपिसार्वात्म्यादानंत्यंब्रह्मणित्रिधेति आदिशब्देनविज्ञानमानंदंब्रह्मेत्यादीनांग्रहणं आनंदादीनांब्रह्मलक्षकत्वेव्याससूत्रंसंवादय

पदानां३॥ यथाकृत्रिमोगकूंतिर्दे॥ गिरामपर्यायशब्दानांयासंसर्गाविषयत्वेसतिसम्यग्धीहेतुतासैवमखंडार्थतोक्ता अथवातेषामेवशब्दानां तत्प्रातिपदिकार्थतानतदितिर४॥

ज्ञा वा नाऽप्यास्मिन्नविद्यन्ते इत्यर्थः शुद्धं निर्मलं अपापविद्धं धर्माधर्मादिपापवर्जितमित्यर्थः ॥२॥ इति संशयः ३॥ आक्षेपस्तु ४॥

उक्तं चेति तृतीये गुणोपसंहारे स्थितं सत्यं ज्ञानमनंतं ब्रह्मेति तैत्तिरीयके तत्रैवात्मन आकाशः संभूत इति विज्ञानमानंदं ब्रह्मेति स वा एष महानज आत्मा अ
संगो ह्ययं पुरुष इत्यादि बृहदारण्यके अस्नाविरं शुद्धमपापविद्धमिति ईशावास्ये एवं तत्र तत्र श्रूयते तत्र संशयः यस्यां शाखायां ब्रह्मणो यावद्गुणजातं श्रुतं
तावदेव ध्यातव्यं आहोस्वित् शाखांतरस्थगुणोपसंहारेण समग्रं ब्रह्म ध्यातव्यं इति तत्र यस्यां यावच्छ्रुतं तच्छाखिभिस्तावदेव ब्रह्म ध्यातव्यं न शाखांतरीय
गुणोपसंहारेण तावता निर्गुणब्रह्मसाक्षात्कारसंभवादितरोपसंहारे प्रयोजनाभावादिति प्राप्ते सिद्धांतः प्रधानस्य ब्रह्मणः आनंदादयः सर्वे सर्वत्रोपसंहर्तव्याः
लक्षकत्वेन यद्यानंदात्मादिभिर्ब्रह्म न लक्ष्येत तर्ह्यनात्मत्वाऽनानंदत्वादिव्यावृत्तिर्न सिद्ध्येत् ततश्चानंदात्मकब्रह्मसाक्षात्कारो न भवेत् अतस्तदर्थमानंदादीनां
ब्रह्मलक्षणतया सर्वोपसंहारेण ब्रह्मानुसंधेयं ननु तर्हि सत्यकामत्वादीनामप्युपसंहारः स्यादिति चेन्न तेषां कारणलक्षणत्वेन निर्गुणब्रह्माऽलक्षकत्वेनानुसंधा
नानुपयोगात् तस्मान्निर्गुणप्रकरणपठितानामानंदादीनां ब्रह्मलक्षकत्वेनोपसंहारेण ब्रह्मानुसंधेयमिति ननु सृष्टिस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षण

अथवा ५

## सच द्विविधः वाच्यार्थो लक्ष्यार्थश्चेति ॥ छ ॥

मित्युक्तं तदनुपपन्नमसंभवात् तथाहि न तावदुपादानकारणत्वं ब्रह्मणः विकल्पाऽसहत्वात् तथाहि किमारंभकत्वेनोपादानत्वं विवक्षितमुत परिणामित्वेन आहो
स्विद्विवर्ताधिष्ठानत्वेन नाद्यः अद्वितीयत्वेन ब्रह्मणोऽनारंभकत्वात् न द्वितीयः केवलो निर्गुणश्च निष्कलं निःक्रियं शांतमविकार्योऽयमुच्यते इत्यादिश्रुतिस्मृतिभिर्गु
णक्रियाशून्यत्वनिरवयवत्वप्रतिपादनेन ब्रह्मणः परिणामित्वायोगात् न तृतीयः घटः सन् पटः सन्निति सत्यत्वेनानुभूयमानस्य प्रपंचस्य ब्रह्मविवर्ततया
मिथ्यात्वकल्पनायां मानाभावात् तस्माद्ब्रह्मण उपादानकारणत्वं दुर्निरूप्यं नापि जगत्कर्तृत्वेन कारणत्वं ब्रह्मणः कर्तृत्वं नामोपादानगोचरापरोक्षज्ञानचिकी
र्षाकृतिमत्त्वं तच्च ब्रह्मणो न सम्भवति ज्ञानचिकीर्षाकृतीनां नित्यत्वे सर्वदा जगदुत्पत्तिप्रसंगात् ततश्च प्रलयप्रतिपादकशास्त्रविरोधः तेषामनित्यत्वे कार्यतया
ब्रह्माश्रयत्वायोगात् ब्रह्मणोऽपरिणामित्वस्योक्तत्वादनादिभावस्यानित्यत्वायोगात् अत एव नोभयात्मकं कारणत्वं ब्रह्मणः तस्मात्सृष्टिस्थितिलयकारणत्वं
ब्रह्मणः तटस्थलक्षणमित्यसंगतं कथं तर्हि जगदुत्पत्तिः शृणु सत्वरजस्तमोगुणात्मिकात्प्रधानान्महदादिक्रमेण जगदुत्पद्यते तस्य परिणामित्वाज्जगज्ज

उपादाननिमित्तत्वं २॥ चिकिर्षादीनां ३॥

उपादानत्वं १॥

न्मादिकारणत्वं भवति पुरुषस्त्वसंगो निर्विकारी एवमाशंकमानसांख्यादीन्निराकर्तुं तत्पदार्थं विभजते स चेति द्वैविध्यमाह वाच्यार्थ इति शक्त्यागम्यमानो
वाच्यार्थः लक्षणयागम्यमानो लक्ष्यार्थः कौतौ वाच्यलक्ष्याविन्याशंकायामाह मायेत्यादि एतदुक्तं भवति यद्यपि शुद्धस्यापरिणामित्वेन नोपादानत्वं तथा
पि मायोपहितस्य तत्त्वं भवत्येव तदपि विवर्ताधिष्ठानत्वेन अतत्वतोऽन्यथाभावो विवर्तस्तदधिष्ठानत्वं मायोपहितस्य न विरुध्यते न च घटः सन्निति सत्य
त्वानुभवेन प्रपंचस्य ब्रह्मविवर्ततया मिथ्यात्वानुपपत्तिरिति वाच्यं अनुभवस्याधिष्ठानसत्यत्वविषयतया मिथ्यात्वे बाधकाभावात् नहि प्रपंचस्य स्वतः स
नासंबन्धः संभवति नेह नानास्ति किंचनेत्यादिशास्त्रेण तस्य प्रतिषेधात् नापि मिथ्यात्वे प्रमाणाऽभावः वाचारंभणश्रुतेरेव प्रमाणत्वात् मिथ्यात्वनिरुक्तिरग्रे
वक्ष्यते किंच जगदुपादानत्वं ब्रह्मणोऽवश्यमभ्युपगंतव्यं यत्प्रयंत्यभिसंविशंतीति तस्मिन् लयश्रवणात् यस्य यत्र लयस्तत्तस्योपादानमिति व्याप्तेर्घटादेः का
रणे मृदादौ दृष्टत्वात् बहु स्यां प्रजायेयेति ब्रह्मणो बहुभवनश्रवणाच्च न ह्यनुपादानस्य बहुभवनं संभवति अपि च प्रत्युत प्रधानस्यैव जगदुपादानत्वं न भव

## मायोपहितं चैतन्यं तत्पदस्य वाच्यार्थः मायाविनिर्मुक्तं चैतन्यं तत्पदस्य लक्ष्यार्थः ॥ छ ॥

ति तस्याऽप्रमाणिकत्वात् नहि क्वचिच्छ्रुतौ प्रधानस्य त्रिगुणात्मिकस्योपादानत्वमवगम्यते सर्वत्र श्रुतिषु आत्मनः आकाशः संभूत इत्यादिषु चेतनस्य ब्रह्मण ए
वोपादानत्वावगमात् न चोदाहृतश्रुतिष्वात्मन एवोपादानत्वमवगम्यते न ब्रह्मण इति वाच्यं तत्सृष्ट्वा तदेवानुप्राविशदिति जीवभावेन ब्रह्मणः प्रवेशश्रवणात्
ब्रह्मण एवात्मनयोपादानत्वोपपत्तेः किंच तदैक्षत सोऽकामयत बहु स्यां प्रजायेयेति बहुभवनकर्तुः कारणस्य सर्वत्र कामयितृत्वेक्षितृत्वश्रवणात् ब्रह्मण एवोपा
दानत्वं न प्रधानस्य ईक्षितृत्वादेरसंभवात् तस्य चेतनधर्मत्वात् मुख्ये संभवति गौणस्याऽन्याय्यत्वात् तस्माद्ब्रह्मण एवोपादानत्वं न प्रधानस्येति सिद्धं एवं मायोप
हितस्य जगत्कर्तृत्वमपि संभवति तच्च पूर्वोक्तमेव ज्ञानेच्छाकृतयो मायोपहितस्येश्वरस्य जन्या अनित्याश्चापरिणामित्वेन शुद्धस्य तदाश्रयत्वाभावेऽपि मायोप
हितस्य तदाश्रयत्वं संभवत्येव तस्य सर्वविवर्ताधिष्ठानत्वान्नोक्तदोषः तस्मादुभयात्मकं सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणं संभवतीति सिद्धं मायास्वरूपं स्फुट
त्यथेति किम् शब्दः प्रश्नार्थे माया कीदृशीत्यर्थ आक्षेपार्थे वा किं शब्दः माया न संभवतीति स्वरूपलक्षणप्रमाणानिरूपणात् तथाहि किं माया सत्या मिथ्या वा ॥

निमित्तत्वं ३॥ ननु कूलंपिपतिष्यतीतिवत् प्रधानस्यापि गौणेच्छावत्त्वेनोपादानत्वाविरोध इत्यत आह मुख्येति ४॥

अखण्डाद्वैतस्वीकर्तॄणांवेदान्तिनांमायायाः सत्वेनष्टम्कुस्वीकृतेद्वैतापत्तिर्दोषसिद्धान्तः॥१॥ भवद्भिः२ मिथ्यात्वाऽमायोपहितत्वेन॥

आद्ये ब्रह्मभिन्नात्तदभिन्नावानाद्यः अपसिद्धान्तप्रसंगात् किंचब्रह्मणोऽसंगत्वेनकेनाप्यसंबंधात्मायोपहितत्वमनुपपन्नमेवननावद्ब्रह्मणोमाययासंयोगः संभवतिसंयोगस्याव्याप्यवृत्तित्वेनसावयवधर्मत्वयानिरवयवत्वेनब्रह्मणोमाययासंयोगायोगात् नापिसमवायस्संभवति अनंगीकारात् नापितयोस्तादात्म्यं भिन्नयोस्तादात्म्यायोगात् नापितयोर्भेदाभेदोविरुद्धत्वात् नतस्माद्ब्रह्मणोमायोपहितत्वमनुपपन्नं नद्वितीयः जडाजडयोरभेदायोगात् नाद्यद्वितीयेः ईश्वरस्यमिथ्यात्वप्रसंगात्तच्च नदिष्टं मोक्षशास्त्राप्रामाण्यप्रसंगात् नहिमिथ्यावस्तुज्ञानेननमोक्षः संभवतिएवंमायास्वरूपंदुर्निरूपमतएव नलक्षणमपिदुर्निरूप्यंसतिधर्मिणिधर्माश्चिन्त्यंत इतिन्यायात् धर्मिणोदुर्निरूपत्वेनद्धर्मलक्षणस्यापिसुतरांदुर्निरूपत्वात्ततएवतत्रप्रमाणमपिदुर्निरूपंनिर्विषयप्रमाणप्रवृत्तेरयोगात्तस्मान्मायायादुर्निरूपत्वात्तदुपहितस्यतत्पदवाच्यत्वमनुपपन्नमिति समाधत्तेश्रृणुइति मायास्वरूपंनिरूप्यतदुपहितचैतन्यमीश्वरः सएवतत्पदवाच्यार्थः तस्यजन्मादिकारणत्वंतटस्थलक्षणमितिवक्तुंतदुपोद्घातत्वेनपरमात्मनिसदृष्टान्तमध्याससामान्यमाह यथेति प्रतिपाद्यमर्थंबुद्धौसं

अथकेयंमाया श्रृणु यथाशुक्त्यादौरजतादिकल्पितं तथाचेतने अचेतनंकल्पितं॥ छ ॥ छ ॥

गृह्य प्रागेवतदर्थसमर्थोत्तरवर्णनमुपोद्घातः अचेतनमज्ञानमज्ञानतत्कार्यंकल्पितमध्यस्तमित्यर्थः चेतनेब्रह्मण्यचेतनस्यकल्पितत्वेश्रुतार्थापत्तिंप्रमाणमाह इदंसर्वमित्यादिना॥ इदंसर्वमित्यनेनप्रमाणोपस्थितमाकाशादिजडजातंप्रतिपाद्यते आत्मशब्देनाद्वितीयः सर्वसाक्षीप्रत्यग्भूतः परमात्माप्रतिपाद्यतेजडचेतनयोरैक्यायोगात् आत्मसर्वशब्दयोः सामानाधिकरण्यंबाधायां योयंचोरः सस्थाणुरितिवत् तथाचयथादृष्टान्तवाक्येस्थाणुव्यतिरेकेणचोराभावः । चोरस्थाणुशब्दयोः सामानाधिकरण्यादवगम्यतेतथादार्ष्टान्तिकेपिश्रुतिवाक्ये आत्मव्यतिरेकेणकृत्स्नजडाभावः आत्मसर्वशब्दयोः सामानाधिकरण्यादवगम्यतेसचाभावः स्वप्रतियोगिनः प्रपंचस्यब्रह्मणिकल्पितत्वमंतरेणानुपपन्नः सन्तस्यकल्पितत्वंकल्पयति इयंतुश्रुतार्थापत्तिः अनयाऽचेतनस्यचेतनेकल्पितत्वमवगम्यतइतिभावः एवमयमर्थोवाक्यांतरेष्वपिसमानः पूर्णत्वात्पुरुषः परमात्मानेनेनकिंचनाऽनावृतंनैनेनकिंचनाऽसंवृतमितिश्रुत्यंतरात्सर्वेषुभूतेषुवसतिसर्वभूतानिचास्मिन्वसंतीतिवासुदेवः सर्वान्तर्यामीपरमात्मा तथाचोक्तं सर्वत्रासौसमस्तंचवसत्यत्रेतिवैयतः ततस्सवासुदेवाख्योविद्वद्भिः परि रामः ७

उपोद्घातसङ्गत्यैतदर्थः॥ अनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वंसङ्गतित्वमुक्तञ्चद्विधम्॥ सप्रसङ्गउपोद्घातोहेतुताऽवसरस्तथा॥ निर्वाहकैककार्यैक्ये अस्मिन्वसति१ अप्रकाशितं२

सोऽवसरइतिविख्यातस्तु॥७॥

आपोनाराशब्देनोच्यन्ते अप्सुनाराशब्दस्याप्रसिद्धेस्तदर्थमाह यतस्तानराख्यस्यपरमात्मनः सूनवोऽपत्यानितस्येदमित्यण्प्रत्ययः यद्यपि अणिकृतेङीप्प्रत्ययःप्रसक्तस्तथापिछान्दसलक्षणैरपिस्मृतिषुव्यवहारात्तदेवविधयच्छन्दसिविकल्प्यन्तेइतिपाक्षिकोङीप्प्रत्ययस्तस्याभावपक्षेसामान्यलक्षणप्राप्तेटापिकृतेनाराइतिरूपसिद्धिः आपोऽस्यपरमात्मनोब्रह्मरूपेणावस्थितस्यपूर्वमयनमाश्रयइत्यसौनारायणइत्यागमेष्वाम्नात इति॥३॥

पठ्यतइति नराज्जातानिनारंतत्त्वान्ययनंयस्यसनारायणः सर्वान्तर्यामीत्यर्थः तदुक्तंमहाभारते नाराज्जातानितत्त्वानिनाराणीतिततोविदुः तानितस्यायनंपूर्वंतेननारायणः स्मृतइति अस्यार्थः प्रत्यगभिन्नात्परमात्मनोनरादुत्पन्नानितत्त्वानिचतुर्विंशतिः तानिभगवतादर्शितानिमहाभूतान्यहंकारोबुद्धिरव्यक्तमेवच इंद्रियाणिदशैकंच पंचचेंद्रियगोचराइति अथवानारमुदकमयनमस्येतिवाविग्रहः तथाचमनुनोक्तं आपोनाराइतिप्रोक्ता आपोवैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणः स्मृतइतितत्तुसर्वात्मशब्दयोः सामानाधिकरण्यान्नीलोत्पलादिवत्तादात्म्यमेवास्तु नचनीलोत्पलयोर्गुणगुणिभावात्तादात्म्येपिचेतनतदभावाज्जडयोर्विरुद्धस्वभावत्वाद्भिन्नाभिन्नलक्षणंतादात्म्यंकथमितिवाच्यंनहिमृद्घटयोरिवकार्यकारणभावसंभवेनतयोस्तत्संभवात् अथवाकारिवशाखयोरिवजडाजडयोरभेदोवास्तु इत्याशंक्याह चेतनेनेति अयंभावः चेतनाचेतनयोर्विरुद्धस्वभावत्वान्नतादात्म्यंनचमृद्घटयोरिवकार्यकारणभावेननत्संभवति अपरिणामित्वेनकार्यकारणभावस्यनिरस्तत्वात् विवर्तत्वेनतदुपगमेऽचेतनस्यकल्पितत्वमागतमेववृक्षशाखयोरवयवावयविभावसंभवेन

कार्यकारणभावोपगमे॥१ सर्वात्मशब्दयोस्तादात्म्यसंभवादित्यर्थः॥३॥

इदंसर्वंयदयमात्मा आत्मैवेदंसर्वंब्रह्मैवेदंसर्वं पुरुषएवेदंविश्वंसर्वंखल्विदंब्रह्म वासुदेवः सर्वमिति नारायणः सर्वमिदंपुराणइत्यादि श्रुतिस्मृतिवाक्यशतैः अचेतनस्यचेतनव्यतिरेकेणाभावप्रतिपादनात् चेतनाचेतनयोरभेदायोगाच्च॥ २२

भेदाभेदेसत्यपिचेतनस्यब्रह्मणोनिरवयवत्वेनविभुत्वेनचचेतनाचेतनयोरवयवावयविभावायोगात् अभेदोनभवतिएकमेवाद्वितीयमितिश्रुत्याब्रह्मणोऽद्वितीयत्वावगमात् अनयोःपारमार्थिकोऽभेदोनसंभवतितस्मादात्मैवेदंसर्वमितिबाधायांसामानाधिकरण्येनात्मव्यतिरेकेणकृत्स्नजडप्रपंचाभावप्रतिपादनेनाऽचेतनंसर्वंचेतनेकल्पितमिति किंतच्चेतनंकिंतदचेतनमित्याकांक्षायांचेतनाचेतनस्वरूपमाह चेतनमिति कार्येतादात्म्यंव्यावर्तयति नित्यमिति आकाशवत्सर्वगतश्चनित्यइत्यादिश्रुतेः परस्य नित्यत्वं अचेतनधर्मतादात्म्यंव्यावर्तयतिशुद्धमिति अस्नाविरंशुद्धमपापविद्धमित्यादिश्रुतेः परस्यशुद्धत्वं रागद्वेषादिराहित्यंकारणीभूताज्ञानतादात्म्यंवारयतिशुद्धमिति ज्ञानैकरसंप्रज्ञानघनश्रुतेरित्यर्थः अज्ञानकृतावरणादितादात्म्यंनिरस्यतिमुक्तमितिबन्धरहितंविमुक्तश्चविमुच्यतइतिश्रुतेरित्यर्थः असत्त्वंनिराकरोतिसत्यमितिकालत्रयाबाध्यंसत्यंसत्यंज्ञानमनन्तंब्रह्मसदेवसोम्येदमग्रआसीदितिश्रुतेःतस्यपुरुषार्थत्वमाह आनंदेति आनंदोब्रह्मेतिव्यजानात् विज्ञानमानंदं

प्रतियोगिसमानकालत्वायोगादेव॥२॥ ३॥ नजानामीत्येतस्यापि ज्ञानत्वावशेषेण ज्ञानसमानकालत्वम्॥१॥३॥ ज्ञानसामान्यविरोधित्वादेवस्वीयभेदस्याधिकरणेऽपिसत्त्वात् ज्ञानान्योऽन्याभावोऽज्ञानमितिस्साकारतयोक्ता

मिति यावत् ते च जीवानां परस्परभेदः जीवेश्वरयोर्घटादीनां च भेदः ईश्वरस्य च जीवस्य जडानां च एवं प्रतियोगिभेदेन भेदाः पञ्चविधाः ते च कल्पितं तेषां कल्पितत्वा
त् अथवा त्रिविधभेदशून्यमद्वयं विजातीयभेदः सजातीयभेदः स्वगतभेदश्चेति त्रिविधो भेदस्तद्रहितं एकमेवाद्वितीयं ब्रह्मेति श्रुतेः ननु किमिदमज्ञानं न तावद्
न् ज्ञानाभावः प्रागभावस्य प्रतियोगिसमानकालत्वायोगात् अज्ञानस्य प्रतियोगिसमानकालत्वेन न जानामीत्यनुभूयमानत्वात् अतः प्रागभावो नाज्ञानं अत एव
न ध्वंसः॥ नात्यन्ताभावोऽपि प्रतियोगिव्यधिकरणत्वात् विशेषाभावस्य ज्ञानसामान्याविरोधित्वात् अज्ञानं तु ज्ञानसामान्यविरोधि अत एव नान्योन्याभावोऽपि त
स्माद् ज्ञानसामान्यविरोधिभावरूपमज्ञानमवश्यमङ्गीकर्तव्यं ननु किं लक्षणमज्ञानं न तावद् ज्ञाननिवर्त्यत्वं तस्य घटादावतिव्याप्तेः प्रतियोगिप्रत्यक्षस्य ध्वंस
प्रतिकारणत्वात् नाप्यनिर्वचनीयत्वं तेनैव तस्य निर्वचनात् तस्माल्लक्षणाभावाद् भावरूपाज्ञानमनुपपन्नं नापि तत्र प्रमाणं पश्यामः न तावत्प्रत्यक्षं प्रमाणं तस्यो
भयवादिसंमतप्रागभावविषयत्वान्नाप्यनुमानं लिङ्गाभावात् न च सर्गाद्यकालीनं कार्यं जडोपादानकं कार्यत्वात् घटवदित्यनुमानं प्रमाणमिति वाच्यं तस्यार्थान

अनिर्वचनीयत्वेनैव२ ध्वंसत्व३ परमाण्वादेः संभवात् सांख्याभिमतत्वेन कर्तव्य १॥

**चेतनं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दानन्ताद्वयं ब्रह्म अचेतनमज्ञानादिजडजातमज्ञानं त्रिगुणात्मकं सदसद्भ्यामनिर्वचनीयं भावरूपं ज्ञाननिवर्त्यं॥**

परमाण्वादेः२ भ्रांतिज्ञान३ कार्यज्ञानं जायमानत्वे३

रत्वात् न चाज्ञानेनावृतं ज्ञानमित्याद्यागम एव तत्र प्रमाणमिति वाच्यं आगमस्य भ्रांतिज्ञानविषयत्वात् नाप्यर्थापत्तिस्तत्र प्रमाणं
दृश्यमानकार्यस्यान्यथाप्युपपत्तेः तस्माल्लक्षणप्रमाणयोरभावाच्चेतनेऽज्ञानादिकल्पितमित्यनुपपन्नमित्यत आह अज्ञानमिति त्रयो गुणाः सत्त्वरजस्त
मांस्यात्मानो यस्य तत् तथा एतेन मिथ्याज्ञानं तत्संस्काररूपाः विशिष्टो वा जगद्धेतुरिति प्रत्युक्तं आगन्तुकत्वेन तस्याः सोपादानत्वनियमेन ब्रह्मणोऽपरिणामित्वे
नित्यत्वायोगात् अनागन्तुकत्वेऽपि सिद्धान्तप्रसङ्गात् तस्मात् यत्किञ्चिदेतत् अज्ञानलक्षणमाह सदसद्भ्यामिति भावप्रधानोऽयं निर्देशः सत्त्वे वाधो न स्यात् अस
त्वे प्रत्यक्षविषयत्वं न स्यात् प्रत्यक्षेण ब्रह्म न जानामीत्यनुभूयते अतो असत्त्वेनानिर्वचनीयं ब्रह्मज्ञानेन बाध्यमानत्वात्सत्त्वेनाप्यनिर्वचनीयं एतदुक्तं भव
ति सदसद्विलक्षणमज्ञानमिति असद्विलक्षणमित्युक्ते सत्यतिव्याप्तिः अत उक्तं सद्विलक्षणमिति तावत्युक्ते असत्यतिव्याप्तिरत उक्तमसद्विलक्षणमिति अभ्यु रामः
पन्नं दृष्टमुक्तं असतो निःस्वरूपत्वेनातिव्याप्तिशङ्काऽनवकाशाद् सत्त्वामकिञ्चिदस्ति चेदसत्त्वव्याघातः नास्ति चेत्कुत्रातिव्याप्तिः कथं तर्ह्याचार्योक्तिः सदसद्भ्या ८

ब्रह्मवदाचरतीति ५॥

मनिर्वचनीयमिति शिष्यबुद्धिव्युत्पादनमात्रे तात्पर्यादाचार्याणां अहृदयवाचामहृदयमेवोत्तरमिति न्यायेन वादिनिराकरणमात्रतात्पर्याद्वा असद्विलक्षणोक्तिः
कालत्रयाबाध्यत्वं सत्त्वं तद्भिन्नत्वमनित्यत्वमिति फलितार्थः नन्विदं लक्षणं कार्ये प्रपञ्चेऽप्यस्तीत्यतिव्याप्तिः नैष दोषः अनादित्वे सतीति विशेषणात् नन्वेवम
पीश्वरादावतिव्याप्तिस्तस्यानादित्वेन कल्पितत्वेन चोक्तलक्षणसद्भावात् तदुक्तं श्रुत्या जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति जीव
ईशो विशुद्धा चित्तथा भेदस्तयोर्द्वयोः अविद्या तच्चितोर्योगः षडस्माकमनादयः इति सांप्रदायिकवचनात् मायाभासेन जीवेशौ करोतीति श्रुतत्वात् कल्पितावेव
जीवेशौ ताभ्यां सर्वं प्रकल्पितमिति विद्यारण्यैरुक्तेश्चातिव्याप्तिर्वज्रलेपायितेत्यत आह ज्ञाननिवर्त्यमिति यतो ज्ञानमज्ञानस्यैव निवर्तकमिति पञ्चपादि
काचार्यैरुक्तत्वादज्ञानमेव ज्ञाननिवर्त्यं तथा चायमर्थः संपद्यते सद्विलक्षणमनादि ज्ञाननिवर्त्यमज्ञानमिति अथवा अनाद्युपादानं ज्ञाननिवर्त्यमज्ञानम्प्रा

**अहं ब्रह्म न जानामीत्यनुभवात् ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः अज्ञानेनावृतं ज्ञानं तेन मु**
**ह्यन्ति जन्तवः ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इति स्मृतेश्च तच्चाज्ञानं द्विविधम् मायाविद्याभेदात् शुद्धसत्त्वप्रधानं सन्मायेत्युच्य**
**ते मलिनसत्त्वप्रधानं सदविद्येत्युच्यते जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतेः॥१॥** गभावेऽतिव्याप्तिपरिहाराये

स्वगतरूपप्रतिउपादाने१

पादानमिति घटादावतिव्याप्तिनिवारणाय अनादीति ब्रह्मण्यतिव्याप्तिवारणाय ज्ञाननिवर्त्यमित्युक्तं भवति ज्ञानाभावोऽज्ञानमित्याशङ्कानिरासार्थमाह भावरूप
मिति अज्ञानसद्भावे प्रत्यक्षादिप्रमाणान्युपन्यस्यति अहमित्यादिना देवश्चासावात्मा च देवात्मा तस्य शक्तिं स्वगुणैः सत्त्वादिभिर्निगूढां ब्रह्मध्यानपरायणाः
ब्रह्मविदः अपश्यन्निति योजना तेनावृतत्वेन मुह्यन्ति संसरन्ति शास्त्राचार्यप्रसादजनितज्ञानेन येषामज्ञानं निवृत्तं तेषामहं ब्रह्मास्मीति ज्ञानं परं ब्रह्म प्रकाशय
तीत्युत्तरेणान्वयः ज्ञानाभावस्य ब्रह्मस्वरूपावरकत्वायोगादनिक्तं नापि तार्किकबलीवर्दैर्ज्ञानयास्तत्याभावरूपमज्ञानमेष्टव्यं एतेन सत्त्वरजस्तमोगुणात्मकमचे
तनं स्वतन्त्रं पारमार्थिकं परिणामि नित्यं प्रधानमिति सांख्यमतं प्रत्युक्तं ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन इति भगवद्वचनविरोधात् न च बुद्धिधर्मो ज्ञानविष
यत्तया भगवद्वचनमन्यथासिद्धमिति वाच्यं बुद्धिधर्मो ज्ञानस्य मिथ्याज्ञानरूपत्वेन चेतन्यावरकत्वायोगादज्ञानेनावृतं ज्ञानमित्यावरकत्वस्मरणात् अचेत

भ्रांतिज्ञान१ अभावस्यावरकत्वं नास्ति३॥

संप्रमाणज्ञानंयदाश्रयंयद्विषयकंप्रमाणज्ञानंतदाश्रयंतद्विषयकमज्ञानंनिवर्तयति३

अ॰कौ॰ नस्यरथादेश्चेतनानाधिष्ठितस्यैव प्रवृत्तिदर्शनेनप्रधानस्यस्वातंत्र्यायोगात् परिणामिनःसावयवतयाक्षीरादेरनित्यत्वदर्शनेनप्रधानस्यनित्यत्वकल्पना
पृ॰६ यांमानाभावाद्दृष्टपूर्वकत्वाददृष्टकल्पनायाः एतेनमिथ्याज्ञानमेवाज्ञानमितिप्रत्युक्तं तस्मात्सर्वोपादानमनाद्यनिर्वचनीयंभावरूपमज्ञानमेष्टव्यम् एवंच
सत्यद्वैतश्रुतिर्नविरुध्यतेसांख्यादिस्मृतेरेवश्रुतिविरुद्धत्वेनाऽप्रमाणत्वात् चकारोऽनुक्तानुमानप्रमाणसमुच्चयार्थः तथाहिविवादगोचरापन्नंप्रमाणज्ञानंस्वसमा
नविषयस्वसमानाधिकरणानादिविरोधिनिवर्तकं प्रमाणज्ञानत्वात् शुक्तिज्ञानवत् नचप्रागभावेनार्थांतरत्वंप्रागभावस्याप्रमाणिकत्वात् अस्तुवाप्रागभाव
स्तथापितस्यसमानाश्रयत्वेपिसमानविषयत्वासंभवेनतन्निवारणाद्ज्ञानस्यैवस्वविषयत्वात् नचानुमित्यादेरज्ञाननिवर्तकत्वानंगीकारेणानुमानस्यतत्रव्यभिच
रइतिवाच्यं असत्वापादकमौढ्याज्ञाननिवृत्तेरेवानुमित्यादिनाभ्युपगमेनतदसंभवात् अथवापक्षहेत्वोरपरोक्षत्वंविशेषणंदेयं नचैवंदृष्टांतेसाध्यवैकल्यं
शुक्तिज्ञानेनतन्निवृत्तेरनुभवसिद्धत्वात् ननुशुक्त्यवच्छिन्नचैतन्यावरकमज्ञानंमूलाज्ञानेनतदन्यद्वानाद्यः इदानींब्रह्मसाक्षात्काराभावेनानन्निवृत्त्योक्तदोषःस्यादेव

अथवाऽज्ञानस्यशक्तिर्द्विविधाज्ञानशक्तिःक्रियाशक्तिश्चेतिरजस्तमोभ्यामनभिभूतंसत्वंज्ञानशक्तिःसत्वात्संजायतेज्ञानंइतिस्मृतेः स
त्वेनानभिभूतेरजस्तमसीक्रियाशक्तिःक्रियाशक्तिर्द्विविधाआवरणशक्तिर्विक्षेपशक्तिश्चेतिरजःसत्वाभ्यामनभिभूतंतमः॥ ६ ॥

नद्वितीयः अनंताज्ञानकल्पनायांगौरवप्रसंगइतिचेन्नैषदोषःशुक्त्यवच्छिन्नचैतन्यावरकाज्ञानंमूलाज्ञानमेव इदानींब्रह्मसाक्षात्काराभावेनतन्निवृत्त्यभावेप्य
ज्ञानंनष्टमित्यनुभवानुरोधेनशुक्तिज्ञानेनतत्कृतावरणनिवृत्तेःसंभवान्नोक्तदोषः अथवाऽज्ञानंद्विविधंमूलाज्ञानंतूलाज्ञानंचब्रह्मावरकमज्ञानमाद्यंविषय
चैतन्यावरकमज्ञानंतूलाज्ञानं तच्चप्रतिविषयंनानाशुक्त्यवच्छिन्नचैतन्यावरकमज्ञानं यावद्विषयभावि एकंएवशुक्तिज्ञानेनतत्कृतमावरणमेवनिवर्त
तेनतुतदज्ञानंज्ञानेनाज्ञानंनिवृत्तमित्यावरणनिवृत्तिरेवानुभूयते इतिकेचित् वस्तुतस्त्वेकैकस्मिन्विषयेऽनंताज्ञानानिमूलाज्ञानपरतंत्राणिसंति एकैकज्ञाने
नैकैकंनिवर्तते ज्ञानेनाज्ञानंनिवृत्तमित्यनुभवस्यसर्वसमतत्वेनावरणनिवृत्तिविषयतयासंकोचेमानाभावात् नचाज्ञानानंत्याभ्युपगमेकल्पनागौरवमितिवाच्यं राम: ६
प्रमाणवत्त्वेगौरवस्यादोषत्वात्तस्माद्दृष्टांतेसाध्यसंभवात् अनवद्यं अज्ञानंविभजते नचेति द्वैविध्यमाह मायेति एकमेवाज्ञानंसत्वशुद्ध्यविशुद्धिभ्यांमायाऽवि
शुक्तिज्ञानाज्ञानयोर्भिन्नविषयकत्वेनभिन्नाधिकरणत्वेनचसाध्यवैकल्पमितिशंकांशुक्त्यवच्छिन्नचैतन्यस्यांतःकरणोपहितचैतन्याभिन्नतयानयोःसमानविषयकत्वेनसामानाधिकरण्येनचास्तिनिवर्त्यनिवर्तकभावइत्यभिप्रायेणोत्तर माह

कार्यजननसामर्थ्यं४॥ यत्पात्रवत्५॥
द्याचेतिद्विधाजातमित्याह शुद्धेतिरजस्तमोभ्यामनिरस्कृतंशुद्धंतद्विपरीतंमलिनंतत्रश्रुतिप्रमाणमाह मायाचेति स्वयमेवयथोक्तप्रकारेणमायाविद्याचेतिद्वि
धाभवतिताभ्यांमायाविद्याभ्यामेकमेवचैतन्यंजीवेश्वररूपेणद्विधाजातमित्याह जीवेशाविति आभासेनप्रतिबिंबरूपेणेत्यर्थः अयंभावःमायाप्रतिबिंबितं
चैतन्यमीश्वरःअविद्याप्रतिबिंबितंचैतन्यंजीवइतिप्रकारांतरेणमायाविद्याभेदंचवक्तुमज्ञानस्यशक्तिंविभजते अथवेत्यादिनाकार्यानुकूलकारणनिष्ठसाम
र्थ्यंशक्तिः ज्ञानशक्तिंव्युत्पादयति रजइति अनभिभूतमनिरस्कृतंइदंकुतोवगम्यते इत्यत आह सत्वादिति आवरणशक्तिमाह रजइति तत्रभाष्यकारसंमतिमा
ह तदुक्तमिति चमसवदऽविशेषादित्यत्रपूर्वपक्षेऽजामेकांलोहितशुक्लकृष्णामित्यस्याजामंत्रस्यव्याख्यानावसरेकृष्णशब्देनतमोगुणःप्रतिपाद्यतेनतमोगुण
स्यावरणात्मकत्वादिति तस्यावरकत्वंप्रतिपादितंभाष्यकारेणेतियथोक्तलक्षणावरणशक्तिरित्यर्थः तस्यलक्षणमाहसाचेति पूर्वस्वरूपंव्युत्पादितंइदानुलक्ष

आवरणशक्तिःतदुक्तंकृष्णंतमःआवरणात्मकत्वादिति साचनास्तिनप्रकाशतइतिव्यवहारहेतुः तथाचोक्तम्। नभातिनास्तिकूटस्थः
इत्यापदनमावृतिरिति तमःसत्वाभ्यामनभिभूतंरजोविक्षेपशक्तिःरजसोलोभएवचेतिस्मृतेःलोभादीनांविक्षेपकत्वंप्रसिद्धमेवसाच
आकाशादिप्रपंचोत्पत्तिहेतुः उक्तंच॥ विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंजगत्सृजेदिति तथाचपूर्वोक्ताऽज्ञानंआवरणशक्तिप्रधानंसद
विद्येत्युच्यते ज्ञानशक्तिप्रधानंसन्मायेत्युच्यतएतदभिप्रायास्मृतिरपि॥२॥ णमितिविशेषःअर्थोनास्तिनप्रकाशतइतिव्यवहारकारणमज्ञानशक्तिरि
ति तल्लक्षणंज्ञेयंतत्रसंमतिमाह तथाचोक्तमिति कूटवन्निर्विकारेणतिष्ठतीतिकूटस्थःपरमात्मासनास्तिनप्रकाशतइत्यापादनमापादनकारणमावृतिरावरणश
क्तिरित्यर्थः विक्षेपशक्तिमाह तमइति ननुरजसोलोभहेतुत्वमुदाहृतस्मृतावगम्यते ननुविक्षेपहेतुत्वमित्याशंक्याह लोभादिना
मिति आदिशब्देनमदमात्सर्यादयोग्राह्याः विक्षेपशक्तेःकृत्यमाह साचेति सजातीयविजातीयव्यावर्तकत्वादिदमेवास्यालक्षणंतत्रसमतिमाह उक्तंचेति स
मष्टिव्यष्टिसूक्ष्मशरीरंलिंगं आदिशब्देनपंचीकृतभूतानिगृह्यंते ननु भवत्वेवंप्रकृतेकिंमायातमित्यत आह तथाचेति नचवैपरीत्येकिंविनिगमकमितिवाच्यं
स्वाश्रयाऽव्यामोहकरीमायास्वाश्रयव्यामोहकरी अविद्येतिमायाविद्यालक्षणप्रसिद्धेःआवरणशक्तेर्मोहकारित्वात् तत्प्रधानमज्ञानमविद्येत्युच्यते विक्षेपा
विक्षेपशक्तिप्रधानंइतिवापाठः६॥ एकविधमेवलक्षणंकर्तव्यं२॥

फलव्याप्यभावात्७॥ तथाचेश्वरे आवरणशक्तिर्नास्तीति भावः१॥

दिशक्तेरन्यथात्वात्तत्प्रधानमज्ञानं मायेत्युच्यते तथा च न वैपरीत्यमिति भावः ननु तरत्यविद्यामिति श्लोके घटकलशादिवन्मायाविद्याशब्दयोः पर्यायत्वमवगम्य
ते तत्कथं तयोर्भेदसिद्धिरित्यत आह एतदभिप्रायास्स्मृतिरपीति अत्राप्यावरणशक्तिं निमित्तीकृत्याविद्याशब्दः प्रकृतिं व्युत्पादयति विक्षेपादिशक्तिं निमित्तीकृ
त्य मायाशब्दोपीति एषोभिप्रायो यस्याः सा एतदभिप्राया सा तथोक्ता योगो ब्रह्मसाक्षात्कारोस्यास्तीति योगी ब्रह्मनिष्ठ इति यावत् यस्मिन्सर्वान्तर्यामिणि सर्वाधिष्ठाने
वासुदेवे हृदि अंतःकरणे निवेशिते ऽहं ब्रह्मास्मीति साक्षात्कृते सति कार्य्याकारेणाविष्कृतामावरणशक्तिप्राधान्येनाविद्याशब्दवाच्यां विक्षेपशक्तिप्राधान्येन मायापदवा
च्यां प्रकृतिं तरति नाशयति तस्मै नमः इति संबंधः कीदृशाय नमः विद्या चैतन्यमात्मा यस्य स तथोक्तः तस्मै पुनः कस्मै अमेयाय न मेयोऽमेयः अप्रमेयायेत्यर्थः
ननु पूर्वं साक्षात्कारविषयत्वं ब्रह्मणः प्रतिपादितं इदानीमप्रमेयत्वमुच्यते तथा च पूर्वोत्तरव्याघातः उच्यते वृत्तिविषयत्वमुक्तं साक्षात्कृते सतीति अप्रमेया
येति चैतन्याविषयत्वमुच्यते यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह तं त्वौपनिषदं पुरुषं पृच्छामि इत्यादिश्रुतिभ्यः अतो न व्याघात इत्यर्थः मायाविद्याविभाग

**तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते योगी मायाममेयाय तस्मै विद्यात्मने नमः इत्येवंरूपा द्रष्टव्या एवं च मायोपहितचैतन्यमीश्वरो**
**जगत्कारणमंतर्यामीत्युच्यते स एव तत्पदवाच्यार्थः ॥** २२ निरूपणफलमाह एवंचेति एष सर्वेश्वर एष सर्वज्ञ एषोंतर्यामी एष योनिः सर्वस्ये
त्यादिश्रुत्योच्यते इति शेषः ततः किं तत्राह स एवेति स ईश्वरः तत्त्वमसिवाक्ये तत्पदस्य वाच्यार्थः नन्वविद्यायाः कुत्र तदुपयोग इत्याशंकासुषुप्तस्थान एकीभूतः
प्रज्ञानघन एवानंदमयो ह्यानंदभुगित्यादिश्रुत्या ऽविद्योपहितचैतन्यं जीवः प्राज्ञ इति चोच्यते स एव त्वंपदस्य वाच्यार्थः इत्यभिप्रेत्य प्रसंगाज्जीवस्वरूपं व्युत्पादयति
अविद्योपहितमिति उक्तश्रुत्येति शेषः उक्तेऽर्थे वृद्धसंमतिमाह तदुक्तमिति सच्चिदानंदब्रह्मप्रतिबिंबसमन्विता सत्वरजस्तमोगुणात्मिका प्रकृतिरेकैव अजा
मेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः तत्त्वविदोथ य इमाः जज्ञानाऽन्यद्युष्माक
मंतरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति इत्यादिश्रुतिभ्यः नन्विन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतौ मायाभिरिति बहुवचनसाम रामः
र्थ्याल्लिंगादज्ञानस्य नानात्वावगमात्कथमेकत्वमवधार्यते न चाजामंत्रेणानदवगम्यते इति वाच्यं श्रुत्यन्तरविरोधे तदवधारणायोगात् न च परस्परविरोधादु १०
हे लोकाः यूयं तं न विदाथ जानीथ यः इमाः अनेकयोनिजजानन् उत्पादितवान् तत्राज्ञाने को हेतुः यद्यस्मात्कारणात् युष्माकं तेन ब्रह्मणा सह अंतरं भिन्नत्वं बभूव अत एव भवंतश्चरंति पुनः पुनर्जन्ममरणादिकं प्राप्नुवंति नीहारेण मोहांधकारेण
प्रावृताः नित्यमात्मानं त्यक्त्वा अनित्ये परे देहे आत्मानमन्यमानाः अत एव जल्प्याः मिथ्याः अत एव असुतृपः उदरभरणमात्रे प्सवः उक्थशासः वेदोक्तविधिनिषेधरज्जुभिर्बद्धाः इत्यर्थः ॥२॥

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादित्ययंन्यायः३॥

भयोरप्रामाण्यापत्तिरिति वाच्यं बहुवचनसामर्थ्यादज्ञाननानात्वे निश्चितेऽजामंत्रस्याज्ञानसमष्टिपरत्वोपपत्तेस्तस्मात्प्रकृतिरेकैवेत्यवधारणमनुपपन्न
मिति मैवं श्रौतार्थस्य बलवत्त्वात्प्रकृतेरेकत्वावधारणोपपत्तेः तथा हि अजामंत्रे एकामिति श्रुत्या एकवचनसामर्थ्येन च लिंगेन प्रकृतेरेकत्वं निश्चीयते इंद्रो
मायाभिरित्यस्मिन्मंत्रे बहुवचनसामर्थ्यादज्ञाननानात्वमवगम्यते तत्र श्रुतिलिंगयोः श्रुतेः बलीयस्त्वाच्छ्रौतार्थप्रकृत्येकत्वमभ्युपगंतव्यं अन्यथा न्याय
विरोधापत्तेः किंच इंद्रो मायाभिरित्यत्र केवललिंगादज्ञाननानात्वमवगम्यते अजामंत्रे श्रुतिलिंगाभ्यामज्ञानैकत्वमिति तदेवावश्यमभ्युपगंतव्यं तर्हींद्रो
मायाभिरिति मंत्रस्याप्रामाण्यप्रसंग इति चेन्न अर्थांतरत्वेन प्रामाण्योपपत्तेः तथा हि इंद्रो मायाभिरित्यत्र मायाशब्देन प्रज्ञाविशेषो मिथ्याभिमानो वा विधी
यते तेन तत्रेंद्रः परमात्मानैरन्यतरैर्वा हिरण्यगर्भादिभिर्नानारूपः सन्चेष्टते इत्यर्थांतरत्वेन प्रामाण्यमुपपद्यते तेनाऽज्ञाननानात्वप्रतिपादने तात्पर्यं मंत्रस्य अ

कार्यविद्या२ सदेह३

**अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते तदुक्तं तमोरजस्सत्वगुणा प्रकृतिर्द्विविधा च सा सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते**
**मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया**
**संनिरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इत्येवमादयः श्रुतयः उक्ताभिप्रायाः द्रष्टव्याः ॥२॥ यद्वा यथा एक एव देवदत्तः क्रियानि**
**मित्तवशेन पाठकः पाचकः इति व्यपदिश्यते ॥** २२ जामंत्रस्य त्वऽज्ञानैकत्वप्रतिपादने तात्पर्यादर्थांतरत्वायोगाच्चाज्ञानमेकमेव तस्मात्प्रकृतिरेकै
वेत्यवधारणमुपपन्नं सा सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्याभेदेन द्विविधा तद्वैचित्र्यान्मालिन्यवैचित्र्यादनेकधा अनेकप्रकाराऽविद्या इति शेषः अयं भावः शु
द्धसत्वप्रधाना माया एकैव तदुपहित ईश्वरः मलिनसत्त्वप्रधाना अविद्या मालिन्यवैचित्र्यादनेकधा तदुपहितो जीवोपि तथैव अस्मिन्पक्षे नानाजीवः उक्तार्थे
श्रुत्यंतरसंमतमित्याह अस्मादिति अस्माद्वदान् मायी मायोपाधिकः परमात्मा एतत्कु त्यादिप्रमाणेनावगम्यमानं विश्वमाकाशादिब्रह्मांडांतं जगत्सृजते उत्पा
दयति तस्मिन्सृष्टेऽन्योऽविद्योपाधिकः मायया पूर्वोक्तया देहादिष्वहंममेत्यभिमानेन संनिरुद्धो बद्धः प्रकृतिं जगदुपादानकारणं मायिनं मायोपाधिकं विद्यादि
त्युभयत्र संबध्यते अयं भावः मायोपाधिकः परमात्मा स्वोपाधिमायाप्राधान्येन जगदुपादानकारणं स्वप्राधान्येन निमित्तमिति इममेवार्थमग्रे व्युत्पादयिष्यति अत्रा

दाशाः कैवर्ताः ७॥ दासाभृत्याः ७॥ कितवाः द्यूतकृतो भ्रष्टाः ७॥

नस्यैकत्वेपिमायाऽविद्याभेदं ततोजीवेश्वरभेदंचोक्त्वेदानीमज्ञानमेकमेवमायाऽविद्याभेदोनास्तिविंबप्रतिविंबभावेनजीवेश्वरयोर्भेदः जीवोप्येकएवेत्यभि
प्रेत्यपक्षांतरमाह यद्वेतिव्यपदिश्यतेइति तथाचमायाविद्याशब्दौपर्यायवंतौनमायाविद्ययोर्भेदइत्यर्थः कथंतर्हिजीवेश्वरभेदस्तत्राह तथाचेति अविद्या
यांप्रतीयमानमविद्याप्रतिविंबितं परमात्मनोनीरूपत्वेनसूर्यादिवत्प्रतिबिंबायोगात् अविद्योपाधिकमविद्योपहितंनचतत्रप्रमाणाभावइत्याह आभासए
वचेत्यादिनाद्वितीयेस्थित मंशोनानाव्यपदेशादन्यथाचापिदाशदासकितवादित्वमधीयतएकेतत्रपूर्वाधिकरणेजीवेश्वरयोरुपकार्योपकारकभावउक्तःस
किंस्वामिभृत्ययोरिवाहोस्विदग्निविस्फुलिंगयोरिवेतिसंशयः तत्रानियमइत्येकःपूर्वपक्षः द्वितीयस्तुभेदश्रुत्यनुरोधात्स्वामिभृत्यवदेवजीवपरयोरुपका
र्योपकारकभावइतिप्राप्तेइदमाह परस्यांशइवांशआभासरूपोजीवः कुतः नानाव्यपदेशात् यआत्मनितिष्ठन्नित्यादिना अन्यथाचापिपरमात्माभिन्नश्च॥
जीवः ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमेकितवाउततत्त्वमस्यादिश्रुतिभिरभेदप्रतिपादनात् जीवेश्वरयोरत्यंतैक्ये अहरहःसंध्यामुपासीतगृहस्थः सद्दृशी

तथाएकमेवाज्ञानंविक्षेपावरणशक्तिनिमित्तभेदेनमायाऽविद्येतिचव्यपदिश्यतेतथाच अविद्याप्रतिविंबितंचैतन्यंजीवः अवि
द्योपहितंचैतन्यमीश्वरः आभासएवच ॥ १।आर्यामुपेयात्ब्राह्मणोनहंतव्यःमिश्रीभावःगुर्वंगनांनोपगच्छेदित्यनुज्ञापरिहारयोरानर्थक्यप्रसंगइतिचे
न्नदेहाभिमानादर्थवत्त्वोपपत्तेस्तयोः नन्वेवमपिकर्मफलव्यतिकरः स्यादिति चेन्नजीवस्यपरिच्छिन्नत्वान्नकर्मफलव्यतिकरः जीवस्यपरमात्माभिन्नत
याकथंपरिच्छिन्नत्वमित्याशंक्याह सूत्रकारः आभासएवचेति जलादिप्रतिबिंबितसूर्यादिवदाभासएवप्रतिविंबरूपएवजीवः कस्तत्रप्रतिविंबोपाधिरिति
चेत् अत्रकेचित् अंतःकरणविशिष्टकर्तृत्वादिसंसारस्यानुभूयमानत्वात् कार्योपाधिरयंजीवइतिवचनाच्च अंतःकरणंप्रतिविंबजीवोपाधिरितिवदंति अपरे
तु अंतःकरणस्याज्ञानकार्यतयास्वातंत्र्यायोगेनजीवपरमात्मभेदकत्वायोगात् नांतःकरणंजीवोपाधिः किंत्वज्ञानंस्वातंत्र्यात् तदपिनानातत्प्रतिविंबोजीवः
सोपिनानातदुपाधेरज्ञानस्यनानात्वात् तथाचब्रह्मण्यारोपितानामज्ञानानांपरिच्छिन्नतयातत्प्रतिविंबरूपाणांजीवानामपिपरिच्छिन्नत्वादितरेतरव्यावृत्तत्वा राम ११
न्नकर्मफलव्यतिकरः इतिसूत्रार्थः १ इतिनानाजीववादिनामभिप्रायमाह अन्येतुजीवेश्वरविभाजकोपाधिरज्ञानमेवतस्यस्वातंत्र्यात् तदप्येकमेवतत्प्रतिविंबो
अभिमानात्वेसतिजीवस्यएकत्वात् ६॥

अपरोक्षज्ञान४॥

जीवउपाधेरेकत्वात्सोप्येकएव अज्ञानैक्येप्रमाणंदर्शितं आभासएवचेत्येकवचनसामर्थ्यात् च ननुजीवैक्येबंधमोक्षव्यवस्थाकथमित्थमंतःकरणनाना
त्वेप्रमातृणांनानात्वं नत्वज्ञानेनैकस्मिन्प्रमातरिमुच्यमानेतद्रहितःप्रमाताबद्धइतिबंधमोक्षव्यवस्थासंभवतिस्यादेतत्कोयंमोक्षोनामअविद्यानिवृत्तिरिति
त्वेप्रमातृणांनानात्वं ... चेन्नतावत्कार्याविद्यानिवृत्तिमोक्षः सकलभ्रांतिज्ञाननिवृत्तेरसंभवात् मूलाविद्यासत्वेन पुनर्भ्रांतिज्ञानोदयसंभवात् यत्किंचिद्भ्रांतिज्ञाननिवृत्तेरपुरुषार्थत्वात्
नत्वज्ञानगतावरणशक्तिरविद्या तन्नानात्वेनयस्यप्रमातुस्तत्त्वज्ञानेमुत्पन्नंतस्यस्वसंसारहेतुभूताविद्यानिवृत्तिर्मोक्षः यस्यतन्नोत्पन्नंतस्यबंधइतिबंध
मोक्षव्यवस्थोपपद्यतेइतिचेन्न नानाजीववादप्रसंगात् तथाहि अविद्यायानानात्वेनबंधहेतुतयातदाश्रयजीवभेदस्यावश्यकतयानानाजीववादप्रसंगः अ
न्यथाबंधमोक्षव्यवस्थानस्यात् प्रतिज्ञाविरोधश्च अस्तुतर्हिमूलाविद्यानिवृत्तिर्मोक्षइतिचेन्नैकमुक्तौसर्वमुक्तिप्रसंगात् नचजीवैक्येसर्वमुक्त्युपपादनमनु
पपन्नमितिवाच्यंहिरण्यगर्भशुकवामदेवादीनांमुक्त्यभ्युपगमेनास्मदादीनांसंसारानुपलंभप्रसंगात् तदनभ्युपगमेतत्प्रतिपादकशास्त्रस्याप्रामाण्यप्रसंगा
जीवएकेवर एकत्ववादेसर्वशब्दार्थसंभवात् २॥

अतएवोपमासूर्यकादिवत् ॥

त् किंचयावदधिकारमवस्थितिराधिकारिणामित्यत्रोपासनेनेंद्रादिपदंप्राप्तानामधिकारिपुरुषाणांनिमित्तवशेनजन्मांतरसत्वेपितत्त्वज्ञानप्रतिबंधाभावे
नाधिकारावसानेमोक्षोऽभ्युपेयते एकजीवपक्षेतत्सर्वंदत्तजलांजलिःस्यात् अपिचसाक्षात्कृततत्त्वोगुरुःशिष्यायतत्त्वमुपदिशतीत्यभ्युपगंतव्यंनहि
ज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठं उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइत्यादिश्रुतिस्मृतिभ्यः तत्रश्चैकजीवपक्षेउत्पन्नब्रह्मसा
क्षात्कारस्यगुरोरभावेनगुरुशिष्यव्यवस्थायाअसंभवादनिर्मोक्षःप्रसज्येतकिंचकर्मकांडज्ञानकांडयोरेकजीवपक्षेऽधिकारिभेदाभावेनाप्रामाण्यप्रसंगः तस्माद
ज्ञानमेकंतदुपाधिकोजीवोप्येकएवइत्यनुपपन्नमिति अत्रब्रूमः अजामेकांमायांतुप्रकृतिंविद्यात् नीहारेणप्रावृताः अज्ञानेनावृतंज्ञानंममपायादुरत्यया
विभेदजनकेऽज्ञानेइत्यादिश्रुतिस्मृतीतिहासपुराणेषुलाघवानुगृहीतश्रुतिलिंगाभ्यामविद्यैक्येनिश्चितेतदुपाधिकोजीवोप्येकएवेतिनिश्चीयते नचबंध
मोक्षव्यवस्थानुपपत्तिरिति वाच्यं अज्ञस्यबंधोज्ञानिनोमोक्षः इतिव्यवस्थासंभवात् हिरण्यगर्भादीनांमुक्तिप्रतिपादकशास्त्रस्यप्रवृत्तिकरत्वेनस्वार्थेनान्य
प्रकृतिप्रत्ययोः २॥ तयोर्ब्रह्मणादिवरणाश्रमयुक्ताधिकारिभेदसापेक्षप्रवृत्तेः ४॥

अ·कौ·
प्र·
१२

अधिकारिणामीश्वराज्ञायां वर्तमानानां व्यासादीनां यावदधिकारमधिकारकर्मैयावत्तावदेवावस्थितिरवस्थानं न तु परिष्ठादिति॥शा०॥सू०॥१०॥ कर्मोपासनाव्यावहारकस्यैव ३॥ कर्मज्ञानकांडरूपस्य ४॥
र्याभावात् नच महानुभावानां तेषां तत्वज्ञानाभावेप्यस्मदादीनां तत्वज्ञानोत्पत्तौ काप्रत्याशेति वाच्यं सृष्ट्यादिविक्षिप्तचित्तत्वेन तेषां ज्ञानाभावेपि विवेकवैराग्यसं
पन्नानामस्मदादीनां तत्वज्ञानोत्पत्तौ वाधकाभावात् स्वर्गकामो यजेतेत्यादिवाक्यप्रामाण्यात् स्वर्गोद्देशेन यागादिप्रवृत्तिवद्द्रष्टव्यः श्रोतव्य इत्यादिप्रामाण्यात्
ज्ञानोद्देशेन श्रवणादिषु प्रवृत्त्युपपत्तेः नच क्रममुक्त्युपासनाशास्त्रविरोधः व्यावहारिकप्रमातृभेदविषयतया स्वप्नवदविरोधोपपत्तेः नन्वेवं सति पूर्वकल्पेद
हराद्युपासनया ब्रह्मलोकं गतानां तत्वसाक्षात्कारेण ज्ञाननिवृत्तेर्मोक्षस्य संपन्नत्वेनास्मदादीनां संसारानुपलब्धिप्रसंगः इति चेन्मैवं स्वप्नवदनुपपत्तेः नहि
स्वप्नावस्थायां स्वभ्रांतिकल्पितप्रमातुर्मुक्तिदर्शनेन बंधदर्शनेन वा स्वस्य मुक्तिर्वंधो वा भवति नच शास्त्रस्याप्रामाण्यं एतेनाधिकारिभेदाभावात् कर्मज्ञानकांड
प्रामाण्यं प्रत्युक्तं नच गुरुशिष्यव्यवस्थानुपपत्तिः परोक्षज्ञानिनोपि तन्निष्ठस्योपदेष्टृत्वोपपत्तेः अथवा परमेश्वरो वा गुरुशरीरमाविश्य साधकमनुगृह्णातीति
व्यवस्थान विरुध्यते तस्मादेक एव जीवः किंच आभास एव च स एव तु कर्मानुस्मृतिशब्दविधिभ्यः॥ सतासोम्य तदा संपन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तः प्रा

ब्रह्म / मिलितः
यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भेदरूपो देवः॥

यथा लिंगगतः ज्योतिः स्व आभो विवस्वानेकोपि तत्तन्निष्पात्रगताः ताभिन्ना आपोनुगच्छन् बहुधा क्रियते एवमयं आत्मा देवः स्वप्रकाशोऽतः नित्य एको विभिन्नेषु क्षेत्रेषु अनुगच्छन्नुपाधिना भेदरूपः क्रियते इति योजना॥१
त्तेनात्मनान्वारूढ इत्यादिष्वेकवचनसामर्थ्याज्जीवैक्यमभ्युपगंतव्यं नन्वेवमिमाः सर्वाः प्रजाः सतिसंपद्य न विदुः वीतरागभयक्रोधा मन्मया मामुपाश्रिताः
यावदधिकारमवस्थितिराधिकारिकाणामित्यादिषु बहुवचनसामर्थ्याज्जीववहुत्वं किं न स्यादिति चेन्नैतदेवं लाघवात्तदेक्योपपत्तेः तस्मादेक एव जीव इति व
दंति अत एवेति तृतीये स्थितं तस्थाननोपि परस्योभयलिंगं सर्वत्र हि जीवः सुषुप्त्यादौ येन ब्रह्मणा संपन्नो भवति तत्किं निर्विशेषं सविशेषमुभयलिंगं वान्यतरलिं
गं वा अन्यत्र लिंगमित्यत्रापि सविशेषलिंगं वा निर्विशेषलिंगं वेति संशयः तत्र सत्यकामः सत्यसंकल्पः अस्थूलमनण्वह्रस्वमित्याद्युभयविधश्रुतिसंभवात् उभय
लिंगं ब्रह्मेति प्राप्तेऽभिधीयते नोभयलिंगं ब्रह्म एकस्य वस्तुनो द्विरूप्यायोगात् न ह्येकमेव सविशेषं निर्विशेषं च भवतीति युक्त्या बृकुंशकं अस्तु तर्ह्युपाधितः सविशे
षं स्वभावतो निर्विशेषं चेत्युभयलिंगं ब्रह्मेति चेन्न तदेवं न ह्युपाधितोपि स्वभावतोपि निर्विशेषं सविशेषं भवति विरोधात् सर्वत्र किंतु परमार्थिकं निर्विशेषस्वरूपं स राम
विशेषस्वरूपं मायामयं तथा च श्रुतिस्मृती भवतः अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत् अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्य १२
सोजीवः सुप्तः पुनः स एवोत्तिष्ठति तु शब्दोऽन्यं वारयति कुतः कर्मानुस्मृतिशब्दविधिभ्यः कर्मोत्थितस्य शेषोऽध्ययनादिः अनुस्मृतिः पूर्वदिवसभोजनादेः स्मरणं शब्दः प्रतिन्यायं प्रतियोनि द्रवतीत्यादिः विधिर्ज्योतिष्टोमेनेत्यादि
[illegible]॥शा०॥ सू०॥९॥

नेस यथा सैंधवघनोऽनंतरोऽवाह्यः कृत्स्नो रसघनः एवं वा अरेऽयमात्मानंतरोऽवाह्यः कृत्स्नः प्रज्ञानघन एव अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते इत्या
दि एतेन सविशेषमेव ब्रह्म न निर्विशेषं सत्यकामात्वादिश्रुतेरिति प्रत्युक्तं ननु ब्रह्मणो निर्विशेषत्वे सगुणवाक्यानां सृष्ट्यादिवाक्यानां वा का गतिरिति चेन्न
तेषामन्यपरत्वेन तत्र तात्पर्याभावात् तथाहि सर्वे वेदा यत्पदमामनंतीति शास्त्रेण सर्ववेदप्रतिपाद्यत्वमवगम्यते तत्र च कर्मवाक्यानि स्वप्रतिपाद्ययागा
द्यनुष्ठानेन सत्वशुद्धिद्वारा ब्रह्मसाक्षात्कारोत्पादनेन तत्र पर्यवस्यंति उपासनावाक्यानि तु तत्तद्गुणविशिष्टोपासनविधानेन चित्तैकाग्र्यद्वारा ब्रह्मणि पर्यवस्यं
ति तत्वमस्यादिवाक्यानि साक्षाद्ब्रह्मणि पर्यवस्यंति तदुक्तं शुद्धिद्वारा कर्मकांडस्य वाक्यं चित्तैकाग्र्यद्वारतो ध्यानवाक्यं साक्षादेतत्तत्वमस्यादिवाक्यं सत्यानंदे
स्वप्रकाशे प्रयातीति सृष्टिप्रलयादिवाक्यानि तु अध्यारोपापवादन्यायेन सृष्ट्यादिदर्शनस्य ब्रह्मज्ञानोपायतया ब्रह्मणि पर्यवस्यंति तदुक्तमाचार्यचरणैः
मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा उपायः सोऽवतारायनास्ति भेदः कथंचनेति नतश्च सगुणोपासनसृष्ट्यादिप्रतिपादिकवाक्यानां ब्रह्मज्ञानोपा

ब्रह्मत्वनये १
क्षेत्रेष्वेवमजोयमात्मा एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् इत्यादिश्रुतिसूत्रयोः सत्वात्॥

यतोपदर्शनमुखेन निर्विशेषे ब्रह्मणि पर्यवसानात् निर्विशेषं ब्रह्म यत अतो ब्रह्माऽविद्याप्रतिबिंबितं सज्जीवोऽविद्योपहितं सदीश्वरः इति बिंबप्रतिबिम्बभावे
न जीवेश्वरभावः इत्यत्र वेदांतेषु जलसूर्यादिदृष्टांतोपपादनमिति सूत्रकार आह अत एवेति यतो ब्रह्म निर्विशेषमत एव निवेसन्नेषु जलसूर्याद्युपमोपादीयतेनानेव
वेदांतानुदाहरतियथेत्यादिना ननु सूर्यादीनां रूपवत्वेन जलादौ प्रतिबिंबसंभवेपि ब्रह्मणो रूपादिरहितत्वेन कथमविद्यायां प्रतिबिंबोदयः न च जले आकाशादि
प्रतिबिम्बवदविद्यायां ब्रह्मप्रतिबिम्बसंभव इति वाच्यं आकाशस्यापि रूपादिशून्यतया जलादौ प्रतिबिम्बासंभवात् च स्वल्पजलभाजनेसाभ्रनक्षत्राकाशानु
भवविरोध इति वाच्यं तत्रापि रूपादिमन्नक्षत्रादिप्रतिबिम्ब एवानुभूयते आकाशप्रतिबिम्बानुभवस्तु भ्रम एव तस्माद्बिंबप्रतिबिंबभावेन ब्रह्मणो जीवेश्वरविभा
गोऽनुपपन्न इति चेन्न रूपवत एव प्रतिबिम्ब इति नियमाभावात् रूपादिरहितस्य लोहितरूपादेः स्फटिकादौ प्रतिबिंबदर्शनात् नच रूपादिहीनस्य द्रव्यस्य
प्रतिबिंबसंभव इति वाच्यं तादृशव्योमादेः प्रतिबिम्बदर्शनात् आकाशानुभवस्य सर्वानुभवसिद्धत्वात् नेचतस्य भ्रमत्वं वाधकाभावात् तस्माद्ब्रह्मणो विम्बप्रति

यथासूर्यप्रतिबिंबस्यजलांतरभूतस्यजलगतवृद्धिह्रासादिभाक्त्वंनतात्त्विकमेवमविकृतस्यपरमात्मनोदेहाद्युपाध्यंतर्भावाद्देहगतवृद्धिह्रासादिभाक्त्वंनस्वाभाविकमित्येतावतांशेनतयोरुभयोर्दृष्टांतदार्ष्टांतिकयोःसामंजस्याद्दृष्टांतसिद्धि
दिदृष्टांतःनहिसर्वात्मनासाम्यंदृष्टांतदार्ष्टांतिकयोःशक्यतेवक्तुंदृष्टांतत्वविरोधात् इतिभावः ॥२॥
विम्बभावेनजीवेश्वरविभागः अथवा अविद्याविशिष्टंचैतन्यंजीव अविद्योपहितंचैतन्यमीश्वरः यथाहुः विंबत्वंप्रतिविंबत्वंयथापूषणिकल्पितं जीवत्व
मीश्वरत्वंचतथाब्रह्मणिकल्पितं इति एतदभिप्रेत्यसूत्रकारोप्याह वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवमिति अजोह्येकोजुषमाणोनुशेतेज
हात्येनांभुक्तभोगामजोन्य इत्यादिश्रुतिरादिशब्देनगृह्यते अज्ञानमेकं तद्विशिष्टचैतन्यंजीवइत्यत्रफलितमाह अस्मिन्निति ननु जीवैक्येसुखदुःखवैचि
त्र्यानुपपत्तिरित्याशंक्यप्रमातृभेदेनतदुपपद्यतइत्याह तस्मिन्निति अविद्याप्रतिविम्बेजीवइत्यर्थः प्रमातारइतिप्रमाश्रयाइत्यर्थः पक्षांतरमाह के
चित्त्विति अयमाशयःशास्त्रेषुशुकादीनांमोक्षप्रतिपादनादस्मदादीनांसंसारोपलंभाच्चप्रतिपुरुषंनजानामीत्यनुभूयमानानिभिन्नान्यज्ञानानिस्वीकर्तव्या
नि अन्यथाबंधमोक्षव्यवस्थानस्यात् इंद्रोमायाभिःपुरुरूपईयतेइत्यादिश्रुतौमायाभिरितिबहुवचनसामर्थ्याच्च अजामेकामितिश्रुतेःसमष्ट्यज्ञानविषयत
यान्यथोपपत्तेःअन्यथामायाभिरितिबहुवचनस्यानर्थक्यप्रसंगात् अर्थांतरकल्पनायांप्रकृतहानाऽप्रकृतप्रक्रियाप्रसंगात् आनर्थक्यंप्रतिहतानांवि

अस्मिन्पक्षेजीवस्तुएक एवतस्मिन्नंतःकरणविशिष्टाः प्रमातारःकल्पिताः।३।केचित्तुनानाऽज्ञानंस्वीकृत्यवनवदज्ञानसमुदायःसम
ष्टिःतदुपहितम्॥ २२ परीतंबलाबलमितिन्यायात् वाक्यशेषानुरोधाच्च एकामितिश्रुतेरज्ञानसमष्ट्येकविषयत्वमभ्युपगंतव्यंततश्चाज्ञाननानात्वे
निश्चितेतदुपाधिकाजीवाश्चनानाभवंतिएवंचशुकादीनांमोक्षेप्यस्मदादीनांसंसारोपलंभोनविरुध्यते नन्वज्ञानभेदेनजीवभेदाभ्युपगमेप्रतिजीवंप्रपंचभे
दईश्वरभेदश्चस्यात् नचेष्टापत्तिःयोयंघटस्त्वयानुभूतःसएवमयापीतिप्रत्यभिज्ञाविरोधप्रसंगात् अन्याज्ञानकल्पितप्रपंचस्यान्यप्रत्यक्षाविषयत्वात् नच
भ्रांतित्वंबाधकाभावात् एकःपरमेश्वरःसकलजगत्सृष्टिस्थितिलयकारणमितिसर्वतंत्रसिद्धांतविरोधप्रसंगाच्च॥ अथैतद्दोषपरिजिहीर्षयासम
ष्ट्यज्ञानोपहितचैतन्यमीश्वरःतत्सृष्टःप्रपंचःसर्वसाधारणइत्यभ्युपगम्येततर्ह्यनिर्मोक्षःप्रसज्येततथाहि निर्गुणब्रह्मभावापत्तिर्मोक्षःएकस्यतत्त्वज्ञानेनसर्व
ज्ञानानामनिवृत्तेरीश्वरजगतोरबाधेननिर्गुणब्रह्मप्राप्तेरसंभवान्मोक्षोनस्यात् किंच अद्वितीयब्रह्मज्ञानान्मोक्षोभ्युपगंतव्यः तच्चाद्वितीयब्रह्मज्ञानंनानाजीवप रामः
क्षेनसंभवतिस्वव्यतिरिक्तजीवेश्वरजगतांविद्यमानत्वात् ततश्चानिर्मोक्षःप्रसज्येतकिंचशास्त्रप्रामाण्यात् कथंचिज्ज्ञानान्मोक्षोपपादनेपिसगुणब्रह्म १२
मायाभिरितिश्रुतेः७॥ आनर्थक्यंनप्रतिहतानांश्रुतिलिङ्गादीनांबलाबलंविपरीतंचिन्तनीयंलिङ्गेनापिश्रुतिर्बाध्येतेत्यर्थः॥९॥

प्राप्तिःमोक्षःस्यान्ननिर्गुणब्रह्मप्राप्तिःतच्चानिष्टं अनंतरोबाह्यःकृत्स्नःप्रज्ञानघन एवयत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिशास्त्रविरोधात् तस्मान्ना
नाज्ञानंस्वीकृत्यनानाजीववादोऽनुपपन्नइति अत्रोच्यते अज्ञानभेदोवश्यमभ्युपगंतव्यःसर्वशास्त्रप्रामाण्यात् नचजीवभेदेऽनेकप्रपंचेश्वरकल्पना
पत्तिरितिवाच्यं इष्टापत्तेःनचप्रत्यभिज्ञाविरोधस्तस्याभ्रमरूपत्वात् तथाहि एकस्मिन् शुक्तिकाशकलेदशानांपुरुषाणांरजतभ्रमेसतिस्वस्वाज्ञानक
ल्पितस्यरजतस्यान्योन्यभेदेपिअन्याज्ञानकल्पितस्यरजतस्यान्यप्रत्यभिज्ञाविषयत्वेपित्वयाययद्रजतमनुभूतंतदेवमयापीतियथाप्रत्यभिज्ञाभ्रमरूपा
जायतेएवंप्रकृतेपिस्वस्वाज्ञानकल्पितप्रपंचस्यस्वस्वाज्ञानोपहितचैतन्यमीश्वराकारावेतिनानेकेश्वरकल्पनापत्तिः सर्वतंत्रविरोधोवा अथवाव्य
ष्ट्यज्ञानोपहितचैतन्यंजीवःसमष्ट्यज्ञानोपहितचैतन्यमीश्वरःतत्सृष्टःप्रपंचःसर्वसाधारणःएवंचनप्रत्यभिज्ञाविरोधोनवाशास्त्रविरोधःनापिकल्प
नागौरवं नत्वानिर्मोक्षप्रसंगःस्वस्वश्रुत्याचार्यप्रसादेनब्रह्मसाक्षात्कारेणस्वाज्ञाननिवृत्यातत्कार्यलिंगशरीरादिनिवृत्तेःसंभवात् निर्गुणब्रह्मभावापत्तेरवि

चैतन्यंईश्वरःवृक्षवत्प्रत्येकमज्ञानंव्यष्टिःतदुपहितचैतन्यंप्राज्ञइतिवदंति ४ अन्येतुकारणीभूताज्ञानोपहितंचैतन्यमीश्वरःअंतःक
रणोपहितंचैतन्यंजीवः॥ २२ रोधात् ननुस्वव्यतिरिक्तानांजीवेश्वरजातानांविद्यमानत्वेनाहंमुक्तोऽन्योबद्धोऽन्यःप्रपंच अन्य ईश्वरइतिभेददृष्टेर
निवारणादद्वितीयब्रह्मसाक्षात्काराभावेनकथंनिर्गुणब्रह्मभावापत्तिर्मोक्षःइतिचेन्नैवं इदंसर्वंयदयमात्मावाचारंभणंविकारोनामधेयमित्यादिशास्त्रैरज्ञा
नादिसमस्तजडजातस्यब्रह्मण्यध्यस्तत्वावधारणेनमिथ्यात्वनिश्चयादद्वितीयब्रह्मसाक्षात्कारसंभवेनब्रह्मभावापत्तिर्मोक्षउपपद्यते॥ नचज्ञानेनस्वाज्ञाने
निवृत्तावप्यन्याज्ञानानिवृत्त्याब्रह्मणईश्वरत्वानपायात् ज्ञानेनसगुणब्रह्मभावापत्तिरेवस्यादितिवाच्यं अन्यज्ञानादन्यप्राप्तेरयोगात् नहिशुक्तिज्ञानाद्रजत
प्राप्तिःसंभवतिकिंतुशुक्तिरेवप्राप्यतेएवंनिर्गुणब्रह्मज्ञानान्निर्गुणब्रह्मैवप्राप्यतेनसगुणंतस्यमायामयत्वात् तथाशुक्तावन्यस्यरजतभ्रांतिदशायांअन्योविशे
षदर्शीशुक्तिज्ञानाच्छुक्तिमेवप्राप्नोतिनरजतंपरमार्थतस्तत्राभावात् अन्याज्ञानकल्पितस्यरजतस्यान्यप्रत्यक्षविषयत्वाभावाच्चतथाब्रह्मण्यज्ञानादीश्वरज
गज्ज्ञांतिरशायांश्रुत्याचार्यप्रसादादन्योविशेषदर्श्यहंब्रह्मास्मीति अद्वितीयब्रह्मसाक्षात्कारादानंदैकरसंनिर्विशेषमद्वितीयंब्रह्मैवप्राप्नोतिनसगुणमीश्वरंतस्य
ऽनिवारणात्४

ईश्वरकल्पित१॥ जीवकल्पित॥

मायामयत्वेन परमार्थतस्तद्व्यतिरेकेणाभावान्नहि भ्रांत्या ज्ञातं परमार्थिकं वस्तु भवति तस्मात्साधारणासाधारणप्रपंचाभ्युपगमेपि निर्गुणब्रह्मभावापत्तिरूपो मोक्ष उपपद्यते तस्मादिंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतिवशात्सर्वेषामहं ब्रह्म न जानामीति स्वस्वाज्ञानानुभववशाद्नेकान्यज्ञानानि ब्रह्मण्यारोपितानि तदुपाधिका जीवाश्च तरेतरविलक्षणा एवं च स निरूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुति रथातो ब्रह्मजिज्ञासेति शास्त्रं चेत्येतत्सर्वं सामंजस्येनोपपद्यते तस्मान्नानाजीववाद इति॥ अत्र समष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्तदुपहितयोरीश्वरप्राज्ञयोरपि तादात्म्यं द्रष्टव्यं ४ मतांतरमाह अन्येत्विति ५॥ विश्वेति सर्वथापीति यादिशक्तिप्रधान्येनाज्ञानस्य मायाशब्दवाच्यत्वाद्यथोक्तेषु पंचस्वपि पक्षेषु मायोपहितं चैतन्यं जगत्कारणमीश्वर इत्यर्थसंमतइत्युपसंहरति सर्वथापीति अन्योपहितचैतन्यमीश्वर इत्यविवादमिति सूचयन्नपीतिनन्वीश्वरे विवादाभावेपि जीवे अज्ञानैकत्वनानात्वाभ्यां प्रकारांतरेण वा जीवैकत्वनानात्वयोर्विवादेपि मायोपहितचैतन्यमीश्वर इत्यविवादमिति चेन्नाध्यारोपकत्वनात्वयोर्विवादसंभवात्किमुपादेयं किं हेयमिति शृणु सर्वमुपादेयं सर्वं हेयं मायामयत्वाद्व्यवहारस्वतर्हि सर्वस्य हेयत्वमेव न तूपादेयत्वमिति चेन्नाध्यारोपकत्वनात्वयोर्विवादसंभवात्किमुपादेयं किंहेयमिति शृणु सर्वमुपादेयं सर्वं हेयं

सर्वथापि मायोपहितं चैतन्यमीश्वरः स च ज्ञानशक्त्युपहितस्वरूपेण ज कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः इति वचनादित्याहुः ५ सर्वथापि मायोपहितं चैतन्यमीश्वरः स च ज्ञानशक्त्युपहितस्वरूपेण जगत्कर्ता विक्षेपादिशक्तिमदज्ञानोपहितस्वरूपेण जगदुपादानं ऊर्णनाभिवत् ॥ २१

पवादन्यायेन ब्रह्मणोऽज्ञातव्यनपा व्यवहारेण विना ब्रह्मज्ञानासंभवात्तदुपादेयं न यास सर्वमुपादेयं भवत्येव अयं विशेषः जीवैकत्वे जीवनानात्वे वा यथा यस्य मनोरोचते स तथा तं पक्षं स्वीकृत्य प्रत्यगात्मानं विविच्य तस्य ब्रह्मत्वं साक्षात्कुर्यात् न तु तत्र विवदितव्यं दूषणभूषणयोः सर्वत्र तुल्यत्वात् प्रत्यगात्मप्रधानतया येन प्रकारेण भवति तथा संपादनीयं स एव शास्त्रार्थः तदुक्तं वार्तिककाराचार्यैः यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थितिरिति व्युत्पत्तिर्ज्ञानं तत्पदवाच्यार्थस्य मायोपहितस्येश्वरस्य जन्मादिकारणत्वमुक्तं तदुपादानत्वेन कर्तृत्वेन च द्वेधा भवति तत्र केन रूपेणोपादानत्वं केन रूपेण कर्तृत्वं चेत्याकांक्षायां तदुभयं क्रमेणादर्शयति स चेत्यादिना ज्ञानेति ज्ञानशक्तिमदज्ञानोपहितस्वरूपेणेत्यर्थः अन्यथा शुद्धस्यासंगत्वे कर्तृत्वायोगात् कर्तृत्वं नाम उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं तच्च शुद्धे ब्रह्मणि न संभवति असंगो ह्ययं पुरुष इत्यादिश्रुत्या ब्रह्मणोऽसंगत्वावगमेन ज्ञानेच्छाकृतीनां तस्मिन्नसंभवात् यथोक्तेश्वरस्यैव हि तदिति भावः एकस्यैव ब्र रामः १४

उक्तानुक्तदुरुक्तादिचिंता यत्र प्रवर्तते तं ग्रंथं वार्तिकमाहुर्वार्तिकज्ञा मनीषिण इति ॥ ५ ॥

ह्मण उपादानत्वे कर्तृत्वे च दृष्टांतमाह ऊर्णनाभीति ब्रह्मणोऽभिन्ननिमित्तोपादानत्वे प्रमाणमाह यथेति आदिशब्देन यथा पृथिव्यामोषधयः संभवंति यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वं यथोर्णनाभिस्तंतून्नोपचरेत् यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः यथा सुदीप्तात्पावकाद्विस्फुलिंगा इत्यादिवाक्यानि गृह्यंते यथोक्तेश्वरस्यासर्वज्ञत्वे जगत्कर्तृत्वं न संभवति इति ततः सर्वज्ञत्वं वक्तव्यं तत्र प्रमाणमाह यः सर्वज्ञ इति यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते एष सर्वज्ञ एष सर्वेश्वरः एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्यादिश्रुतिस्मृतिभ्यश्च यथोक्त ईश्वरः सर्वशक्तिः यथोक्तप्रकारेण जगत्कर्ता जगदुपादानं चेति योजना अयमेव मायोपहितः परमेश्वरो ब्रह्मविष्णुमहेश्वररूपतां भजते तथा हि मायानिष्ठनिरतिशयसत्वं त्रिमूर्त्याकारेण परिणमते परमेश्वरेच्छया लोकानुग्रहाय तत्र दंडकमंडलुमन्मूर्त्युपहितः सन्परमेश्वरो जगत्स्रष्टा ब्रह्मा भवति शंखचक्रगदांबुजपाणिमूर्त्युपहितः सन्परमेश्वरो जगद्गोप्ता विष्णुर्भवति त्रिनेत्रशूलपाणिमूर्त्युपहितः सन्प

यथोर्णनाभिः सृजते गृह्यते चेत्यादिश्रुतेः यः सर्वज्ञः स विश्वकृत् स हि सर्वस्य कर्तेत्यादिश्रुतिभ्यश्च एवं पूर्वोक्तादीश्वरादाकाश उत्पद्यते आकाशाद्वायुर्वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी च तस्माद्वा एतस्मादात्मनः आकाशः संभूतः इत्यादिश्रुतेः ॥ २२ ॥

रमेश्वरो जगत्संहर्ता महेश्वरो भवति स ब्रह्मा स शिवः सेंद्रः सोक्षरः परमः स्वराट् स एव विष्णुरित्यादिश्रुतेरेकैव मूर्तिर्विभेदे त्रिधासौ सामान्यमेषां प्रथमावरत्वं हरेर्हरस्तस्य हरिः कदाचिद्ब्रह्मा तयोस्तावपि धातुराद्याविन्यभियुक्तोक्तेश्च अत्र स्वस्वभक्त्यनुसारेणोपास्याः सर्व इति अपरे तु स्रष्टा हिरण्यगर्भो जीवः परमेश्वराविष्टः समष्टिलिंगशरीराभिमानी सत्यलोकवासी शिवविष्णुमूर्ती तु शुद्धसत्वपरिणामरूपे रुद्रो नारायणश्चेवेत्येकं सत्वं द्विधाकृतं लोके चरति कौंतेय व्यक्तिस्थं सर्वकर्मसु इति महाभारतवचनात् तत्रापि विष्णुभक्तिर्मोक्षं प्रत्यंतरंगसाधनं शिवादिभक्तिरीषद्व्यवधानेन विष्णोः सत्वप्रवर्तकत्वात् आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात् ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनादिति पुराणवचनाच्च मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते इति भगवद्वचनाच्चेति वदंति शैवास्तु मायोपहितः परशिवश्चंद्रकलावतंसनीलकंठत्रिनयनोमासमेतनिरतिशयसत्वमूर्त्युपहितः सन्परमशिवो भवति स एव मुमुक्षुभिरुपास्यः उमासहायं परमेश्वर

आद्यपदेनान्वयः ५

पिनकाख्यधनुर्धारिणेशिवायेत्यर्थः २॥

रा·कौ· प्रभुंत्रिलोचनंनीलकंठंप्रशांतंध्यात्वामुनिर्गच्छतिभूतयोनिंसमस्तसाक्षिणंतमसःपरस्तादितिश्रुतेस्तस्यैवब्रह्मविष्णुमहेश्वराविभूतयःसब्रह्मसशिवइत्यादि

प्र· श्रुतेःयस्माज्जयाजगत्स्रष्टाविरिंचिःपालकोहरिःसंहर्ताकालरुद्राख्योनमस्तस्मैपिनाकिन इतिवचनाच्चेति वर्णयंतिवैष्णवास्तुमायोपाधिकःपरमात्माशंख

१५ चक्रगदांबुजपाणिलक्ष्मीसमेतनिरतिशयसत्वमूर्त्युपहितःसन्परमवासुदेवोभवतिसएवमुमुक्षुभिरुपास्यस्तस्यत्रिमूर्तयोविभूतयःवेदाहमेतंपुरुषम

हांतमादित्यवर्णंतमसःपरस्तान्नमेवविद्वानमृतइहभवतिनान्यःपंथाविद्यतेऽयनायसब्रह्मासशिवःसेंद्रःसोक्षरःपरमःस्वराडित्यादिश्रुतेःमोक्षमिच्छे

ज्जनार्दनादितिवचनाच्चेति मन्यंतेहैरण्यगर्भास्तुश्रुतिस्मृतिवादानांवहूनांसत्वाद्धिरण्यगर्भमुमुक्षुभिरुपास्यप्राहुःशैवादिपक्षेमूर्तित्रयातिरिक्तमूर्ति

कल्पनायांप्रमाणंचिंत्यंउदाहृतश्रुतीनामर्थांतरत्वोपपत्तेःब्रह्मणोमायोपहितस्यसृष्टिस्थितिलयकारणत्वंतटस्थलक्षणमुक्तंतदेवप्रपंचयिष्यन्वियत्

ते प्राणपादोक्तन्यायेनसृष्टिक्रममाह एवमितिपूर्वोक्तादिति विक्षेपादिशक्तिप्रधानमायोपहितादीश्वरादित्यर्थः अत्रायंक्रमःसंसृज्यमानप्राणिकर्मसहकृ

भाष्यपादः १॥ भवतिनवाइतिचिंतनीयं २॥

**मायायाःसत्वरजस्तमोगुणात्मकत्वात् ॥**

न परमेश्वरइदमिदानींस्रष्टव्यमितीक्षते ततईक्षितुःपरमेश्वरादाकाशउत्पद्यते आकाशाद्वायुस्ततोऽग्निस्ततआपस्ततःपृथिवीचेतितन्चाऽचेतन्यस्यक।

ल्पितस्याकाशादेर्वायवाद्युपादानत्वंकथमितिवाच्यंतत्तदुपहितचैतन्यस्यैवोपादानत्वेनविवक्षितत्वात् अन्यथाचेतनकारणतावादिश्रुतिविरोधप्रसंगात् अत्र

वैशेषिकामन्यंतेद्रव्यगुणकर्मसामान्यविशेषसमवायाःषट्पदार्थाःगुणादयोद्रव्यपरतंत्राःभावकार्य्यंसर्वंसमवायिकारणमसमवायिकारणंनिमित्तकारणंचेति

कारणत्रयजन्यंतत्रद्रव्यंसमवायिकारणंतानिचद्रव्याणिनवैवपृथिव्यादयश्चत्वारःपरमाणवआकाशादीनिचेत्येतानिनित्यद्रव्याणिद्व्यणुकंपरमाणुभ्यामुत्पद्य

तेद्व्यणुकेभ्यस्त्र्यणुकंततश्चतुरणुकमेवंक्रमेणमहापृथिवीमहत्यापः महत्तेजोमहान्वायुरुत्पद्यते आद्व्यणुकादाब्रह्मांडांतंसर्वंकार्यमनित्यमवयवसमवेतंच

अपकृष्टमहत्परिमाणतारतम्यस्यगगनादिपरिमाणेविश्रांतत्ववदणुपरिमाणतारतम्यस्ययत्रविश्रांतिःसएवपरमाणुःनचाणुपरिमाणतारतम्यस्यत्रसरेणौविश्रां

तिरस्त्विति वाच्यं तस्यचाक्षुषद्रव्यत्वेनसावयवत्वानुमानेनतदवयवद्व्यणुकसिद्धौतस्यापिमहदवयवत्वेनसावयवत्वानुमानेनतदवयवपरमाणुसिद्धेस्तस्यापिसावयव रामः १५

आकाशोत्पत्तिबोधिकाश्रुतिर्गौणीभवतुमर्हतिकस्मात् तस्यसमवाय्यसमवायिकारणयोराकाशपरमाणुतत्संयोगयोरसम्भवादिति॥ शा॰।। सू॰।।४।। प्रतिकर्द॥

त्वेनाऽनवस्थाप्रसंगःनचनदिष्ट अनंतावयवारब्धत्वाविशेषेणमेरुसर्षपयोस्तुल्यपरिमाणप्रसंगोऽतोनिरवयवःपरमाणुःततश्चतदुत्पत्तौसमवायिकार।

णानिरूपणादनादिःपरमाणुःविनाशकारणाभावान्नित्यएवमाकाशादीनामपिसर्वत्रकार्योपलब्ध्याविभुत्वेननिरवयवद्रव्यतयोत्पत्तिविनाशकारणाभा

वात्तत्कल्प्यतयाऽनादित्वंनित्यत्वंचनचोत्पत्तिश्रुतेराकाशस्याऽनादित्वंकथमितिवाच्यं प्रमाणान्तरविरोधेनतस्यागौणत्वोपपत्तेःतथाचपारमर्षसूत्रंगौणए

ऽसंभवादिति एवंमनसोपि अत्रेदंचिंत्यंशक्तिसादृश्यादीनांवहूनांपदार्थानाविद्यमानत्वेनषट्पदार्थानसंभवंतिनचशक्तिसादृश्यसद्भावेमानाभावइतिवाच्यं

करतलानलसंयोगेसतिमण्यादिसमवधानेदाहानुत्पत्यातदपनयेदाहोत्पत्त्यावह्नौदाहानुकूलशक्तिविनाशोत्पत्त्योरावश्यकत्वेनशक्तिसिद्धेःनचप्रतिबं

धकाभावेनदाहोत्पत्त्युपपत्तौकथंशक्तिसिद्धिरिति वाच्यं प्रतिबंधकाभावस्यदाहकारणत्वेमानाभावात्तदन्वयव्यतिरेकयोःकार्याऽनुत्पादस्याग्रिमसमयसं

बंधसंपादकत्वेनान्यथासिद्धत्वाच्चकथमसतःसज्जायेतेतिश्रुत्यानासतोऽदृष्टत्वादितिन्यायेनचाभावकारणत्वस्यनिराकृतत्वाच्च तस्मात्कारणेकार्यानुकू

असतोऽविद्यमानात्कारणात्कार्य्यंनजायतेकस्मात्मृदादेरसत्वेघटादेरदृष्टत्वादिति॥ श॰।। सू॰।।१।।

**तत्कार्याण्याकाशादीनि अपिसत्वरजस्तमोगुणात्मकानि ॥ ७ ॥**

आत्मनआकाशःसम्भूतइतिश्रुतिसिद्धभावकार्य्यत्वेनाकाशस्यसावयवत्वमनोनिरवयवद्रव्यत्वरूपोहेतुस्वरूपासिद्धइतिभावः॥७॥ असतःपा॰

लशक्तिरभ्युपगंतव्याएवंचद्रवत्वसुखमित्याद्यनुभवात् सादृश्यसिद्धिस्तस्मात्पदार्थानामनंत्याद्द्रव्यादयःषट्पदार्थाइत्यसंगतं किंचद्रव्याणिनवैवेत्यसंगतंअंध

कारस्यदशमद्रव्यस्यसत्वात् नचांधकारस्यालोकाभावतयाकथंद्रव्यत्वमितिवाच्यं प्रतियोगिनिरपेक्षतयाप्रतीयमानस्याभावत्वकल्पनायांमानाभावात् नी

लंतमश्चलतीत्यादिप्रत्यक्षप्रतीत्यारूपादिमत्वेनतस्यद्रव्यत्वोपपत्तेश्चतस्माद्द्रव्याणिनवेत्यनुपपन्नंकिंच आत्मनःश्रुतिस्मृतिविद्वदनुभवैर्निर्गुणत्वसच्चिदा

नंदस्वरूपत्वावगमेनगुणाश्रयत्वेसमवायिकारणत्वेनवाद्रव्यत्वकल्पनायांमानाभावात् नचात्मनोऽद्रव्यत्वेगुणादिवत्परतंत्रत्वापत्तिरितिवाच्यं तस्यसर्वक

ल्पनाधिष्ठानतयासर्वप्रेरकत्वेनचस्वातंत्र्योपपत्तेःकुतःपारतंत्र्यमतोपिद्रव्याणिनवैवेत्यनुपपन्नंअतोऽन्यदार्तमित्यादिश्रुत्याब्रह्मभिन्नस्यसर्वस्यानित्यत्वा

त्कथमाकाशादीनांनित्यत्वंनचतस्योपचरितार्थत्वंप्रमाणांतराविरोधात् तथाहिनतावदाकाशादीनामातत्वेप्रत्यक्षविरोधस्तेषामतीन्द्रियत्वान्नाप्याकाशंनि

त्यंनिरवद्रव्यत्वादात्मवदित्यनुमानविरोधइति वाच्यं असिद्धत्वात् नचविभुत्वेननिरवयवत्वसिद्धिरिति वाच्यंतस्याऽनिर्वचनात् नतावत्सकलमूर्तद्रव्यसंयो

प्रतिबन्धकसत्वेकार्य्यानुत्पादस्याग्रिमसमयसम्बन्धोभवतिप्रतिबन्धकाभावेचकार्य्यस्याग्रिमसमयसम्बन्ध इत्येतावन्मात्रेचरितार्थयोःप्रतिबन्धकतदभावयोःकार्य्यानुत्पादोत्पादं प्रत्यन्यथासिद्धत्वमितिभावः॥ १० ॥ १०॥

कौ॰ प्र॰ १६

रहित २॥ आकाशवत्सर्वगतश्च नित्यः ३ आकाश ५॥ शब्दादि २॥ नविपदस्तुतेरितिवि॰ यदाकाशं न जन्मवत् छान्दोग्येन तस्य जन्मश्रवणादिति वादिवाक्यम्॥३॥

गित्वं विभुत्वं संयोगस्याव्याप्यवृत्तितया सावयवनिरवयवयोस्तदसंभवात् नापि परममहत्परिमाणवत्त्वं विभुत्वं परममहत्परिमाणस्यानिरूपणात् न च इयत्ता
नवच्छिन्नपरिमाणत्वं परममहत्त्वं तथात्वे मानाभावात् न च सर्वत्र कार्योपलब्धिरेव मानमिति वाच्यं तर्हि यत्र कदापि कार्यं नोपलभ्यते तत्र तदऽसिद्ध्या विभुत्वा
ऽसिद्धेः नाप्युपमानविरोधः नित्यत्वाभावेपि तत्संभवात् नाप्यागमविरोधः वादिवाक्यस्याप्रमाणत्वात् श्रुतिस्त्वऽनित्यमेव बोधयति न च विनाशकारणानिरू
पणात्कथं तदुपपद्यते इति वाच्यं उपादानकारणनाशादेव तन्नाशोपपत्तेः किं तदुपादानमिति चेत्परिणाम्युपादानमज्ञानं विवर्तोपादानं ब्रह्म तत्र ब्रह्मणो भ
नित्यत्वेपि ज्ञानेनाज्ञाननिवृत्त्या तन्निवृत्तिरुपपद्यत इत्याशंश्रुतेर्मानांतराविरोधादुपचरितार्थत्वाभावेनाकाशादीनामनित्यत्वं एतेनाऽऽकाशादीनां समवा
यिकारणाऽसमवायिकारणानिरूपणादनादित्वमित्यपास्तं समवायासिद्ध्याऽसमवायिकारणपरिभाषाया अप्रामाणिकत्वात् कुतस्तर्हि कार्यो
त्पत्तिरिति चेदुपादानकारणनिमित्तकारणाभ्यां ते च निरूपयिष्यंते समवायासंभवो वक्ष्यते एतेन परमाणूनामप्युत्पत्तिविनाशकारणानिरूपणादनादित्वमि

अग्रे १ अविद्यमान॰ ग॰ णारोपः ३॥ शास्त्रज्ञानामाधुनिकसंकेतः परिभाषा इति॥२॥ घटादि २

अपंचीकृतानि सूक्ष्मभूतानीति च वर्णयंति ॥ ॥ छ ॥ ठ ॥

आत्मनिर अनुमानादेव १ असाधकत्वात् २

त्यपास्तं सूक्ष्मभूतातिरिक्तपरमाणुसद्भावे मानाभावात् न चानुमानात्तत्सिद्धिरिति वाच्यं तर्हि तेनैव परमाणूनां सावयवप्रसंगात् न चानवस्थाभयात्तदसिद्धिरिति
वाच्यं परमकारणविश्रांतिसंभवेनाऽनवस्थापरिहारात् न च मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसंगोऽनंतावयवारब्धत्वाविशेषादिति वाच्यं अप्रयोजकत्वात् किं
च रूपादिमत्त्वात्परिच्छिन्नत्वाच्च परमाणूनां सावयवत्वमनित्यत्वमभ्युपगंतव्यं घटादीनां रूपादिमतां तथादर्शनात् किं च संयुक्ताभ्यां परमाणुभ्यां द्व्यणुकोत्पत्तिर्वा
च्या साऽनुपपन्ना तत्संयोगाऽयोगात् परमाणूनां निरवयवत्वाभ्युपगमात्संयोगो न भवति तस्याऽव्याप्यवृत्तित्वात् न हि निःप्रदेशे संयोगतदऽभावौ संभवतः असं
बद्धानां दिशामनवच्छेदकत्वात् तत्संबंधानिरूपणाच्च तस्मात्परमाणुभ्यां द्व्यणुकमुत्पद्यत इत्यसंगतं अपि च येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्येक
विज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तच्च ब्रह्माभिन्नस्यानादित्वनित्यत्वे बाधितं स्यान्न च तदिष्टं मृदादिदृष्टांतेन कार्यस्य कारणाद्व्यतिरेकेण तदुपपादनमनर्थकं स्या राम
त्तस्माद्ब्रह्माभिन्नं सर्वमुत्पद्यते विलीयते चेति निश्चिततरं अस्तु तर्हि प्रधानान्महदादिक्रमेण प्रपंचोत्पत्तिरिति चेन्न प्रधानस्याप्रमाणिकत्वेन जगदुपादानत्वायोगा १६

प्रमाणुसंयोगे ३ संबद्धत्वम २ संयोगस्य ४

सांख्य १ अप्रामाण्यं॥ कारणानि कपालतन्त्वादीनि तेषु वर्तन्ते ये नीलपीतादयो गुणास्ते घटपटादिकार्यगतगुणानारभन्ते इति॥ वै॰॥ सू॰॥ २॥

त् ननु स्मृतिसिद्धत्वात्कथमप्रामाणिकत्वमिति चेन्न श्रुतिविरोधे स्मृतेरप्रामाणिकत्वात् तस्मान्मायोपहितेन ब्रह्मणा आकाशादिक्रमेण प्रपंचोत्पत्तिरिति निश्च
यैरभ्युपगंतव्यं अन्यथा श्रुतेरप्रामाण्यप्रसंगात् न च तदिष्टं अध्ययनविधिपरिगृहीतस्याक्षरमात्रस्यानर्थक्यायोगात्तस्माद्ब्रह्मण एवाकाशादिक्रमेण जग
दुत्पद्यत इत्यनवद्यं आकाशादिभ्यः सूक्ष्मशरीरोत्पत्तिं वक्तुं कारणगुणा हि कार्यगुणानाऽऽरंभंत इति न्यायेन भूतकारणस्याज्ञानस्य सत्वरजस्तमोगुणात्मकत्वे
न तत्कार्याणामाकाशादीनामपि सत्वरजस्तमोगुणात्मकत्वं व्यवहारायोग्यत्वात् सूक्ष्मभूतत्वं पंचीकरणाभावादऽपंचीकृतत्वं चेत्याह मायाया इति वर्णयंति
वेदांतविद इति शेषः एतेभ्यः सूक्ष्मभूतेभ्यः सूक्ष्मशरीराणां स्थूलभूतानां चोत्पत्तिमाह एतेभ्य इति लिंगानि गणयति सप्तदशेति श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि
ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि कर्मेंद्रियाणि तत्र शब्दोपलब्धिसाधनमिंद्रियं श्रोत्रं स्पर्शोपलब्धिसाधनमिंद्रियं त्वक् रूपोपलब्धिसाधनमिंद्रि
यं रसनं गंधोपलब्धिसाधनमिंद्रियं घ्राणं वचनक्रियासाधनमिंद्रियं वाक् आदानक्रियासाधनमिंद्रियं पाणी गमनक्रियासाधनमिंद्रियं पादौ विसर्गक्रियासाधन

एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि सूक्ष्मशरीराणि च सप्तदशलिंगात्मकानि जायंते सप्तदशलिंगानि तु ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पं
चमनोबुद्धी पंच प्राणाश्चेति तथा च आकाशादिसात्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेंद्रियाणि उत्पद्यंते ॥

ज्ञान १ कर्म जाति ३ ज्ञानभरा ३॥

मिंद्रियं पायुः सुखक्रियासाधनमिंद्रिय
मुपस्थः सुखदुःखानुकूलसाक्षात्कारप्रमितिक्रियान्यतरकरणमतींद्रियमिंद्रियं आलोकादावतिव्याप्तिवारणायातींद्रियमित्युक्तं अतींद्रियत्वं नाम संयोगादिप्र
त्यासत्तिजन्यसाक्षात्काराविषयत्वं न च वस्तुमात्रस्यालौकिकसाक्षात्कारविषयत्वादसंभव इति वाच्यं अलौकिकसाक्षात्कारस्यानंगीकारात् सामान्यज्ञानयोग
जधर्माणां प्रत्यासत्तित्वे मानाभावेनातिप्रसंगेन च तज्जन्यसाक्षात्कारविषयस्यासंभवात् न च तर्हि साक्षात्काराविषयत्वमतींद्रियत्वमस्तु किं जन्यांतेनेति वाच्यं
सर्वस्य वस्तुनो ज्ञाततयाऽज्ञाततया वा साक्षिभास्यत्वेन साक्षिणो नित्यापरोक्षत्वेनाऽसंभववारणार्थत्वात् धर्मादावतिव्याप्तिवारणायाद्यविशेषणं अनुमित्यादि
करणेऽतिव्याप्तिवारणाय साक्षादित्युक्तं स्वाकारवृत्त्युपहिताबाधितयोग्यवर्तमानविषयचैतन्याभिन्नत्वं प्रमितेः साक्षात्वं एतच्चाग्रे व्युत्पादयिष्यते मनसि चित्त
स्य बुद्धावहंकारस्यांतर्भावं मत्वा बुद्धिमनसोर्ग्रहणं प्राणापानव्यानोदानसमानाः पंच प्राणाः तेषां लक्षणमनुपदमेव वक्ष्यति सप्तदशलिंगानामुत्पत्तिक्रममा

ज्ञानस्य कार्यत्वात् सन्निकर्षस्य कारणत्वात् ४॥ अनुमानादौ ४॥ विषयाकारवृत्त्युपहितं चैतन्यं॥२॥१॥ शुक्तिरजते धामदोसत्यादौ चातिप्रसङ्गभङ्गाय अबाधितयोग्यवर्तमानानि विषये विशेषणानि॥२॥२॥

ह तथा चेति व्यस्तेभ्यः प्रातिस्विकेभ्यः ज्ञानकरणानींद्रियाणि ज्ञानेंद्रियाणि ज्ञानस्य सत्वपरिणामत्वात्तत्करणानामिंद्रियाणां सात्विकांशकार्यत्वमुपपद्यते त
त्रैकस्मात्किमुत्पन्नमित्याकांक्षायामाह आकाशेति श्रोत्रस्य शब्दग्राहकत्वेन शब्दगुणकत्वादाकाशसात्विकांशादुत्पत्तिर्यदिंद्रियं रूपादिषु पंचसु मध्ये यं
गुणं गृह्णाति तदिंद्रियं तद्गुणकमिति व्याप्तेः अन्यथा शब्दग्राहकत्वमेव न स्यात् एवं त्वगादीनामपि वाय्वादिसात्विकांशकार्यत्वं द्रष्टव्यं तत्र श्रुतिप्रमाणय
ति श्रोत्रमिति आदिशब्देन वायौ त्वक् अग्नौ चक्षुरप्सु जिह्वा पृथिव्यां घ्राणमिति गृह्यते अस्यार्थः आकाशे यः सात्विकांशस्तस्माच्छ्रोत्रमुत्पद्यत इति पर्या
यांतरे यद्यपि योजनीयं अंतःकरणस्य श्रोत्रादिद्वारा शब्दादिसर्वविषयग्राहकत्वात्सर्वात्मकत्वं वक्तव्यमित्याकांक्षायामाकाशादिसात्विकांशसमुदायादु
दुत्पत्तिमाहाकाशादीनामिति अत्र सांख्यामतं तेन त्रिविधमंतःकरणं बुद्धिरहंकारो मनश्चेति तत्र प्रकृतेर्बुद्धिरुत्पद्यते महतत्वापरपर्याया ततोऽहंकारः स च त्रिवि
धः सत्वरजस्तमोगुणभेदात् तत्र सात्विकाहंकारादेकादशेंद्रियाण्युत्पद्यंते तामसाहंकारात्पंचतन्मात्राणि राजसोऽहंकारोऽनयोः प्रवर्तकत्वेन सहकारी पंच

आकाशसात्विकांशात् श्रोत्रमुत्पद्यते वायोः सात्विकांशात् त्वगिंद्रियं तेजसः सात्विकांशाच्चक्षुः अपां सात्विकांशाद्रसनं पृथिवीसात्विकां
शात् घ्राणं श्रोत्रं आकाश इत्यादिश्रुतेः आकाशादीनां सात्विकांशेभ्यो मिलितेभ्यो अंतःकरणमुत्पद्यते॥ २१ तन्मात्रेभ्यः पंचमहाभूतानि तदु

क्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति अस्यार्थः सत्वरजस्तमोगुणानां साम्यावस्था प्रकृतिः
सा जगतो मूलकारणं न कस्यापि विकृतिर्भवति महदहंकारपंचतन्मात्राणि सप्त प्रकृतयो विकृतयश्च भवंति मूलप्रकृत्यपेक्षया महतत्वं विकृतिः कार्यमिति यावत्
अहंकारापेक्षया प्रकृतिरुपादानकारणमिति यावत् एवमहंकारोपि महतत्वापेक्षया विकृतिः इंद्रियपंचतन्मात्रापेक्षया प्रकृतिः एवं पंचतन्मात्राण्यहंकारापेक्ष
या विकृतयः स्थूलभूतापेक्षया प्रकृतयश्च भवंति एकादशेंद्रियाणि पंचमहाभूतानि षोडश विकारा एव असंगत्वात्पुरुषो नोभयमिति तच्चिंत्यं सूत्रकृतेश्वरेणाशब्दमि
त्यादिनाऽशब्दतयाऽप्रमाणिकत्वेन प्रधानवादस्य दूषितत्वात् अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागिति श्रुत्यांतःकरणप्राणेंद्रियाणां भौतिकत्वा
वगमाच्च ननु ब्रह्मणोऽसंगत्वेन श्रुत्यावगतस्य जगदुपादानत्वं कथं प्रतिपाद्यते विरोधादिति चेत्सत्यं शुद्धस्यासंभवेपि मायोपहितस्य तत्संभवादेतच्च प्रागेव प्रतिपादि रा १७

तं एतेन निरवयवमणु नित्यं मन इति नैयायिकमतं प्रत्युक्तं अद्वैतश्रुतिविरोधापत्तेः एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति श्रुतौ मनस उत्पत्तिश्रवणाच्च
कार्यस्यानित्यत्वाच्च किंच यन्मूर्तं तत्परिच्छिन्नं यत्परिच्छिन्नं तत्सावयवं यत्सावयवं तदनित्यमिति नियमेन मनसो मूर्तत्वाभ्युपगमेन सावयवत्वमनित्य
त्वं चस्यादेव अपि च मनसोऽणुत्वे तत्संयोगजन्यसुखस्य तावन्मात्रप्रसंगे न सर्वांगव्यापि सुखं न स्यात् तथा च पादे मे वेदना शिरसि मे सुखमिति युगपत्सु
खदुःखानुभवो न स्यात् मनसोऽणुत्वे नोभयत्र संयोगाऽभावात् एतेन मनसो विभुत्वं प्रत्युक्तम् तस्मात्सावयवमंतःकरणमुत्पद्यत इति सिद्धं तद्विभजते तदि
ति तत्र पंचीकरणवार्तिकमुदाहरति मन इति कर्मेन्द्रियाणामुत्पत्तिमाह पूर्वोक्तेति वचनादिक्रियाकर्म तत्करणानींद्रियाणि कर्मेन्द्रियाणि अपामिति केचित्तु

तत्संकल्पविकल्पनिश्चयाभिमानानुसंधानरूपवृत्तिभेदाच्चतुर्विधम् मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधं संकल्पाख्यं मनोरूपं बुद्धिर्निश्च
यरूपिणी अभिमानात्मकस्तद्वदहंकारः प्रकीर्तितः अनुसंधानरूपं च चित्तमित्यभिधीयते इति वार्तिकवचनात् पूर्वोक्ताकाशादिराज
सांशेभ्यो व्यस्तेभ्यः कर्मेन्द्रियाण्युत्पद्यंते आकाशराजसांशाद्वागिन्द्रियमुत्पद्यते वायोराजसांशाद्धस्तौ तेजसो राजसांशात्पादौ अपां राजसांशा
त्पायुः पृथिवीराजसांशादुपस्थः आकाशादिराजसांशेभ्यो मिलितेभ्यः प्राण उत्पद्यते सोपि वृत्तिभेदात्पंचविधः प्राग्गमनवान्नासाग्रवर्ती प्राणः
अर्वाग्गमनवान्पाय्वादिस्थानवर्त्यपानः विष्वग्गमनवान्सर्वशरीरवर्ती व्यानः ऊर्ध्वगमनवान्कंठवर्त्युदानः ॥ २२ अपां राजसांशादुपस्थमुत्प
…ते पृथिवीराजसांशात् पायुः कस्मिन्न्वापः प्रतिष्ठिता इति रेतसीति श्रुतेरिति वदंति प्राणोत्पत्तिं वृत्तिभेदात्तद्भेदं तल्लक्षणं चाह आकाशेति तत्र प्रमाणमाह वाक्
…णीति आदिशब्देन एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादिवाक्यं गृह्यते तथा पद्मपुराणे शिवगीतायामपि सूक्ष्मभूतेभ्यः सप्तदशलिंगानामुत्प।
…समो दर्शितः व्योमादिसात्विकांशेभ्यो जायंते धीन्द्रियाणि तु व्योम्नः श्रोत्रं भुवो घ्राणं जलाज्जिह्वाथ तेजसः।१। चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौतिकता ततो व्यो
…तां समस्तानां सात्विकांशेभ्य एव च।२। जायते बुद्धिमनसी बुद्धिः स्यान्निश्चयात्मिका वाक्पाणिपादपायूपस्थाश्च कर्मेंद्रियाणि तु।३। व्योमादीनां रजोंशेभ्यो
…न्यत्क्रमात् समस्तेभ्यो रजोंशेभ्यः पंचप्राणास्ततः परं।४। जायंते सप्तदशकमेवं लिंगशरीरकमिति नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्ये वायवः

सर्वतो गमनवानित्यर्थः ६॥

क्षुत्पादयतिवस्मारोति अस्मदादिस्थूलशरीरंकार्य्यान्नमयकोशः ३॥
संति नागउद्गीरणीकरः कूर्मउन्मीलनकरः कृकलः क्षुत्करः देवदत्तोजृंभणाकरोधनंजयः पोषणाकरइतिवदंति वेदांतिनस्तुतेषांपृथक्कल्पनागौरवाच्छ्रुत्या
दिप्रमाणाभावाच्चप्राणादिष्वंतर्भावंवदंतितैत्तरीयश्रुत्युक्तानांकार्यकारणरूपाणांपंचकोशानांस्थूलसूक्ष्मकारणोपाधिष्वंतर्भावमाह अन्नमयेति अन्नम
यकोशः विराट्स्थूलशरीरंकारणान्नमयकोशउभयमेकीकृत्यनिर्दिशतिस्थूलशरीरमिति प्राणमयकोशंव्युत्पादयितुमुक्तसूक्ष्मशरीरेकोशत्रयमंतर्भूतमित्या
ह उक्तमिति। समष्टिव्यष्टिकोशानेकीकृत्यतानेवकोशानःनुक्रमति कर्मेति अयंविज्ञानमयःकोशःतस्यकर्तृत्वोपाधित्वेप्रमाणमाह विज्ञानमिति आनंदमयको
शंव्युत्पादयितुंसत्त्ववृत्तिंविभजते अंतःकरणस्येतितत्तः किमित्यत आह निश्चयवृत्तिमदिति॥ तस्यविज्ञानमयकोशत्वात् तदुपाधिकोजीवः कर्ताज्ञाताप्रमातेतिचो
अशितपीतान्नपानादिसमीकरणकर्ताऽखिलशिराव्रतीसमानः वाक्पाणिपादपायूपस्थाख्यानिकर्मेंद्रियाणितेषांक्रमेणोत्पादिश्रुतेः अन्नमय
प्राणमयमनोमयविज्ञानमयानंदमयकोशाःपंचात्राप्यंतर्भवंति वक्ष्यमाणंस्थूलशरीरमन्नमयःकोशः उक्तंसूक्ष्मशरीरंकोशत्रयात्मकं कर्मे
द्रियैःसहितःप्राणःप्राणमयकोशःकर्मेंद्रियैःसहितःमनःमनोमयकोशःज्ञानेंद्रियैःसहिताबुद्धिर्विज्ञानमयकोशः अयमेवकर्तृत्वोपाधिः
विज्ञानंयज्ञं तनुत इत्यादिश्रुतेः अंतःकरणस्यसत्त्ववृत्तिर्द्विविधानिश्चयवृत्तिः सुखाकारवृत्तिश्चेतिनिश्चयवृत्तिमदंतःकरणंबुद्धिरित्युच्यते
सुखाकारवृत्तिमदंतःकरणंभोक्तृत्वोपाधिः तस्यप्रियमेवशिरोमोदोदक्षिणःपक्षःप्रमोदउत्तरपक्षःआनंदात्माब्रह्मपुच्छंप्रतिष्ठा इत्यादिश्रु
तेः अयमेवकारणपर्यंतआनंदमयकोशः केचित्त्वज्ञानमानंदमयकोशंवदंति ॥ २१ च्यतेसुखाकारवृत्तिमदंतःकरणस्यभोक्तृत्वोपाधित्वेप्रमा
णमाह तस्येति अयंभोक्तृत्वोपाधिःकारणपर्यंतः अज्ञानपर्यंतः आनंदमयकोशोपाधिकश्चिदात्माभोक्तेत्युच्यत इतिभावः पक्षांतरमाहकेचित्विति अयंप
क्षश्चिंतनीयः पंचकोशान्व्युत्पाद्यसूक्ष्मशरीरंविभजते इदमिति समष्टिंव्युत्पादयति अपंचीकृतेति समष्टिसूक्ष्मशरीरोपाधिकश्चिदात्मासूत्रादिसंज्ञोभवती
त्याह एतदिति हिरण्यगर्भप्राणसूत्रशब्दानांतद्वाचकत्वेक्रमेणप्रवृत्तिनिमित्तमाह ज्ञानेति ज्ञानंचक्रियाचज्ञानक्रियेतयोःशक्तिर्ज्ञानक्रियाशक्तिः इद्ग्रांतेश्रूय
माणाःशक्तिशब्दःप्रत्येकमभिसंबध्यते तथाच ज्ञानशक्तिःक्रियाशक्तिश्चेत्येतेयस्यतत् ज्ञानक्रियाशक्तिमत् सूक्ष्मशरीरंतदुपाधिकत्वादित्यर्थः पक्षांतरमाह
श्रुतिविरोधान्नसम्यगिदंप्रलपनमितिचिन्ताबीजम्३॥ सोपाधिकचैतन्यस्य२॥
अत्रतुव्याष्टिगताशुणदोषाजन्ममरणादयःसमष्ट्युपाध्युपाहितस्यस्वाराजन्नानाबाजम्१॥
अथवेति किंतत्समष्टित्वंतत्राह समष्टित्वंनामेति उक्तार्थेसंमतिमाह तदुक्तमिति तेभ्यःपंचीकृतपंचभूतेभ्यःसर्वात्मकंसर्वव्यापिकंपरमात्मनोगमकत्वा
ल्लिंगंइदमेवसांख्यैर्महत्तत्त्वमित्युच्यते इत्यभिप्रेत्याह महदिति पक्षांतरमाह केचित्विति अयमपिचिंत्यः व्यष्टिस्वरूपंव्युत्पादयति प्रत्येकमिति व्यष्टित्वंनिर्व
क्ति व्यष्टित्वंनामेति अस्तुततः किंतत्राह एतदुपहितमिति तत्रप्रवृत्तिनिमित्तमाह तेजोमयेतितेजोमयंतेजोविकारोयदंतःकरणंतदेवोपाधिर्यस्यसतथोक्त
तस्यभावस्तत्त्वंतस्मादित्यर्थः समष्ट्युपाधिकहिरण्यगर्भाज्ञानव्यष्ट्युपाधिकतैजसज्ञानंचनिष्प्रयोजनं सुखप्राप्तिदुःखनिवृत्त्योरसंभवादित्याशंक्यसूत्रतैज
सात्मनोरभेदोपासनयाहिरण्यगर्भप्राप्तिफलसंभवात्तद्ज्ञानस्यतेनानिष्प्रयोजनत्वमित्यभिप्रेत्य तदनुसंधानोपयोगित्वेनसदृष्टांतंसमष्टिव्यष्ट्योस्तादात्म्यप्रति
इदंसूक्ष्मशरीरंसप्तदशलिंगंद्विविधंसमष्टिव्यष्टिभेदात् अपंचीकृतपंचमहाभूतानितत्कार्यंसप्तदशलिंगंसमष्टिरित्युच्यते एतदुपहितंचैत
न्यंहिरण्यगर्भइत्युच्यतेप्राणःसूत्रात्मेतिच ज्ञानक्रियाशक्तिमदुपहितत्वात् व्यापित्वाच्च अथवापूर्वोक्तापंचीकृतभूतेभ्यःसर्वव्यापकंलिंग
शरीरंपृथगेवोत्पन्नं तदेवसमष्टिरित्युच्यते समष्टित्वंनामगोत्वादिवत्सर्वत्रव्यष्टिष्वनुस्यूतत्वं तदुक्तं तेभ्यःसमभवत्सूत्रंलिंगंसर्वात्मकंमह
दिति केचित्तुवनवत् लिंगशरीरसमुदायःसमष्टिरितिवदंति प्रत्येकंलिंगशरीरंव्यष्टिरित्युच्यते व्यष्टित्वंनामव्यक्तिवत् व्यावृत्तत्वं एतदुपहि
तंचैतन्यंतैजसइत्युच्यते तेजोमयांतःकरणोपाधित्वात् सामान्यविशेषयोरि ॥ २१ पादनेनतदुपहितयोरपितादात्म्यंप्रतिपादयति सामान्यविशे
षयोरिवेति द्रव्यत्वादिसामान्यंपृथिवीजलादिर्विशेषःसत्तासामान्यद्रव्यंगुणादिर्वाविशेषःघटत्वादिजातिःपृथुबुध्नोदराकारघटादिर्व्यक्तिःतत्तश्चयथासामान्य
विशेषयोस्तादात्म्यं सर्वैरभ्युपेयतेजातिव्यक्त्योर्वातथासमष्टिव्यष्टिसूक्ष्मशरीरयोस्तादात्म्यमभ्युपेयते अस्माभिः ननुजातिव्यक्त्योर्वैशेषिकादिभिःसमवायाभ्यु
पगमात्कथंतत् दृष्टांतेनसमष्टिव्यष्ट्योस्तादात्म्याभ्युपगमइति चेन्नसमवायासिद्धेः तथाहिलक्षणप्रमाणाभ्यांवस्तुसिद्धिरितिन्यायविदांसमयः तदभावात्तदसिद्धिः
ननुनित्यसंबन्धत्वंसमवायलक्षणंप्रत्यक्षादीनिप्रमाणानीति चेत्यभ्युपगमात्कथंतदसिद्धिरिति चेन्न अद्वैतश्रुतिविरोधेनतदनिरूपणात् तथाहिश्रुतिस्तावत् सदे
वसौम्येदमग्रआसीदेकमेवाद्वितीयं सत्यंज्ञानमनंतंब्रह्मेतिब्रह्मणोनेनत्वमद्वितीयत्वंचप्रतिज्ञायतत्सिद्धयेतदैक्षतबहुस्यांप्रजायेयेतितत्तेजोऽसृजत यतोवाइमानि
संकेतः३॥

कौ॰ प्र॰ १९

भूतानिजायंते आनंदोब्रह्मेतिव्यजानात् आनंदाद्धेवखल्विमानिभूतानिजायंते इत्यादिनाब्रह्मव्यतिरिक्तस्यजगज्जातस्यतस्मादुत्पत्तिंतस्मिँल्लयंचप्रतिपाद्येन
तादात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्वमसिसयश्चायंपुरुषेयश्चासावादित्येसएकइत्यादिनाब्रह्मणोऽद्वितीयत्वंप्रतिपादयंति सा समवायस्यनित्यत्वेविरुध्येत
अतोनित्यसंबंधत्वलक्षणमित्यसंगतमेतत् ननु अज्ञानतत्संबंधादीनामनादित्वादनादिभावस्यनित्यत्वनियमात्कथंब्रह्मणोऽद्वितीयत्वमितिचेद्वाढं अज्ञानादी
नामध्यस्तत्वेनतेषामधिष्ठानमात्रतयाब्रह्मणोऽद्वितीयत्वोपपत्तेः नचानादिभावस्यनित्यत्वनियमः तस्यारोपितत्वेन ज्ञाननिवर्त्यत्वात् अनारोपितस्यानादिभा
वस्यनित्यत्वस्येष्टत्वात् नचतर्ह्येवंनाद्वितीयसिद्धयेप्रपंचस्यब्रह्मकार्यत्वप्रतिपादनमसंगतमिति वाच्यं नहिवयंप्रागसतःसत्तायोग्यत्वमाद्यक्षणसंबंधित्वं
वाकार्यत्वंब्रूमस्तयोरसंगतत्वात् नापिपरिणामित्वमसंभवात् किंतर्हि विवर्तापरनामाध्यस्तत्वंब्रह्मकार्यत्वेचेति ब्रूमः एवंचसति एतदात्म्यमिदंसर्वंवाचारं
भणंविकारोनामधेयं तदनन्यत्वमारंभणशब्दादिभ्यः इत्यादि श्रुतिसूत्राणिसामंजस्येनोपपद्यंते अन्यथाऽसंगतानिस्युः तस्माद्ब्रह्मव्यतिरिक्तस्यसर्वस्य

**वजातिव्यक्त्योरिवचसमष्टिव्यष्ट्योस्तादात्म्याभ्युपगमात्तदुपहितयोस्तैजससूत्रात्मनोरपितादात्म्यं एतदेवसूक्ष्मशरीरं ॥ ॥**

तत्वज्ञाननिवर्त्यतयाऽनित्यत्वावगमान्नित्यसंबंधत्वंसमवायलक्षणमित्यसंगतं किंचसमवायःसमवायिभ्यांभिन्नोऽभिन्नोवा आद्येपिसमवायःसमवायिनि
केनसंबंधेनवर्ततेसंयोगेनसमवायेनान्येनवानाद्यःद्रव्यधर्मत्वात्संयोगस्य नद्वितीयः अनवस्थाप्रसंगात् नतृतीयःसंबंधांतरानिरूपणात् स्वरूपसम्बन्ध
स्याप्रामाणिकत्वात् अन्यथासमवायासिद्धिप्रसंगात् नाद्यद्वितीयः अपसिद्धांतापत्तेः तस्मात्तत्स्वरूपस्यदुर्निरूपत्वात्तदसिद्धिः एवंप्रामाणाभावादपिसमवा
सिद्धिः तथाहितनावत्प्रत्यक्षंप्रमाणमतींद्रियत्वात्समवायस्यघटेरूपंसमवेतमित्यादिप्रतीतेर्वैदिकल्पिततयासर्वसंमतत्वाभावेनाप्रमाणत्वात् नापितत्रानु
नप्रमाणंलिंगाभावात् नचविशिष्टबुद्धिःविशेषणविशेषसबन्धविषयाविशिष्टबुद्धित्वादित्यनुमानेनतत्सिद्धिरितिवाच्यं अनुमानस्यार्थांतरत्वात् तस्माल्लक्षणप्र
माणयोरनिरूपणात् समवायासिद्धेर्जातिव्यक्त्योःसामान्यविशेषयोर्वासर्वत्रतादात्म्यमेवसंबंधइतिसिद्धं अनेनदृष्टांतेनसमष्टिव्यष्टिसूक्ष्मशरीरयोस्तादात्म्यप्रति
पादनंयुक्तमेवनच्चव्यष्टिसूक्ष्मशरीरस्यभौतिकतयासमष्टिसूक्ष्मशरीरोपादानत्वाभावात्कथंतयोस्तादात्म्यमितिवाच्यंअपञ्चीकृतभूतानांहिरण्यगर्भोपाधिभूतसमष्टिसूक्ष्म १९



अग्निः वाक्

काऽऽसंगपरिच्छेदाभिमानेनव्यष्टित्वमस्तुसवैवाचमेवप्रथमामत्यवहत् सोयदामृत्युमत्यमुच्यतसोऽग्निरभवदित्यादिश्रुतेः तथाचसमष्टिव्यष्टिलिंगशरीरयोस्तादा
त्म्यमुपपद्यते एवंचानयोस्तादात्म्यात् तदुपहितनैजससूत्रात्मनोरपितादात्म्यंभवतिभिन्नत्वेसतिअभिन्नसत्ताकत्वंतादात्म्यं ततश्चहिरण्यगर्भोहंग्रहोपास्त्या
तत्प्राप्तासर्वोत्कृष्टानंदावाप्तिःप्रयोजनंसंभवतीतितद्ज्ञानमर्थवदितिभावः पुर्यष्टकेनलिंगेनप्राणाद्येनसयुज्यतइतिश्लोकोक्तपुर्यष्टकशब्दार्थप्रक्रियांतरमाह
एतदेवेति ननुकेयमविद्येत्यत आह तत्रेतिकार्याविद्यांविभजते साचेति चातुर्विध्यमेवाह अनित्यइति असुखेसुखभिन्नेदुःखेतत्साधनेसुखबुद्धिरितितत्साधनबु
द्धेरप्युपलक्षणंतत्रयोगशास्त्रसंमतिमाह तदुक्तमितिसूत्रंव्याचष्टे अस्यार्थइतितत्वशोकमहिमंतस्मिन्वसतिशाश्वतीःसमाइत्यादिश्रुत्याब्रह्मलोकस्यनित्यत्वा
वगमात्कथमनित्यत्वंनचतस्यकर्मसाध्यत्वेनलौकिककृष्यादिफलवदंतव–त्तुफलंतेषामित्यादिस्मृत्यातद्यथेहकर्मचितोलोकःक्षीयतएवमेवामुत्रपु

**अविद्याकामकर्मसहितंपुर्यष्टकमित्युच्यते ज्ञानेंद्रियपंचकंकर्मेंद्रियपंचकंअंतःकरणचतुष्टयंप्राणादिपंचकंभूतसूक्ष्मपंचकंअविद्या**
**कामःकर्मचेतान्यष्टौतत्रकार्याविद्याद्रष्टव्या साचतुर्विधा अनित्येनित्यत्वबुद्धिःअशुचौशुचित्वबुद्धिःअसुखेसुखत्वबुद्धिःअनात्मन्यात्म**
**बुद्धिश्चेति तदुक्तं अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्येति ॥** २१

तइतिवाच्यंउपासनाविधेरप्रामाण्यप्रसंगात्॥ यथास्वर्गादावनित्यत्वदोषदर्शनेनस्वर्गतत्साधनेच्छानिवृत्त्याप्रवृत्तिनिरोधेननित्यफलोद्देशेनतत्साधने
ऽप्रवृत्तिरेवंब्रह्मलोकादावनित्यत्वदोषदर्शनेनतदुद्देशेनतत्साधनानुष्ठानेप्रवृत्तिनिरोधात्सर्वेषामन्यत्रप्रवृत्तिप्रसक्त्योपासनाविधायिशास्त्राप्रामाण्यंप्रस
ज्येत नचतदिष्टंब्रह्मलोकातिरिक्तानित्यफलमानाभावात् अन्यत्रापिदोषदर्शनेनप्रवृत्ति–निरोधात्संदिहानःसर्वोपिलोकोनर्थंप्राप्नुयात् मोक्षशास्त्रंसर्वमन
र्थकंप्रसज्येतेत्यतःकेवलकर्मसाध्यस्यानित्यत्वेपियथोक्तशास्त्रप्रामाण्यानुरोधात् कर्मसमुच्चयसाध्यस्यब्रह्मलोकस्यनित्यत्वमभ्युपगंतव्यं एवंचसतिश्रुतिस्मृत्योःश्रु
त्यंतरविरोधादितरविषयेव्याख्येयेनस्माद्ब्रह्मलोकस्यानित्यत्वकथनमसंगतमेवेत्यत्रब्रूमःनित्यत्वप्रतिपादकश्रुतेरर्थवादत्वाद्ब्रह्मलोकोऽनित्यएव तथाहिपूर्णा
त्यासर्वान्कामान्वाप्नोतीतिवचनस्यविध्यपेक्षिततयाइतरकर्मविध्यानर्थक्यप्रसंगेनचयथार्थवादत्वंतथाऽस्यापितथात्वमेवतच्चोपासनाविधिस्तुनित्यत्वम

पेशः स्वर्णं तत्करोतीति पेशस्कारी स्वर्णकार इत्यर्थः भृङ्गाख्यजन्तुविशेष इत्यपि केचित् ॥ ७ ॥

अ॰ कौ॰ पेस्यते किं तर्हि फलमात्रे अन्यथा स्वर्गादिसाधनविधेरपि तथात्वेन कर्मफलानां तारतम्याभावप्रसंगेनाग्निहोत्रानुष्ठातुरुत्तरकालकर्मानुष्ठाने उपासनायां च
प्र॰ प्रवृत्तिर्न स्यात् अतो विधिः फलमेवापेक्षते न तन्नित्यत्वमपि न च ब्रह्मलोकस्यानित्यत्वदोषदर्शनेन तत्साधनोपासनायामप्रवृत्त्या तद्विधायकशास्त्रस्याप्रमा
२० ण्यमानर्थक्यं च प्रसज्येतेति वाच्यं तर्हि कर्मविधायकशास्त्रस्यापि तथात्वप्रसंगात् न च कर्मफलानित्यत्वज्ञानेपि रागवशात्प्रवृत्तिसंभवेन कर्मशास्त्रस्य ना
प्रामाण्यमानर्थक्यं चेति वाच्यं तर्हि प्रकृतेपि तुल्यत्वात् किं च तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिश्रुतेः श्रवणवि
ध्यर्थेस्तनतयाभूतार्थवादत्वेन स्वर्गार्थवादवत् स्वार्थे प्रामाण्यसंभवेन पुण्यकार्यस्य ब्रह्मलोकान्तस्यानित्यत्वमेव न च ब्रह्मलोकस्य विद्यासाध्यत्वेन कर्मफ
लवैलक्षण्येन नित्यत्वमिति वाच्यं तत्त्वविद्याया ब्रह्मभिन्नसर्वनिवर्तकत्वेन तत्साधनत्वाभावादुपासनायास्तु मानसक्रियारूपत्वेन पुण्यानुभूतनयात्तत्सा
ध्यब्रह्मलोकस्यानित्यत्वस्यादेव किं च तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्य अविद्यां गम

अस्यार्थः अनित्ये ब्रह्मलोकादिसंसारफले नित्यत्वबुद्धिरेकाऽविद्या द्रष्टव्या ॥ ६ ॥ ६ ॥

यित्वान्यन्नवतरं रूपं कल्याणतरं रूपं कुरुते पैत्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वेत्यादिना ब्रह्मलोकान्तस्य सर्वस्य कर्मफलत्वेन संसारगोचरत्वमु
क्त्वा अथाऽकामयमान इत्यारभ्य ब्रह्माप्येतीत्यन्तेन संसारासंस्पृष्टमविद्याकामकर्मातीतं ब्रह्मभावं मोक्षं नित्यफलं ब्रह्मलोकातिरिक्तं दर्शयन्ती श्रुतिः अन्तस्तदितरि
क्तनित्यफलमानाभावं दर्शयन्ती तत्प्रलापः किं च यो भूमा तदमृतमथ यदल्पं तन्मर्त्यमतोऽन्यदार्तं अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य न क
श्चित्कर्तुमर्हति अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः आब्रह्मभुवनाल्लोकाः
पुनरावर्तिनोऽर्जुन इत्यादिश्रुतिस्मृतिभिरखण्डैकरसब्रह्मभावव्यतिरिक्तस्यानित्यत्वदुःखहेतुत्वावगमात् ब्रह्मलोकस्यानित्यत्वमेव अपि च यत्कार्यं तदनित्य
मिति व्याप्त्या भावकार्यस्य सर्वस्यानित्यत्वावगमात् ब्रह्मलोकस्यापि कर्मसाध्यत्वेन भावकार्यत्वेनानित्यत्वं स्यादेव तस्मादशोकमहिममित्यादिवाक्यानां यथाश्रुत्य
अर्थवादस्त्रिविधो गुणवादोऽनुवादो भूतार्थवादश्चेति प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः यथा आदित्यो यूप इत्यादि यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते ॥ प्रमाणान्त रा॰
रावगतार्थबोधकोऽनुवादः यथा अग्निर्हिमस्य भेषजम् इत्यत्र हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् ॥ प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको वादो भूतार्थवादः यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि ॥ १० ॥ १० ॥ १० ॥ २
नस्य ब्रह्मणोऽधिगमे उत्तराघस्याश्लेषः पूर्वाघस्य विनाशः कुतस्तद्व्यपदेशात् तयोरश्लेषविनाशयोर्व्यपदेशात् अश्लेषस्य तद्यथा पुष्करपलाश इत्यादिना विनाशस्य तद्यथेषीकातूलमित्यादि तस्मादिति ॥ शा॰ ॥ सू॰ ॥ १४ ॥
नयाविध्यपेक्षिततया च गुणार्थवादत्वाद् ब्रह्मलोकस्य श्रुतिस्मृतिन्यायैरनित्यत्वावगमाच्च तस्मिन्नित्यत्वबुद्धिरविद्येति निरवद्यं मूत्रमलपूर्णत्वाच्छरीरस्याशु
चित्वं तदुक्तं बीजात्स्थानादुपष्टंभान्निस्यन्दान्निधनादपि कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुरिति अन्यत्रापि अमेध्यपूर्णे कृमिजालसंकुले स्वभावदुर्गन्ध अ
शौचमध्रुवं कलेवरं मूत्रपुरीषभाजनं रमन्ति मूढा न रमन्ति पण्डिता इति तस्मिन्नशुचौ शुचित्वबुद्धिरविद्येत्याह अशुचिष्विति शुचित्वं निर्मलत्वं प्रतिकूलवेदनीयं पीडा
त्मकं दुःखं तत्साधनं ब्रह्मदत्तनापेयपानादि अनुकूलवेदनीयं प्रीत्यात्मकं सत्त्ववृत्तिरूपं सुखं तत्साधनं ब्रह्मपूजनं गंगाजलपानादि दुःखतत्साधनेषु सुखतत्सा
धनभ्रमं मुचुकुंद आह विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचित इति द्व्य मला
कं सर्वेषां प्रत्यक्षसिद्धा चेत्यतो दुःखादिषु सुखादिबुद्धिरविद्येति तदुक्तमित्याह दुःखेति शेषस्पष्टार्थं अविवेकेनाहंकारचिदात्मनोस्तादात्म्याध्यासपूर्वकमिदं मे स्थूला

अशुचिषु स्वशरीरपुत्रभार्यादिशरीरेषु शुचित्वबुद्धिः परा दुःखेषु दुःखसाधनेषु सुखतत्साधनबुद्धिरन्या अनात्मनि देहादिष्वहमित्यात्म
बुद्धिरितरा चेति अविद्या चतुर्विधेति कामो रागः कर्म त्रिविधं संचितमागामि प्रारब्धं चेति स्वकृतं फलमदत्वा अदृष्टरूपेण विद्यमानं सं
चितं कर्म यथा संध्यावन्दनाग्निहोत्रादि आगामि अस्मिन् शरीरे क्रियमाणं कर्म वर्तमानशरीरारंभकं प्रारब्धं कर्म संचितागामिकर्मणोः ॥

दिति जायमानोऽन्तःकरणवृत्तिविशेषो रागः कर्म विभजते कर्मेति त्रैविध्यमेवाह संचितमिति संचितं निरूपयति स्वेति तदुदाहरति यथेति तत्त्वज्ञानादूर्ध्वं क्रियमा
णं कर्मागामीत्यभिप्रेत्याहागामीति प्रारब्धं कर्म लक्षयति वर्तमानेति। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभं नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि प्रायश्चित्तैर
पैत्येनो यदज्ञानकृतं भवेत् कामतो व्यवहार्यस्तु वचनादिह जायते क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे तरति शोकं तरति पाप्मानं सर्वं पाप्मानं तरति ज्ञानाग्निः सर्वक
र्माणि भस्मसात्कुरुते तथा सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतं भूयस्तपस्वी भवति पंक्तिपावनपावनः परोक्षब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं बुद्धिपूर्वकृतं पा
पं कृत्स्नं दहति वह्निवत् प्रारब्धं भोगतो नश्येच्छेषं ज्ञानेन दह्यते इत्यरहिनयं कर्म तद्द्वेषि प्रियवादिनोः ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्
॥१॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥२॥ भोगेन त्वितरे क्षपयित्वा संपद्यत इत्यादिश्रुतिस्मृतीतिहासपुराणान्याये संचितागामिनोः फलभोगविरोधिकर्मब्रह्मज्ञानेना
इतरस्य सुकृतस्यापि दुष्कृतस्येवमहासंश्लेषः इतरपुलक्षणाविनाशस्यापि उभे उ हैवैष एते तरतीत्यादिश्रुतेः तुशब्दोऽवधारणार्थः पाते शरीरस्य पतनेन यथा चेदं सिद्धं शरीरस्य पाते विदुषो मुक्तिर्भवत्येवेति ॥ शा॰ ॥ सू॰ ॥ १ ॥
इतरे सुकृतदुष्कृते आरब्धकार्ये भोगेनैव क्षपयित्वानन्तरं ब्रह्मसंपद्यते तस्य तावदेव चिरमित्यादिश्रुतेरिति ॥ शा॰ ॥ सू॰ ॥ १ ॥

कपिलपतंजलिभ्यां४॥

श्यत्वंप्रारब्धस्यभोगैकनाश्यत्वमित्याह संचितेति नचसंचितस्यकर्मणः प्रायश्चित्तज्ञानाभ्यांनाशोस्तु आगामिकर्मणः कथंनाशःस्यात्तस्यतदानीमनुत्पन्नत्वा
दितिवाच्यं तस्याप्यश्लेषसंभवेनफलाजनकतयानष्टप्रायत्वादितितात्पर्येनकेवलंब्रह्मसाक्षात्कारेणकर्मनाशः किंत्वविद्यादिसर्वबंधनिवृत्तिर्भवतीत्याह किं
मिति केतेपंचक्लेशाइत्याकांक्षायांतान्निरूपयितुमाह तथाहीति पतंजलिसूत्रंपठति अविद्येति तत्राविद्यापूर्वमेवनिरूपितेत्याह कार्येति अस्मितांनिरूप
यति अहंकारस्येति सूक्ष्मावस्थाकारणावस्थेत्यर्थः कपिलपतंजलिभ्यामिदमेवमहत्तत्त्वमित्युच्यते वेदांतिभिः सामान्याहंकारइत्युच्यते तौभ्यांप्रकृतेर्महान्मह
तोहंकारइतिसृष्टिक्रमाभ्युपगमादस्माभिर्व्यष्ट्यहंकारस्यसामान्याहंकारापरपर्यायभूतस्य सूक्ष्माकाशादिसात्विकांशसमुदायादुत्पत्तिस्वीकारात् व्यष्ट्यहं

फलभोगेनविरोधिकर्मान्तरेणवाब्रह्मज्ञानेनवाविनाशः प्रारब्धस्यतुभोगेनैवविनाशः किंबहुनाप्रारब्धव्यतिरिक्तानां अविद्यादीनांपं
चक्लेशानांतत्त्वज्ञानान्नाशः तथाहि अविद्यास्मितारागद्वेषाभिनिवेशाः पंचक्लेशाः कार्यकारणरूपाद्विविधाविद्यानिरूपिता। अहं
कारस्यसूक्ष्मावस्थाऽस्मिता इदमेव महत्तत्त्वंसामान्याहंकारइतिचोच्यते रागउक्तः द्वेषःक्रोधः स्वीकृतस्यपुनस्त्यागासहिष्णुत्वंअभि
निवेशः एतेषांपंचानांब्रह्मसाक्षात्कारान्निवृत्तिः ज्ञात्वादेवंमुच्यतेसर्वपाशैरित्यादिश्रुतेः पाशैः पंचक्लेशैरित्यर्थः तिष्ठतुतावत्प्रासंगिकं
एवंसूक्ष्मशरीरोत्पत्तिंनिरूप्य पंचीकृतभूतानिस्थूलभूतानि ॥ २२

कारसूक्ष्मावस्थासामान्याहंकारोवक्तुंशक्यतेनेनचतत्रप्रमाणाभावः पू
वीकृत्वादितिभावः तत्रप्रमाणमाह ज्ञात्वेति आदिशब्देनतद्योवेदनिहितंगुहायांसोऽविद्याग्रंथिंविकिरतीहसौम्यगुहाग्रंथिभ्योविमुक्तोऽमृतोभवति॥ य
सर्वेप्रमुच्यते कामायेस्यहृदिस्थिता अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुते॥ इत्यादिश्रुतयोगृह्यंते स्मृतिरपिज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनइत्या
दिर्ज्ञात्वादेवंसर्वपाशापहानिः क्षीणैःक्लेशैर्जन्ममृत्युप्रहाणिरितिवाक्यशेषानुरोधेनोदाहृत श्रुतिंव्याचष्टे पाशैरिति अस्यार्थः देवंस्वप्रकाशमहंब्रह्मास्मी
तिसाक्षात्कृत्वाविद्यास्मितारागद्वेषाभिनिवेशैः पंचभिः क्लेशापरपर्यायपाशशब्दाभिधेयैर्मुच्यते इत्यर्थः एतत्सर्वमभिप्रेत्यभगवतावार्तिकाचार्येणाप्यु
क्तं यःपश्येत्सर्वगंशांतमानंदात्मानमद्वयं नतेनकिंचिदाप्तव्यं ज्ञातव्यंवावशिष्यते कृतकृत्योभवेद्विद्वान् जीवन्मुक्तोभवेत्सदेति प्रासंगिकंपरिसमाप्यप्रकृ
तमनुसरति तिष्ठत्विति प्रसंगादागतंप्रासंगिकंउपसंहरत्येवमिति एवमुक्तरीत्यायथोक्तक्रमेणेतियावत् एवंवार्तिककृदपिसृष्टिक्रममाह स्म आसीदेकंपरं
ब्रह्मनित्यंमुक्तमविक्रियं तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकं तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकंस्पर्शात्मकस्ततोवायुस्तेजोरूपात्मकंततः॥
आपोरसात्मकास्तस्मात्ताभ्योगंधात्मिकामही शब्दैकगुणमाकाशं शब्दस्पर्शगुणोमरुत् शब्दस्पर्शरूपगुणैस्त्रिगुणंतेजउच्यते शब्दस्पर्शरूपरसगुणैराप
श्चतुर्गुणाः शब्दस्पर्शरूपरसगंधैः पंचगुणामही तेभ्यःसमभवत्सूत्रंलिंगंसर्वात्मकंमहदिति तेभ्योऽपंचीकृतभूतसात्विकांशराजसांशेभ्यःसमष्टिव्यष्ट्यात्म
कंलिंगशरीरमुत्पन्नमित्यर्थः एवंसूक्ष्मशरीरोत्पत्तिंसप्रपंचांनिरूप्यस्थूलभूतोत्पत्तिंवक्तुंतानिलक्षयति पंचीकृतेति तान्यपंचीकृतभूतानांतामसांशेभ्योजा
यंतइतिशेषः पंचीकरणप्रक्रियामनुभाषते पंचीकरणंत्विति ननुछांदोग्येतेजोऽबन्नानांसृष्टिमुक्त्वात्रिवृत्करणप्रतिपादनात्पंचीकरणप्रक्रियायाश्चानुत्पादनम

पंचीकरणंतुपूर्वोक्तानामाकाशादीनांतामसांशान् एकैकंद्विविधासमंविभज्य तत्रएकैकंपुनश्चतुर्विधाविभज्यस्वांशंपरित्यज्य इतरां
शेषुयोजनंपंचीकरणं तासांत्रिवृतंत्रिवृतमेकैकंकरवाणीतित्रिवृत्करणश्रुतेः पंचीकरणस्याप्युपलक्षणत्वात् पंचीकरणंप्रामाणिक।
मेववैशेष्यात्तुतद्वादस्तद्वादइतिन्यायेनस्वांशभूयस्त्वाद्विशेषव्यपदेशोपिसंभवति ॥ २२

संगतंतत्रप्रमाणाभावात् नचसृष्टिपरिपूर्तये
भूतत्रयसमर्थश्रुतेर्वियदधिकरणन्यायेनतैत्तिरीयश्रुत्यनुसारेणचाकाशंवायुसृष्ट्वातेजोऽसृजतेतिव्याख्यातत्वेनपंचीकरणस्याप्युचितत्वादिति वाच्यंत्रिवृ
करणेनापिसर्वव्यवहारोपपत्तेरित्याशंक्याह तासामिति तासांपृथिव्यप्तेजोरूपाणांमध्येएकैकांदेवतांत्रिवृतं यथाभवति तथाकरवाणिएषात्रप्रक्रियापृ
थिव्यप्तेजसांत्रयाणांभूतानांमध्यएकैकंभूतंद्विधाविभज्यतत्राप्येकंभागंद्विधाविभज्यस्वांशंपरित्यज्येतरयोर्योजनीयंत्रिवृत्करणंएतदभिप्रायेणसूत्रकारोप्या
ह संज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वत उपदेशादिति श्रुतिसूत्रप्रसिद्धत्वेनभूतानांत्रिवृत्करणमेवनपंचीकरणमितिवाचस्पतिमिश्राः २ आचार्यास्तुछांदोग्य
नोपंचभूतसर्गविवक्षायांत्रिवृत्करणमेवनपंचीकरणमितिप्रतिपादनेप्रकरणविरोधप्रसंगात् आकाशवाय्वोःशब्दस्पर्शानुपलब्धिप्रसंगाच्चानिच्छतापि
पंचीकरणमवश्यमभ्युपगंतव्यंयदिपंचीकरणाभावेपि आकाशवाय्वोःशब्दस्पर्शोपलब्धिःस्यात्तर्हितद्वदेवत्रिवृत्करणाभावेपितेजोबऽन्नेषुरूपाद्युपलब्धिप्रस

त्रिवृत्कुर्वतःपरमेश्वरस्यैवसंज्ञामूर्तिक्लृप्तिः नामरूपव्याकरणंकार्यंभवितुमर्हतिकस्मात्सेयंदेवतेत्युपक्रम्यव्याकरवाणीतिव्याकरणस्यपरदेवताकर्तृकत्वोपदेशादिति॥ शा॰॥ सू॰॥ ३॥

दधिमंडाकारः परिणामः ५॥

कौ० त्वाव्यवहारोपपत्तौ त्रिवृत्करणमपिन सिद्ध्येत् ततश्च श्रुतेरप्रामाण्यप्रसज्येत्ततश्च श्रुतेरप्रमाण्यपरिहारायसर्वत्रव्यवहारोपपत्तेश्च श्रुतिसूत्रयोः पंचीक
प्र० रणंविवक्षितमेवेतित्रिवृत्करणश्रुत्रिसूत्रयोः पंचीकरणस्याप्युपलक्षणत्वात्पंचीकरणंप्रामाणिकमित्याहुः ननुयदि पंचीकरणेन सर्वेषां भूतानामे
२ कीभावस्तर्हीयंपृथिवीदंजलमित्यादिविशेषव्यपदेशः कथंस्यादित्याशंक्यसूत्रेणपरिहारमाह वैशेष्यादिति विशेषस्यभावोवैशेष्यंस्वांशभूयस्त्वंतस्मा
त्तद्वादः इयंपृथिवीदंजलमिति विशेषव्यपदेशइतिसूत्रार्थः उक्तमेवार्थमनुसंदधातिस्वांशेति पंचीकरणस्यप्रयोजनमाह एवं चेति पंचीकरणेकृते
सतीत्यर्थः॥ आकाशेपंचीकृताकाशेएवंसर्वत्रद्रष्टव्यं आपोवार्कस्तद्यदपांशर आसीत्तत्समहन्यत साष्टथिव्यभवत्तस्यामश्राम्यत्तस्यतप्तस्यतेजोरसोनिव

एवं चसति। आकाशे शब्दोभिव्यज्यते वायौशब्दस्पर्शौ तेजसिशब्दस्पर्शरूपाणिजलेशब्दस्पर्शरूपरसाः ——————

——पृथिव्यांशब्दस्पर्शरूपरसगंधाः तथाच पंचीकृतपृथिव्याः ब्रह्मांडमुत्पन्नंतदंतर्वर्तिलोकाः चतुर्दशब्रह्मांडान्मनुशतरूपेजा
ते ब्रह्मांडांतर्वर्तिपृथिव्याः औषधयुत्पन्नाः औषधिभ्योऽन्नंपितमातृभ्यांभुक्तान्नपरिणामरेतः शोणितद्वारास्थूलशरीरमुत्पन्नंतच्चतुर्वि
धंजरायुजमंडजंस्वेदजमुद्भिज्जंचेति मनुष्यादिशरीरंजरायुजं पक्षिपन्नगादिशरीरमंडजं यूकामशकादिशरीरंस्वेदजं तृणगुल्मादिश
रीरमुद्भिज्जं उक्तंस्थूलशरीरंपुनः प्रकारांतरेणद्विविधं समष्टिव्यष्टिभेदात्॥ २२ तेनाग्निरिरिति श्रुतिमाश्रित्यपंचीकृतपृथिव्याः ब्रह्मांडोत्पत्तिमाह

नथेतिसोवैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत्सहै नावतासस यथास्त्रीपुमांसौसंपरिष्वक्तौसइममेवात्मानंद्वेधापातयत्ततः पतिश्चपत्नीचाभव
नामितिश्रुतिमाश्रित्यब्रह्मांडात्मनोविराट्पुरुषात् मनुशतरूपयोरुत्पत्तिमाह ब्रह्मांडादिति पृथिव्या औषधयः औषधिभ्योऽन्नं अन्नात्पुरुषइति श्रुत्युक्त।
अर्कनाम्नः सूर्यप्रसिद्धेस्तद्वलादप्शब्दोपि ततपरएवकिंनस्यादितिशंकापनुत्तयेप्रागुक्तमपामर्कनामत्वमनुवदन्ताभ्यः पृथिवीसृष्ट्यादिकमाह आपोवार्क इतिवैअवधारणेआपएवअत्रार्कोनादित्यइत्यर्करू
ढितोपिवाचनिकयोगस्यानवकाशतयाप्राबल्येनापामेवार्कनामा अर्चतोवैमइतिप्रागुक्तनिरुक्तिवलात् उक्तंहिकिंपनादित्यत्ररूढितोपिवाचनिकयोगस्यप्राबल्यंतद्यदपांततासां अपां यत् शरःमंडआसीत्तत्शरः
समहन्यत निविडोभवत् सेतिविधेयापेक्षयास्त्रीलिंगनिर्देशः संहतशरः पृथिव्यभवत् तस्यांस्वसृष्टायांपृथिव्यां अश्राम्यदंतर्यामितयाप्राविशत् तत्स्रष्टातदेवानुप्राविशदितिश्रुतेः अग्निर्मेस्यादित्यतप्यच्चेतिशेषः तस्यश्रांत
स्यतप्तस्याग्निर्मेस्यादितिचिंतयतः तेजोरसः तेजसः सामर्थ्यस्परसः सारभूतोवलदेवतारूपोग्निः अग्रजत्वादग्रणीत्वात् अंगिनांनेतृत्वादग्निनामामुख्यवायुः निरवर्तत उदपद्यतेतिश्रुत्यर्थः॥ ८॥ ८॥ ॥ शाग २

क्रममाश्रित्यपृथिव्याः सकाशादौषध्याद्युत्पत्तिक्रमेणस्थूलशरीरोत्पत्तिमाह ब्रह्मांडांतर्वर्तीति स्थूलशरीरंविभजते तदिति जरायुजादीनिदर्शयति मनु
ष्यपश्वादीनिप्रकारांतरेणस्थूलशरीरंविभजते उक्तमिति समष्टिस्थूलशरीरंव्युत्पादयति पंचीकृतेति पश्चांतरमाह अथवेति तत्रैवमतांतरमाह वनव
दिति ततः किंतत्राह एतदिति समष्टिस्थूलशरीरोपहितचैतन्येविराड्वैश्वानरशब्दयोः प्रवृत्तिनिमित्तमाह विविधेति व्यष्टिस्वरूपंव्युत्पादयति प्रत्येकमिति
व्यष्टिस्थूलशरीरोपहितचैतन्यस्यविश्वसंज्ञामाह एतदिति तत्रयुक्तिमाह सूक्ष्मेतिननुसमष्टिस्थूलशरीरोपाधिकवैश्वानरज्ञानंव्यष्टिस्थूलशरीरोपाधिक
विश्वज्ञानंचनिष्प्रयोजनंसुखदुःखप्राप्तिपरिहारयोरसंभवादित्याशंक्यविश्ववैश्वानरयोरभेदोपासनयावैश्वानरप्राप्त्यातदानंदावाप्तिप्रयोजनसंभवा
दित्यभिप्रेत्यतदुपासनोपयोगित्वेन —————— समष्टिव्यष्टिस्थूलशरीरयोस्तादात्म्यप्रतिपादनेनतदुपहितयोरपितादात्म्यंप्रतिपादयति अनयोरिति

पंचीकृतपंचमहाभूततत्कार्यब्रह्मांडंतदंतर्वर्तिकार्यंसर्वंसमष्टिरित्युच्यते अथवाव्यक्तिषुगोत्वादिवत् सर्वव्यष्टिष्वनुस्यूतंपंचीकृतभू
तकार्यंब्रह्मांडात्मकंव्यापकंसमष्टिः वनवत्सकलस्थूलशरीरसमुदायोवासमष्टिरित्युच्यते एतदुपहितं चैतन्यंविराट्वैश्वानर इतिचोच्य
तेविविधंराजमानत्वात् सर्वनराभिमानित्वाच्चप्रत्येकंस्थूलशरीरंगवादिव्यक्तिवद्यावृत्तंव्यष्टिरित्युच्यते एतदुपहितंचैतन्यंविश्वइत्यु
च्यते सूक्ष्मशरीरसपरित्यज्यस्थूलशरीरेप्रविष्टत्वात्॥ २२ यथासत्तासामान्यद्रव्यादिविशेषयोस्तादात्म्यंसमवायस्य पूर्वमेवनिराकृतत्वात्

तथाव्यष्टिस्थूलशरीरस्यसमष्टिस्थूलशरीरांतर्गतपंचीकृतभूतकार्यत्वेनोपादानोपादेयसंभवात्तयोस्तादात्म्यात्तदुपहितयोरपिविश्ववैश्वानरयोस्तादा
त्म्यं एवमनयोर्भेदासंभवादभेदांसमादाय —— अहमेववैश्वानरोस्मीति अभेदोपासनयातत्साक्षात्कारेणतदानंदावाप्तिः संभवात् ज्ञानंसप्रयोजन
मितिभावः अथवाश्रुत्युक्तप्रकारेणविश्ववैश्वानरतैजससूत्रात्मप्राज्ञेश्वरान् ज्ञात्वाप्रथमंविश्वंवैश्वानरात्मत्वेनाहमेववैश्वानरोस्मीतिविभाव्यततस्तैज
संसूत्रात्मत्वेनाहमेवसूत्रात्मास्मीतिविभाव्यानंतरंप्राज्ञमीश्वरात्मत्वेनाहमेवेश्वरोस्मीतिविभाव्यानंतरंसमष्टिस्थूलसूक्ष्मकारणोपाधिकमोंकारवाच्यंप
रंब्रह्माहमस्मीतिसर्वात्मत्वेनविभाव्यपश्चात्मनसैकाग्रतामापन्नेसतिसर्वंजगत्स्थूलसूक्ष्मादिक्रमेणनिर्विशेषचिन्मात्रेऽखंडैकरसानंदेपरब्रह्मणिविल

संमुख४॥ रहित३॥

वे.कौ. प्यतद्नंतरमेकाग्रेण मनसास्वस्याखंडैकरसब्रह्मानंदात्मतां साक्षात्कुर्यादित्यभिप्रायेण समष्टिव्यष्ट्योस्तादात्म्यनिरूपणेन तदुपहितयोस्तादात्म्यनिरू
प्र. पणंकृतं तदुक्तं समाधिकालात्प्रागेवं विविच्यातिप्रयत्नतः स्थूलसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेदिति कल्पतरावाचार्यैरप्युक्तं निर्विशेषं परं ब्रह्म साक्षा
२३ त्कर्तुमनीश्वराः येमंदास्तेऽनुकंप्यंते सविशेषनिरूपणैः वशीकृते मनस्येषां सगुणब्रह्मशीलनात् तदेवाविर्भवेत्साक्षा दपेतोपाधिकल्पनमिति ए
तदभिप्राया श्रुतिरपि एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति तस्माद्वैश्वानरादिज्ञानमर्थवदित्यर्थः ननु व्यष्टि
स्थूलसूक्ष्मकारणाभिमानिनो विश्वतैजसप्राज्ञाः संसारिणः प्राक्निरूपितास्ते किं स्वतंत्रा जीवाः आहोस्विदेकस्यैवावस्थाविशेषाः नाद्यः सर्वेषां स्वतंत्रत्वतय
परस्परभेदाभ्युपगमे सुषुप्तिस्वप्नयोरनुभूतस्य पदार्थस्य जाग्रदवस्थायां विश्वस्य स्मरणाभावप्रसंगात् अन्यानुभूतपदार्थस्मरणायोगादन्यस्यान्यथानुप्र

अनयोः समष्टिव्यष्ट्योः सामान्यविशेषयोरिव तादात्म्याभ्युपगमादेतदुपहितं विश्ववैश्वानरयोरपि तादात्म्यं एक एव जीवो जाग्रदवस्था
यां स्थूलसूक्ष्मकारणाविद्याभिमानी सन् विश्व इत्युच्यते — स एव स्वप्नावस्थायां सूक्ष्मशरीरकारणाविद्याभिमानी सन् तैजस इत्युच्य
ते — स एव सुषुप्तौ कारणाविद्याभिमानी सन् प्राज्ञ इत्युच्यते — स एव शरीरत्रयाभिमानरहितः सन् शुद्धपरमात्मा भवति ॥ ॥

एक एवेति अयं भावः असंगोदासीनः प्रत्यगात्माऽविद्यामात्मत्वेनोपगतः प्राज्ञः इति उच्यते स एव सूक्ष्मशरीरमा
संगात् तस्माद्द्वितीयः परिशिष्यत इत्याह त्वेनोपगतो विश्व एवं विश्वतैजसप्राज्ञाः प्रत्यगात्मन एकस्यैवावस्थाविशेषा इतीममेवार्थं स्पष्टयति जाग्रदव
त्वेनोपगतस्तैजसः स एव स्थूलशरीरमात्मत्वेनोपगतो विश्व एवं विश्वतैजसप्राज्ञाः प्रत्यगात्मन एकस्यैवावस्थाविशेषा इतीममेवार्थं स्पष्टयति जाग्रदव
स्थायामिति अथेदानीं तत्त्वंपदार्थशोधनोपायान्वयव्यतिरेकौ दर्शितौ तथाहि जाग्रदवस्थायां शरीरत्रयसाक्षित्वेन स्वप्ने शरीरद्वयसाक्षित्वेन सुषुप्तौ कारणश
रसाक्षित्वेन समाधौ शुद्धस्वप्रकाशचिद्रूपेणाभानमन्वयः स्वप्ने स्थूलशरीराभावं सुषुप्तौ सूक्ष्मशरीराभानं समाधौ कारणशरीराभानं च शरीरत्रयविनिरेक
चित्तस्य वृत्तिशून्यतयात्मैकाकारावस्था समाधिस्तदानीं देहादिषु सर्वत्राभिमानस्य निवृत्तत्वात्समाध्यवस्थायां शरीराणां व्यतिरेको भवत्येव तस्यामवस्थाया म
त्मा वस्तुतः शुद्धः परमात्मा भवति सर्वाभिमानशून्यत्वादिदमेवान्वयव्यतिरेकाभ्यां त्वंपदार्थशोधनं यद्यावृत्तं तत्सर्वमनात्मेति निश्चित्य यदन्वितं स आत्मेति नि श्च

श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्च ज्ञानेन्द्रियाणि तेषां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः एवं वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि तेषां च क्रमेण वह्नीन्द्रोपेन्द्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः मनोबुद्ध्य
हङ्कारचित्तानि चतुष्टयान्तःकरणानि तेषां क्रमेण चन्द्रचतुर्मुखशङ्कराच्युता अधिष्ठातृदेवता इति ॥ २॥
यः तदुपायान्वयव्यतिरेकाविति शुद्धेति समाधिरवस्थायामिति शेषः जाग्रदाद्यवस्था निरूपयितुमाह तस्येति ताएवोद्दिषति जाग्रदिति जाग्रदवस्थां लक्षयति दि
गिति आदिशब्देन दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेंद्रमृत्युकाः तथा चंद्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः इति श्लोकोक्तदेवता वा तादयो गृह्यंते ताभिर्देवताभि
रनुगृहीतानि अधिष्ठातानीन्द्रियाणि यानि श्रोत्रादीनि तैरिति यावत् शब्दादिविषयानुभवावस्था जाग्रदवस्थेत्युक्ते स्वप्नेऽतिव्याप्तिस्तत्रापि वासनामयविष
यानुभवस्य सत्वात्तद्व्यावृत्त्यर्थं दिगादीत्युक्तं स्वप्नावस्थामिंद्रियाणामुपरतत्वात्तज्जन्यविषयाननुभवान्नातिव्याप्तिः विषयानुभवावस्था जाग्रदावस्थेत्युक्ते सुषु
प्तावतिव्याप्तिस्तत्राप्यज्ञानविषयकसाक्ष्यनुभवस्य सत्वात् अत उक्तं शब्दादीति सुषुप्तौ शब्दादिविषयाणामंतःकरणवृत्तेस्तदाश्रयप्रमातृत्वोपाध्यंतःकरण
दीनां च लीनत्वान्नातिव्याप्तिः शब्दादिविषयाकारांतःकरणवृत्तिप्रतिबिंबितचैतन्यं शब्दादिविषयानुभवः अंतःकरणवृत्तिमग्रे निरूपयिष्यते स्वप्नावस्थां ल

तस्यैवाभिमानिनो जीवस्यावस्थाः पंच जाग्रत्स्वप्नसुषुप्तिमूर्छामरणभेदात् दिगाद्यधिष्ठातृदेवतानुगृहीतैरिंद्रियैः शब्दादिविषयानुभ
वावस्था जाग्रदावस्था जाग्रद्भोगप्रदकर्मोपरमे सतिइन्द्रियोपरमे जाग्रदनुभवजन्यसंस्कारोद्भूतविषयतज्ज्ञानावस्था स्वप्नावस्था जाग्रत्स्वप्नोभयभो
गप्रदकर्मोपरमेण स्थूलसूक्ष्मशरीराभिमाननिवृत्तिद्वारा विशेषविज्ञानोपरमात्मिका बुद्धेः कारणात्मनावस्थितिः सुषुप्तिः मुद्गरप्रहारादिजनितविषादे
नविशेषविज्ञानोपरमावस्था मूर्छावस्था ॥ लक्षयति जाग्रदिति विषयतज्ज्ञानावस्था स्वप्नावस्थेत्युक्ते सुषुप्तावतिव्याप्तिस्तद्वारणाय जाग्रदित्या
दिविशेषणं सुषुप्तावज्ञानतत्साक्षिणोरनादिसिद्धत्वेन संस्कारोद्भूतत्वाभावान्नातिव्याप्तिः तावत्युक्ते जाग्रदवस्थायामतिव्याप्तिः रजतानुभवजन्यसंस्कारो
द्भूतानिर्वचनीयविषयतद्ज्ञानस्य तादृशस्मृते वीसत्वात्तद्वारणायेंद्रियोपरम इति उपरमे निमित्तमाह जाग्रदिति सुषुप्तिलक्षणमाह जाग्रदिति
विशेषविज्ञानोपरमात्मिका सुषुप्तिरित्युक्ते जाग्रदवस्थायामतिव्याप्तिस्तदा समाधौ विशेषविज्ञानोपरमसत्वात् अत उक्तं बुद्धेः कारणात्मनावस्थानमिति समा
धवंतः करस्य स्वरूपेण सत्वान्नातिव्याप्तिरित्यर्थः विशेषविज्ञानोपरमे निमित्तमाह स्थूलेति तत्रापि निमित्तमाह ॥ जाग्रदिति मूर्छावस्थां लक्षयति मुद्गरेति वि
शेषविज्ञानोपरमावस्था मूर्छेत्युक्ते जाग्रदवस्थायामतिव्याप्तिरत उक्तं मुद्गरेति मुद्गरप्रहारजनितविषादावस्था मूर्छा इत्युक्ते जाग्रदवस्थायां अतिव्याप्तिरत उक्तं

विशेषेति मूर्छाया अवस्थांतरत्वेव्यासस्सूत्रं संवादयति तदुक्तमिति तृतीयेस्थितं मुद्गरादिप्रहारादिनिमित्ते सति पुंसां यां मूर्छामाचक्षते लोकाः सा मूर्छा जाग्रदाद्यंतर्भूता आहोस्विदवस्थांतरमिति संशयः तत्र श्रुत्यादिष्ववस्थांतरत्वेनाप्रसिद्धत्वाज्जाग्रदादिष्वंतर्भूता तत्रापि विशेषविज्ञानोपरमसाम्यात् मूर्छा सुषुप्तावेवांतर्भूता नावस्थांतरमिति प्राप्तेऽभिधीयते मूर्छा जाग्रदादिभ्योऽवस्थांतरं परिशेषात् सा तावन्न जाग्रत्स्वप्नयोरंतर्भवति विज्ञानाभावान्नापि मरणं पुनरुत्थानदर्शनात् नापि सुषुप्तौ लक्षणवैलक्षण्यात् तथाहि सुषुप्तस्य प्रसन्नवदनत्वनिष्कंपत्वादिकं लक्षणं मुग्धस्य तु विकरालवदनत्वसंकंपत्वादिकमतो लक्षणवैलक्षण्यान्न सुषुप्तावंतर्भवति मूर्छा किंतु परिशेषादवस्थांतरमेवेति सकंपत्वादीनां सुषुप्तिवैलक्षण्येपि विशेषविज्ञानोपरमेण सुषुप्तिसाम्पादर्द्धसंपत्ति मूर्छेति निर्णयः मरणावस्थां लक्षयति एतदिति देहाभिमानो द्विविधः सामान्याभिमानो विशेषाभिमानश्चेति सुषुप्तौ सामान्याभिमानः पुनरुत्थानदर्शनात् जीवस्य निरभिमानस्योत्थानायोगात् अतः सुषुप्तौ जीवस्य देहे सामान्याभिमानस्तिष्ठत्येव जाग्रत्स्वप्नयोर्विशेषाभिमानः मनुष्योहं ब्राह्मणोहमिति मरणे भोगे

तदुक्तं मुग्धेऽर्द्धसंपत्तिः परिशेषादिति एतच्छरीरभोगप्रापककर्मोपरमेण द्विविधदेहाभिमाननिवृत्त्या संपिंडितकरणग्रामावस्थाभाविशरीरप्राप्तिपर्यंतं मरणावस्था केचित्स्वाप्नोक्तावस्थास्वंतर्भावं वदंति अत्र श्रुतिस्मृतिपुराणप्रमाणानि प्रसिद्धानि ॥ ७ ॥ ॥

प्रारब्धक्षये द्विविधस्य सामान्यविशेषरूपस्याभिमानस्य निवृत्त्या भाविदेवादिशरीरप्राप्तिपर्यंतं संपिंडितकरणग्रामावस्था एकीकृत चतुर्दशकरणावस्था मरणावस्थेत्यर्थः। सूत्रकृता मरणावस्थाया जाग्रदादिवद्बहिर्भावेनानुक्तत्वात् यथोक्तजाग्रदादिष्वंतर्भावं वदंति मतांतरमाह केचित्विति तत्रापि मरणावस्थायां न जाग्रत्स्वप्नयोरंतर्भावः देहाभिमानाभावान्नापि सुषुप्तौ पुनरुत्थानाभावात् अतः परिशेषान्मूर्छायामंतरभावः तत्र कर्मशेषे सति पुनरुत्थानं भोगप्रदकर्मविशेषाभावे मरणमिति भावः ननु संतु विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः वैश्वानरसूत्रात्मेश्वरेषु को निर्णय इति तत्राह एवमिति यथा विश्वतैजसप्राज्ञा एकस्यैवावस्थाविशेषाः एवं वैश्वानरसूत्रेश्वरा इत्यर्थः ननु भयाऽऽ इत्यादिश्रवणात् कथं वैश्वानरसूत्रात्मनोरीश्वरत्वं तस्य जीवलिंगत्वादीश्वरस्य तद्रहितत्वात् तथा च श्रुतिः योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीत्याद्या अशनायाद्यतीतत्वमीश्वरस्य दर्शयति तस्मादेकस्य परमेश्वरस्यावस्थाविशेषा

आक्षिप्तपुरुषः परमात्मैवोपदिश्यते कुतः सुखविशिष्टाभिधानात् एवकारेणात्र संशयः कार्य्य इति सूच्यं तत् सुखविशिष्टब्रह्मवाक्योपक्रमे श्रूयते तस्यैवेहाभिधानादित्यर्थः इति॥ शा॰॥ सू॰॥ १॥ १॥ ॥ वैश्वानरः परमेश्वरः कुतः साधारणशब्दविशेषात् साधारणशब्दयोर्विशेषः साधारणशब्दविशेषः वैश्वानरशब्दोयद्यप्यन्यादित्यात्मना साधारणआत्मनश्च जीवपरमात्मनोस्तथाप्यत्र विशेषः तस्य हवा एतस्येत्यादिनोक्तो मूर्धेत्यादिस्तस्मादिति॥ शा॰॥ सू॰॥ १॥

इत्यसंगतमिति चेन्मैवं सूत्रकृता बादरायणेन वैश्वानरसूत्रात्मनोः सुखविशिष्टाभिधानादेव च वैश्वानरः साधारणशब्दविशेषादित्यत्रेश्वरत्वस्योक्तत्वात् कथं तर्हि हिरण्यगर्भं जनयामास पूर्वं नमेतावतः कालस्य पुरस्तादसृजत तं जातमभिव्यादधात् सभाणमकरोत्सोविभेत् सर्वे नैव रेमे कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमित्यादिश्रुतिस्मृतिसूत्रैस्तयोर्जन्ममरणावंधुमोक्षभयाऽऽ इत्यादिप्रतिपादनं शृणु वैराग्यार्थं तत्प्रतिपादनं तथाहि श्रुत्यादिभिस्तयोर्जन्मादिषु प्रतिपादितेषु तत्रापि दोषदर्शनेन वैराग्यमुत्पद्यत इति तत्प्रतिपादनं न च तावता तयोर्जीवत्वं तथात्वे ईश्वरस्यापि तथात्वप्रसंगात् तस्यापि कामनादिश्रवणात् कामनादेर्जीवलिंगत्वात्तस्माद्यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तमीश्वराणां परमं महेश्वरं आप्तकाममात्मकाममित्यादिश्रुत्या निरतिशयज्ञानैश्वर्यादिशक्तिमत्त्वावगमाद्यथा कामनादिश्रवणेपि न जीवत्वं तथा ज्ञानमप्रतिहतं यस्य वैराग्यं च जगत्पतेः ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयमिति स्मृत्या सूत्रात्मवैश्वानरयोरप्रतिहतस्वतःसिद्धनिरतिशयज्ञानैश्वर्यादिशक्त्यावगमाज्ज

कार्यस्य ब्रह्मलोकस्यात्यये विनाशे तस्य ब्रह्मलोकस्याध्यक्षेण परेण सहातः परमेष्ठिनः परं ब्रह्म अवतिकृतः अनात्माभिधानादिति॥ शा॰॥ सू॰॥ ६॥

एवं एक एव परमात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन् वैश्वानर इत्युच्यते अहमेव वैश्वानरोस्मीत्येतदुपासनया तत्प्राप्तिः फलं भवति ॥ ९ ॥

न्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च न जीवत्वमत ईश्वरत्वमेव युक्तं चैतत् यथा जीवस्य नात्माश्रुतेर्नित्यत्वाच्च ताभ्य इति न्यायेन जन्माद्यभावे निश्चितेपि चराचरव्यपाश्रयस्तु तद्व्यपदेशो भाक्तस्तद्भावभावित्वादिति न्यायेनौपाधिकमुत्पत्तिविनाशवत्त्वं तथाऽऽसंभवस्तु सतोऽनुपपत्तेरिति न्याये न न जायते म्रियते वा विपश्चित् आकाशवत्सर्वगतश्च नित्य इत्यादिश्रुत्या च जन्माद्यभावे निश्चितेपि समष्टिस्थूलसूक्ष्मोपाधिप्रयुक्तमुत्पत्त्यादीश्वरस्याप्यस्तु हिरण्यगर्भादिरूपेण न च तावता जीवत्वं अनावृतस्वरूपेत्वेन परिच्छेदाभिमानाभावात् आवृतस्वरूपेण परिच्छेदाभिमानस्यैव जीवत्वप्रयोजकत्वात् स्वोपाधिसंबंधमात्रेण जीवत्वे निरुपाधिकस्य ब्रह्मणो जीवत्वेश्वरत्वयोरनभ्युपगमेन सोपाधिकस्य तदभ्युपगमेन तस्य जीवत्वं प्रसज्येत तस्मात्सूत्रात्मवैश्वानरयोः सूत्रकारेणेश्वरत्वप्रतिपादनात्तत्प्रतिपादकश्रुतिस्मृतिसंभवाच्च औपाधिकजन्मादिप्रतिपादनस्य वैराग्यार्थत्वाच्च निरतिशयज्ञानैश्वर्यादियो

गो वे जीविजास्य यो जन्ममरणयोर्व्यपदेशः देवदत्तो जातो मृत इति स चराचरव्यपाश्रयः स्थावरजंगमदेहविषयो मुख्यः जीवे तु भाक्तो गौणः स्यात् कुतः जन्ममरणव्यपदेशस्य तद्भावभावित्वात् देहोत्पत्तिनाशानुविधायित्वादित्यर्थः इति॥ शा॥ सू॰॥ ५॥ | सतः सदात्मकस्य ब्रह्मण उत्पत्त्यसंभवः कुतः अनुपपत्तेः सत्सामान्यात्सत्सामान्यस्योत्पत्तेरनुपपत्तेरिति॥ शा॰॥ सू॰॥ ५॥ | आत्मा जीवो नोत्पद्यते कुतः अश्रुतेः उत्पत्तिप्रकरणेषु जीवोत्पत्तेरश्रुतेस्ताभ्यः श्रुतिभ्यः जीवस्य नित्यत्वावगमाच्चेति शा॰॥ सू॰ ६॥

सुतेजस्त्वगुणा द्यौर्वैश्वानरस्य मूर्द्धा विश्वरूपत्व— गुणकः सूर्यश्चक्षुः पृथग्वर्त्मा नानावर्त्मगमनमात्मास्वभावो यस्य स तथा नानागतित्वगुणो वायुः प्राणः बहुलत्वगुण आकाशोऽस्य संदेहः देहमध्यं रयिधनं तद्गुणा आपोऽस्य बस्तिः मूत्रस्थानं वै
श्वानरस्य होमाधारत्वसंपादनार्थमुर एवेत्यादि ॥ ६॥ अभिमुखेन विश्वं मिमीते जानातीत्यभिविमानः संमुखेनेति ५॥ ॥ अध्ययनकृतवान् ॥ ४

गाच्चानावृतस्वरूपत्वेन परिच्छेदाभिमानाभावाच्च तयोरीश्वरत्वं एवं च तदुपासकानां तत्प्रसादेन क्रममुक्तिरुपपद्यते तस्मादेकस्यैव परमात्मनो वैश्वानरसूत्रे ।
श्वरा अवस्थाविशेषादित्यभिप्रेत्येममर्थं स्पष्टयति एक एवेइति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेज— इत्यादिश्रुत्युक्तसकलगुणविशिष्टवैश्वा
नरोऽहमस्मीत्यर्थः एतदिति वैश्वानरोपासनयेत्यर्थः यथोक्तप्रकारेण वैश्वानरपरमात्मानं ज्ञात्वा तदुपासनेन साधकस्तद्भावं प्राप्नोतीत्यत्र संमतिमाह वैश्वानरेतिशारी
रके समन्वयलक्षणे स्थितं वैश्वानरः साधारणशब्दविशेषात् को न आत्मा किं ब्रह्मेत्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्य तेजसस्त्वा ।
दिगुणयोगं द्युसूर्यप्रभृतीनामेकैकोपासननिंदया मूर्धादिभावमुपदिश्याम्नायते यः प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु
भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पा ।
दावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय इत्यादि तत्र संशयः किमिह वैश्वानरो जठराग्निरुत भूताग्निराहोस्विद्देवता

वैतत्येषु २ मुखं १

**वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां एवं एवश्रुत्यर्थस्य तथा प्रतिपादनात् स एव परमात्मा समष्टिसूक्ष्मशरीर तत्कारणमायोपहि**
**तः सन् हिरण्यगर्भ इत्युच्यते ॥ २ ॥** त्माथवा शारीरः किंवा परमेश्वरः इति वैश्वानरात्मशब्दाभ्यां संशयः तत्र जाठराग्निर्वा भूताग्निर्वा देवतात्मा वा
वैश्वानरः स्यात् श्रुतिषु सर्वत्र वैश्वानरशब्दप्रयोगात् अथवा शारीरो वा स्याद्वैश्वानर आत्मशब्दादात्मशब्दस्य तत्रैव मुख्यत्वाद्वैश्वानरशब्दस्यापि लक्षणया त
त्र प्रवृत्तिसंभवात् तस्माच्छारीरो वैश्वानरो न परमेश्वर इत्येवं प्राप्तेऽभिधीयते वैश्वानरः परमेश्वरो भवितुमर्हति कस्मात् साधारणशब्दविशेषात् वैश्वानरशब्दस्त्रय
स्य साधारण आत्मशब्दो द्वयस्य — साधारणस्तथापि विशेषो दृश्यते मूर्धैव सुतेजा इत्यादिना न चायं जाठरादीनां संभवत्यतः परमेश्वरो वैश्वानरस्तस्य सर्वकारण
त्वात्सर्वात्मत्वोपपत्तेः तस्मिन्यथोक्तविशेषसंभवात् किंच सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति वैश्वानरस्य परमेश्वरत्वेन तदुपासकस्य तद्भावप्राप्त्या स
सर्वलोकाश्रयान्नात्त्वं संभवति अन्यथा तन्न स्यात् अपि च तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति वैश्वानरस्य परमेश्वरत्वेन तदुपासक
स्य तद्भावमापन्नस्य सर्वपाप्मदाह उपपद्यते इतरथा तदयोगात् एवं च सति वैश्वानरादिशब्दाः भाष्यकारोक्तप्रकारेण परमेश्वरे यथासंभवं योजनीयाः तस्माद्वैश्वा



अंतर अक्षिमध्यगतः परमात्मैव कुतः उपपत्तेः आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां परमात्मन्येवोपपत्तेः ३॥

नरः परमेश्वर इति सूत्रकारभाष्यकाराभ्यां श्रुत्यर्थः प्रतिपादितस्तस्माद्वैश्वानरस्येश्वरत्वं तदुपासकस्य तत्प्राप्तिः फलं भवतीति भावः हिरण्यगर्भस्वरूपमाह स
एवेति श्रुत्युक्तगुणोपेतः सूत्रात्मा हिरण्यगर्भोऽहमस्मीत्युपासकस्य तद्भावापत्तिफलमाह एतदिति हिरण्यगर्भोपासनयेत्यर्थः हिरण्यगर्भस्येश्वरत्वे तदुपासक
स्य तत्प्राप्तौ च संमतिमाह अंतर उपपत्तेरिति समन्वयलक्षणे स्थितं अंतर उपपत्तेः य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मे
ति तद्यद्यप्यस्मिन्सर्पिर्वोदकं वा सिंचति वर्त्मनी एव गच्छतीति श्रूयते तत्र संशयः किमत्राक्ष्यधिकरणे उपास्यत्वेनोपदिश्यते छायात्मा उत देवतात्मा आहोस्विच्छा ।
रीरः किंवा परमेश्वर इति तत्र दृश्यते इति निर्देशाच्छायात्मोपास्यत्वेनोपदिश्यत इति प्राप्तं तस्यैव चक्षुः संनिधानात् अथवा देवतात्मा स्यादिंद्रियानुग्राहकत्वेन
संनिहितत्वात् यद्वा शारीरः स्यात्तस्यापि करणस्वामित्वेन जाग्रदवस्थायां चक्षुर्विशेषतः संनिहितत्वात् तत्रैवात्मशब्दस्यापि मुख्यत्वादेवं निश्चिते सत्यमृतत्वादिकं
शारीरे यथाकथंचिद्योजनीयं तस्माच्छारीर उपास्यः न तु परमेश्वर इत्येवं प्राप्ते ब्रूमः अक्षिस्थाने परमेश्वर एवोपास्यत्वेन निर्दिश्यते न छायादिः कस्माद्वाक्यशेषगत

घृतं ४

**एतदुपासनया तत्प्राप्तिः फलं भवति ॥ २ ॥**

सर्वफलोदयहेतुत्वम् १ सूक्ष्मत्वम् १ प्रकाशकत्वम् १॥

संपद्वामत्वं वामनत्वं भामनत्वं मृतत्वादिगुणजातस्य परमेश्वर एवोपपत्तेः इतरत्रासंभवात् किंच वाक्योपक्रमे प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सुखविशिष्टब्रह्माभिधा
नात् य एषोऽक्षिणि पुरुषो दृश्यते इत्यत्रापि य एष सर्वनाम्नोः प्रकृतपरामर्शित्वेन तस्यैव प्रतिभिज्ञानात् आचार्यस्तु ते गतिं वक्तेत्यग्नीनां वचनाच्च वाक्योपक्रमनिर्दिष्टं
सुखविशिष्टं ब्रह्म इहाक्षिस्थाने ध्येयत्वेनोपदिश्यत इति गम्यते अन्यथा प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात् परमेश्वरस्यापि उपासनार्थमक्षिस्थानत्वमुपप
द्यते तस्मात्परमेश्वर एवोपास्यः उपकोशलेनाधीता विद्योपकोशलविद्या तस्यामियमाख्यायिका उपकोशलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवा
सेति श्रुताविथमाम्नाता उपकोशलो नाम कश्चिद्ब्रह्मचारी सत्यकामस्य गुरोर्निकटे ब्रह्मचर्यं कृतवान् तमुपकोशलं शिष्यमग्निपरिचर्यानिमित्तं गृहे स्थापयित्वा गुरुः
[illegible] स्वस्त्रीकार्यव्याजेनार्थं देशांतरं जगाम ततोऽपकोशलस्य परिचर्यया संतुष्टास्त्रेताग्नयो ब्रह्मविद्यामुपदिदिशुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्यनंतरं स्वस्वविद्यां
[illegible] इति प्रश्नोऽकृते आचार्यस्तु ते गतिं वक्तेत्यप्यूचुः अनंतरमागतेनाचार्येण प्रशांतं शिष्यं प्रति ब्रह्मविन्मुखमिव त्वन्मुखं प्रतिभाति केनोपदिष्टा ब्रह्मविद्येति

औ० प्र० २६

तस्माज्जायते तज्जं तस्मिंल्लीयते तल्लं तेनानिति तदनु इति तज्जलानिति ॥६॥ संकल्पमय इत्यर्थः ॥६॥ स उपासकः क्रतुं ध्यानं मनोमयः प्राणशरीरो भारूप इत्याकारकं कुर्वीत ॥४॥

तस्माज्जायते तज्जं तस्मिंल्लीयते तल्लं तेनानिति तदनु इति तज्जलानिति ॥६॥ संकल्पमय इत्यर्थः ॥६॥ सउपासकः क्रतुं ध्यानं मनोमयः प्राणशरीरो भारूप इत्याकारकं कुर्वीत ॥४॥ ... प्रतिपेदे शरणागतं शिष्यं सत्यकामो गुरुरुपदिदेश यएषोक्षिणि पुरुषो
दृष्टे अग्निभिरुपदिष्टा आचार्यो गतिं वक्ष्यतीत्युक्तमित्युक्तोपकोशल आचार्यं शरणं प्रतिपेदे शरणागतं शिष्यं सत्यकामो गुरुरुपदिदेश यएषोक्षिणि पुरुषो
दृश्यते इत्यादिना अतइयं विद्योपकोशलेनाधीतत्वादुपकोशलविद्येत्युच्यते तस्मिन्नुपकोशलविद्यावाक्यविचारे सूत्रकारभाष्यकाराभ्यां समष्टिप्राणोपा
धिकसुखविशिष्टपरमात्मोपास्त्यातत्प्राप्तिः प्रतिपादितेतिभावः इदानीमीश्वरस्वरूपमाह सएवेति मायास्वरूपं प्राग्निरूपितं समष्टिस्थूलसूक्ष्मशरीरराहित्य
कैवल्यं य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सक्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप इत्यादिश्रुत्युक्त
गुणकः परमात्माह मस्मीत्युपासनया तत्प्राप्तिफलं भवतीत्याह तदिति ईश्वरभावापत्तिः फलं भवतीत्यर्थः तत्र संमतिमाह सर्वत्रेति समन्वयलक्षणे स्थितं सर्वत्र प्रसि
द्धोपदेशात् सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोम
यः प्राणशरीरो भारूप इत्यादि श्रूयते तत्र संशयः किमत्र मनोमयत्वादिगुणकः शारीर उपास्यत्वेनोपदिश्यते आहोस्वित्परं ब्रह्मेति तत्र शारीर एवोपास्यत्वेनोप

सएव केवलमायोपाधिकः

अंतर उपपत्तेरित्यस्मिन्नधिकरणे सूत्रकारभाष्यकाराभ्यां उपकोशलविद्यायां तथैव प्रतिपादनात् सन् ईश्वर इत्युच्यते तदुपासनया तत्प्राप्तिः फलं भवति सर्वत्रप्रसिद्धोपदेशादिति ॥ २१

जीवधर्मीब्रह्मणि ४

दिश्यते मनोमयत्वादिगुणजातस्य तस्यैवमु
पपत्तेः यद्यपि जीवोऽप्रकृतो वाक्योपक्रम
स्यत्वेनोपपत्तेः न परं ब्रह्म अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुत्या प्राणादिसंबंधप्रतिषेधेन तस्मिन्मनोमयत्वादिगुणानुपपत्तेः यद्यपि जीवोऽप्रकृतो वाक्योपक्रम
गतं ब्रह्म प्रकृतं तथापि शमगुणविध्यर्थवादगतत्वेन ब्रह्मणोप्य प्रकृतत्वादिलिंगाच्छारीर एवोपास्य एवं निश्चिते वाक्यशेषगतगुणजातं शारीरे योजयितव्यं तस्मा
च्छारीर एवोपास्यो न ब्रह्मेति प्राप्तेभिधीयते परमेव ब्रह्म मनोमयत्वादिगुणकमुपास्यतया प्रतिपत्तव्यं कस्मात् सर्वेषु वेदांतेषु तस्यैवोपास्यत्वेन प्रसिद्धतयोपदेशात
अत्रापि प्राणःशरीरमस्येति समासांतर्गतसर्वनामश्रुत्या संनिहितस्य ब्रह्मणः परामर्शत्वात् तद्धितार्थस्य सामान्यरूपतयापेक्षायानिवर्तकत्वाभावाच्च वाक्यशेष
गतानां सत्यकामत्वादिगुणानां ब्रह्मण्येवोपपत्तेश्च शारीरेऽनुपपत्तेः शमविधिपर — इदपि वाक्याद्ब्रह्मैवोपास्यत्वेन ग्राह्यं एवं निश्चिते शारीरपरमात्मनोरभेदा
न्मनोमयत्वादिकं ब्रह्मण्यपि संभवति यद्यपि वैपरीत्यं तथापि समारोप्यस्वरूपेण विषयो रूपवान् भवेत विषयस्य तु रूपेण समारोप्यं नरूपवदित्याचार्यवाचस्प

मादिगुणानां यो विधरूपासीतेत्याकारकसत्यार्थवादत्वेन तज्जलानित्यादिवाक्यानां तद्गतत्वेन ब्रह्मणो ॥ अधिष्ठाने १ ॥ मयट्प्रत्यय
प्राकृतत्वमित्यर्थः ५॥

एतं परमात्मानम भिसंभवामि इतः प्रेत्य १॥

तिमिश्रैरुक्तत्वान्न वैपरीत्यं किंच एतमितः प्रेत्याभिसंभावितास्मि ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया तमेव शरणं ग
च्छ सर्वभावेन भारतेति श्रुतिस्मृतिभ्यामुपास्योपासकयोः शारीरपरब्रह्मणोर्गतगंतव्यभावेन भेदव्यपदेशात् अनंतकल्याणगुणकं सर्वज्ञं सर्वशक्तिनित्यशुद्धबु
द्धमुक्तसत्यपरमानंदाद्वयं परं ब्रह्मोपास्यं यद्यपि नान्योतोस्ति द्रष्टा क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेति श्रुतिस्मृतिभ्यां परमात्मनोऽन्यः शारीरो नास्ति तथा
प्यविद्याकल्पितभेदमादाय तद्व्यपदेशः एवं च यथोक्तपरमेश्वरोपासनया शारीरस्योपासकस्य तत्प्राप्तिः फलं भवति यथा क्रतुरस्मिंल्लोके पुरुषो भव
ति तथेतः प्रेत्य भवति मद्भक्ता यांति मामपि मत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतमिति इत्यादिश्रुतिस्मृतिभ्यः तस्माद्ब्रह्मैवोपास्यमिति शांडिल्यवि
द्यावाक्ये निश्चितं सूत्रकारभाष्यकाराभ्यां एवमन्यत्रापि दहर उत्तरेभ्यः अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतराकाशस्तस्मिन्यदं
तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्याम्नायते अत्राकाशशब्देन भूताकाशः प्रतिपाद्यते शारीरः परमेश्वरो वेति संशयः आकाशशब्दस्य भूतविशेषे रूढ

शांडिल्यविद्यायां दहर उत्तरेभ्यः इति दहरविद्यायां च सूत्रकारभाष्यकाराभ्यां यथोक्तेश्वरोपासनया तत्प्राप्तिप्रतिपादनात् तं यथा यथोपासते तत्तथैव भवतीतिश्रुतेश्च भावनामांद्येतु नारतम्येन सार्ष्टिसारूप्यसामीप्यसालोक्यफलानि भवंति ॥ २२

तदेवेह प्रतिपाद्यत इति प्राप्ते अ
थवा शारीरो वा प्रतिपाद्यते दहराकाशशब्देन तस्मिन्नात्मशब्दस्य मुख्यत्वात् तस्माच्छारीर एव दहरो न परमेश्वर इति प्राप्ते ब्रूमः दहराकाशः परमेश्वरो भवितुम
र्हति कस्मादुत्तरेभ्यो हेतुभ्यः तथाहि उत्तरत्र यावान् वायमाकाशस्तावानेषोंतर्हृदय आकाश इति वाह्याकाशेन दहराकाशस्योपमानोपमेयभावः प्रतिपाद्यते स च
भूताकाशपरिग्रहे नोपपद्यते तेन तस्योपमेयत्वायोगात् तथा जीवपरिग्रहेपि तस्योपाधिपरिच्छिन्नस्य तेनतद्योगात् किंच य आत्माऽपहतपाप्मा विजरो विमृत्यु
र्विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इति वाक्यशेषगतानां गुणानां शारीरभूताकाशयोरनुपपत्तेः दहराकाशः परमेश्वर एव अपि च तद्ये इहात्मानमनु
विद्य व्रजंत्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति द
हराकाशोपासकस्य तद्भावापत्तिफलं दर्शयति तच्च शारीरभूताकाशपरिग्रहे नोपपद्यते तस्माद्दहराकाशः परमेश्वर एवेति दहरविद्यावाक्ये सूत्रकारभाष्यकारा

सत्यकामादिगुणकम् ३॥
गुणान् २॥ दहरवाक्ये आत्मशब्दस्याप्युक्तत्वात् ॥६॥ जीवात् २॥

योगिनां भौतिककेष्वेव स्वातंत्र्यं न भूतेष्वित्याह जगद्व्यापारवर्जमिति कुतः प्रकरणात् सर्वभूतस्थशिवाक्येषु परमात्मनः प्रकृतत्वात् नचतेपि परमात्मवत्प्रकृता इत्याह असन्निहितत्वाद्योगिनां चकारो महाभू
तस्थैर्योगिनामशक्यत्वमपि बोधयतीति ॥ शा॰॥ सू॰॥ ६॥

म्याभीश्वरोपासनया तद्भावापत्तिः प्रतिपादिता तस्मात्तदुपासनया तत्प्राप्तिः फलं भवति इति निरवद्यं ईश्वरोपासनया तत्प्राप्तिः फलं भवतीत्यत्र श्रुत्यंतरं सं
वादयति तंयथेति तं परमात्मानं यथा येन प्रकारेण यादृशगुणविशिष्टत्वेनोपासने अहमेश्वरोस्मीति ध्यायति तत्थैव तादृशमेव फलं भवति तदुक्तं स
दाशिवेन रघुनाथं प्रति येनाकारेण ये मत्पीमामेवैकमुपासते तेनाकारेण तेभ्योहं प्रसन्नो वांछितं दद इति चकारेण स्मृतिं समुच्चिनोति यंयंवापि स्मरन्भा
वंत्यजत्यंते कलेवरं तंतमेवैति कौंतेय सदा तद्भावभावित इति स्मृतेश्चेत्यर्थः ननु भावनोत्कर्षेण तत्साक्षात्कारवतस्तत्फलं भवतु भावनामांद्ये किं स्यादिति त
त्राह भावनेति मनुष्यत्वविस्मृतिपूर्वकं तद्भावापत्तिर्भावनोत्कर्षः देहे मनुष्योहमिति यथा तद्वत् ईषन्मनुष्यत्वस्मरणपूर्वकं तद्भावापत्तिर्भावनामांद्यं त
त्तारतम्येन परमेश्वरेण समानैश्वर्यभोगवत्त्वं सार्ष्टिः जगद्व्यापारवर्जं तदुक्तं जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्चेति समानरूपत्वं सारूप्यं समीपवर्ति

**साम्नः सायुज्यं सालोकतां जयतीत्यादिश्रुतेः ये पुनः साधनचतुष्टयसंपन्ना विचारासमर्थाः मंदप्रज्ञाः तेषां गुरुमुखात् ब्रह्म निश्चि**
**त्य सर्वोपाधिविनिर्मुक्तं सच्चिदानंदलक्षणं ब्रह्माहमस्मीति निर्गुणब्रह्मोपासनया अस्मिन्नेव शरीरे जीवदवस्थायां मरणावस्थायां**
**वा ब्रह्मलोके वा उत्पन्नब्रह्मसाक्षात्कारेण तत्प्राप्तिः फलं भवति ॥** २१

त्वं सामीप्यं समानलोकत्वं सालोक्यं एवं भावनातारतम्येन फलतारतम्ये
श्रुतिं प्रमाणयति साम्न इति साम्नः प्राणस्य सायुज्यं तादात्म्यं तद्भावापत्तिरित्यर्थः न वान्यस्यान्यभावापत्तिः कथं विरोधादिति वाच्यं समष्टिकारणनामेव प
रिच्छेदाभिमानेन व्यष्टित्वप्राप्तिरिति अपरिच्छिन्नोपासनया परिच्छेदाभिमाननिवृत्त्या व्यष्टित्वनिवृत्तिसंभवेन तद्भावापत्ते रविरोधादुपासकस्य इममेवार्थं श्रुति
राह देवो भूत्वा देवानप्येति एतादृशं फलं भावनोत्कर्षेण भवति तन्मांद्ये पूर्वोक्तमेव भवतीति दर्शयति सालोकतामिति आदिशब्देन एतासां देवतानां सायुज्य
सार्ष्टितां समानलोकतां यांतीति इत्यादिश्रुतयो गृह्यंते सालोक्यादिफलभेदः पुराणेषु स्फुटः एवं सगुणोपासकानां तत्पदवाच्यार्थनिरूपणप्रसंगेन तत्तदुपा
सनया तत्तत्प्राप्तिफलमुक्त्वोपासनाप्रसंगेन सर्वतो विरक्तानां मंदप्रज्ञानां विचाराक्षमाणां ब्रह्मजिज्ञासूनां निर्गुणब्रह्मोपासनया तत्साक्षात्कारद्वारा ईक्षतिक
र्मव्यपदेशात्स इति न्यायेन मणिप्रभायां मणिबुद्ध्या प्रवृत्तस्य मणिप्राप्तिवन्निर्गुणब्रह्मप्राप्तिं दर्शयति ये पुनरिति नित्यानित्यवस्तुविवेकादिसाधनचतुष्ट
॥२ सध्यातव्यः परमात्मैव कुतः ईक्षतिकर्मत्वेन व्यपदेशात् वाक्यशेषे ध्यातव्यस्येक्षतिकर्मत्वेन व्यपदेशात् ईक्षतिधातोः कर्मपुरुषं समीक्षते इति ॥ शा॰॥ सू॰॥

यं एतच्च अग्रे निरूपयिष्यति ब्रह्मविचारासमर्था इत्यर्थः तत्र हेतुमाह मंदेति न च मंदप्रज्ञानां ब्रह्मज्ञाने कथं प्रवृत्तिः स्यादिति वाच्यं मुमुक्षावशात् तथाच श्रुति
स्मृतीतिहासपुराणेषु मंदप्रज्ञानां मैत्रेयीप्रभृतीनां मुमुक्षूणां मोक्षसाधने ज्ञानादौ प्रवृत्तिदर्शनात् प्रायः स्त्रीणां मंदप्रज्ञत्वाच्च एवं पुरुषाणामपि तत्संभवात् न काप्य
नुपपत्तिरिति भावः अत्राक्षरयोजना ये मंदप्रज्ञा गुरुमुखाद्ब्रह्म निश्चित्य निरुपाधिकं ब्रह्माहमस्मीत्युपासते तेषां निर्गुणब्रह्मोपासनयोत्पन्नब्रह्मसाक्षात्कारे
ण तत्प्राप्तिः फलं भवतीति कदा भवतीत्याकांक्षायामाह अस्मिन्नेवेति निर्गुणब्रह्मोपास्तेर्निदिध्यासने पर्यवसानान्निदिध्यासनस्य ब्रह्मसाक्षात्कारप्रत्यंतरंगसाधन
त्वावगमात्तेनानात्मन्यात्मबुद्धिनिवृत्तौ तत्संस्कृतांतःकरणस्य भावनापरिपाकतारतम्येनास्मिन्नेव शरीरे जीवदव— स्थायां मरणावस्थायां वा ब्रह्मलोके वा ब्रह्मसा
क्षात्कारो भवति ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः ध्यानयोगेन संपश्यन्त्यात्मन्यात्मानमात्मना ध्यानेनात्मनि पश्यंति केचिदात्मान
मात्मनेति श्रुतिभ्यः ततः प्रारब्धक्षीणे स्वस्वरूपेण ब्रह्मप्राप्तिरित्यर्थः ननु मंदप्रज्ञानां ब्रह्मस्वरूपस्याज्ञातत्वेन निर्गुणब्रह्मोपास्तिः कथं स्यान्न ह्यज्ञातत्वं केन

**श्रुतेर्न्यायसामान्यात् ओमित्येतेनैवाक्षरेण परं पुरुषं अभिध्यायीत स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते ओमित्यात्मा**
**नं युंजीत ओमित्येवं ध्यायथ आत्मानं इत्यादिश्रुतिभ्यः ॥** २१

चिदुपासितुं शक्यत इत्यत आह गुरुमुखादिति तद्विज्ञानार्थं स गुरुमेवाभि
गच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं शांतो दांत उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत् आचार्यवान्पुरुषो वेद यस्य देवे परा भक्तिः तद्विद्धि प्रणिपातेन
परिप्रश्नेन सेवया उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः इत्यादिश्रुतिस्मृत्युक्तप्रकारेण गुरुमुपसृत्य तत्प्रसादात्तदु
पदेशेन ब्रह्म तत्पदार्थं त्वंपदार्थं च विवेकेन देहेंद्रियमनोबुद्ध्यहंकाराज्ञानविलक्षणत्वेन मायाविलक्षणत्वेन स्थूलसूक्ष्मकारणशरीराधिष्ठानभूतप्रत्यगात्मानं
मायाधिष्ठानं सच्चिदानंदलक्षणमद्वितीयं परमात्मानं च निश्चित्य निश्चयेन ज्ञात्वा यत्तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्ययमस्थूलमनणु एव ह्रस्वमदीर्घं अप्रा
णो ह्यमनाः शुभ्र असंगो ह्ययं पुरुषः निष्कलं निष्क्रियं शांतं निरवद्यं —— निरंजनं अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च नित्यः सर्वगतः स्थाणुरचलोयं सना
तनः अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते तदव्यक्तमाह ॥ ॥

अ॰कौ॰
प्र॰
२८

वाजसनेयके श्रूयते एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमित्यादि तथान्यत्रापि तासां विशेषप्रतिषेधबुद्धीनां किं संर्वासां सर्वत्र प्राप्तिः उत व्यवस्थेति संशये श्रुतिविभागात् व्यवस्थाप्र
प्तौ उच्यते॥ अक्षरविषयास्तु विशेषप्रतिषेधबुद्धयः सर्वाः सर्वत्रावरोद्धव्याः सामान्यतद्भावाभ्यां समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारस्तदेव च सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते औ
पसदवदिति निदर्शनं यथा जामदग्न्येऽहीने पुरोडाशिनीषूपसत्सु चोदितासु पुरोडाशप्रदानमंत्राणामग्नेर्वेहोत्रं वेरध्वरमित्येवमादीनामुद्गातृवेदोत्पन्नानामप्यध्वर्युभिरभिसम्बन्धो भवति अध्वर्युकर्तृकत्वात्पुरोडा
शप्रदानस्य प्रधानतंत्रत्वाच्चाङ्गानां एवमिहाप्यक्षरतंत्रत्वात्तद्विशेषणानां यत्र कविदुक्तानामक्षरेण सर्वत्राभिसम्बन्ध इति ॥ शा॰॥ सू॰॥ १॥ १॥
अक्षरधियां त्वविरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं इत्यादिश्रुतिस्मृतिन्यायैर्ब्रह्मणो निरुपाधिकत्वावगमान्निर्गुणब्रह्मोपासनं संभवत्येव स्वस्य विचारास
मर्थत्वेपि गुरूपदेशेन तद्ज्ञानस्य परोक्षस्य संभवादित्यर्थः निर्गुणोपासनमभिनीय दर्शयति सर्वेति उक्तलक्षणं ब्रह्मैवाहमस्मि अहं ब्रह्मास्मीति व्यतिहारेणोपास
नं कर्तव्यं त्वं चाहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योहं सोसौ योसौ सोहं व्यतिहारो विशिषंति हीतरवदित्यादिश्रुतिसूत्रेभ्यः तथा चोक्तं चिदात्माहं नि
त्यशुद्धबुद्धमुक्तसदद्वयः परमानंदसंदोहो वासुदेवोहमस्मि १ इति वक्ष्यमाणविलापनेन ब्रह्मण उपाधिविनिर्मोको द्रष्टव्यः एवं यथोक्तोपासनेन तद्यथोक्तं फलं भव
व्यतिहार एवात्रोपास्यत्वेनोपदिश्यते न त्वात्मन ईश्वरेणैकत्वमात्रं इतरवत् यथादितरे सर्वात्मत्वादयो गुणा उपास्यत्वेनोपदिश्यंते न तद्वत् प्रतिज्ञातेर्थे हेतुः विशिषंति हीति समाम्नातारो जीवपरमात्मनोर्व्यतिहारेण विशिषंति
तथाहमित्यादिनेति शा॰॥ सू॰॥ २॥ २॥ २॥

भगवतान्युक्तं ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् यः प्रयाति त्यजन्देहं स याति परमां गतिं इति अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य
उपासते तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः इति च एवं तत्पदार्थस्य मायोपहितस्य ब्रह्मणः॥ २१ तीति कुतो ज्ञायते इत्याकांक्षायामाह श्रु

श्रुतिमूलकस्य १

तेरिति तं यथा यथोपासते तेन तथैव भवतीत्युदाहृतश्रुतेः तन्मूलस्य प्रतीकालंबनान्नयतीति बादरायण उभयथाप्यदोषात्तत्क्रतुश्चेति न्यायस्य प्रकृतेपि तुल्यत्वादे
वं ज्ञायते इत्यर्थः यथोक्तब्रह्मोपासनेन तत्प्राप्तौ प्रामाण्येन श्रुत्यंतराण्युपन्यस्यति ओमित्यनेनेति अत्र तृतीया द्वितीयार्थे द्रष्टव्या ओंकारवाच्यः परमात्माहमस्मी
ति यः परं पुरुषं परमात्मानमभिध्यायीत उपासीत स उपासकः पुरुषमीक्षत इति श्रुतौ योजना अयमेवार्थः श्रुत्यंतराणामपि आदिशब्देन ओंकं ब्रह्म खं ब्रह्म पुरा
मित्यादिश्रुतिर्गृह्यते तत्र स्मृतिमप्याह भगवतेति प्रणवजपं कुर्वन् सन् मां तत्पदलक्ष्यं परमात्मानं वासुदेवमहं ब्रह्मास्मीत्यनुस्मरन्ननुसंधानं कुर्वन् देहं त्यजन् यः
पूर्वोक्तयोगधारणावान्मरणं प्राप्नोति स परमां गतिं ब्रह्मभावलक्षणां मुक्तिं याति प्राप्नोतीत्यर्थः त्रयोदशाध्यायश्लोकमप्यत्रैवोदाहरति अन्ये त्विति अन्ये साधन च
प्रतीकोपासकभिन्नान्सर्वानुपासकानमानवपुरुषो नयतीति बादरायण आचार्यो मन्यते न च सर्वेषा — मित्यत्र सर्वोपासनेषु मार्गोपसंहारोक्तिविरोधस्तत्राह उभयथादोषादिति प्रतीकालम्बनानामनयनेऽ
[illegible] कृतः संकल्पो ब्रह्मप्राप्तौ हेतुरिति॥ शा॰॥ सू॰॥ ५॥

अवांतर ५

मंदप्रज्ञा एवमजानंतो विचारं कर्तुमशक्ता अन्येभ्य आचार्येभ्यो ब्रह्मस्वरूपं श्रुत्वा तत्त्वंपदार्थौ विवेकेन परिशोध्य श्रुतिपरायणाः संतः अहं ब्रह्मास्मीत्युपास
सते ध्यानं कुर्वंति तेपि सर्वानर्थहेतुं मृत्युमज्ञानमतितरंत्येव अतितरां नाशयंत्येव नास्त्यत्र संदेहः तेषां नित्याभियुक्तानां भजतां प्रीतिपूर्वकं ददामि बुद्धियोगं तं
येन मामुपयांति ते तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता २ इति भगवतैवोक्तत्वात् तेपि चातितरंतीत्यनेन विचारकुश
लानां मृत्युतरणं कैमुतिकन्यायप्रसिद्धमिति सूचयत्यपिकारेणेति श्लोकतात्पर्यार्थः किं बहुना सर्वासां सगुणनिर्गुणोपासनानां चित्तैकाग्र्यद्वारा ब्रह्मसाक्षात्का
र एव मुख्यफलं ज्ञानप्रकरणे पठितत्वात् एतदभिप्रायेणैव सूत्रकृता बादरायणेनोपासनाविचारो ज्ञानकांडे कृतः ब्रह्मलोकादिफलं तु नांतरीयकमिति भावः
एवं सृष्ट्यादिनिरूपणप्रसंगागतमुपासनाविचारं परिसमाप्य परमप्रकृतमुपसंहरति एवमिति एवमुक्तरीत्या नन्वध्यारोपापवादयोर्ब्रह्मप्रतिपत्तिहेतुत्वात्ताव
पि निरूपणीयावित्याशंक्य ब्रह्मणो मायाद्वारा सूक्ष्मस्थूलप्रपंचसृष्टिनिरूपणमुखेन जगज्जन्मादिकारणत्वनिरूपणमेवाध्यारोपनिरूपणमित्याह अयमे

तटस्थलक्षणं जगज्जन्मादिकारणत्वं निरूपितं अयमेवाध्यारोप इत्युच्यते अस्यापवादश्चेदानीमुच्यते अपवादो नाम अधिष्ठा
ने भ्रांत्या प्रतीतस्य तद्व्यतिरेकेणाभावनिश्चयः॥ २२ वतिअनस्मिंस्तद्बुद्धिरध्यारोपः अपवादनिरूपणं प्रतिजानीते अस्येति। इदानीमध्यारोपनिरूप
णानंतरं प्रसक्तस्य प्रतिषेधसंभवादिति भावः कोयमपवाद इत्याकांक्षायां तत्स्वरूपमाह अपवादो नामेति तद्व्यतिरेकेण तद्भिन्नत्वेन इत्थंभावे तृतीया उक्तमेवार्थ
मुदाहरति यथेति ननु तत्त्वमस्यादिवाक्योत्थज्ञानादज्ञानतत्कार्यं बाध्यते तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः अविद्या सह कार्येण नासीदस्ति भविष्यती
ति वार्तिकवचनादस्मदादीनां घटज्ञानेन घटाज्ञाननिवृत्तिवदहं ब्रह्मास्मीति ब्रह्मसाक्षात्कारेण तदज्ञाननिवृत्तेः विद्वदनुभवसिद्धत्वाच्चेति वदंति तत्र कोयं बाध इत्या
शंक्याह यमपवादः स एव बाध इत्युच्यते इत्याह अयमेवेति यत्र यत्प्रतीयते तत्र तस्य त्रिषु कालेष्वत्यन्ताभावनिश्चयो बाधः तं विभजते स चेति त्रैविध्यमेवाह शा
स्त्रीयेति आद्यं व्युत्पादयति अथात इत्यादिना द्वितीयं व्युत्पादयति तद्व्यतिरेकेणेति तृतीयं व्युत्पादयति अहं ब्रह्मास्मीत्यादिना विपर्ययेण तु क्रमोत उपपद्यते
चेति न्यायमनुसरंस्तत्र यौक्तिकबाधस्य क्रमं निरूपयति यौक्तिकबाधस्येति अयं वक्ष्यमाणः इदं शब्दार्थमाह स्थूलप्रपंचमिति सर्वं स्थूलशरीरमारभ्य ब्राह्म
तु शब्दः प्रलय उत्पत्तिक्रमं वारयति किन्त्वतोऽस्मादुत्पत्तिक्रमाद्विपर्ययेण पृथिव्यप्सित्यादिक्रम उक्तः उपपद्यते च यतः कार्यस्य घटादेः कारणमृदादौ प्रलयस्य दृष्टत्वादिति॥ शा॰॥ सू॰॥ २॥

इपर्यंतं स्थूलभूतेषु पंचीकृतभूतेषु तेषां तत्कारणत्वात्तेषु तद्विलापनमुचितमिति भावः किं तद्विलापनमित्याकांक्षायामाह तदिति कारणीभूतपंचीकृतभू तव्यतिरेकेण ब्रह्मांडतदंतर्वर्तिकार्यजातं नास्तीति निश्चित्येत्यर्थः एतदुक्तं भवति दृश्यमानस्य कार्यजातस्य कारणसत्तातिरिक्तसत्तानंगीकारात्कारणव्यतिरेकेण कार्यं नास्तीति निश्चित्य तद्धि स्वस्वकारणे कणगोचरं स्मरणं विलापनमिति स्थूलभूतानि स्वस्वकारणीभूततामसांशेषु अंतःकरणं ज्ञानेंद्रियाणि स्वस्वकारणीभू तसात्त्विकांशेषु प्राणकर्मेंद्रियाणि स्वस्वकारणीभूतराजसांशेषु विलाप्येत्यर्थः इदानीं सूक्ष्मभूतानामुत्तरोत्तरं विलापनमाह तत्रापीति इदानीं परमकारणस्य मूलाज्ञानस्य चिन्मात्रे विलापनमाह अज्ञानमिति उक्तक्रमे प्रमाणत्वेन विष्णुपुराणवचनमुदाहरति तथाचेति तत्र वार्तिकसंमतिमाह उक्तंचेति अध्यारोपा पवादनिरूपणेन फलितमर्थं दर्शयत्याभ्यामिति तदेवोपपादयति तथाहीति तत्पदार्थं शोधयति मायेति माया आदिर्यस्याः स्थूलसूक्ष्मभूतायाः समष्टेः सा तथो

यथा शुक्त्यादौ भ्रांत्या प्रतीतस्य रजतादेः शुक्तिव्यतिरेकेणेदं रजतं किंतु शुक्तिरित्यभावनिश्चयः अयमेव बाधो विलापनमिति चोच्यते स च बाधः त्रिविधः शास्त्रीयो यौक्तिकः प्रत्यक्षश्चेति अथात आदेशो नेति नेति नेह नानास्ति किंचनेत्यादिशास्त्राद्ब्रह्मव्यतिरेकेण प्रपंचाभाव निश्चयः शास्त्रीयो बाधः मृद्व्यतिरेकेण घटाभावनिश्चयवत् निखिलकारणीभूतब्रह्मव्यतिरेकेण निखिलप्रपंचाभावनिश्चितस्य दृश्यमानस्य मि थ्यात्वनिश्चयेन ब्रह्मात्ममात्रत्वनिश्चयो यौक्तिकबाधः अहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारेण ज्ञानतत्कार्यनिवृत्तिः प्रत्यक्ष बाधः यौक्तिकबाधस्यायं क्रमः स्थूलप्रपंचः सर्वोपि स्थूलभूतेषु विलाप्य ॥ ११ क्तमायादिश्चासौ समष्टिश्चेत्यनंतरं कर्मधारयः अयं भावः समष्टिस्थू लसूक्ष्मशरीरमाया तदुपहितवैश्वानरसूत्रात्मेश्वरचैतन्यमेतदाधारानुपहिताखंडचैतन्यमेतत्त्रयं तप्तायः पिंडवदविविक्तमेकत्वेनावभासमानं तत्पदस्य वा च्यार्थः इति तत्पदलक्ष्यार्थमाह विविक्तमिति समष्टिस्थूलसूक्ष्मशरीरमायाभ्यां विविक्तं विवे केनान्वयव्यतिरेकाभ्यां पृथक्कृत्य निश्चितमखंडचैतन्यं तत्त्वमसिवा क्ये तत्पदलक्ष्यार्थ इत्यर्थः एतावन्वयव्यतिरेकौ तत्पदार्थशोधनोपायौ तथाहि स्थूलप्रपंचस्थित्यवस्थायां तत्साक्षित्वेन पंचीकरणात्पूर्वं सूक्ष्मभूततत्कार्यसाक्षि त्वेनाकाशादिसृष्टेः पूर्वं प्रलयावस्थायां मायासाक्षित्वेन तत्त्वज्ञानेनाज्ञाननिवृत्तौ भोगेन प्रारब्धे च क्षीयमाणे जीवस्य वर्तमानदेहपातोत्तरं विदेहमुक्तावस्थायामखं

डस्वप्रकाशचिद्रूपेणाभानं तत्पदार्थस्य परमात्मनोऽन्वयः समष्टिस्थूलशरीरस्य पंचीकरणात्पूर्वमभानं समष्टिसूक्ष्मशरीरस्याकाशाद्युत्पत्तेः पूर्वं मायायाः मुक्त वस्थायां च व्यतिरेकः जीववत्परमात्मनो जाग्रदादिसंबंधाभावात् कार्यस्य कारणात्मनारंभणाधिकरणन्यायेनारोपितस्य चाधिष्ठानात्मना सत्त्वांगीकारादसदुत्प त्तिवादनिराकरणाच्च यथोक्तप्रकारेण समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायानां यथोक्तावस्थास्वभानं व्यतिरेकः तत्पदार्थस्य परमात्मनो भानमन्वय इत्येवम

तद्व्यतिरेकेण तन्नास्तीति निश्चित्य स्थूलभूतानि समष्टिव्यष्टिसूक्ष्मशरीरं च सूक्ष्मभूतेषु विलाप्य हेनारद२ तत्रापि पृथिवीमप्सु विलाप्य अप स्तेजसि तेजो वायौ वायुमाकाशे आकाशमज्ञाने अज्ञानं चिन्मात्रे विलापयेत् तथा च स्मृतिः जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयंते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते इति उक्तं च आकारं पुरुषं विश्वमुकारे प्रविलापयेत् उकारं तैजसं सूक्ष्मं मकारे प्रविलापयेत् मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदिति आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति तथाहि मायादिसमष्टिस्तदुपहितचैतन्यमेतदाधारानुपहितमखंडचैतन्यं च तप्तायः पिंडवत् एत त्त्रयं अविविक्तमेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति विविक्तमखंडचैतन्यं तत्पदलक्ष्यार्थो भवति अविद्यादिव्यष्टिरेतदुपहितचैतन्य एतदा धारानुपहितप्रत्यक्चैतन्यं एतत्त्रयं तप्तायः पिंडवदविविक्तमेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति विविक्तं प्रत्यक्चैतन्यं त्वंपद लक्ष्यार्थो भवति ॥ १२ न्वयव्यतिरेकावभ्युपगंतव्यौ जीववत्१ तत्त्वंपदार्थौ तयोरत्रासंभवात् अन्यत्र धर्मादित्यादि श्रुत्या परमात्मनः पुण्यापुण्यसंबंधानवगमा च्च तस्मादाभ्यामन्वयव्यतिरेकाभ्यां शोधितस्तत्पदार्थो मायातत्कार्याभ्यामपरामृष्टाखंडसच्चिदानंदस्वरूपः परमात्मा तत्पदस्य लक्ष्यार्थः इति भावः त्वंपदार्थं शो धयति अविद्यादीति अविद्या आदिर्यस्याः सा तथा सा चासौ व्यष्टिश्चेत्यविद्यादिव्यष्टिः अयमभिप्रायः व्यष्टिस्थूलसूक्ष्मशरीरतत्कारणाविद्या एतदुपहितविश्वतै जसप्राज्ञाश्च एतदाधारानुपहितप्रत्यक्चैतन्यं तप्तायः पिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थः इति त्वंपदलक्ष्यार्थमाह विविक्तमिति ॥ छ ॥ छ ॥

तर्जनी स्वहिताङ्गुष्ठे विस्तृते प्रदेशप्रमाणं भवतीति ॥ २ ॥ | नत्वमस्यादिश्रुत्या ॥ १ ॥

इन्द्रियसन्निकर्षाश्रयत्वं योग्यत्वं योग्ययोर्जीवेश्वरयोरनुपलब्धियोग्यानुपलब्धिस्तस्या असम्भवेनेत्यर्थः ॥ १ ॥ | भिन्नत्वे सतीति पूर्वदले कथिते सति समवाये ऽतिव्याप्तिस्तद्वारणायोत्तरदलं समवेतत्वादित्युत्तरदले सतिद्रव्यादिष्व

वाचस्पतिमिश्रमते इन्द्रियत्वं आचार्याणां मतेतु नकामादिवृत्तीनामुपादानत्वात् ९ ॥ | तिव्याप्तिस्तद्वारणाय पूर्वदलं कारणद्रव्ये समवायोस्तीति ॥ १० ॥ भेदेन २ ॥ भेदनि ३ ॥

ग्यानुपलब्धेरसंभवेन जीवनिष्ठेश्वरभेदस्य प्रत्यक्षायोग्यत्वात् मनसोऽनिंद्रियत्वेन तथात्वाच्च जीवाधिकरणेश्वरभेदस्य साक्षिभास्यतया प्रातीतिकत्वेन तद्विषयप्रत्यक्षस्य श्रुत्या वाधसंभवाच्चंद्रगत प्रादेशकत्वप्रत्यक्षवत्तद्भत्तद्भिन्नत्वादिप्रत्यक्षवच्च भेदप्रत्यक्षस्याज्ञानोपाधितंत्रत्वेन स्वाभाविकाखंडार्थस्य महावाक्यस्य तेनैस समं विरुद्धत्वेनैतन्निर्वर्तकतया भेदप्रत्यक्षस्य भ्रांतित्वाच्च नन्वेवं द्वा सुपर्णेत्यादिश्रुत्या जीवपरयोर्भेदप्रतिपादनात् कथं महावाक्यस्याखंडार्थत्वमिति चेन्न भेदस्य मानांतरसिद्धत्वेन श्रुतिप्रतिपाद्यत्वायोगात्फलवत्यज्ञातेर्थे श्रुतेस्तात्पर्यात् तस्मात्तदनुवादेनोदाहृतश्रुतेरखंडे ब्रह्मण्येव तात्पर्यात् पैंगिरहस्यब्राह्मणेन श्रुत्यैव तथाव्याख्यानत्वाच्चाखंडे ब्रह्मैव तत्त्वमस्यादिवाक्यप्रतिपाद्यं तस्मात् संसर्गस्य वा विशिष्टस्य वा महावाक्यप्रतिपाद्यत्वायोगात्तादात्म्यप्रतिपादनेनेत्यस्याखंडस्वरूपप्रतिपादनइतिव्याख्यानमुचितमेव तदुक्तं संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखंडैकरसत्वेन वाक्यार्थो विदुषां मत इति ननु किमिदमखंडत्वं जातिरुपाधिर्वा ना

महावाक्ये १

**सर्वस्य प्रपंचस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वाद्विजातीयभेदशून्यता जीवपरमात्मनोरत्यंतैक्यात् सजातीयभेदशून्यता एकरसत्वात्स्वगतभेदशून्यता ॥ २ ॥**

द्यः अविद्यातिरिक्तजडजातेरनंगीकारात् ननु घटोयं घटोयमित्यनुगताकारप्रतीत्या जातिसिद्धेः कथमनंगीकार इति चेन्न अनुगताकारप्रतीत्या घटत्वादिसिद्धावपि तस्य जातित्वे मानाभावात् न च घटत्वादिकं जातिर्द्रव्यगुणकर्मविशेषभिन्नत्वे सति समवेतत्वात् व्यतिरेकेणाभाववदित्यनुमानेन तस्य जातित्वसिद्धिरिति वाच्यं समवायस्य निरस्तत्वेन हेत्वसिद्धेः साध्यप्रसिद्धेरनुमानांगत्वेन जातित्वस्य मानांतरासिद्धत्वेन व्याप्तिग्रहाभावेन तदनुमानायोगाच्च अन्यथाऽतिप्रसंगात्तस्मादखंडत्वं न जातिः न चाविद्यातिरिक्तजडजात्यनंगीकारेपि ——— साविद्यैवास्तामिति वाच्यं तथात्वे तस्य श्रुतिवेद्यत्वाभावप्रसंगात् न द्वितीयः तस्यानिर्वचनत्वात्तथाहि न तावद्भेदशून्यत्वमखंडत्वं भेदस्याप्रसिद्धत्वेन तच्छून्यत्वस्यासंभवात् अप्रसिद्धत्वेऽप्रसक्तप्रतिषेधासंभवेन्निषेधायोगेन तच्छून्यत्वस्य ग्रहणायोगात् तद्द्वितीयः भवन्मते ब्रह्मव्यतिरिक्तवस्त्वंतरस्य मानांतरासिद्धतया तन्निषेधायोगेन तदनुपपत्तेः न तृतीयः अ

मानाभावात् किंतु अविद्यैव प्रतिनिरोधाय ॥ ६ ॥ | धर्मिकारेणाभाति ननु नित्यमेकमनेकानुगतं सामान्यमिति लक्षणाज्जातिरस्ति तथात्वे ऽद्वैत ॥ समवायादीनामपि जातित्वं स्याल्लक्षणस्य तत्रसत्त्वादिति ॥ ५ ॥ | मायोपलक्षितानुपहितचैतन्यं अंतःकरणोपलक्षितानुपहितचैतन्ये तयोरैक्यमित्यखंडवाक्यार्थः ॥ ६ ॥ अविद्यातिरिक्तजातिरूपाखंडत्वस्य ॥ ७ ॥

अखण्डत्वम् ३ ॥

उभाभ्यां भावपदार्थाभ्यामन्योन्यस्मिन्नन्योन्याभावास्ति अद्वैतश्रुत्या द्वयोर्भावपदार्थयोरनंगीकारात् २ ॥ | अविशिष्टत्वविशिष्टाभावः सकरत्युक्तपूर्वोक्ताभावाप्रासिद्धिरूपदोषस्यात्रापि सत्त्वादित्यर्थः ॥ ३ ॥ | यदि ब्रह्मणोभ्रमेणाप्यत्युंताभावसिद्धिः स्यात्तर्हि तन्निषेधः स्यात् ॥

नाद्यनंतमजो नित्य इत्यादिश्रुत्या ब्रह्मणोऽनादिनित्यतया ध्वंसप्रागभावयोरसंभवात् अद्वितीयश्रुत्या ब्रह्मणस्त्रैकालिकानादिनित्यात्यंताभावस्यासंभवात् अतएवतदन्योन्याभावस्यासंभवात्तस्मादप्रसक्तप्रतिषेधायोगेनाभावः परिच्छेदस्तच्छून्यत्वमखंडत्वमित्यसंगतमेतत् एतेनानेकपर्यायशब्दप्रकाश्यत्वे सत्यविशिष्टत्वं तदिति निरस्तं पूर्वोक्तदोषस्यात्रापि तुल्यत्वात् तस्मादखंडब्रह्मवाक्यार्थ इत्यसंगतमित्याशंक्याह अखंडत्वं नामेति अखंडत्वमुपाधिरेव न च तन्निर्वचनासंभव इत्याह विजातीयेति न च विजातीयादिभेदस्याप्रसिद्धतयाऽप्रसक्तप्रतिषेधानुपपत्त्या तच्छून्यत्वं दुर्ग्रहमिति वाच्यं भ्रांत्या प्रसिद्धिसंभवेन तच्छून्यत्वग्रहसंभवात् वृक्षादीनां विजातीयो घटादिस्तद्भेदो वृक्षेषु प्रसिद्धो लोकानां एकस्य वृक्षस्य वृक्षांतरं सजातीयं तत्रान्योन्यभेदोऽन्योन्यस्मिन्प्रसिद्धः स्वगतं शाखापत्रादितद्भेदो वृक्षे प्रसिद्धः प्रत्यक्षादिना नैवं ब्रह्मणि संभवतीत्याह सर्वस्येति वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं ऐतदात्म्यमिदं सर्वं तदनन्यत्वमारंभणशब्दादिभ्य इत्यादिश्रुतिसूत्राभ्यां कार्यस्य कारणाद्व्यतिरेकात् सर्वस्य कल्पितत्वं न चाज्ञानस्याकार्यतया ब्रह्मव्यतिरेकात् कल्पितत्वप्रसंग इति वाच्यं एकमेवाद्वितीयमेतदात्म्यमिदं सर्वमिति श्रुत्या साज्ञानस्य कार्याकार्यसर्वप्रपंचस्य ब्रह्माव्यतिरेकावगमेनाज्ञानस्यापि कल्पितत्वसंभवात्कल्पितस्य सर्वस्य प्रपंचस्य मिथ्यात्वेन परमार्थतोऽधिष्ठानेऽसत्त्वेन विजातीयभेदशून्यत्वं ब्रह्मण उपपद्यते एवं तत्त्वमस्यहं ब्रह्मास्मि क्षेत्रज्ञं चापि मां विद्धीत्यादिश्रुतिस्मृतिभिर्जीवपरमात्मनोरत्यंतैक्यप्रतिपादनेन चेतनांतरस्यासंभवाज्जीवभावस्य मिथ्यात्वेनाज्ञानकल्पितत्वाद्ब्रह्मणः सजातीयभेदशून्यत्वं तथा निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं केवलो निर्गुणश्चासंगोह्ययं पुरुषः नित्यः सर्वगतः स्थाणुरचलोयं सनातन इति श्रुतिस्मृतिभिरवयवगुणक्रियाजातिसंबंधप्रतिषेधेन सत्यादिवाक्यैर्ज्ञायमानावयवगुणादीनां श्रुतिप्रति ——— द्यत्वाभावेन मायाकल्पितत्वेन च मिथ्यात्वाद्ब्रह्मणः स्वगतभेदशून्यत्वमिति भावः स्वगतभेदशून्यत्वमखंडत्वमित्युक्ते सांख्यात्मन्यतिव्याप्तिः सांख्यैरप्यात्मनोवयवगुणक्रियाजातिशून्यत्वाभ्युपगमेन स्वगतभेदशून्यत्वसंभवात्तद्वारणाय सजातीयेत्युक्तं तैर्जीवानां परस्परभेदाभ्युपगमेन सजातीयभेदशून्यत्वाभावान्नातिव्याप्तिः सजातीयस्वगतभेदशून्यत्वमखंडत्वमित्युक्ते आकाशेऽतिव्याप्तिस्तद्वारणाय विजातीयेति ॥ ॥

**अथवा त्रिविधभेदशून्यत्वं अखंडत्वं विभुत्वाद्देशपरिच्छेदशून्यत्वं नित्यत्वात्कालपरिच्छेदशून्यत्वं सर्वात्मकत्वात् वस्तुपरिच्छेदशून्यत्वं ॥ १ ॥**

हिरण्यश्मश्र्वादीनां सत्यादीनामन्वयः ॥ ३ ॥

विजातीयभेदशून्यत्वं तदित्युक्ते सजातीयस्वगतभेदयोरभ्युपगमः स्यात् तथाद्वितीयश्रुतिविरोधापत्तिः तद्वारणाय सजातीयेत्यादि एकरसत्वसिद्धये स्वगतेति एवं पदप्रयोजनं द्रष्टव्यं प्रकारांतरेणाखंडत्वं निर्वक्तव्यमेवेति ब्रह्मणि लक्षणमुपपादयति विभुत्वेति परिच्छेदोऽभावो घटत्वादीनां देशपरिच्छेदः पटादिषु तदात्यंताभावः स च ब्रह्मणो विभुत्वान्नास्त्येव अन्यथा विभुत्वमेव न स्यात् घटादिव्यक्तीनां कालपरिच्छेदः स्वोपादाने ध्वंसः स च ब्रह्मणो नित्यत्वान्नास्त्येव नित्यत्वं च ब्रह्मणः श्रुतिप्रसिद्धं घटादीनां वस्तुपरिच्छेदो पटादिषु घटादिप्रतियोगिकभेदो वा घटादिषु पटादिप्रतियोगिकभेदो वा द्विविधभेदोपि ब्रह्मणः सर्वा

देशपरिच्छेदे सति २॥

वेदाहमेतमजरं पुराणं सर्वात्मकं सर्वगतं विभुत्वादित्यादिश्रुतेः यद्वा अपर्यायानेकशब्दप्रकाश्यत्वे सति अविशिष्टत्वमखंडत्वं तदुक्तं अविशिष्टमपर्यायानेकशब्दप्रकाशितं एकं वेदांतनिष्णाता अखंडं प्रतिपेदिरे इति एवं तत्त्वमस्यादिवाक्यजन्याखंडापरोक्षज्ञानादज्ञाननिवृत्तिरानंदावाप्तिश्च तदुक्तं प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ६ ॥

निपुणाः॥२

घटकलशादावपर्यायत्वाभावः॥३॥ नीलोत्पलादावविशिष्टत्वाभावः॥३॥

त्मत्वान्नास्त्येव सर्वस्य स्वप्नकल्पितगजादिवत् ब्रह्मण्यारोपितत्वादारोपितस्याधिष्ठानव्यतिरेकेणाभावाद्ब्रह्मणः सर्वात्मत्वमत एवैकरसत्वं सर्वात्मकत्वं ब्रह्मणः श्रुतियुक्त्यनुभवसिद्धमतो नोक्तविकल्पावकाशः उक्तार्थे श्रुतिमुदाहरति वेदेति कल्पतवाचार्यनिर्वचनमाह यद्वेति तत्रैव तेषां सम्मतिमाह तदुक्तमिति॥ घटादौ नीलोत्पलादौ चातिव्याप्तिवारणाय विशेषणद्वयं यद्यपि यतो वाचो निवर्तंते इत्यादिश्रुत्या ब्रह्मणो वाङ्मनसाऽतीतत्वप्रतिपादनात् साक्षाच्छब्दप्रकाश्यत्वमनुपपन्नं तथापि वाच्यार्थमायांतःकरणद्वारा लक्षणया शब्दप्रकाशितत्वं संभवत्येव अन्यथा तं त्वौपनिषदमित्यादिश्रुतिविरोधापत्तेः

तस्मात्तत्त्वमस्यादिवाक्यं लक्ष्यार्थमुपादायाखंडस्वरूपप्रतिपादने प्रवर्तत इति निरवद्यं अस्तु तत्त्वमस्यादिवाक्यमखंडार्थबोधकं ततः किं स्यादित्यत आह एवमिति एवमुक्तप्रकारेणाहमेव ब्रह्म ब्रह्मैवाहमस्मीति महावाक्यजन्याखंडापरोक्षज्ञानेन ततोऽनर्थनिवृत्तिरानंदावाप्तिश्च भवतीति विशेषः तत्राचार्यसंमतिमाह तदुक्तमिति आचार्यश्लोकं व्याचष्टे अन्योन्येति अहं ब्रह्मास्मीति ज्ञानेन ब्रह्मणः परोक्षत्वानात्मत्वनिवृत्तिः ब्रह्मैवाहमस्मीति ज्ञानेन जीवस्य परिच्छिन्नत्वाब्रह्मत्वनिवृत्तिः किं बहुना ज्ञाने न सर्वसंसारनिवृत्तिः ततश्च प्रत्यगात्माऽखंडैकरसब्रह्मानंदात्मनाऽवतिष्ठते ब्रह्म वेद ब्रह्मैव भवति क्षेत्रक्षेत्रज्ञयो

ज्ञानचक्षुषा शास्त्राचार्योपदेशजनितात्मज्ञानरूपेण चक्षुषा क्षेत्रक्षेत्रज्ञयोरन्तरं परस्परवैलक्षण्यं जाड्यचैतन्यविकारित्वनिर्विकारित्वादिरूपं ये विदुर्ज्ञानिभूतप्रकृतिमोक्षं च भूतानां प्रकृतिरविद्या मायाख्यातस्या आत्मविद्यया मोक्षमभावगमनं च ये विदुस्ते परं कैवल्यं यान्तीत्यर्थः ॥ १॥

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते इत्यन्योन्यतादात्म्यप्रतिपत्तिः अहं ब्रह्मास्मीति ब्रह्मैवाहमस्मीत्यखंडाकारवृत्तिः तया वृत्त्याऽज्ञाने निवृत्ते अब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात् प्रत्यगात्मनः अखंडानंदस्वरूपावस्थितिर्भवतीति श्लोकतात्पर्यार्थः इति प्रथमः परिच्छेदः समाप्तः१

रेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परमित्यादिश्रुतिस्मृतिशतेभ्यः इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीमुनिवरविरचिते तत्त्वानुसंधानव्याख्याने अद्वैतचिंताकौस्तुभे प्रथमः परिच्छेदः समाप्तः शुभमस्तु लेखकपाठयोः श्रीकृष्णाय नमः ॐ शान्ति शान्ति शान्ति ॥ ६ ॥

इतितत्त्वानुसन्धानमद्वैतकौस्तुभटीकोपेतंसमाप्तः॥

इदंपुस्तकंकाश्यांगोवर्धनदासाभिधेयेनमयाहरिहररत्नाकराख्यस्वीययन्त्रालयेङ्कितम् सं०१९४८ मुंबइयाख्य प्रतियायांशोधितं॥ यहसवपुस्तककाशीमेकुंजगलीकेपश्चिमफाटकपरगोवर्धनशाहूकेदुकानपरहै॥ ॥

## अथाद्वैतकौस्तुभस्यद्वितीयपरिच्छेदप्रारम्भः

सीतापतिंसर्वसुरैश्चसेव्यंरात्रिंचराणांकुलतूलवह्निम॥भक्तप्रियंहेतुचयावसानंश्रीरामचन्द्रंशिरसाभिवन्दे॥१॥साङ्गोपाङ्गप्रमाणानांद्वितीयेऽस्मिन्निरूपणम् कृतन्त्वाद्वैतसिद्ध्यर्थंग्रन्थकृद्भिश्वसूरिभिः॥२॥ ॥

॥ श्रीगणेशायनमः॥ यत्तादात्म्यरयोगाद्गतभव्याधादयोऽधमाः॥पुमर्थं लेभिरे रामं मेशं वयमुपास्महे १॥ योगीन्द्राः समाहितस्वान्ता यं विगलितभिदं शुद्धं परमात्मानं जडतनुसमासङ्गवशानः कार्य्यकारणात्मकजडवर्गेणसहकल्पि
ततादात्म्याध्यासेनत्रिजगतां नियन्तारं प्रेरकमाहुस्तं कृष्णं वयं नमाम इति योजना शेषं स्पष्टं जडतनुसमासङ्गवशात् इति पुनरावृत्त्या योजनीयम्॥१॥

॥ॐ श्रीगणेशायनमः॥ प्रमातारं मानफलमपि च मेयं त्रिजगतां नियन्तारं जीवं विगलितभिदं शुद्धममलं यमाहुर्योगीन्द्रा जडतनुसमासंगवशतो नमामस्तं कृ
ष्णं व्रजयुवतिचित्तालिकमलं १ तत्त्वमस्यादिवाक्यजन्याखण्डापरोक्षवृत्त्या ज्ञाननिवृत्तिनिरानन्दावाप्तिश्च भवतीत्युक्तं तत्र केयं वृत्तिः किं वा तत्र प्रमाणं कथं वा त
दुत्पत्तिर्वृत्त्या वा किं प्रयोजनमित्याकाङ्क्षायां प्रमाऽप्रमाभेदेन द्विविधां वृत्तिं निरूपयितुं प्रथमं वृत्तिं लक्षयति वृत्तिर्नामेति यद्यपि प्रमेयसिद्धिः प्रमाणादिनि प्र
थमं प्रमाणनिरूपणमुचितं तथापि तत्रान्तरे प्रमेयस्य जडतया प्रमाणाधीनासिद्धिर्भवतीति तन्निरूपणमुचितं इह त्वद्वितीयात्मसाक्षिचैतन्यस्य सर्वप्रमा
णादिव्यवहारसाधकस्य वेदान्तप्रमेय — तयातन्निरूपणं कृतमनन्तरं प्रमाणादिनिरूपणमुचितमेवेत्यतो न काप्यनुपपत्तिः यथाहुः मानेन मेयाधिगतिस्तु
युक्ता प्रमेयजाड्याद्विधिनिष्ठकाण्डे मेयेन मानाधिगतिस्तु युक्ता वेदान्तवाक्यात् जडं हि मेयमिति वृत्तिर्वृत्तिज्ञानं घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यं क्रोधादि॥

श्रीगणेशायनमः॥ वृत्तिर्नाम विषयचैतन्याभिव्यंजकोन्तःकरणाज्ञानयोः परिणामविशेषः अभिव्यंजकत्वं नामापरोक्षव्यवहारजनक
त्वमावरणनिवर्त्तकत्वं वा परिणामो नाम उपादानसमसत्ताकोऽन्यथाभावः उपादानविषमसत्ताकोन्यथाभावो विवर्त्त इति भेदादनयोः
परिणामविवर्त्तयोर्वृत्तिः उपादानान्तःकरणाज्ञानापेक्षया परिणामः चैतन्यापेक्षया विवर्त्त इति न सिद्धान्तविरोधः॥ १

र्वदलं च सुखादावतिव्याप्तिवारणायोत्तरदलं तेषामपि स्वजन्यवृत्तिद्वारा विषयचैतन्याभिव्यंजकत्वात्तद्वारा वृत्त्यर्थमपेक्षितं ननु किमिदमभिव्यञ्जकत्वमित्याशं
क्याह अभिव्यंजकं नामेति नन्वनुमित्यादिवृत्तीनां प्रत्यक्षव्यवहारजनकत्वाभावादव्याप्तिरित्यरुचेराह आवरणनिवर्त्तकत्वं वेति यद्यपि प्रत्यक्षवृत्तेरेवा
वरणनिवर्तकत्वमित्यव्याप्तिस्तदवस्था तथाप्यनुमित्यादेरसत्त्वापादकमौढ्याज्ञानावरणनिवर्तकत्वात्नाव्याप्तिरिति ध्येयं ननु पूर्वरूपपरित्यागेन रूपान्तरा
पत्तिः परिणामः स चानुपपन्नः पूर्वरूपे स्थिते नष्टे वा रूपान्तरापत्तेरदर्शनात् किंच वेदान्तवादस्तु विवर्तवाद इत्यभ्युपगमात्परिणामवादाश्रयणे सिद्धान्तविरो
धापत्तेश्चेत्यत आह॥ परिणामो नामेति अन्यथाभावः परिणाम इत्युक्ते विवर्तेऽतिव्याप्तिः स्यादत उक्तं उपादानसमसत्ताक इति अन्यथाभावो विवर्त इत्युक्ते
परिणामेऽतिव्याप्तिवारणायोपादानविषमसत्ताक इत्युक्तम् ॥ ६ ॥



अग्निस्त्रिकोण इत्यादिवत् ४ १निरवयवस्य परिणामस्वीकारे तदीयं यत्निरवयवस्वरूपं तस्य नाशप्रसङ्गादित्यर्थः १॥ स्वभावसिद्धम् ७

नन्वन्तःकरणस्य निरवयवत्वात्कथं परिणामः सावयवस्य क्षीरादेः परिणामदर्शनात् न हि निरवयवं परिणम्यमानं दृष्टं लोके अन्यथा स्वरूपनाशप्रसंगा
त् इत्याशंक्याह नदिति वृत्तिज्ञाने स्यान्तःकरणधर्मत्वे कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुतिरेव तत्र प्रमाणं
ष्टव्यं ननु जानामीच्छामीत्यात्मधर्मत्वेनानुभूयमानानां ज्ञानेच्छादीनां कथमन्तःकरणधर्मत्वमनुभवविरोधात् न चानुभवो भ्रमः बाधकाभावादिति चेन्न तप्ता
यःपिंडवदन्योन्यतादात्म्याध्यासेनान्तःकरणात्मनोरैक्ये दहतीतिवज्जानामीत्याद्यनुभवोपपत्तेः न चाध्यासे मानाभावः स्वानुभवस्यैव प्रमाणत्वात् तथाहि
जानामीति ज्ञातृत्वमनुभूयते न चान्तःकरणस्य केवलस्य न संभवति जडत्वात् नापि तदात्मनः संभवति असंगो ह्ययं पुरुषः। केवलो निर्गुणश्च अव्यक्तोयम
चिन्त्योयमविकार्योयमुच्यते इत्यादिश्रुतिस्मृतिभिरसंगत्वावगमात् तत्र ज्ञाताहमित्यात्मन्यन्तःकरणमध्यस्यान्तःकरणेऽहं चेतन इत्यात्मतादात्म्यमध्यस्यान्यो
न्यधर्माश्चान्योन्यस्मिन्नध्यस्याहं जानामीति ज्ञातृत्वमनुभवति जीवः अतः स्वानुभव एवाध्यासप्रमाणं तदाह भगवान्भाष्यकारः अहमिदं ममेदमिति नैसर्गि

तन्मनोऽकुरुतेत्यादिश्रुत्यान्तःकरणस्य कार्यद्रव्यत्वेन सावयवतया परिणामित्वोपपत्तिः सा च वृत्तिर्द्विविधा प्रमाऽप्रमाभेदात्
अत्र वोधेद्धा वृत्तिर्वृत्तीद्धबोधो वा प्रमा सा च द्विविधा ईश्वराश्रया जीवाश्रया चेति॥ २२

कोयं लोकव्यवहार इति यच्च जन्यज्ञाने क्वा
दीनामात्ममनःसंयोगाद्युत्पत्तिरितिन्यायमतं तन्नोपपद्यते आत्ममनसोर्निरवयवतया संयोगासंभवात् तथाहि अव्याप्यवृत्तिर्हि संयोगः अव्याप्यवृत्ति
त्वं नामस्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं तन्नच विरुद्धयोः प्रतियोगि — तदभावयोरवच्छेदकभेदमन्तरेणात्मनि निःप्रदेशेऽसंभवेनात्मनि।
ज्ञानादयो जायन्त इत्यनुपपन्नं अपि च ज्ञानस्यात्मकार्यत्वे उपादानमात्मा वक्तव्यस्तस्योपादानत्वमारंभकत्वेन वा स्यात् परिणामित्वेन वा नाद्यः एकस्यानारंभ
कत्वात् न द्वितीयः निरवयवस्य परिणामायोगात् सावयवत्वेऽनित्यत्वप्रसंगात् तस्मादसंगतत्वान्न्यायमतस्य वृत्तिज्ञानमन्तःकरणधर्म एवेति वृत्तिं विभजते सा
चेति प्रमां निरूपयति बोधेति बोधेनेद्धा ज्वलिता प्रकाशिता सा चासौ वृत्तिश्चेति तथा वृत्त्या विद्धः प्रतिबिंबितो वृत्तीद्धः स चासौ बोधश्च स तथा वृत्त्यभिव्यक्तचैतन्य
मितियावत् प्रमां विभजते सा चेति॥ ६॥

न्यायमते पुरीतति सुषुप्तौ हि ईशावच्छेदेनात्ममनःसंयोगस्य ज्ञानहेतुत्वम् तथा च देशकालस्य वकालेऽपि देशस्यावच्छेदक ५॥ किमवच्छेदेन मन आत्मसंयोगरूपप्रतियोगि किमवच्छेदेन च तदभव इत्यात्मनि वक्तुमयोग्यं तस्य निरवय
त्वादिति वदात्मन्यपि पुरीतति चाहि देशस्यावच्छेदकत्वमस्त्वतो दूषणान्तरमाह॥ अपि चेति॥४॥ वत्वेन प्रदेशशून्यत्वात्॥ ५॥

आकाशादि ६॥ सर्वस्यसाक्षिणाधिगतत्वात् ब्रह्मज्ञानेनचबाधितत्वादसम्भवः ॥४॥ " "॥

प्रथमांनिरूपयति तत्रेति तयोर्मध्येइतिसप्तम्यर्थःतत्रप्रमाणमाह तदिति तत्प्रकृतंसच्छब्दवाच्यमैक्षत ईक्षणंकृतवत् ईक्षणमभिनयति बह्विति ब
हुस्यांबहुभवेयंप्रजायेयउत्पद्येयजीवाश्रयांप्रमांनिरूपयति अनधिगतेति अनधिगतःअज्ञातःबोधेनाविषयीकृतोयोर्थोविषयस्तदाकारायांतःकरण
वृत्तिःतत्प्रतिबिंबिताचित् द्वितीयाजीवाश्रयाविषयाकारांतःकरणवृत्तिप्रतिबिंबिताचिज्जीवश्रयप्रमेत्युक्ते भ्रांतिज्ञानेऽतिव्याप्तिस्तद्वारणायाबाधितेति।
भ्रमविषयीभूतस्यरजतस्यबाधितत्वान्नातिव्याप्तिस्तावत्युक्तेस्मृतावतिव्याप्तिरतउक्तमनधिगतेति स्मृतेरनुभूतविषयत्वान्नातिव्याप्तिःसंपूर्णासंभव
माशंक्याह ब्रह्मेति तथात्वादनधिगताबाधितार्थविषयाकारांतःकरणवृत्तिप्रतिबिंबितचित्त्वात् ननुप्रपंचस्यब्रह्मज्ञानबाध्यत्वेनतत्प्रमायामव्याप्ति

**तत्रईक्षणापरपर्यायस्रष्टव्यविषयाकारमायावृत्तिप्रतिबिंबितचिदीश्वराश्रया तदैक्षत बहुस्यांप्रजायेयेत्यादिश्रुतेः अनधिगता**
**बाधितविषयाकारांतःकरणवृत्तिप्रतिबिंबितचिज्जीवाश्रयातुद्वितीयाब्रह्मात्मैक्यप्रमायास्तथात्वान्नासंभवःप्रपंचस्यसंसारदशा**
**यामबाधितत्वात् तत्प्रमायांनाव्याप्तिःशुक्तिरजतादेस्तु सत्ताकत्वेनाज्ञानसत्वाकत्वाभावात् नातिव्याप्तिः नैत्करणंप्रमाणंसाजी**
**वाश्रयाप्रमाद्विविधापारमार्थिकीव्यावहारकीचेति तेत्र तत्वमस्यादिवाक्यजन्याप्रमापारमार्थिकीसाचनिरूपिता अग्नेपिनिरू**
**पयिष्यते प्रपंचप्रमाव्यावहारिकी॥**

रित्याशंक्याह प्रपंचस्येति ननुभ्रांतिज्ञानेयथोक्तलक्षणसद्भावादतिव्याप्तिरित्याशंक्याह शुक्तीति
एवंप्रमालक्षणेनिर्दिष्टेफलितमाह तदिति तस्याःप्रमायाः करणंप्रमाणं अत्रप्रमाणंलक्ष्यंप्रमाकरणंलक्षणंकरणंप्रमाणमित्युक्तेकुठारेऽति
व्याप्तिःस्यात्तस्यापिछिदिक्रियांप्रतिकरणत्वात् तद्व्यावृत्त्यर्थंप्रमेतिप्रमाप्रमाणमित्युक्तेचक्षुरादावव्याप्तिःस्यात्तस्यद्रव्यत्वेनप्रमात्वाभावात्तत्परिहाराय
करणमित्युक्तंकरणस्वरूपमग्रेव्युत्पादयिष्यतिजीवाश्रयांप्रमांविभजते सेति पारमार्थिकींव्युत्पादयति तत्रेति तर्हिपारमार्थिकीप्रमानिरूपणीयेत्याकां
सायामाह साचेति अग्रे शाब्दिप्रमानिरूपणावसरे व्यावहारिकींप्रमांनिरूपयति प्रपंचेति॥ ६॥ ६॥ प्रमा ६

आवरणभंगमात्रविषयत्वात्॥८



नैयायिकः १॥ घटप्रकारकरूपविशेष्यकशाब्दबोधः ४॥ अनिर्वचनीयख्यातिवादिभिःशांकरैःशुक्तिरजतादिस्थलेऽनिर्वचनीयरजतादिनाद्युत्पत्ति

तांविभजते साचेति प्रत्यक्षप्रमांलक्षयति तत्रेति तासुमध्येइत्यर्थःअत्रनैयायिकाःप्रमाकरणंप्रमाणं।यथार्थानुभवःप्रमातद्वतितत्प्रकारकत्वंयाथार्थ्यं
स्मृतिभिन्नज्ञानमनुभवःसाचतुर्विधाप्रत्यक्षानुमित्युपमितिशाब्दप्रमाभेदात् तत्रेंद्रियत्वेनेंद्रियजन्यंज्ञानंज्ञानाककरणकंज्ञानंवाप्रत्यक्षमितिवदंति।
तच्चिंत्यंभ्रमज्ञानेऽतिव्याप्तेःनचतद्वतितत्प्रकारकानुभवस्यप्रमात्वेनभ्रमस्यातथात्वान्नातिव्याप्तिरितिवाच्यं भ्रमविषयरजतस्यशुक्तावभ्युपेयत्वेनभ्र
मस्यापितद्वतितत्प्रकारकत्वात् अन्यथाख्यातेर्निरसिष्यमाणत्वात् किंच घटेरूपमितिप्रमायामव्याप्तिस्यात्तद्वतितत्प्रकारकत्वाभावात् स्वरूपसंबंधेन
तथात्वेभ्रमेऽतिव्याप्त्यापत्तेश्चतस्माद्यथोक्तमेवसाधु ननु भवन्मतेधारावाहिकज्ञानेऽव्याप्तिःस्यात्तस्याधिगतविषयत्वादिति चेन्नतत्रापितत्तत्क्षणवि।
शिष्टघटस्यानधिगतत्वेनधारावाहिकज्ञानस्यापितथात्वात् ननुक्षणस्यातींद्रियत्वेनतस्यतद्विशिष्टविषयत्वमनुपपन्नमितिचेन्नधारावाहिकस्थलेवि

अनधिगताबाधितार्थविषयत्वात्॥१॥ क्षणस्य घटविशिष्टविषयत्वं १॥ प्रकारांतरेणसमाधत्ते १

**साचषड्विधाप्रत्यक्षानुमित्युपमितिशाब्दार्थापत्त्यभावप्रमाभेदात् तत्रविषयचैतन्याभिन्नप्रमाणचैतन्यंप्रत्यक्षप्रमा॥**

व्यतिरेकस्य२

षेधिवृत्त्युत्पत्तिपर्यंतंयावद्घटस्फुरणंतावद्वृत्तेरेकत्वेनज्ञानभेदाभावेनाव्याप्तिशंकानवतारात् वृत्तिभेदेमानाभावाच्च किंचप्रमाचातुर्विध्यमप्यसंगतंपी।
नत्वदर्शनाद्रात्रिभोजनप्रमाऽभावप्रसंगात् नचव्यतिरेकानुमानात् साभविष्यतीतिवाच्यंतस्याग्रेपरिहरिष्यमाणत्वात् तथानुपलब्ध्याभावप्रमादर्शनात्।
प्रमितेश्चातुर्विध्यमसंगतं इंद्रियान्वयव्यतिरेकयोरधिकरणज्ञानोपक्षीणत्वेनेंद्रियस्यसंबद्धार्थप्रकाशकत्वेचाभावेनेंद्रियस्यसंबंधाभावेनचतेनतद्ग्रहणा
योगात् तस्मादनिच्छताप्यक्रमतिनार्थापत्त्यनुपलब्ध्योःप्रथक्प्रामाण्यमभ्युपगंतव्यंततःषड्विधैवप्रमाकिंचइंद्रियत्वेनेंद्रियजन्यंज्ञानंप्रत्यक्षमित्यसंगतं
इंद्रियस्यातीं——द्रियतयातद्घटितप्रत्यक्षत्वविशिष्टज्ञानस्याप्यतींद्रियत्वप्रसंगात् नचेष्टापत्तिःसाक्षात्करोमीत्यनुभवविरोधप्रसंगात् जन्यतावच्छेदक
ग्रहमंतरेणजन्यत्वस्यदुर्ग्रहत्वाच्चनच साक्षात्त्वजातिरेवजन्यतावच्छेदिकास्त्वितिवाच्यं॥ ॥२इंद्रियत्वंजातिरूपाधिर्वाभावःश्रुतिविरोधात्नद्वितीयाधर्मिअभावात्इंद्रियत्वाभावस्३॥

प्रत्यक्षलक्षणं ज्ञानाकरणकं ज्ञानं १॥ इंद्रियसंनिकर्षाश्रयत्वं योग्यत्वं ५॥ मतांतर ६॥ अर्थो विषयो यस्य ज्ञानस्य तच्च ६॥ भ्रमप्रत्यक्षे साक्षिद्वयो रैक्यात् ॥ ३॥

जातेर्निरस्तत्वात् अपिच द्वितीयमप्यसंगतमेव तत्वसाक्षात्कारस्य श्रवणमननादिजन्यतया तत्राव्याप्तिप्रसंगात् तस्मादसंगतमेतत् प्रमाणचैतन्यप्रत्यक्षप्र मेत्युक्ते अनुमित्यादावतिव्याप्तिः स्यात् तद्वारणाय विषयेति विषयचैतन्याभिन्नं वृत्त्यवच्छिन्नचैतन्यं प्रत्यक्षप्रमेत्युक्ते भ्रमप्रत्यक्षेऽतिव्याप्तिः स्यात्तद्वारणाय प्रमाणेति नचैवं विषयचैतन्याभिन्नप्रमाणचैतन्यमिदमाकारवृत्त्यवच्छिन्नं भ्रमविषयरजतभासकसाक्षिचैतन्यमिति पुनरतिव्याप्तिरिति वाच्यं अवाधि तत्वस्यापि विषयविशेषणत्वात् नचैवं घटादेर्ब्रह्मज्ञानवाध्यतयाऽव्याप्तिरिति वाच्यं संसारदशायामवाधितत्वस्य विवक्षितत्वात् नचैवमपि धर्माधर्मानु मित्यादावतिव्याप्तिरिति वाच्यं योग्यत्वस्यापि विषयविशेषणत्वात् एवंस्रतावतिव्याप्तिपरिहाराय वर्तमानेति विशेषणं देयं तथा चायमर्थः संपन्नः संसार दशायामवाधितवर्तमानयोग्यविषयचैतन्याभिन्नप्रमाणचैतन्यं प्रत्यक्षप्रमेति अथवाऽवाधितापरोक्षार्थविषयज्ञानं प्रत्यक्षप्रमा भ्रमविषयस्य वा धितत्वान्नातिव्याप्तिः घटादीनां संसारदशायामवाधितत्वान्नाव्याप्तिः पूर्वं प्रत्यक्षविषयस्यापरोक्षत्वं नाम साक्षिनादात्म्यं तथाच नान्योन्याश्रयः विषयत्वं ना

तथाहि एकमेव चैतन्यमुपाधिभेदाच्चतुर्विधं प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यं फलचैतन्यं चेति तत्रांतःकरणविशिष्टं चैतन्यं प्रमातृचैतन्यं अंतःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यं घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यं॥ ११

मज्ञाने स्वाकारसमर्पकत्वं विषयित्वं नाम तदवभासकत्वं ननु वृत्तीद्धबोधस्य प्रमातृत्वेनाखंडचैतन्यस्य स्वप्रकाशत्वेन तद्वौस्यत्वाभावात् ज्ञानज्ञेययोः कथं विषयविषयीभावः इति चेन्न बोधेद्धवृत्तेरेव प्रमातृत्वाभ्युपगमे नाखंडचैतन्यस्य तद्विषयतया विषयविषयीभावोपपत्तेः अथवा विषयत्वं नामव्यंग्यत्वं विषयित्वं नाम व्यंजकत्वं विषयनिष्ठावरणनिवर्तक त्वमिति यावत् ततश्च वृत्त्यैकप्रमायाः अखंडचैतन्यनिष्ठावरणनिवर्तकत्वाद्विषयविषयीभाव उपपद्यते यद्वा अध्यस्तत्वं विषयत्वं चित्वं विषयित्वं तत्तश्च ज्ञानादिसमस्तं जगद्विषयश्चिदात्मा वृत्त्यारूढो विषयीति चैतन्यभेदे ज्ञाते विषयचैतन्याभिन्नप्रमाणचैतन्यं प्रत्यक्षप्रमेति ज्ञातुं शक्यमिति॥ उपाधिभेदात्तद्भे दंव्युत्पादयति एकमिति अथवा चैतन्यस्याद्वितीयत्वेन विषयचैतन्याभिन्नं प्रमाणचैतन्यमित्यनुपपन्नमित्याशंक्योपाधिभेदात्तद्भेदंव्युत्पादयति एकमिति एवं चै तन्यभेदं व्युत्पाद्य प्रमाणचैतन्यस्य विषयचैतन्याभेदं व्युत्पादयति तत्रेति तेषु मध्ये अंतःकरणपरिणामो वृत्तिरित्युक्तं तत्रापरोक्षवृत्तेरुत्पत्तिप्रकारं सदृष्टांतं व्युत्पा

अवरणभंगाय वृत्त्यंशविषयतया ५॥ वृत्तिप्रतिबिंबताभासेन। ६। अवाधितापरोक्षार्थविषयत्वं ज्ञानस्यापरोक्षत्वं अपरोक्षज्ञानविषयत्वमर्थापरोक्षमित्यन्योन्या श्रयो नास्तीत्यर्थः ६॥



दयति तथाहीत्यादिना वृत्तिरित्युच्यते इति शेषः अनुमित्यादिस्थले विषयेंद्रियसन्निकर्षाभावादंतःकरणस्य वहिर्निर्गमनं नास्ति तत्र वह्न्याद्याकारवृत्तिरंतरेव जायते अतएव तस्याः परोक्षत्वं विषयेन संबंधाभावादिति भावः अस्तु ततः किं तत्राह तस्यामिति इंद्रियार्थसन्निकर्षजन्यवृत्तावित्यर्थः विषयचैतन्यं घटाद्यवच्छि न्नचैतन्यं ततोपि किं तत्राह तदेति यदेंद्रियार्थसंनिकर्षानंतरं घटाकारवहिर्निर्गतांतःकरणवृत्तौ विषयचैतन्यं प्रतिफलति तदेति योजना घटाकारवृत्तिघटयो रित्यर्थः युगपदेकदा एकदेशस्थत्वेन एकस्मिन्देशे विद्यमानत्वेन वृत्तिघटोपाधिकयोश्चैतन्ययोर्भेदाप्रयोजकत्वात् भेदापादकत्वाभावाद्यथा सुखावच्छिन्न चैतन्यं तदाकारवृत्त्यवच्छिन्नचैतन्यं चोभयमभिन्नं भवति सुखतदाकारवृत्त्योरेकस्मिन् साक्षिण्यध्यस्तत्वादेवं घटतदाकारवृत्त्योरेकस्मिन् साक्षिण्यध्यस्

अंतःकरणवृत्त्यभिव्यक्तं चैतन्यं फलचैतन्यं तत्र वृत्तिविषययोर्युगपदेकदेशावस्थानेन तदुपहितचैतन्ययोरप्यभेदो भवति तथा हि तडागोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुःकोणाद्याकारेण यथा परिणमते तथेंद्रियार्थसन्निकर्षानंतरं अंतःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन संयुज्य तेपश्चात्तदाकारेण परिणमते सोयं परिणामो वृत्तिः तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति तदा वृत्तिविषययोर्युगपदेकदेशस्थत्वे ततदुपहितचैतन्यभेदाप्रयोजकत्वात् प्रमाणचैतन्यं विषयचैतन्याभिन्नं भवति सेयं प्रत्यक्षप्रमा॥ तत्र वृत्त्यावरणं निवर्तते चैतन्येनाज्ञानं निवर्तते प्रमयावा सावरणाज्ञानं निवर्तते ॥ ११

त्वाद्वृत्त्यवच्छिन्नप्रमाणचैतन्यं घटाद्यवच्छिन्नवि षयचैतन्याभिन्नं भवतीत्यर्थः अस्तु प्रकृते किमायातं तत्राह सेयमिति अनुमित्यादिस्थले विषयतदाकारवृत्त्योरेकस्मिन्नध्यस्तत्वाभावे प्रमाणचैतन्यस्य विषया चैतन्याद्भिन्नतया परोक्षत्वमिहतु तद्वैपरीत्यात्प्रत्यक्षत्वमितिभावः॥ प्रमायाः फलमाह तत्रेति प्रमासप्तम्यर्थः प्रमायां यो वृत्त्यंशस्तेनावरणं निवर्तते चैतन्यांशेन ज्ञानं निवर्तते इतिन सिद्धाश्रममतमुक्त्वेदानीं प्रमया सशक्तिकमज्ञानं निवर्तत इत्याचार्यमतमाह प्रमयावेति ततः किमत आह ततइति यतः सावरणमज्ञानं प्र यानिवृत्तं ततः साक्षिणा घटः स्फुरतीत्यर्थः ननु कोयं साक्षीत्याशंक्याह अंतःकरणेति ननु साक्षित्वं नाम उदासीनत्वे सति वोद्धृत्वं तच्चात्मन एव तत्र च वोद्धृत्वं नाम बोधाश्रयत्वमिति कथं साक्षिणा विषयस्फुरणं स्याद्दतोयं घट इति व्यवसायज्ञानानंतरं घटमहं जानामीत्यनुव्यवसायेन घटः स्फुरतीति वक्तव्यं न साक्षिणा॥

अंतश्चेतसि १

आदित्योयूप इति श्रुतिवद्गुणवादपरत्वादित्यर्थः॥२॥ जानामीत्यादि ६

तस्यबोधाश्रयत्वेन तत्स्फोरकत्वायोगात् नचात्मनश्चिद्रूपतया घटादिस्फोरकत्वमिति वाच्यं तर्हि सर्वदा सर्वस्फुरणप्रसंगात् किंच ज्ञानवानहमिति ज्ञाना श्रयत्वेनानुभूयमानस्य चिद्रूपत्वे मानाभावात् नच श्रुत्या तथात्वमिति वाच्यं प्रत्यक्षविरोधे श्रुतेरन्यपरत्वात् तस्मात्साक्षिणा घटः स्फुरतीत्यसंगतमिति चेत् नैवं योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्यादिश्रुतेरर्थांतरत्वासंभवेनात्मनश्चिद्रूपतावगमात् नच प्रत्यक्षविरोधः प्रत्यक्षेणाहंकारस्यैव ज्ञानाश्र यत्वेनानुभूयमानत्वात् नच स एवात्मेति वाच्यं तस्याध्यस्तत्वेनानात्मत्वेनानात्मत्वस्य वक्ष्यमाणत्वात् प्रमातृप्रमेयाद्यवभासकस्य श्रुत्यादिसिद्धस्यापलापा योगात् नचात्मनश्चिन्मयत्वेपि कथं प्रमात्राद्यवभासकत्वमिति चेन्न स्वप्रकाशतया तदुपपत्तेः नच स्वप्रकाशत्वे मानाभाव इति वाच्यं अत्रायं पुरुषः स्वयं ज्योतिर्भवतीत्यादिश्रुतेरेव प्रमाणत्वात् तस्या अर्थांतरत्वकल्पनायां श्रुतहान्यश्रुतकल्पनाप्रसंगात् लाघवादेकेन स्वप्रकाशसाक्षिणा सर्वव्यवहारोपपत्ता वनंतज्ञानकल्पनागौरवप्रसंगात् किंचानुव्यवसायेन घटः स्फुरतीत्यसंगतं साक्ष्यतिरिक्तानुव्यवसायकल्पनायां मानाभावात् नच प्रत्यक्षमेव तत्र प्रमाण

ततो विषयः स्फुरति साक्षिणा अंतःकरणोपहितचैतन्यं साक्षी॥ सेयं प्रत्यक्षप्रमा द्विविधा बाह्यप्रमा आंतरप्रमा चेति तत्र बाह्यप्रमा शब्दस्पर्शरूपरसगंधविषयभेदात्पंचविधा तत्करणानि श्रोत्रादिज्ञानेंद्रियाणि पंच आंतरप्रमा द्विविधा॥ ॥ ॥ ॥ ॥

प्रमप्रत्यक्षं २

मिति वाच्यं अनवस्थाप्रसंगात् किंचानुव्यवसायस्य मानसत्वेन तेन घटस्फुरणं कथं स्यात् मनसो बहिरस्वतंत्र्यात् अन्यथांतिप्रसंगात् नचव्यवसायज्ञानद्वारा तद्विषयतीति वाच्यं व्यवसायस्य मानसप्रत्यक्षत्वेपि बाह्यस्य घटादेस्तद्योगात् नच ज्ञानप्रत्यासत्त्या तद्विषयतीति वाच्यं ज्ञानस्य प्रत्यासत्तित्वेऽतींद्रिय मात्रोच्छेदापत्तेः तस्मात्स्वप्रकाशसाक्षिणा घटः स्फुरतीति निरवद्यम्॥ प्रत्यक्षप्रमां विभजते सेयमिति प्रथमां विभजते तत्रेति शब्दप्रमा स्पर्शप्रमा रूपप्रमा रसप्रमा गंधप्रमेति पंचविधेत्यर्थः तत्करणभेदमाह तदिति द्वितीयां विभजते आंतरेति आत्मप्रमां विभजते आत्मेति आंतरप्रमायाः करणमाह अंतरिंद्रि यमिति इन्द्रियलक्षणलक्षितत्वान्मन इंद्रियं आंतरप्रमाकरणं सुखादिप्रमाकरणं यथा रूपादिसाक्षात्प्रमितिकरणत्वेन चक्षुरादींद्रियं सिद्ध्यति एवं सुखादि साक्षात्प्रमितिकरणत्वेन मनोंतरिंद्रियं सिध्यति सुखादीनां व्यवहारिकत्वेन तद्गोचरज्ञानस्यापि व्यावहारिकप्रमात्वात् नच मनसस्तत्करणत्वेपि शुद्धात्मप्रयाक



अतींद्रियाणां धर्मादीनामपि ज्ञानप्रत्यासत्त्यैव प्रत्यक्षत्वात् सन्निकर्षेणैव प्रत्यक्षत्वनियमात् ४॥ घटज्ञानवानहमित्याद्यांतरस्फुरणं ६॥ बहिर्गमनाभावात् ६॥ मनसः स्वतो बहिर्निर्गमनसामर्थ्याभावात् ...

पन्मानं सान मनुते येनाहुर्मनो मतमिति श्रुतिविरोधादित्यर्थः॥१॥ ३ निश्चितत्वात् ३ श्रुतिः३॥ विशिष्टात्मसाक्षात्कारेपि श्रुतिः करणं सा न३॥ असंस्कृतमनः परत्वोपपत्तेरित्यर्थः॥१॥

रणत्वमनुपपन्नं श्रुतिविरोधादिति वाच्यं मनसैवानुद्रष्टव्यमित्यादिश्रुत्या मनसः शुद्धात्मप्रमाकरणत्वनिश्चितेः श्रुत्यंतरस्यार्थांतरत्वोपपत्तेः नचात्मनो मानसत्वे औपनिषदत्वश्रुतिविरोध इति वाच्यं शास्त्राचार्यसंस्कृतस्य मनस एव ब्रह्मसाक्षात्कारकरणत्वेनाविरोधादौपनिषदत्वश्रुतेः किंच विशिष्टात्मसा क्षात्कारे मनसः करणत्वेन क्लृप्तत्वाच्छुद्धात्मसाक्षात्कारेपि तदेव करणं वाच्यं विजातीयकरणांतरकल्पनेऽतिप्रसंगात् मानाभावाच्च तस्मादांतरप्रमायां मन एव करणमिति वाचस्पतिमिश्रमतानुसारिणामाशयः आचार्यमतमाह आचार्यास्त्विति एवं वक्ष्यमाणप्रकारेण मनस आंतरप्रमाकरणत्वमनुपपन्नमिति वक्तुं इंद्रियत्वं दूषयति इंद्रियेभ्य इति नच श्रुतिस्मृतिभ्यां बाह्येंद्रियेभ्यः पृथक्त्वं प्रतिपाद्यते नत्विंद्रियेभ्य इति वाच्यं संकोचे मानाभावात् नच तन इन्द्रियाणि

आत्मगोचरा सुखादिगोचरा चेति आत्मगोचरा द्विविधा विशिष्टात्मविषया शुद्धात्मविषया चेति अहं जीव इत्यादिविशिष्टात्मविषया अहं ब्रह्मास्मीति शुद्धात्मविषया चेति अहं सुखीत्यादिसुखादिविषया अंतरिन्द्रियं मन आंतरप्रमाकरणमिति वाचस्पतिमिश्राः आचार्यास्त्वेवं वर्णयंति इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः इन्द्रियाणि पराण्याहुः इन्द्रियेभ्यः परं मन इति श्रुतिस्मृतिभ्यां मनसः इन्द्रियेभ्यः पृथक्कृत्वकरणात् मनो नेन्द्रियं॥ वृत्तिं प्रत्युपादानत्वान्न करणं मनः सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वेनाप्रमात्वमिष्टमेव॥

तद्व्यपदेशादन्यत्र श्रेष्ठ इत्यस्मिन्नधिकरणे एकादशानाममुख्यप्राणानामिंद्रियत्वनिर्णयात् मनसोऽनिंद्रियत्वेन विरोधापत्त्या संकोचो युक्त इति वाच्यं यजमानपंचमा इडां भक्षयंतीत्यादौ ऋत्विग्भिन्नेन यजमानेन तद्गतपंचत्वसंख्यापूरणादनिंद्रियेणापि मनसा इन्द्रियगतसंख्यापूरणसंभवेन तदधिकरण विरोधात्॥ किंच मनसः करणत्वसिद्धे इंद्रियत्वं स्यात् नच तस्य करणत्वं संभवति निखिलवृत्त्युपादानत्वेन तस्य तदयोगात् इत्याह वृत्तिं प्रतीति ननु सुखाद्युप लब्धिः करणसाध्या साक्षात्प्रमितित्वाद्रूपाद्युपलब्धिवदित्यनुमानेन मनसः करणत्वसिद्धौ इंद्रियत्वसिद्धिरन्यथा सुखादिसाक्षात्कारस्याप्रमात्वप्रसंग इति चेत् ॐ मित्याह सुखेति ईश्वरस्य देहेंद्रियादिशून्यत्वेन तदीयसुखादिप्रमायां व्यभिचारादनुमानस्य मनसः करणत्वासिद्धाविंद्रियत्वं दूरनिरस्तं एवं च सुखादिसाक्षात्कारस्य प्रमाणाजन्यत्वाभावेनाप्रमात्वांगीकरणमुचितमिति भावः ननु सुखादीनां साक्षात्कारस्य प्रातीतिकत्वे सुखादीनां व्यावहारिकत्वं न

किं मुख्यप्राणस्यैव इति भेदादितरे प्राणा वागादय उत ततत्वात् प्राणा इति ... आहतरितितत्वान् प्राणा एव वागादीनि ... मनः सर्वेन्द्रियाणि चेति श्रेष्ठप्राणादन्यत्र भिन्न

क्वचित्प्राणादौ इन्द्रियत्वव्यवहारः प्रकरणादिति ... ॥११॥

एकत्वज्ञापकोपनिषज्जन्यज्ञानं विनानिर्विकल्पकज्ञानेनसम्भवतीतिभावः॥७॥

स्यादित्याशंक्याह अतएवेति सुखादिसाक्षात्कारस्याप्रमात्वादेवेत्यर्थः नचसुखादीनांप्रातीतिकत्वेहर्षाद्यर्थक्रियाकारित्वंनस्यादिति वाच्यंप्रातीतिकस्यापि शुक्तिरजतादेस्तद्दर्शनात् आंतांतःकरणतद्धर्माणांप्रातीतिकत्वमुपपन्नमितिभावः॥ नन्वेवमात्मसाक्षात्कारस्यापिप्रमाणाजन्यतयाऽप्रमात्वापत्तिः नचेष्टापत्तिरितिवाच्यं तर्ह्यंतःकरणादिवदात्मनोपि प्रातीतिकत्वापत्तिरतस्तद्व्यावृत्त्यर्थमात्मसाक्षात्कारंप्रतिमनसःकरणत्वमेष्टव्यं इत्याशंक्यकिंविशिष्टात्मसाक्षात्कारस्याप्रमात्वमापद्यते आहोस्विच्छुद्धात्मसाक्षात्कारस्यनाद्यः इष्टापत्तेः नद्वितीयइत्याह शुद्धेति ननुवाक्यस्यपरोक्षज्ञानजनकत्वनियमात्कथंवेदांतवाक्याद्दात्मसाक्षात्कार इत्याशंक्याह वाक्यस्येतिवक्ष्यतइतिशाब्दप्रमानिरूपणावेलायामितिशेषः अत्रवैशेषिकाःसाक्षात्कारिप्रमाद्विविधासविकल्पकनिर्विकल्पकभेदात् निःप्रकारकंवैशिष्ट्यानवगाहिवाज्ञानंनिर्विकल्पकंसप्रकारकंवैशिष्ट्यावगाहिवाज्ञानंसविकल्पकंतत्कारणमिंद्रियंप्रत्यक्षमितिवदंति तदसंगतं अशाब्दनिर्विकल्पकज्ञानेमानाभावात् नचविशिष्टज्ञानस्यविशेषणज्ञानजन्यत्वनियमेनतत्सिद्धिरितिवाच्यंविशेषेणसन्निकर्षाद्विशिष्टज्ञानोपपत्तेः॥ निर्विकल्पकज्ञानवत्सविकल्पकज्ञानंप्रत्यक्षमितिबौद्धा [अपोह—वादिनः१] नदसत् निर्विकल्पकज्ञानवत् सविकल्पकज्ञानस्यापिप्रमात्वेबाधकाभावात्नचालीकसामान्यविषयतयानस्याप्रमात्वमिति वाच्यं सामान्यस्यालीकत्वासिद्धेः प्रत्युतनिर्विकल्पज्ञानस्यैवाप्रामाणिकत्वात् तस्माद्यत्किंचिदेतत् तदेवंप्रत्यक्षप्रमानिरूपिताप्रत्यक्षोपजीव्यत्वात् प्रत्यक्षनिरूपणानंतरमनुमितिंलक्षयति लिंगेति पर्वतोयंवह्निमान् धूमवत्वात्योयोधूमवान्ससोऽग्निमान् यथामहानसइत्यत्र पर्वतःपक्षः वह्निःसाध्यंधूमोलिंगं ततश्चसएवपक्षधर्मः तथाचायंधूमवानितिव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानंलिंगज्ञानंतेनजन्यमयंपर्वतोवह्निमानितिज्ञानमनुमितिः। यद्वाजीवोब्रह्माभिन्नःसच्चिदानंदलक्षणत्वात् ब्रह्मवदित्यत्रजीवःपक्षःब्रह्माभेदःसाध्यसच्चिदानंदलक्षणत्वंलिंगमयमेवपक्षधर्मःएवंचव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानंलिंगज्ञानंतेनजन्यंजीवोब्रह्माभिन्नमितिज्ञानमनुमितिः पक्षताश्रयःपक्षः सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षताएवंचव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनलिंगज्ञानजन्यत्वमनुमितेर्विवक्षितमतोनस्मृत्यादावतिव्याप्तिः नतृतीयलिंगपरामर्शत्वेनतज्जन्यत्वमनुमितेः तृतीयलिंगपरामर्शस्याप्रामाणिकत्वेनतज्जत्वस्यदूरनिरस्तत्वात् किंतल्लिंगमित्याकांक्षायामाह व्याप्तीति केयंव्याप्तिरित्यत आह साधनेतिव्याप्त्याधारत्वंसाधनत्वंव्याप्तिनिरूपकत्वंसाध्यत्वं अव्यभिचरितत्वंनियतत्वं अव्यभिचरितत्वंनामसाधनसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यवदन्यावृत्तित्वंवातथाचायंनिष्कर्षः साधनसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यंव्याप्तिरिति द्वितीयपक्षेतु साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वंव्याप्तिः अस्तिचेयंधूमेसाधनेनधूमादिनासमानाधिकरणोयोत्यंताभावोघटादिप्रतियोगिकस्तदप्रतियोगियत्साध्यंतेनसामानाधिकरण्यंधूमादेर्व्याप्तिः अत्रयद्यपिहेतुसमानाधिकरणात्यंताभावाः तत्तद्वह्न्यत्यंताभावास्तत्प्रतियोगिनस्तत्तद्वह्नयः। पर्वतीयधूमसमानाधिकरणात्यंताभावप्रतियोगित्वान्महानसीयवह्नेः। महानसीयधूमसमानाधिकरणात्यंताभावप्रतियोगित्वात्पर्वतीयवह्नेस्तथाचलक्षणमव्याप्तं अप्रतियोगिसाध्यसामानाधिकरण्याभावात् नचसमानाधिकरणयोरेव व्याप्तिर्विवक्षितेतिवाच्यंतर्हि गुणवान्द्रव्यत्वादित्यत्राव्याप्तिर्वज्जलोपायिता तथापिहेतुतावच्छेदकावच्छिन्नहेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नसाध्यसामानाधिकरण्यंहेतोर्व्याप्तिर्विवक्षितातथाचनाव्याप्तिः नचैवमपिसंयोगिद्रव्यत्वादित्यत्राव्याप्तिरितिवाच्यं अत्यंताभावस्यप्रतियोगिव्यधिकरणत्वस्यविवक्षितत्वात् अस्मिन्मतेसंयोगस्याव्याप्यवृत्तित्वाद्दानदोषः अवच्छेदकत्वमनतिरिक्तदेशवृत्तित्वंतथाचनात्माश्रयदोषोपि अत्रविस्तरस्तुन्यायचिंतामणितद्व्याख्यासुद्रष्टव्यः अस्माभिरत्रदिङ्मात्रप्रदर्शितंपारमार्थिकतत्वनिरूपणेप्रवृत्तत्वादितिएवमन्योन्यघटितव्याप्तिलक्षणेपिद्रष्टव्यंनन्वियंव्याप्तिःकेनप्रकारेणगृह्यतइत्यत आह प्रतिबंधकेति प्रतिबंधकत्वंनामकार्यानुकूलकिंचिद्धर्मविघटकत्वंकार्यानुत्पादप्रयोजकत्वंवातत्रव्यभिचारज्ञानंसाक्षाद्व्याप्तिग्रहणप्रतिबंधकंउपाधिज्ञानंपरंपरया। साध्यवदन्यवृत्तित्वंव्यभिचारः साध्यव्यापकत्वेसतिसाधनाव्यापकत्वंउपाधिः तथाहिक्रत्वंतरवर्तिनीहिंसाऽधर्मसाधनंहिंसात्वाद्बाह्यहिंसावदित्यत्रनिषिद्धत्वमुपाधिः तत्रासीदंलक्षणंसाध्यस्याधर्मसाधनत्वस्यव्यापकं॥ ॥

**अतएवअंतःकरणतद्धर्माणांचशुक्तिरजतादिवत् प्रतीतिकत्वंशुद्धात्मसाक्षात्कारस्यवेदांतवाक्यजन्यत्वात्प्रमात्वंवाक्यस्यापरोक्षज्ञानजनकत्वंवक्ष्यते इतिप्रत्यक्षप्रमाणं लिंगज्ञानजन्यंज्ञानमनुमितिः॥ व्याप्त्याश्रयोलिंगं साधनसाध्ययोर्नियत॥ ॥ ॥ ॥**

**समानाधिकरणंव्याप्तिः प्रतिबंधकाभावेसतिसहचारदर्शनेनसाव्याप्तिर्गृह्यते ॥ ९ ॥**

[तु॰छेर] [हेतोः४] [३साधनस्य] [कस्य२] [साध्यनिष्ठ४] [संयोगस्य३] [जनन५] [नाशकत्वं५]

समानाधिकरणंवह्निधूमयोःपर्वतमहानसादौसर्वत्रसत्वात्नाव्याप्तिरित्यर्थः॥१

आद्यलक्षणेगुणत्वाभावेपिद्रव्यत्वस्यसत्वात्साधनसमानाधिकरणात्यंताभावप्रतियोगित्वमेवसाध्यस्येति१॥

व्याप्यतावच्छेदकप्रकारकेत्यस्यव्याप्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः२॥

अव्यापकत्वेनैः सं०५ बाधेव्याप्तिवारणायद्वितीयलक्षणमाहकार्येति२॥

स्वसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्वंव्याप्यवृत्तित्वं५॥ यत्साध्यतावच्छेदकमित्यत्रावच्छेदकत्वंसमव्याप्तत्वमितिवक्तव्यंतथाव्याप्तिघटितव्याप्तिलक्षणाकरणेनात्माश्रयःस्यादित्याशंक्याह अवच्छेदकमितितथाचावच्छेदकत्वस्यव्याप्यघटि

साध्यवान्पक्षः १॥ अनुमितेः संस्कारजन्यत्वेनस्मृतित्वांगीकृतेसतिद्॥ पर्वतोधूमवान्वह्निमत्वात्२॥ धूमदर्शनेनव्याप्तिसंस्कारोद्बोधे ४॥ अनुकूलतर्कस्त्वयदिधूमोवह्निव्यभिचारिस्यात्तर्हिवह्निजन्योनस्यात्३॥

निषद्धत्वंव्यापकत्वंनामतद्वन्निष्ठात्यंताभावाप्रतियोगित्वंनिषिद्धत्वंच तथाएवंसाधनस्यहिंसात्वस्यनिषिद्धत्वमव्यापकं अव्यापकत्वंनामतद्वन्निष्ठात्यंता भावप्रतियोगित्वंनिषिद्धत्वंचतथा अग्नीषोमीयहिंसायांतदभावात् एवंधूमवान्वह्नेरित्यत्रार्द्रेंधनसंयोगः उपाधिः अत्राप्युक्तप्रकारेणलक्षणंयोजनी यं एवंयथोक्तप्रतिबंधकाभावेसतिसहचारदर्शनेनव्याप्तिर्गृह्यते ननुयथोक्तप्रतिबंधकाभावः कस्मान्निश्चीयतेइतिचेत् अनुकूलतर्कादिनासनिश्चीयते इतिग्रहाणएवमनुकूलतर्कादिनाप्रतिबंधकाभावेनिश्चितेननसहकृतसहचारदर्शनेनव्याप्तिनिर्णयानंतरंलिंगज्ञानेनसंस्कारोद्बोधेसत्येवानुमितिरुत्पद्य तेनत्रव्याप्तिःज्ञानंकरणं नत्संस्कारोऽवांतरव्यापारः अनुमितिःफलं नचसंस्कारजन्यत्वेस्मृतित्वापत्तिरितिवाच्यं तत्प्रागभावजन्यत्वस्यवासंस्कारमात्रजन्यत्व स्यवास्मृतित्वप्रयोजकत्वादन्यथाप्रत्यभिज्ञायामपिस्मृतित्वापत्तेरित्यभिप्रेत्यफलितमाह तस्यामितिउद्बोधःसहकारिलाभःसहकारिणःसदृशदर्शनादयः

व्याप्तिः तस्यांगृहीतायांलिंगज्ञानेनव्याप्त्यनुभवजन्यसंस्कारोद्बोधेसति अनुमितिर्जायते साद्विधास्वार्थापरार्थाचेति इयंस्वार्थाऽनुमितिरुक्ता परार्थानुमितिस्तुन्यायसाध्यान्यायोऽवयवसमुदायः अवयवास्त्रयः प्रतिज्ञाहेतूदाहरणरूपाः उदाहरणोपनयनिगमनरूपा वा तथाहि जीवः परस्मान्न भिद्यते सच्चिदानंदलक्षणत्वात् परमात्मवदित्यत्रजीवः परस्मान्नभिद्यते इतिप्रतिज्ञासच्चिदानंदलक्षणत्वंहेतुः इदमेवलिंगमित्युच्यते यः सच्चिदानंदलक्षणः सपरस्मान्नभिद्यते यथा परमात्मेत्युदाहरणम् ॥

रैः स्वस्यव्याप्तिनिश्चयानंतरं परोपदेशमंतरेणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानाद्याऽनुमितिर्जायते सास्वार्थानुमितिरित्यर्थः परार्थानुमितिंव्युत्पादयति परार्थेति कोऽसौन्यायइत्य पेक्षायामाहन्यायइतिकियंतोऽवयवाइत्यत आह अवयवाइति केतेत्रयइत्याकांक्षायामाह प्रतिज्ञेति त्रीणिऊदाहरणांतानि यद्वाउदाहरणादिकाइत्यभियुक्तोक्त्या प्रतिज्ञाद्यास्त्रयोऽवयवाउदाहरणाद्यास्त्रयोवाऽनुमानवाक्यैकदेशत्वंप्रतिज्ञाद्यन्यतमत्वंवाऽवयवत्वं साध्यविशिष्टधर्मिप्रतिपादकंवाक्यंप्रतिज्ञा पक्षधर्मतावाच कपंचम्यंतःशब्दोहेतुः सव्याप्तिकदृष्टांतप्रतिपादकवाक्यमुदाहरणं पक्षेहेतूपसंहार उपनयः पक्षेसाध्योपसंहारोनिगमनं तद्यथापर्वतोयंवह्निमानितिप्रतिज्ञाधूम वत्वादिहेतुः योयोधूमवान्ससोऽग्निमान्यथामहानसइत्युदाहरणं तथाचायमित्युपनयः तस्मात्तथेतिनिगमनमेवंलौकिकोदाहरणेप्रतिज्ञादिविभागमभिप्रेत्यजी





ज्ञानाश्रयं ६॥ आत्मनःपरस्मादभेदरूपं ९॥

भेदंव्युत्पादयन्ननुमानप्रयोगमाह तथाहीति अनुमानवाक्यंसप्तम्यर्थः प्रतिज्ञादिविभागंदर्शयति जीवइत्यादिना लीनमर्थंगमयतीतिव्युत्पत्त्यासाध्यसाधकोहेतुर्लिं गशब्दवाच्यइत्याह॥ इदमिति॥ ननुजीवः परस्मान्नभिद्यतेइत्यत्रकिमंतःकरणविशिष्टोजीवः पक्षः उततन्त्साक्षी आहोस्विन्निरुपाधिकः प्रत्यगात्मावानाद्यःवि शिष्टस्यकर्तृत्वादिधर्मिणस्तद्विपरीतब्रह्मात्मैक्यायोगात् नहिश्रुतिरपिवाधितमर्थंबोधयति नद्वितीयःसाक्षिणःसोपाधिकतयातद्विपरीतब्रह्मात्मैक्यायोगा न ततृतीयः शुद्धस्यजीवशब्दवाच्यत्वायोगात् लक्ष्यस्याद्वितीयतयातत्साधनेसिधसाधनतापत्तेः तथाजीवस्यपरस्माद्भेदः प्रसिद्धोनवानाद्यस्तदैक्यसा धनेवाधापत्तेः नद्वितीयः अप्रसिद्धस्यशशशृंगस्येवनिषेधायोगात् तथाजीवस्यज्ञानाश्रयत्वेनसच्चिदानंदलक्षणहेत्वसिद्धेः तत्स्वरूपत्वेमानाभावात् त दाश्रयत्वस्यजानामीत्यनुभवसिद्धत्वादेवंब्रह्मणोपिद्रष्टव्यं तस्मादेवमनुमानमसंगतमिति अत्रब्रूमः जीवशब्दवाच्यस्यब्रह्मैक्यवाधेपितल्लक्ष्यस्यतदै क्यसाधनेनसएवपक्षः नचसिद्धसाधनतावाच्ययोर्भेददर्शनेनलक्ष्ययोरपितद्भ्रांतिसंभवेनश्रुत्यनुगृहीतानुमानेनतद्वारणात् किंचपरमतेजीवपर

अहमस्मीतिभामिइतिकदाप्यप्रियोनभवामिइत्यनुभवाज्जीवस्यसच्चिदानंदलक्षणत्वं अतोनहेत्वसिद्धिः ॥ ९ ॥

योर्भेदाभ्युपगमेनश्रुत्यनुगृहीतानुमानेनजीवपरयोरैक्यसाधनेनभेदस्यमिथ्यात्वोपपत्तेः नसिद्धसाधनता वाधोवेत्यभिप्रेत्यश्रुतिस्मृतियुक्तिविद्वदनुभ वैर्जीवस्यसच्चिदानंदत्वाचगमान्नासिद्धोहेतुरित्याह अहमिति अत्रायंपुरुषः स्वयंज्योतिर्भवतीति आत्मैवास्यज्योतिर्भवतियोऽयंविज्ञानमयःप्राणेषुहृद्यंज्योतिःपुरुषः त्रिषुधामसुयद्भोग्यंभोक्ताभोगश्चयद्भवेत् तेभ्योविलक्षणःसाक्षीचिन्मात्रोहंसदाशिवः इत्यादिश्रुतयः यथाप्रकाशयत्येकः कृत्स्नंलोकमिमंरविः क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशयतिभारतेत्यादिस्मृतयः यद्यात्माचिद्रूपनस्यात्तर्हिजगदांध्यप्रसंगइतितर्कात्मिकायुक्तयः विद्वदनुभवइत्येतैरात्मनःसच्चि दानंदरूपत्वमंगीकर्तव्यमित्यस्मिन्नर्थेस्वानुभवमभिनीयदर्शयति अहमिति अस्मीत्यात्मनःसत्यत्वानुभवः भामीतिचिद्रूपत्वानुभवः अप्रियोनभवामी त्यप्रियत्वनिषेधानुभवेनात्मनआनंदत्वसिद्धिः नन्वस्त्वात्मनःसच्चिदानंदलक्षणत्वंततःकिमित्यत आह अतइतियतःकारणादात्मनःसच्चिदानंदलक्षण त्वंस्वानुभवसिद्धं अतःकारणादित्यर्थः हेत्विति हेतोस्त्रिविधाअसिद्धयोनभवंतीत्यर्थः॥

यथा पर्वतो वह्निमान् प्रमेयत्वात् साधा॥ शब्दो नित्यः शब्दत्वात् असा०॥१॥ यथा शब्दो नित्यः कृतकत्वात् विरुद्धः॥२॥ गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत् आश्रयासिद्धिः॥१॥ शब्दो गुणः चाक्षुषत्वात् स०॥२॥ पर्वतो धूमवान् वह्निमत्त्वा

तथाहि हेत्वाभासः पंच अनैकांतिकविरुद्धासिद्धप्रकरणसमकालात्ययापदिष्टभेदात् सव्यभिचारोऽनैकांतिकः स च द्विविधः साधारणोऽसाधारणश्चेति साध्यवदन्यवृत्तिः साधारणः सपक्षावृत्तिरसाधारणः साध्यव्यापकीभूताभावप्रतियोगी विरुद्धः अनिश्चितपक्षवृत्तिरसिद्धः स च त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति पक्षतावच्छेदकाभाव आश्रयासिद्धः पक्षे हेतुस्वरूपाभावः स्वरूपासिद्धः साध्याप्रसिद्धिः हेत्वसिद्धिर्वा व्याप्यत्वासिद्धः साध्यविपरीतसाधकं हेत्वंतरं प्रकरणसमः अयमेव सत्प्रतिपक्षः इत्युच्यते पक्षे साध्यशून्यत्वं बाधः अयमेव कालात्ययापदिष्ट इति चोच्यते ततश्चात्मनः सच्चिदानंदलक्षणत्वस्य श्रुत्यादिभिर्निश्चितत्वादसिद्ध्यादिदोषाणामसंभवात्तेन ब्रह्मैक्यसाधनं युक्तमिति भावः ननु द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। जीवपरमात्मानौ भिन्नौ विरुद्धधर्माक्रांतत्वाद्दहनतुहिनवत् नाहमीश्वर इत्यादिश्रुतिस्मृत्यनुमानप्रत्यक्षैर्जीवब्रह्मैक्यस्य बाधितत्वात् कथं सच्चिदानंदलक्षणत्वेन ब्रह्मैक्यसिद्धिः न चाद्वितीयश्रुतिस्मृत्यनुमानविरोधादन्येषामप्रामाण्यं किं न स्यादिति वाच्यं सर्वतंत्रविरोधापत्त्यातैर्योगाद्द्वैतश्रुत्यादीनामुपासनपरत्वोपपत्तेः तस्मादनुमानेन ब्रह्मैक्यसाधनं बाधितमिति चेन्नैवं द्वैतश्रुतिस्मृत्योरतत्परत्वात् तथाहि फलवत्यज्ञातेऽर्थे श्रुतेस्तात्पर्यं वक्तव्यं जीवपरभेदस्य मानांतरसिद्धत्वेन तज्ज्ञानस्यापुरुषार्थत्वेन च श्रुतेस्तत्र तात्पर्यायोगात् किं च मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेददर्शिनोऽनर्थश्रवणाच्च श्रुतेस्तत्र तात्पर्यं न संभवति अपि च अथ योऽन्यां देवतामुपासतेऽन्योसावन्योहमस्मीति न स वेद यथा पशुः एवं स देवानामिति भेददर्शिनो निंदाश्रवणान्न तत्र श्रुतितात्पर्यं किंच उपक्रमादिषड्विधलिंगैरद्वितीये ब्रह्मणि तात्पर्यस्य निश्चितत्वात्तद्विरोधान्न भेदश्रुतेः स्वार्थे तात्पर्यं किंचास्मिन्नपि प्रकरणे कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्येकविज्ञानेन सर्वविज्ञानोपक्रमेणाद्वितीयं ब्रह्म प्रतिज्ञाय परेऽव्यये सर्व एकीभवंति ब्रह्मविद्ब्रह्मैव भवतीत्यद्वितीयब्रह्मण एवोपसंहारात्तन्मध्यपाति द्वासुपर्णादिवाक्यमपि प्रत्यक्षसिद्धभेदानुवादेनानंदैकरसमद्वितीयं ब्रह्म तात्पर्येण प्रतिपादयतीति निष्क्लिष्टतरमन्यथोपक्रमादिबाधप्रसंगः एवं स्मृतेरपि द्रष्टव्यं अनुमानस्य विंबप्रतिविंबयोर्व्यभिचारात् प्रत्यक्षस्य नेह नानास्ति किंचनेत्यादिशास्त्रबाधितत्वेन भ्रमत्वान्न ब्रह्मैक्यबाधकत्वं तस्माद्बाधकाभावादनुमानेन ब्रह्मैक्यसाधनमुपपन्नं एतेन सर्वतंत्रविरोधोपि निरस्तः॥

॥नेद्वैतप्रतिपादनपरा७॥ श्रेष्ठसिंहासने अंतराकाशे८॥ श्रुत्यादीनां एकवाक्ययोगा९ ॥ द्वासुपर्णा श्रुतौ ४॥

२॥ ऋतं सत्यमवश्यंभावित्वात् कर्मफलं पिबंतौ एकस्तत्र कर्मफलं पिबति भुंक्ते नेतरः तथापि पातृसंबंधात् पिबंतावित्युच्यते छत्रिन्यायेन सुकृतस्य स्वयंकृतस्य कर्मणः कृतमिति पूर्वेण संबंधः लोकेऽस्मिन् शरीरे गुहां बुद्धौ प्रविष्टौ परमे बाह्यपुरुषाका [illegible] तस्मिन् परमे परार्द्धे [illegible] ११

सत्यज्ञानमनंतं ब्रह्मेत्यादिश्रुत्या॥२॥ गुणादिविशिष्टबोधकत्वेनाप्युपपत्तेः॥२॥

नन्वेवमपि दृष्टांताभावादिदमनुमानं नावतरति जीवातिरिक्तब्रह्मसद्भावे मानाभावात् भावे वा तस्य ज्ञानाश्रयत्वेन सच्चिदानंदलक्षणत्वे मानाभावान्न च श्रुत्यैव तत्सिद्धिरिति वाच्यं तस्यार्थांतरत्वोपपत्तेरित्याशंक्याह सत्यमिति अयं भावः पारमार्थिकभेदाभावेपि जीवपरयोरौपाधिकभेदस्य व्यावहारिकस्याभ्युपगमेन दृष्टांतसंभवादनुमानमवतरत्येव न च परस्य ज्ञानाश्रयत्वं श्रुत्यानंदात्मकत्वावगमात् न च श्रुतेरर्थांतरत्वं वक्तुं शक्यं गौरवात् श्रुत्यन्तरविरोधप्रसंगात् आनंत्यानुपपत्तेश्चेति भावः ब्रह्मणः सच्चिदानंदलक्षणत्वे फलितमाह अत इति ननु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानेन व्याप्त्यनुभवसंस्कारोद्बोधे सति स्वार्थानुमितिरुत्पद्यत इत्युक्तं सा किं सर्वेषामुत्पद्यते आहोस्वित्केषांचित् नाद्यः अदर्शनात् न द्वितीयः तदुपायाभावादित्याशंक्य विवेके न तदुपायलिंगज्ञानसंभवान्नैवमित्याह एवमिति उक्तप्रकारेणान्वयव्यतिरेकाभ्यां शोधितस्त्वंपदार्थो येन स तथोक्तः तस्य स्वस्मिन् सच्चिदानंदलक्षण

सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति व्यजानात् इत्यादिश्रुत्या ब्रह्मणः सच्चिदानंदलक्षणत्वं अतो न दृष्टांतासिद्धिः एवं गुरुमुखाच्छ्रुतवेदांतस्य शोधितत्वंपदार्थस्य स्वस्मिन् सच्चिदानंदलक्षणदर्शनात् अहं ब्रह्मेति ब्रह्माभिन्नानुमितिरुत्पद्यते न चौपनिषदस्य ब्रह्मात्म्यैक्यस्यानुमानगम्यत्वानुपपत्तिः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या मननविधानात् वेदांतसहकारित्वेनानुमानप्रामाण्यस्वीकारात् परार्थानुमितिस्तु न्यायोपदेशेनोत्पद्यते न्यायोपदर्शिनः एवं ब्रह्मव्यतिरिक्तस्य प्रपंचस्य मिथ्यात्वसाध्यानुमितिर्दृश्यत्वादिहेतुभिरुत्पद्यते॥

११ त्वलिंगज्ञानादहं ब्रह्मास्मीति ब्रह्माभिन्नाऽनुमितिः स्वार्थोत्पद्यते ननु तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुत्या धर्मवद्ब्रह्मणो वेदैकगम्यत्वात् कथमनुमानगम्यत्वमित्याशंक्य निराकरोति न चेति किं ब्रह्मण्यनुमानस्य स्वतंत्रप्रामाण्यं निराक्रियते आहोस्विद्वेदांतसहकारित्वमिति नाद्यः इष्टापत्तेः न द्वितीय इत्याह मंतव्य इति अन्यथा मननविधानवैयर्थ्यं स्यादिति भावः कथं तर्हि परार्थानुमितिरुत्पद्यत इत्याशंक्याह परार्थानुमितिस्त्विति अवयवसमुदायात्मकानुमानवाक्यप्रयोगेणेत्यर्थः उक्तन्यायमन्यत्राप्यतिदिशति एवमिति व्यावहारिकः प्रपंचो मिथ्या दृश्यत्वात् शुक्तिरूप्यवदित्यनुमानप्रयोगो द्रष्टव्यः आदिशब्देन ब्रह्मव्यतिरिक्तत्वबाध्यत्वादयो गृह्यंते ॥ ६ ॥ ॥

घटादीनामत्यंताभावप्रतियोगित्वमस्त्येवातःसिद्धसाधनप्रसंगः॥१॥ संयोगस्याव्याप्यवृत्तित्वेनस्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वमस्त्येव॥१॥ ॥ ॥ ॥ ॥ ॥ १ ॥
स्वसंबंधी२॥ प्रतियोग्याधेयनिरूपिताधिकरणे या आधारता साएतद्देशत्वेनावच्छिन्ना३॥ संयोगेनघटवतिभूतलेअभावीयदैशिकविशेषणतासंबंधेनघटात्यंताभावोपितत्रैव वर्ततइतिनैयायिकाः२॥

ननुकिमिदंमिथ्यात्वंनतावदत्यंताभावप्रतियोगित्वंसिद्धसाधनत्वप्रसंगात् नापिस्वाधिकरणनिष्ठात्यंताभावप्रतियोगित्वंनदितिवाच्यं संयोगादिकमादायार्थानर
त्वोपपत्तेःनापिस्वसंसृज्यमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वंनदितिवाच्यंपरैरपिघटवतिभूतलेसंबंधांतरेणतदत्यंताभावाभ्युपगमेनसत्यत्वविरोधिमि
थ्यात्वासिद्धेःनाप्येकावच्छेदेनयेनसंबंधेनप्रतियोगिसत्वंतेनैवसंबंधेनतत्वंविवक्षितमितिवाच्यंतादृशस्यलोकेअप्रसिद्धत्वात् नापिज्ञाननिवर्त्यत्वंतदितिवाच्यं
यतोज्ञानमज्ञानस्यैवनिवर्तकमितिनियमेनप्रपंचस्यतदभावेनमिथ्यात्वाभावप्रसंगात्तस्मान्मिथ्यात्वस्यानिरूपणात्तत्साधकमनुमानमित्याशंक्याहमिथ्या
त्वंनामेतिनचप्रपंचस्यानिर्वचनीयशब्देननिरुच्यमानत्वात्कथमनिर्वचनीयत्वमितिवाच्यंसत्वासत्वाभ्यामन्यत्वस्यैवतत्वात् नचविरोधादुभयान्यत्वमनुपप
त्तमितिवाच्यं घटात्यंताभावस्यस्वाभावप्रतियोग्यनधिकरणत्वदृष्टत्वेनप्रकृतेप्युपपत्तेः नचैवंक्लिष्टकल्पनायांकिंप्रयोजनमिति वाच्यंप्रकारांतरस्यासंभवात्
तथाहिसत्वेवाधायोगादसत्वेप्रपंचस्यापरोक्षत्वायोगात् सदसदात्मकत्वस्यविरोधेनासंभवात् तस्मादुभयविलक्षणत्वमभ्युपगंतव्यं नचासत्तोऽप्रसिद्धत्वेनतद्भै

घटात्यंताभावस्यासद्रूपत्वात्यंताभावादन्यत्वं अत्यंताभावस्यत्रैकालिकत्वेनस्वाभावाभा
वात्प्रतियोगिसद्रूपघटादप्यन्यत्वंतस्य अतोअत्यंताभावस्यानिर्वचनीयत्वंसिद्धम्२॥

## मिथ्यात्वंनाम अनिर्वचनीयत्वं॥

शून्येक६॥ अभावस्य५॥
नात्रघटोवर्ततेकिंतुस्वरूपेणात्वस्तिसव॥४॥ यस्य५॥ भूतले३

लक्षण्यस्याप्यप्रसिद्धत्वादसंगतमितिवाच्यंतर्हिसदन्यत्वमेवानिर्वचनीयत्वमस्तुनचासत्यतिव्याप्तिःअसन्नामकिंचिदस्तिचेत्सत्वव्याघातःनास्तिचेत्कुत्रातिव्या
प्तिःतस्मात्सदन्यत्वमेवानिर्वचनीयत्वंवाधायोग्यंसत् तदन्यत्वंवाधयोग्यत्वं अथवाएकावच्छेदेनस्वसंसृज्यमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वंमिथ्यात्वंसम
मानसत्ताकयोःप्रतियोगितदभावयोरेकत्रविरोधेपिभिन्नसत्ताकयोरविरोधान्नासंभवःप्रतियोगिमतिसंबंधांतरेणतदभावस्य प्रतियोगिसत्वस्याभावविरोधित्वेनासंभ
वात्प्रतीतेरन्यथाप्युपपत्तेर्नोक्तदोषः यद्यभावस्यप्रतियोगिसत्ताधीनसत्ताकत्वेनप्रपंचाभावस्यापितत्समानसत्ताकतयातत्सामानाधिकरण्यमनुपपन्नमितिमन्यसेतर्हि
सत्यत्वावच्छिन्नप्रतियोगिकस्यात्यंताभावसमानाधिकरणत्वंमिथ्यात्वमस्तु———प्रतियोगिवत्प्रतियोगितावच्छेदकस्यापितन्निरूपकत्वात्सत्वावच्छिन्नप्रतियोगि
कस्यात्यंताभावस्यपारमार्थिकत्वेनतत्सामानाधिकरण्यंप्रपंचस्योपपद्यतेअभावस्यभिन्नसत्ताकत्वात् यद्यत्रापिविरहेकस्वभावाभावस्यप्रतियोगिसत्ताकतयाभिन्न
सत्ताकत्वन्नाभ्युपगम्यतेतर्हिकल्पितस्याभावोधिष्ठानेप्रतीयमानस्तादात्म्यकएवयत्राधिकरणसत्तापेक्षयाऽभिन्नसत्ताकःप्रतियोगीतत्रैवाधिकरणादभावोभिद्यतेसएवानुपप

निरुक्तलक्षणलक्षितकेवलान्वयित्वात्६॥ विषयात्प्रमायाभिन्नत्वंचेत्विषयंविनापिप्रमायाज्ञानंस्यात् विषयवत् अभिन्नत्वंचेत्साकारतापत्तिः५॥ सौगतमतानुमतिप्रसंङ्गस्स्वा६ मिथ्यात्वात्मकम्१॥ अधेयतयास्वात्यंताभावः३॥

ननुदृश्यत्वंनामदर्शनविषयत्वंदर्शनंनामवृत्तिज्ञानंतद्विषयत्वंब्रह्मणिवर्ततेउक्तसाध्यंनास्तिब्रह्मणःपारमार्थिकत्वादतोव्यभिचारइत्याशंक्याह दृशत्व
नामेतिब्रह्मणःस्वप्रकाशत्वेनस्वपरविषत्वाभावान्नोक्तदोषइत्यर्थः शुक्तिरूप्यमग्रेनिरूपयिष्यते अतोनदृष्टांतासिद्धिरितिदृष्टव्यंनैयायिकास्तुयत्त्वनुमा
नंत्रिविधंकेवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकीचेतिवर्णयंतिस्वमतमनुपपादयंस्तान्निराकरोतितच्चेतिएवकारव्य—वच्छेद्यमाहनत्विति वृत्तिमदत्यंता
भावाप्रतियोगित्वंकेवलान्वयित्वंतच्चास्मन्मतेनभवतीत्याहअस्मन्मतेइति ब्रह्मभिन्नस्यसर्वस्यकल्पितत्वेनमिथ्यात्वान्मिथ्यावस्तुनोऽधिष्ठाननिष्ठात्यंताभा
वप्रतियोगित्वेननिरुक्तकेवलान्वयित्वमसिद्धमेवनचप्रमेयत्वादीनांतथात्वात्कथमसिद्धिरितिवाच्यंप्रमाविषत्वंप्रमेयत्वंप्रमायाभिन्नाभिन्नत्वेनतन्निरू
पितविषयत्वस्यापितथात्वेनकेवलान्वयित्वासिद्धेःनचेश्वरप्रमाविषयत्वंकेवलान्वयित्वमिति वाच्यंईश्वरप्रमायाःस्वविषयत्वेऽप्रसिद्धांतापत्तेस्तद्भा

विषयसापेक्षतया नित्यत्वासिद्धिःजीववत१
दृश्यत्वंनामचैतन्यविषयत्वंअतोनब्रह्मणिव्यभिचारःतच्चानुमानमन्वयिरूपमेवनतुकेवलान्वयिअस्मन्मतेब्रह्मव्यतिरिक्तस्यसर्वस्य
ब्रह्मनिष्ठात्यंताभावप्रतियोगित्वेनतदप्रतियोगित्वरूपकेवलान्वयित्वस्याप्रसिद्धेःनापिव्यतिरेकी साधनेनसाध्यानुमितौसाध्याभावेसा
धनाभावनिरूपितव्याप्तिज्ञानस्यानुपयोगात्॥ २२ वेकुतः केवलान्वयित्वंनचाकाशात्यंताभावः केवलान्वयीतिवाच्यंतस्यस्वप्रतियोगित्वाकाशेऽअ
वृत्तिमत्वेन१ संयोगाभाव२

सत्वेनतत्वायोगात्प्रतियोगितदभावयोःसामानाधिकरण्यवदाधाराधेयभावस्यापिविरुद्धतयाऽसंभवादन्यथाकाशस्यासत्वप्रसंगात् किंचाकाशवदाकाशा
त्यंताभावस्यापिब्रह्मणिकल्पितत्वेनतन्निष्ठात्यंताभावप्रतियोगितयाकेवलान्वयित्वंदूरनिरस्तंएवमन्यदपिनिरूपणीयंएवंकेवलव्यतिरेक्यनुमानमपिन
संभवतीत्याह नापीतिसाधनसाध्ययोर्व्याप्तिज्ञानात्साध्यानुमितिर्भवतिनतुसाध्याभावसाधनाभावव्याप्तिज्ञानात् नह्यन्यव्याप्तिज्ञानादन्यानुमितिर्भवतिअतिप्र
संगात्नचप्रतियोग्यनुयोगिभावस्तत्रनियामकत्वंइतिवाच्यंप्रतियोगित्वादेरनिरूपणात् किंचव्याप्तिप्रकारकपक्षधर्मताज्ञानादनुमितिरितिनेमततनस्साधना
भावव्याप्तेःसाध्याभावनिष्ठत्वेनतत्प्रकारकपक्षधर्मताज्ञानासंभवात्कथंव्यतिरेकलिंगज्ञानेनसाध्यानुमितिःस्यात् किंचसाध्यप्रसिद्धेरनुमानांगत्वेनपृथिवीतर
भेदस्यकुत्राप्यप्रसिद्धत्वेनतदनुमितिर्नसंभवत्येव अन्यथाऽप्रसिद्धसाध्यानुमितौअप्रसिद्धशशशृंगाद्यनुमितिःकुतोनस्यात् नचघटादावितरभेदःप्रत्यक्षइति

केवलान्वयित्वायोगात्६ ब्रह्मण्याकाशात्यंताभावस्यात्यंताभावः५॥ प्रतियोगित्वंनामाभावनिरूपकत्वंअभावत्वंनामप्रतियोगिनिरूप्यंतथाचान्योन्याश्रयःस्यात्३॥ अत्यंताभावस्य७॥

नन्वेवं सति अन्वयव्याप्तिमविदुषः व्यतिरेकव्याप्तिज्ञानादुपमानुमितिः कथं स्यादिति तत्राह अन्वयेनेति तस्मादन्वयिरूपमनुमानमेकमेवेतिभावः एवमनुमितिप्रमां निरूप्य क्रमप्राप्तामुपपत्तिं निरूपयति सादृश्येति अयंभावः नगरदृष्टगोपिंडो गवयार्थी पुरुषः वनमुद्दिश्य प्रस्थित आरण्यकपुरुषाद्गोसदृशो गवयपद इति श्रुत्वा वनं गतो गोसादृश्यविशिष्टपिंडमनुभवति गोसदृशो ऽयं गवय इति पश्चादेतत्सदृशी मदीया गौरिति स्वगेहस्थां गामुपमिनोतीति तत्र गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलं सेयमुपमितिरिति भक्ताभीष्टदं सनातनं गोपीजनमनोहरं सत्यभामासुतं कृष्णं वंदे सच्चित्सुखात्मकं १ क्रमप्राप्तां शाब्दप्रमां लक्षयति वाक्येति किं तद्वाक्यमित्याकांक्षायां वाक्यस्य लक्षणमाह अकांक्षेति वर्णसमूहः पदं न च वर्णानां क्षणिकानां क्रमेणोत्पद्यमानानां कथं समूहः स्यादिति वाच्यं एकज्ञानविषयत्वस्यैव तत्त्वात् न चैकज्ञानविषयत्वं वा कथं क्षणिकानामिति वाच्यं वर्णानां क्षणिकत्वे मानाभावात् न चोत्पन्नो गकारो नष्टो गकार इत्यनुभवः प्रमाणमिति वाच्यं तस्योच्चारणोत्पत्त्यादिविषयत्वेन तत्राप्रमाणत्वात् न च प्रत्युच्चारणं गकारादिव्यक्त्युत्पत्तिः कुतो न भवतीति वाच्यं सोऽयं गकार इति

अन्वयव्याप्तिमविदुषः साध्यप्रमार्थापत्तिप्रमाणादिति वक्ष्यते सादृश्यप्रमितिरुपमितिर्वाक्यकरणिका प्रमा शाब्दी आकांक्षायोग्यतासंनिधिमत्पदसमुदायो वाक्यम ॥

प्रत्यभिज्ञाविरोधात्तच्च प्रत्यभिज्ञानस्य सादृश्यविषयतया जातिविषयतया वाऽन्यथासिद्धत्वेनाविरोध इति वाच्यं मुख्यत्वे वा धकाभावादुत्पत्तिविनाशप्रत्ययस्यान्यथासिद्धत्वस्योक्तत्वात् ननु तर्हि वर्णानां नित्यत्वेऽद्वैतश्रुतिविरोधः स्यादिति चेन्न प्रत्यभिज्ञाविरोधेन तेषां क्षणिकत्वमात्रनिराकरणात् आकाशादिवत् सर्गाद्यकाले उत्पत्तेः प्रलयकाले विनाशस्य चोपपत्तेर्नाद्वैतश्रुतिविरोधः अत एव तत्समुदायात्मकं पदं न क्षणिकं अत एव पदसमुदायात्मकं वाक्यं न क्षणिकं अत एव वाक्यसमुदायात्मको वेदोऽपि न क्षणिकः अत एवोक्तं भगवता सूत्रकारेण अत एव च नित्यत्वमिति नित्यत्वं प्रलयपर्यंतावस्थायित्वं विवक्षितं प्राकृतप्रलये सकलकार्यविनाशस्य प्रतिपादनात् ननु ध्वंसाप्रतियोगित्वं नित्यत्वमिति विवक्षितं अद्वैतश्रुतिविरोधापत्तेः छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत अस्य महतो भूतस्य निःश्वसितमेवैतद्यदृग्वेदो यजुर्वेद इत्यादिश्रुत्या वेदस्य कार्यत्वावगमात् तस्य चानित्यत्वावश्यंभावाच्च वाचा विरूपनित्ययेति श्रुतेरप्ययमेवार्थः अन्यथैकमेवाद्वितीयमिति श्रुतिविरोधापत्तेः नन्वेवं वेदस्योत्पत्तिविनाशाभ्युपगमे पौरुषेयतया स्वतः प्रामाण्यं व्याहन्येतेति चेन्न नहि पुरुषा



त्वं ईश्वरस्तु पूर्वपूर्वानुपूर्वीमपेक्ष्य सर्गादौ वेदं विरचितवानिति वेदस्यापौरुषेयत्वेन न स्वतः प्रामाण्यव्याहतिरित्यलमतिविस्तारेण पदसमुदायो वाक्यमित्युक्ते विलंबोच्चारितपदसमुदायेऽतिव्याप्तिरतस्तद्व्यावृत्त्यर्थं उक्तं सन्निधीति नात्युक्तेऽग्निनासिंचेदिति वाक्येऽतिव्याप्तिः स्यात्तद्वारणाय योग्यतेति तथापि गौरश्वः पुरुषो हस्तीत्यत्रातिव्याप्तिः स्यात्तन्निवृत्तये आकांक्षेति अत्रापि पदसमुदायत्वमेकज्ञानविषयत्वं विवक्षितमतो नासंभवः॥ नन्वाकांक्षादिमत्पदसमुदायो वाक्यमित्युक्तं अथ आकांक्षाया इच्छात्मकत्वेन चेतनधर्मत्वात्कथं पदानां साक्षात्त्वमित्याशंक्याकांक्षाजनकत्वेन पदानां साकांक्षत्वमित्यभिप्रेत्याकांक्षालक्षणमाह अन्वयेति यस्य पदस्य येन पदेन विनाऽन्वयानुपपत्तिस्तस्य पदस्य तेन पदेन समभिव्याहार आकांक्षा योग्यतालक्षणमाह वाक्येति सन्निधिस्वरूपमाह अविलंबेनेति पदानामविलंबोच्चारणं संनिधिः इत्यर्थः ननूक्तलक्षणवाक्यं शाब्दप्रमाकरणं चेदव्युत्पन्नस्यापि श्रुतवाक्याद्वाक्यार्थप्रमाप्रसंग इत्याशंक्याह अव्युत्पन्नस्येति संग

अन्वयानुपपत्तिराकांक्षा वाक्यार्थाबाधो योग्यता अविलंबेनोच्चारणं सन्निधिः अव्युत्पन्नस्य संगतिग्रहाभावान्न वाक्यार्थप्रमा पदपदार्थयोः स्मार्यस्मारकभावः संगतिः सा द्विविधा शक्तिर्लक्षणा चेति शक्तिर्नाम मुख्यावृत्तिः पदपदार्थयोर्वाच्यवाचकभावसंबंध इति यावत् सा च द्विधा योगो रूढिश्चेति अवयवशक्तिर्योगः यथा पाचकादिपदानां रूढिः समुदायशक्तिः यथा घटादिपदानां सा च व्यवहारादिना गृह्यते तथाहि उत्तमवृद्धस्य घटमानयेति वाक्यश्रवणानंतरं मध्यमवृद्धः प्रवर्तते ततो बालो तत्प्रवृत्तिं दृष्ट्वा ज्ञानमनुमिनोति तथाहि इयं प्रवृत्तिर्ज्ञानसाध्या प्रवृत्तित्वात्

निग्रहस्यापि वाक्यार्थप्रमोत्पत्तौ कारणत्वादव्युत्पन्नस्य तदभावान्न वाक्यार्थप्रमेत्यर्थः ननु केयं संगतिरित्यत आह पदेति संगतिः संबंध इत्यर्थः संगतिं विभजते सा द्विधेति द्वैविध्यमेवाह शक्तिरिति यद्यपि शक्तिर्गौणीलक्षणा चेति वृत्तिस्त्रिविधा तथापि वक्ष्यमाणविधया गौणीं लक्षणायामंतर्भाव्य द्वैविध्यकथनमिति ध्येयं प्रथमोद्दिष्टां शक्तिं निरूपयति शक्तिर्नामेति कासौ मुख्यावृत्तिरित्याशंक्याह पदेति पदजन्यज्ञानविषयत्वं वाच्यत्वं पदार्थस्मृतिजनकत्वं वाचकत्वं तदुक्तं पदमप्यधिकाभावात्स्मारकान्न विशिष्यते इति शक्तिं विभजते सा चेति यथोद्देशं योगं लक्षयति अवयवेति केषां पदानां योग इत्याशंक्योदाहरणमाविष्करोति यथेति पाचकादिपदानां योग इत्यनुषज्यते रूढिं लक्षयति रूढिरिति उदाहरति यथेति शक्तिग्रहप्रकारमाह सा चेति व्यवहारेण शक्तिग्रहप्रकारमुपपादयति तथाहीत्यादिना उत्त

प्रकृतिप्रत्ययार्थयोः संबंधेन शब्दस्यार्थेषु वर्तनं ७॥ प्रकृतिप्रत्ययार्थयोः संबंधेन विना शब्दस्यार्थेषु वर्तनं ७॥

अ॰कौ॰ द्वि॰प्र॰ ४३

उत्तरकालेलाघवेनपदार्थत्वे१ ॥ शक्यसंबंधिलक्षणाभवतियर्हिसंबंध्यपिपदार्थःस्यात्तर्हिलक्षणयाःकिंप्रयोजनंतेनलक्षणापिशब्दलभ्यैवस्यात्अनन्यलभ्यस्यैवशब्दार्थत्वादितिन्यायात्४॥

मध्यमवृद्धस्यप्रयोजकवृद्धस्समध्यमवृद्धःप्रयोज्यवृद्धः शिष्यपुत्रादिरितियावत् ननुमध्यमवृद्धप्रवृत्त्याकिमायातमित्यतआह बालइतिप्रवृत्तिंगमनागमनादिव्यवहा
रंतत्रानुमानंप्रयुज्यदर्शयति तथाहीत्यादिना॥ ननुज्ञानस्यकथंवाक्यजन्यत्वमनुमिनोतीत्याशंक्यानुमानप्रकारमाह इदमितिप्रवृत्त्यानुमितंज्ञानंयोयदन्वय
व्यतिरेकानुविधायीसतज्जन्यः यथादंडान्वयव्यतिरेकानुविधायीघटोदंडजन्यइतिसामान्यव्याप्तिमभिप्रेत्यदृष्टांतमाचष्टेदंडेति ननुज्ञानस्यवाक्यजन्यत्वमस्तु
प्रकृतेकिमायातमित्याशंक्याह इत्यनंतरमितिपदार्थेशक्तिःपदात्पदार्थस्मरणस्यैवज्ञायमानत्वात् समभिव्याहाराद्वाक्यार्थलाभःअन्यथालक्षणामात्रोच्छेदप्र
संगात्तदनन्यलभ्यस्यैवशब्दार्थत्वादितिपूर्वपक्षत्वेननैयायिकमतमाह साचेति ननुकार्यान्वितेशक्तिःगौरवात् नचकार्यान्वितेपदार्थेशक्त्यनंगीकारेकार्यताज्ञानस्याभा
वात्कथंशक्तिग्रहइतिवाच्यंकार्यपरवाक्यश्रवणानंतरंकार्यताज्ञानात्प्रवृत्त्याज्ञानानुमानवत्सिद्धार्थवाक्यश्रवणानंतरंमुखविकाशादिनाज्ञानानुमानसंभव
त् किंचप्रथमव्युत्पत्तौतदपेक्षायामपि लाघवेनानंतरंतदुपेक्ष्यपदार्थमात्रेशक्तिग्रहसंभवात्अन्यथाकथंकविकाव्यादिरचनास्यात् तस्मात्पदानांपदार्थेए

पुत्रस्तेजातः २

मदीयप्रवृत्तिवत् इतिज्ञानमनुमायतस्यवाक्यजन्यत्वमनुमिनोति इदंज्ञानमेतद्वाक्यजन्यंएतद्वाक्यान्वयव्यतिरेकानुविधायित्वात् दंड
जन्यघटादिवत् इत्यनंतरमावापोद्वापाभ्यांघटपदस्यघटव्यक्तौशक्तिमवधारयति साचशक्तिः पदार्थइतिनैयायिकाः॥ १ ॥

वशक्तिरितिनैयायिकानामाशयःमतांतरमाह कार्यान्वितइतितेषामयमाशयःपदानांकार्यान्वितेपदार्थेशक्तिर्नकेवलपदार्थेवाक्याद्वाक्यार्थप्रमानुत्पत्तिप्र
संगात् तथाहिपदार्थमात्रेशक्तानिपदानिकथंवाक्यार्थबोधयेयुः तेषांतत्राशक्तत्वात् नचसमभिव्याहारात्तद्बोधइतिवाच्यंपदानांतत्रसामर्थ्याभावेनसम
भिव्याहारेणापितद्बोधासंभवात् किंचसमभिव्याहारेणापिभवन्नपिघटखदिरपलाशाइतिवाक्यादिवपदार्थानांसमूहालंबनबोधएवस्यात् नचसंसर्गरू
पवाक्यार्थबोधःपदानांतत्रसामर्थ्याभावात् किंचपदानांपदार्थमात्रेशक्त्यभ्युपगमेसंगतिग्रहोनस्यात् तथाहिप्रवृत्त्याज्ञानाद्यनुमानद्वारापदानांपदार्थे
शक्तिनिश्चयःप्रथमंबालस्यवाच्यःकार्यताज्ञानंप्रवृत्तौहेतुःकार्यत्वंनामकृतिसाध्यत्वं एवंचवाक्यश्रवणानंतरंकार्यताज्ञानाभावेप्रवृत्त्यभावेनज्ञानाद्यनुमाना
संभवेनकथंशक्तिनिश्चयःस्यात् नचहर्षादिनाज्ञानानुमानेनतन्निश्चयइतिवाच्यंव्युत्पन्नस्यतद्भावेप्यतिबालस्यप्रथमव्युत्पत्तौतदयोगात् किंचहर्षादीना

पदशक्तिनिरूपितायापदार्थेशक्यतासाकेनावच्छिन्नापदार्थत्वेनावच्छिन्नाइतिनैयायिकः क्रियाऽन्वितपदार्थत्वेनेतिमीमांसिकःअन्वितार्थत्वेनेतिवेदांतिनः ११॥

रामः ४३

सिधपरवाक्येयःसंसर्गाभावःभ्रान्त्यातस्यज्ञानाभावेनसिद्धपरवाक्यमपिसंसर्गिणामिवबोधजनकमन्यंते४॥

तस्मात्पदानांकार्यान्वितेपदार्थेशक्तिरभ्युपगंतव्याएवंचवाक्यश्रवणानंतरंकार्यताज्ञानात्प्रवृत्त्याज्ञानाद्यनुमानेनशक्तिनिश्चयउपपद्यतेनचेष्टसाधनताज्ञा
नात्प्रवृत्तिसंभवेनकार्यताज्ञानमकिंचित्करमितिवाच्यंसुधामरीचिमंडलेतत्सत्त्वेपिप्रवृत्तेरदर्शनात् नचकार्यताज्ञानस्यप्रवर्त्तकत्वेकूपपतनादावपिप्रवृत्ति
प्रसंगइतिवाच्यंइष्टसाधनताज्ञानसमानकालस्यतस्यप्रवर्त्तकत्वस्वीकारात्तस्मात्कार्यताज्ञानमेवप्रवर्त्तकं अतएवकार्यपराणांलिङ्लोट्तव्यप्रत्ययआदिघटिता
नांवाक्यानामेवप्रामाण्यंनेतरेषांकथंतर्हिवाक्यार्थबोधः।असंसर्गाग्रहादितिवदामस्तस्मात्पदानांकार्यान्वितेपदार्थेशक्तिरिति॥ इदानींस्वसिद्धांतमाह अन्वितइ
तिपदानांलाघवादितरान्वितेपदार्थेशक्तिर्नकार्यान्वितेगौरवात्मानाभावाच्चयद्यपिप्रथमव्युत्पत्तौकार्यान्वितेपदानांशक्तिर्गृह्यतेतथापिपर्यायांतरेकार्यां
शंगौरवत्वेनोपेक्ष्येतरान्वितेपदार्थेपदानांसामर्थ्यमवधार्यतेतावतान्यव्यवहारोपपत्तेः नैचैवंकार्यताज्ञानाभावेप्रवृत्त्यभावात्कथंशक्तिग्रहइति वाच्यंपुत्रस्तेजा
तइतिवाक्यश्रवणानंतरंसिद्धार्थज्ञानादपिमुखविकासनेनहर्षमनुमायतत्तस्यज्ञानजन्यत्वमनुमायानंतरंतस्यवाक्यजन्यत्वमन्वयव्यतिरेकाभ्यांनिश्चित्य

कार्यान्वितेइतिमीमांसकाः। अन्वितेइतिवेदांतिनः एवंव्याकरणादिनापिशक्तिर्गृह्यते उक्तंचशक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्या
द्व्यवहारतश्चवाक्यस्यशेषाद्विवृतेर्वदंतिसान्निध्यतःसिद्धपदस्यवृद्धाइति लक्षणाशक्यसंबंधः॥ २२ वापोद्वापाभ्यांजनिमत्पिंडेपुत्रपद

स्यशक्तेरवधारणेनकार्यताज्ञानस्यसर्वत्रानैयत्यात् तदुक्तंवाचस्पतिमिश्रैः कार्यबोधेयथाचेष्टालिंगंहर्षादयस्तथासिद्धबोधेऽर्थवत्ताचशास्त्रत्वंहितशा
सनादिति एतेनकार्यपराणामेववाक्यानांप्रामाण्यंनसिद्धवस्तुपराणांवाक्यानामिति प्रत्युक्तं उक्तरीत्यासंगतिग्रहसंभवात् प्रयोजनवत्त्वाच्च अनधिगतार्थ
बोधकतयाप्रामाण्योपपत्तेः नन्वेवंसतितत्तोलाघवात्पदानांपदार्थेएवशक्तिरस्तुनत्वन्वयांशेगौरवात् नचैवंपदानामन्वयांशेशक्त्यभावेनततोवाक्यार्थबोधः
कथमितिवाच्यंसमभिव्याहारादेवतदुपपत्तेरितिचेन्नातिप्रसंगात् तथाहि पदानांयत्रसामर्थ्यंअवधारितं तद्बोधकत्वमेवावश्यमभ्युपगंतव्यं अन्यथाघटप
दात् पटबोधोपिस्यात् ततश्चाशक्तपदसमभिव्याहारात्कथंवाक्यार्थबोधःस्यात् नचक्रियापदसमभिव्याहृतेनाकांक्षादिमत्पदवृंदेनस्वस्वार्थेगृहीतसंगतिकेनवा
क्याभावाच्छाब्दबोधोस्त्विति वाच्यं तत्तत्पदश्रवणेनतत्तत्पदार्थोपस्थितावप्यन्वयांशेशक्त्यभावेनपदानांसमभिव्याहारात्कथंतद्बोधःस्यात् तस्मात्समभिव्याहा

अयंपुरुषोहर्षवान्मुखविकाशित्वात्संमतवत्१अयंहर्षइष्टज्ञानजन्यःहर्षत्वात्२इदंइष्टज्ञानंवाक्यजन्यंएतद्वाक्यान्वयव्यतिरेकानुविधायित्वात्दंडान्वयव्यतिरेकानुविधायिघटवत्२॥ अत्रोत्सवेनकिंचिदर्थग्रहणाकिंचिदर्थत्यागाभ्यांर

कौ॰
?॰प्र॰
४४

योयेनविनानुपपन्नः सतेनैवाक्षिप्यतेइतिन्यायेनानयनादेर्जातावनुपपत्तौव्यक्त्याक्षेपः आनयनादितात्पर्यानुपपत्तौवाजातिशब्दस्यजातिविशिष्टव्यक्तौलक्षणा २॥

र्थेशक्तिरवधार्यतेइतिसर्वैरवश्यमभ्युपगंतव्यं साचशक्तिर्जातावेवनव्यक्तौव्यक्तीनामानंत्यात् कथंतर्हिपदश्रवणानंतरंव्यक्तिबोधस्तत्राशक्तत्वादितिचेदाक्षे
पाल्लक्षणयावाव्यक्तिबोधः अथवाजातिविशिष्टव्यक्तौशक्तिरस्तुतथापिजातौज्ञातोपयुज्यतेव्यक्तौस्वरूपसतीनज्ज्ञानंविनाव्यक्तिधीविलंबाभावादित्यलमति
विस्तरेण एवंव्यवहाराच्छक्तिग्रहमुक्त्वान्यतोपिशक्तिग्रहमाह एवमिति तत्रसंमतिमाह उक्तंचेति इदानींलक्षणांनिरूपयति लक्षणेति शक्तिविषयःशक्यस्ते
नसंबंधोलक्ष्यमाणपदार्थस्यलक्षणायथामंडपंभोजयेत्यत्रमंडपपदस्यतन्निष्ठपुरुषेशक्यसंबंधोलक्षणा॥ तांविभजते साचेति शक्यसाक्षात्संबंधःकेवलल
क्षणायालक्षणमभिप्रेत्यकेवलांविभजतेकेवलेति त्रैविध्यमेवाह जहल्लक्षणेति जहल्लक्षणांलक्षयति शक्येति अजहल्लक्षणायामतिव्याप्तिवारणायशक्यार्थ
परित्यागेनेत्युक्तं तत्रोदाहरणमाह यथेति अजहल्लक्षणांलक्षयतिशक्यार्थापरित्यागेनेतिजहल्लक्षणायामतिव्याप्तिवारणायशक्यार्थापरित्यागेनेतिविशेष

साचद्विधाकेवलालक्षणालक्षितलक्षणाचेति केवलात्रिविधाजहल्लक्षणाऽजहल्लक्षणाजहदजहल्लक्षणाचेति शक्यार्थपरित्यागेनतत्सं
बंध्यर्थांतरेप्रवृत्तिर्जहल्लक्षणायथागंगायांघोषइत्यत्रगंगापदस्यतीरेशक्यार्थापरित्यागेनतत्संबंध्यर्थांतरेप्रवृत्तिरजहल्लक्षणाय
थाशोणोधावतीत्यत्रशोणपदस्यशोणगुणविशिष्टाश्वादिद्रव्येषु शक्यैकदेशपरित्यागेनैकदेशवृत्तिर्जहदजहल्लक्षणाइयमेवभागल
क्षणेत्युच्यतेयथासोयंदेवदत्तइत्यत्रसोयमितिपदयोःकेवलदेवदत्तपिंडे॥ १९णं तत्रोदाहरणमाह यथेति जहदजहल्लक्षणांनिरूपयति शक्यै

कदेशेतितत्रलौकिकोदाहरणमाह यथेति वैदिकमपितदाह यथेति मायोपहितचैतन्यंतत्पदवाच्यार्थः स्थूलसूक्ष्मादिशरीरोपहितचैतन्यंत्वंपदवाच्यार्थः तत
श्चतत्पदवाच्यैकदेशोमायातत्परित्यागेनैकदेशेचैतन्येवृत्तिस्तत्पदस्य एवंत्वंपदस्यवाच्यार्थेपिस्थूलसूक्ष्मादिशरीरमेकदेशस्तत्परित्यागेनैकदेशेचैतन्येवृत्ति
स्त्वंपदस्यजहदजहल्लक्षणेत्यर्थः ननुतत्त्वंपदयोरखंडचैतन्येलक्षणास्वीकारेएकेनैवपदेनब्रह्मसाक्षात्कारसंभवात् पदांतरवैयर्थ्यमितिचेन्नैषदोषःपदस्य
स्मारकत्वेनपदांतरंविनासाक्षात्काराजनकत्वात् ततश्चप्रथमंप्रत्येकंतत्त्वंपदाभ्यांनिर्विकल्पाखंडचैतन्यस्मरणमुपपद्यतेततः पदसमुदायात्मकवाक्याद्ब्रह्मा
त्मैक्यापरोक्षानुभवउपपद्यते अहंब्रह्मास्मीति अतोनपदांतरवैयर्थ्यंस्यादेतत् तत्त्वमस्यादिवाक्येलक्षणांगीकारोनिरर्थकःवाच्ययोरप्यैक्यबोधसंभवान्नचविरु

यथामंचाःक्रोशंतीत्यत्रमंचपदस्यमंचस्थेपुरुषेइतिपाठांतरम्॥८॥ नदीश्रयग्रहणेइतिपाठांतरम्॥८॥

एम
४४

घटत्वे४

द्धधर्माक्रांतयोस्तयोःकथमैक्यबोधइति वाच्यंविशेषणांशयोर्विरुद्धत्वेनैक्यबोधासंभवेपियोग्यतयाशक्त्युपस्थितयोर्विशेष्ययोरैक्यबोधसंभवात् तथाहिय
थाअनित्योघटइत्यत्रविशेषणांशस्यघटत्वस्यानित्यत्वान्वयासंभवेपियोग्यतयाविशेष्यांशव्यक्तेस्तदन्वयः तथाप्रकृतेप्युपपद्यतेयत्रोपसर्जनत्वेनोपस्थित
स्यवाक्यार्थान्वयः स्थान विशेष्यस्यवाक्यार्थान्वययोग्यतानास्तितत्रैवस्वतंत्रोपस्थित्यर्थं पदार्थैकदेशपरित्यागेनैकदेशेलक्षणापदस्यविशिष्टवाचकस्यय
थाघटोनित्यइत्यत्रविशेष्यांशव्यक्तेर्नित्यत्वान्वयायोग्यतयाघटत्वस्यस्वतंत्रोपस्थित्यर्थंतस्मिन्विशिष्टवाचकघटपदस्यलक्षणाततश्चप्रकृतेशक्त्युप
स्थितयोर्विशेष्ययोर्योग्यतयैक्यबोधसंभवान्नलक्षणा अन्यथागेहेघटमानयइत्यादावपिलक्षणाप्रसंगइति॥ अत्रोच्यतेयेनरूपेणपदार्थोपस्थितिस्तेनरू
पेणपदार्थानांवाक्यार्थान्वयोवाच्यः अन्यथातिप्रसंगात् एवंविशिष्टरूपेणोपस्थितयोस्तत्त्वंपदार्थयोरत्यंतविरुद्धत्वेनकथमभेदवाक्यार्थान्वयःस्यात्ततोनि

यथावातत्त्वमसीत्यत्रतत्त्वंपदयोरखंडचैतन्येलक्षणाशक्यपरंपरासंबंधोलक्षितलक्षणा यथाद्विरेफपदस्यमधुकरे गौणयपिलक्षितल
क्षणैव एवंव्युत्पन्नस्यगृहीतसंगतिकवाक्याद्वाक्यार्थस्यप्रमोत्पत्तौ आकांक्षायोग्यता आसत्तिस्तात्पर्यज्ञानंचेति चत्वारिकारणानि आकां
क्षायोग्यतेनिरूपिते शक्तिलक्षणान्यतरसंबंधेनाव्यवधानेनपदजन्यपदार्थोपस्थितिरासत्तिः॥ ११ र्विकल्पकचिद्रूपेणोपस्थित्यर्थंतत्त्वंपद

[illegible] तत्त्वमस्यादिवाक्येपुलक्षणांगीकारः नचानित्योघटइत्यत्रापिलक्षणास्यादितिवाच्यं तत्रविशिष्टव्यक्तेरनित्यत्वान्वयेबाधकाभावात्तत्रविशिष्टैक्यस्यप्रत्य
[illegible] विरुद्धत्वाच्च गेहेघटइत्यादावपिघटादेर्विशिष्टवृत्तित्वेबाधकाभावान्नलक्षणातस्मान्निर्विकल्पकचिद्रूपेणतत्त्वंपदार्थयोरुपस्थित्यर्थंतत्त्वमस्या
[illegible] पर्याप्तिरिति दिक् लक्षितलक्षणांनिरूपयति शक्येति तत्रोदाहरणमाह यथेति द्विरेफपदस्यशक्यंरेफद्वयंतस्यभ्रमरपदेनसंबंधःभ्रमरपद
[illegible] द्विरेफपदस्यमधुकरेणपरंपरासंबंधोलक्षितलक्षणेत्यर्थः सिंहोदेवदत्तइत्यत्रसिंहपदस्यदेवदत्तेगौणीवृत्तिःसालक्षितलक्षणाया
[illegible] पदस्यसिंह पदः शक्यस्तस्यक्रौर्येणसंबंधः क्रौर्यस्यदेवदत्तेनसंबंधः ततश्चसिंहपदस्यलक्ष्येणदेवदत्तेनशक्यपरंपरासंबंधोवर्ततइतिगौ
[illegible] शक्यधीति एवंसंगतिग्रहस्यान्वयव्यतिरेकाभ्यांवाक्यार्थप्रमोत्पत्तौकारणत्वमभिप्रेत्यशक्तिलक्षणाभेदेनसंगतिंव्युत्पाद्यवाक्यार्थप्र

प्रकृते६॥

कुड्यादिप्रविशेमनुष्यादिर्यदि शब्दं करोति न र्हि शब्द एव तस्य लिंगं लक्षकं ५॥

क्यार्थप्रमोत्पत्तौ संगतिग्रहः कारणं एवं व्युत्पन्नस्य गृहीतसंगतिकस्य गृहीतसंगतिकाद्वाक्यात्तदर्थप्रमोत्पत्तावाकांक्षादीन्यपि कारणानीति योजना न च वाक्यस्याशक्तत्वाद्गृहीतसंगतिकवाक्यादित्यसंगतमिति वाच्यं वाक्यस्याशक्तत्वेपि तस्य पदसमुदायात्मकतया पदानां शक्तत्वाद्गृहीतसंगतिकवाक्यादिति वक्तुं युक्तमितिभावः तर्हि तानि च त्वार्याकांक्षादीनि निरूपणीयानीत्याकांक्षायां द्वयं निरूपितमवशिष्टं द्वयं निरूप्यत इत्यभिप्रेत्याह आकांक्षेति॥ वाक्यलक्षणनिरूपणप्रस्तावे अन्वयानुपपत्तिराकांक्षा वाक्यार्थो वाधो योग्यतेति तेन निरूपित इत्यर्थः आसत्तिं लक्षयति शक्तीति॥ ॥ ॥ शक्तिलक्षणान्यतरवृत्त्या मतदन्यान्यत्वे पदार्थोपस्थितिरासत्तिरित्युक्तेप्रमाणांतरजन्यायाः पदार्थोपस्थितेरप्यासत्तित्वप्रसंगस्तद्वारणाय पदजन्येति लिंगविधया पदजन्यपदार्थोपस्थितेरासत्तित्ववारणाय शक्तीत्यादि शक्तिलक्षणेति रूपितेव्यवहितपदजन्यपदार्थोपस्थितेरासत्तित्ववारणायाव्यवधानेनेति॥ तात्पर्यज्ञानस्य वाक्यार्थप्रमां प्रति कारणत्वमुप

तात्पर्यं द्विविधं वक्तृतात्पर्यं शब्दतात्पर्यं चेति पुरुषाभिप्रायो वक्तृतात्पर्यं तज्ज्ञानं वाक्यार्थज्ञाने न कारणं तदभावेपि अव्युत्पन्नस्य वाक्याद्वाक्यार्थज्ञानदर्शनात् तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यं तच्च षड्विधैर्लिंगैर्निश्चीयते। वेदे लिंगानि तु दर्शितानि उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इति अस्यार्थः प्रकरणप्रतिपाद्यस्य अद्वितीयवस्तुनः॥ २२ पादयितुं तात्पर्यं विभजते तात्पर्यमिति तदर्थप्रतीतीच्छयोच्चरितत्वं वक्तृतात्पर्यमिति केचिदाहुः तन्न मौनिश्लोकादौ तदभावा

दित्यभिप्रेत्य वक्तृतात्पर्यं व्युत्पादयति पुरुषेति तद्ज्ञानस्य वाक्यार्थप्रमां प्रति कारणत्वं न संभवति व्यभिचारादित्यभिप्रेत्याह तदिति तद्ज्ञानं वाक्यार्थप्रमां प्रतिकुतो न कारणमित्याशंक्याह तदभावेपीति अव्युत्पन्नस्य वाक्यार्थज्ञानाभावेन तदिच्छायाः सुतरामसंभवात् तस्य तद्ज्ञानाभावेपि तद्वाक्याद्वाक्यार्थप्रमादर्शनात्तत्कारणमित्यर्थः शब्दतात्पर्यं निरूपयति तदिति तस्मात्प्रकृतवाक्यार्थादितरो यो वाक्यार्थस्तत्प्रतीतिमात्रेच्छया अनुच्चरितत्वे सति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्पर्यमित्यर्थः भोजनप्रकरणे सैन्धवमानयेत्युक्ते लवणानयनप्रतीतिवदश्वानयनप्रतीतिरपि स्यात्तद्योग्यत्वस्य विद्यमानत्वात्तद्वारणाय पूर्वदलं तथा पुभयेच्छया सैंधवमानयेत्युक्ते वाक्येऽव्याप्तिः स्यादत उक्तं मात्रेति उभयेच्छया युक्तत्वेपि तदितरप्रतीतिमात्रेच्छयानुच्चरितत्वस्य सत्वान्नाव्याप्तिः तर्हि तत्तात्पर्यं केन प्रमाणे

अव्युत्पन्नस्य ४॥ व्युत्पन्नस्य ४॥



न निश्चीयत इत्याकांक्षायामाह तच्चेति शब्दतात्पर्यमित्यर्थः कानि तानि तात्पर्यलिंगानीत्याकांक्षायामाह लिंगानि त्विति संग्रहश्लोकं पठत्युपक्रमेति श्लोकं व्याचष्टे अस्यार्थ इति कौ तावुपक्रमोपसंहारावित्याकांक्षायामाह प्रकरणेति उभयाकांक्षं प्रकरणं तत्प्रतिपाद्यस्य वस्तुन आदौ प्रतिपादनमुपक्रमः अंते प्रतिपादनमुपसंहारः एतद्द्वयं तात्पर्यनिर्णायकमेकं लिंगमित्यर्थः तदुभयमुदाहरति यथेति हे सोम्य सोमवन् प्रियदर्शन इदं दृश्यमानं सर्वं अग्रे सृष्टेः पूर्वं सदेवासीत् एकमेवाद्वितीयं तद्भिन्नं विजातीयं सजातीयं वा किमपि नासीत्यर्थः एवं छांदोग्ये षष्ठे आदावद्वितीयवस्तुप्रतिपादनमुपक्रमः॥ तथा एवं तदद्वितीयं वस्तु आत्मा यस्य तदेतदात्म्यं एतदात्मनो भावः ऐतदात्म्यं इदं सर्वं दृश्यमानं अद्वितीयवस्तुव्यतिरेकेण नास्तीत्यर्थः एवमंते अद्वितीयवस्तुप्रतिपादनमुपसंहार इत्यर्थः॥ अभ्यासं निरूपयति प्रकरणेति अभ्यासमुदाहरति यथेति तत्त्वेवछांदोग्ये षष्ठे एव नवकृत्वो नववारं अपूर्वतां निरूपयति प्रकरणप्रतिपाद्ये

आद्यंतयोः प्रतिपादनमुपक्रमोपसंहारौ यथा छांदोग्यस्य षष्ठे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म ऐतदात्म्यमिदं सर्वमित्युपक्रमोपसंहारावाद्यंतयोः प्रकरणप्रतिपाद्यस्य पुनः पुनः प्रतिपादनमभ्यासः यथा तत्रैव तत्त्वमसीति नवकृत्वोऽभ्यासः प्रकरणप्रतिपाद्यस्य मानांतराविषयताऽपूर्वता यथा तत्रैवाद्वितीयवस्तुनो मानांतराविषयता प्रकरणप्रतिपाद्यस्य श्रूयमाणं तज्ज्ञानात्तत्प्राप्तिः प्रयोजनं फलं यथा तत्रैवाचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति अद्वितीयवस्तुज्ञानात्तत्प्राप्तिः फलं प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः यथा तत्रैव येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं॥ २२

रिक्तमानेमानांतरं तदगोचरत्वमपूर्वत्वमित्यर्थः फलं निरूपयति प्रकरणेति तत्राप्युदाहरणमाह यथेति आचार्यवान् गुरुमुखाच्छ्रुतवेदार्थः वेद ब्रह्मास्मीति साक्षात्कारो तिन त्वमस्यादिवाक्यैरितिशेषः तस्य ब्रह्मसाक्षात्कारवतः यावन्न विमोक्ष्ये प्रारब्धफलभोगेन बंधनान्न मुच्यते तावदेव चिरं तावत्कालमवस्थानं अथ भोगेन प्रारब्धे क्षीणे संपत्स्ये ब्रह्म संपद्यते परमात्मा भवतीत्यर्थः अर्थवादं निरूपयति प्रकरणेति उदाहरणं दर्शयति यथेति येन श्रुतेन ब्रह्मणाऽश्रुतं श्रुतं भवति ... ति उदाहरति ... यथेति श्रुत्यति तस्मादेशेम प्राप्तः श्वेतकेतु नामा यस्य तत्सदेवाहमेतद्गुरोः सकाशात्स्पष्टवानसीत्यर्थः सर्वत्र द्रष्टव्यं उपपत्तिमाह प्रकरणेति लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टांतः तेन दृष्टांतेन प्रकरणप्रति

श्वेतकेतो त्वं तमुपदेशैक्यगम्यं गुरोः सकाशात्स्पष्टवानसीत्यर्थः॥१॥

अ॰कौ॰
द्वि॰प्र॰
४६

यथेति यथैकेन मृत्पिंडेन विज्ञातेन सर्वं मृण्मयं घटशरावादिकं विज्ञातं स्यात् मृदात्मना नामधेयं विकारश्चेति द्वयं वाचारंभणमनृतं मृत्तिकेत्येव सत्यं अतो मृ
द्विज्ञानेन घटादिज्ञानं युक्तमित्यर्थः एवं लिंगानि निरूप्य तैर्वेदांतानां ब्रह्मणि तात्पर्यनिश्चयो भवतीत्युपसंहरति एवमिति ततः किमित्यत आह इदमिति उप
क्रमादिषड्विधलिंगैरद्वितीये ब्रह्मणि वेदांतानां तात्पर्यनिश्चयानुकूलव्यापाररूपं श्रवणमित्यर्थः प्रसंगान्मननं निरूपयति श्रुतस्येति निदिध्यासनं निरूपयति
विजातीयेति अनात्मबुद्धिर्देहादर्शनं च विजातीयप्रत्ययः अहं ब्रह्मास्मीति प्रत्ययात्तिरस्कारेणेत्यर्थः अत्र श्रवणेन मानगतासंभावना निवर्तते मननेन मेयग
तासंभावना निदिध्यासनेन विपरीतभावना अनंतरं तत्त्वमस्यादिवाक्याद्ब्रह्मापरोक्षज्ञानं शोधिततत्त्वंपदार्थस्य ततो ऽज्ञाननिवृत्तिः एवं श्रवणादीनां ब्रह्मस

प्रकरणप्रतिपाद्यस्य दृष्टांतैः प्रतिपादनमुपपत्तिः यथा तत्रैव यथा सौम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो ना
मधेयं मृत्तिकेत्येव सत्यमित्यादिवाक्यप्रतिपादितमृदादिदृष्टांतैरद्वितीयवस्तुप्रतिपादनं एवं षड्विधतात्पर्यलिंगैर्वेदांतानामद्वितीये ब्रह्म
णि तात्पर्यनिश्चयः इदमेव श्रवणमित्युच्यते श्रुतस्यार्थस्योपपत्तिभिश्चिंतनं मननं विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकर
णं निदिध्यासनं ॥ तदुक्तम् शब्दशक्तिविषयं निरूपणं युक्तितः श्रवणमुच्यते बुधैः वस्तुतत्त्वविषयं निरूपणं युक्तितो मननमित्युदीर्यते ॥
चेतसस्तु चितिमात्रशेषता ध्यानमित्यभिवदंति वैदिकाः अंतरंगमिदमित्यमी रितं तत्कुरुष्व परमात्मबुद्धये इति ॥ २२ साक्षात्कारद्वारा मोक्षे विनियो

गः एतच्चाग्रे स्फुटी करिष्यति ॥ तत्र संमतिमाह तदुक्तमिति शब्दानां वेदांतानां शक्तिविषयं निरूपणं शक्तितात्पर्यावधारणानुकूलव्यापार इत्यर्थः युक्तितो न्यायतो बुधै
र्वेदांतशास्त्रार्थरहस्यविद्भिर्वस्तुतत्त्वविषयं निरूपणं अद्वितीयब्रह्मतत्त्वनिर्णयानुकूलव्यापार इत्यर्थः युक्ति उपपत्तितः साव्याख्याता चेतसः अंतःकरणस्य चि
तिमात्रशेषता विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहिता वैदिकाः वेदांतार्थचिंतकाः द्वितीयश्लोकस्योत्तरार्द्धं व्याचष्टे इदमिति ज्ञानं प्रति ब्रह्मसाक्षात्का
रं प्रति तत्र प्रमाणमाह आत्मेति आदिशब्देन तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेत् पांडित्यं च बाल्यं च निर्विद्याथ मुनिः तद्विजिज्ञासस्वेत्यादि श्रुतयो गृह्यंते
ननु साधनसंपन्नस्य संन्यासिनः श्रवणादित्रयं ज्ञाने प्रत्यंतरंगसाधनमित्युक्तं तत्र कानि साधनानि यैः संपन्नः श्रवणाद्यधिकारी स्यात्तत्राह साधनानीति अजो नित्यः



शाश्वतो ऽयं पुराणो आकाशवत्सर्वगतश्च नित्यः तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते अविनाशि तु तद्विद्धि येन सर्वमिदं ततं
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः यत्कृतकं तदनित्यं यथा घट इत्यादि श्रुतिस्मृतिन्यायैरात्मा नित्यः आत्मनो
ऽन्यदखिलं ब्रह्मलोकांतमनित्यं पुण्यकार्यत्वात् न च कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुत्या ब्रह्मलोकस्य विद्यासाध्यत्वावगमात् पुण्यकार्यत्वानुपपत्तेः क
स्य नित्यत्वमिति वाच्यं विद्यया देवलोक इत्यत्र विद्याशब्देनोपासनाया विवक्षितत्वात्तस्याः कर्तुमकर्तुमन्यथा कर्तुं शक्यत्वेन मानसक्रियारूपत्वाद्ब्रह्मलोकस्या
पुण्यकार्यत्वेनानित्यत्वोपपत्तेः एतच्चास्माभिः प्रागेव विस्तरेण प्रतिपादितं ततश्चात्मनोऽन्यदखिलमनित्यं आत्मा नित्य इति विवेचनं नित्यानित्यवस्तुविवेकः न
च अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भव
ति श्रुत्या कर्मफलस्याक्षय्यत्वावगमात् कथमात्मभिन्नस्यानित्यत्वनिश्चय इति नायं दोषो मलिनचित्तस्य तदसंभवेऽपि निःकामतयाऽनुष्ठितनित्यनैमित्तिकप्रायश्चि

इदं श्रवणादित्रयं साधनसंपन्नस्य संन्यासिनो ज्ञानं प्रत्यंतरंगसाधनं आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यादिश्रुतेः सा
धनानि नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिः मुमुक्षुत्वं चेत्येवंरूपाणि ॥ २२ तोपासनैराराधिताराध्यपादश्री

...स्य निर्मलस्वांतस्य श्रुत्याद्यनुसंधानेन नित्यानित्यवस्तुविवेकोपपत्तेः कर्मफलाक्षय्यत्ववचनस्य विध्यपेक्षितनया गुणार्थवादत्वात् न
...कर्मचितो लोकः क्षीयत इत्यादिवचनस्य श्रवणाविध्यपेक्षितत्वेन न्यायोपोद्बलितत्वेन च भूतार्थवादतया ततो बलवत्वाच्च ततः आत्मभिन्नस्यानित्यत्वनिश्च
...अर्थवादस्त्रिविधः गुणवादोऽनुवादो भूतार्थवादश्चेति तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मत इति अ
...अग्निर्हिमस्य भेषजं यत्तदुःखेन संभिन्नमित्यादिवाक्यानि यथाक्रममुदाहरणीयानि तथा च विधेः फलापेक्षायामपि नित्यत्वानित्यत्वयोरौदासीन्या
...ज्योतिष्टोमाश्वमेधादिविधीनामानर्थक्यप्रसंगात्तदक्षय्यत्ववचनं गुणार्थवाद एव पूर्णाहुत्या सर्वकामावाप्तिवचनवत् तद्यथेह कर्मचितो लोकः
...श्रवणाविध्यपेक्षितत्वान्मानांतराविरुद्धत्वात् यत्कृतकं तदनित्यमिति न्यायोपोद्बलितत्वाद्ज्ञातार्थबोधकतया भूतार्थवादत्वात्स्वार्थे मानमेवाते

यत्कृतकं तदनित्यमिति न्यायसहकारित्वेन ॥ ५ प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधकतया ५ ॥ आदित्यो यूप इति वत्प्रशंसामात्रपरत्वादित्यर्थः ॥ ६ ॥

नित्यानित्यवस्तुविवेके सम्यक् संपत्तेः क्रमे

फलेष्वनित्यत्वदोषदर्शनेनेहामुत्रार्थफलभोगविरागोभवतिश्ववांतपायसादाविवैहिकभोगसाधनस्रक्चंदनवनितादिविषयेष्वमुत्रामृतादिविषयेषुचानि
त्यत्वदोषदर्शनेनात्यंतजिहासासंपद्यते अयमेवेहामुत्रार्थफलभोगविरागः नचप्रथममेतादृशवैराग्यसिद्धौकिंरहनिपादारंभेणावैराग्यफलकेनेतिवा
च्यंएतद्व्याख्यायतदारंभोपपत्तेः ततःशमदमोपरतितितिक्षाश्रद्धासमाधानानिभवंतितान्यग्रेव्युत्पादयिष्यतिततोमुमुक्षाएवंसाधनानिभवंतीत्यर्थः॥अत्र
विवेकादिसाधनचतुष्टयंसमुच्चितमधिकारिविशेषणमित्याचार्याः अन्येतुमुमुक्षैवाधिकारिविशेषणंविवेकादिकंतुतत्साधनत्वेनप्रणाड्या अन्यथाप्रसज्य
प्रतिषेधादितिवदंतिविवेकादीनामधिकारिविशेषणत्वेप्रमाणमाह परीक्ष्येतिकर्मचितान्कर्मसंपादितान् लोकान्ब्रह्मलोकादीन्परीक्ष्यानित्यत्वेननिश्चित्यब्रा
ह्मणोब्रह्मजिज्ञासुर्निर्वेदंवैराग्यमायात्प्राप्नुयात्किमितियतः अकृतोमोक्षःकृतेनकर्मणानास्तिनसंभवतिततःकिंकुर्यादित्यत आह तदितिविरक्तःसर्वकर्माणि

परीक्ष्यलोकान्कर्मचितान् ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेनतद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठं कश्चि
द्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वा आत्मन्येवात्मानंपश्येदित्यादिश्रुतिभ्यः यथो
क्तसाधनसंपन्नस्यसंन्यासाधिकारः॥ २२ नित्यादीनिसंन्यस्यतद्विज्ञानार्थंमोक्षसाधनीभूतब्रह्मविज्ञानार्थंगुरुमेवाभिगच्छेत्समित्पाणिरुपहारपाणिः श्रोत्रि
यं शास्त्रज्ञानवंतंब्रह्मनिष्ठंकरामलकवदखंडैकरसानंदब्रह्मसाक्षात्कारवंतमितिमुंडकश्रुतेरक्षरार्थः कठवल्लीवाक्यमप्युदाहरतिकश्चिदिति धीरोविवेकीजडा
त्मनदुःखहंकारेभ्यःप्रातिलोम्येनसच्चिदानंदतया अंचतिप्रकाशतेइतिप्रत्यङ् सचासावात्माचप्रत्यगात्मातंअनावृतंविषयेभ्योव्यावृत्तंचक्षुर्यस्यसतथोक्तःचक्षुरि
तिसर्वेन्द्रियाणामुपलक्षणंजितेंद्रियइत्यर्थः बृहदारण्यकवाक्यमुदाहरति शांतइति आत्मनिमनसि आत्मानमद्वयात्मानंपश्यत्यहंब्रह्मास्मीतिसाक्षात्करोतिआ
दिशब्देनात्मनस्तुकामायसर्वंप्रियंभवति आसुर्यानामतेलोका अंधेनतमसावृताःतांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाःउदरमंतरंकुरुतेअथतस्यभयंभवतित
त्त्वेवभयंविदुषोमन्वानस्यतस्यत्रयअवस्थास्त्रयःस्वप्नाइत्यादिवाक्यानिगृह्यंतेनेनतःकिमित्यत आह यथोक्तेति यथोक्तसाधनसंपन्नस्यविवेकादिसाधनसंपन्न
स्यविवेकादिसाधनसंपन्नस्यजिज्ञासोरितिशेषःएतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीत्यादिश्रुतेः ननुसाधनसंपन्नस्यजिज्ञासानोपपद्यतेकुतइतिचेत् ब्रह्म





ज्ञातंज्ञातंवानाद्यःअज्ञातेजिज्ञासाऽयोगात् तस्याधर्मिज्ञानसाध्यत्वात् नद्वितीयःज्ञातेसुतरांतदयोगात् नचतद्ज्ञानमापातस्वरूपमेवेति वाच्यंकिमिदमापातत्वं
सामान्यरूपत्वंवासंशयरूपत्वंवापरोक्षरूपत्वंवा नाद्यःनिःसामान्यविशेषेब्रह्मणिसामान्यलक्षणापातनायाअसंभवात् नद्वितीयःब्रह्मणोमानांतरागम्यत्वेन
तज्ज्ञानस्यसंशयत्वायोगात् नतृतीयःनित्यापरोक्षेब्रह्मणिपरोक्षज्ञानायोगात्यत्साक्षादपरोक्षाद्ब्रह्मेतिश्रुत्याब्रह्मणोनित्यापरोक्षत्वावगमात् तस्मात्साधन
संपन्नस्यजिज्ञासाऽनुपपन्नेति॥उच्यतेयद्यपिब्रह्मणोमानांतरागोचरत्वात् स्वप्रकाशसाक्ष्यभिन्नतयानित्यापरोक्षत्वाच्चतस्मिन्वेदांतवाक्यादपरोक्षमेवज्ञा
नंजायते तथापितज्ज्ञानमापातरूपमेव अग्रेसंशयादिदर्शनात्तस्यापातत्वंनामाविचारितवाक्यजन्यत्वंसंशयादिग्रस्तत्वंवानतुसंशयत्वंभासमानविरुद्ध

विहितानांकर्मणांविधिनापरित्यागःसंन्यासः सचवैराग्यहेतुकः यदहरेवविरजेत्तदहरेवप्रव्रजेदित्यादिश्रुतेः वैराग्यंपरमेतस्यपरमोव
धिरितिस्मृतेश्चसचवैराग्यस्यतारतम्येनचतुर्विधः कुटीचकबहूदकहंसपरमहंसभेदात् वैराग्यंद्विविधं अपरमपरंचेति तत्रापरंचतुर्वि
धंयतमानव्यतिरेकैकेंद्रियत्ववशीकारभेदात् अस्मिन्संसारे इदंसारमिदमसारमितिसारासारविवेकोयतमानवैराग्यंचित्तगतदोषाणाम
ध्येएतावंतःपक्वाएतावंतोऽपक्वाइतिविविच्यापक्वदोषनिरोधेयत्नोव्यतिरेकवैराग्यंविषयेच्छासत्त्वेपिमनसेंद्रियनिरोधावस्थानंएकेंद्रियत्वं
वैराग्यंवशीकारवैराग्यमैहिकामुष्मिकविषयजिहासा॥ २२ नानाकोटिजन्यज्ञानस्यैवसंशयत्वात् वाक्यजन्यज्ञानस्यैककोटिकत्वात् निर्दोषवेदांतवाक्यजन्य

ज्ञानस्यसंशयत्वायोगाच्च अन्येतुक्वचिदेककोटिकज्ञानमप्यनवधारणात्मकं अन्यथाऽनभ्यासदशायांजलज्ञानानंतरंप्रामाण्यसंशयोहितसंशयोनस्यात्जलज्ञानस्य
तस्यसतोनिश्चयरूपत्वात् नचैककोटिकज्ञानस्यसंशयत्वेनिश्चयसंशययोःकोभेदइतिवाच्यंसंशयविरोधिज्ञानस्यैवनिश्चयत्वात् नचान्योन्याश्रयःएकस्मिन् धर्मिणि
तदाकारविरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरोधिज्ञानत्वस्यैवसंशयत्वात् एवंचवाक्यजन्यमपिज्ञानमेककोटिकमपि अग्रेसंशयादिदर्शनादनवधारणात्मक
मेवेतिवदंति तथाचसाधनसंपन्नस्यजिज्ञासोःसंन्यासाधिकारइतिनिरवद्यम् ननुयथोक्तसाधनसंपन्नस्यसंन्यासाधिकारइत्युक्तंतत्रकोसौसंन्यासइत्याकां
क्षायांतव्युत्पादयति विहितानामिति अविहितनिषिद्धत्यागिनांसंन्यासित्वाभावाद्विहितानामित्युक्तं आलस्यादिनाविहितत्यागिनांभ्रष्टानांसंन्यासित्ववारणाय

विधिनेत्युक्तं संन्यासस्य वैराग्यहेतुकत्वे प्रमाणमाह यदहरेवेति यस्मिन् दिने वैराग्यं प्राप्नुयात्तदहस्तस्मिन्नेव दिने प्रव्रजेत्सर्वकर्मसंन्यासं कुर्यात् इति।
श्रुतेरक्षरार्थः मोक्षस्य संन्यासस्य संन्यासं विभजते स चेति वैराग्यतारतम्यमुपपादयितुं वैराग्यं विभजते वैराग्यमिति अपरं वैराग्यं विभजते तत्रेति तयोर्म
ध्य इत्यर्थः यतमानवैराग्यं निरूपयति अस्मिन्निति व्यतिरेकवैराग्यं निरूपयति चित्तेति एकेन्द्रियत्ववैराग्यमाह विषयेति चतुर्थमाह वशीकारेति॥ तत्र पतंज
लिसूत्रं संवादयति तदुक्तमिति — रोहिकाः स्रक्चंदनवनितादयो दृष्टविषया आमुष्मिकाः अनुश्राविकास्तेषु विगततृष्णा यस्य स तथा तस्यैहिकामुष्मिक
विषये जिहासायुक्तस्येत्यर्थः तादृशस्य वशीकारनामकं वैराग्यं भवतीति शेषः अर्थाद्यतमानादित्रयं सूत्रितं द्रष्टव्यं तदपि विभजते तदिति मंदवैराग्यस्वरूपं

तदुक्तं दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति तत्त्रिविधं मंदं तीव्रं तीव्रतरं चेति पुत्रदारादिवियोगे धिक् संसारमि
ति बुद्ध्या विषयजिहासा मंदवैराग्यं अस्मिन् जन्मनि पुत्रदारादिमास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रं पुनरावृत्तिसहितब्रह्मलोकादि
पर्यंतं मास्त्विति स्थिरबुद्ध्या विषयजिहासा तीव्रतरं तत्र मंदवैराग्ये संन्यासाधिकार एव नास्ति यदा मनसि वैराग्यं जायते तस्य वै वस्तुषु॥ तदैव सं
न्यसेद्विद्वानन्यथा पतितो भवेदिति स्मरणात् तीव्रवैराग्ये सति यात्राद्यशक्तौ कुटीचकाधिकारस्तच्छक्तौ बहूदकसंन्यासाधिकारः तीव्रतरवैरा
ग्ये सति हंससंन्यासाधिकारः एते त्रयः संन्यासाः एतेषामाचाराश्च स्मृतौ प्रसिद्धाः तीव्रतरवैराग्ये मुमुक्षोः परमहंससंन्यासाधिकारः स च परमहं
सो द्विविधः विविदिषासंन्यासो विद्वत्संन्यासश्चेति साधनसंपन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः॥ २२ दर्शयति पुत्रेति ती
व्रवैराग्यं निरूपयति अस्मिन्निति तीव्रतरं निरूपयति पुनरावृत्तीति ननु चेदं वैराग्यतारतम्यं कुतोऽवगम्यत इति वाच्यं परवैराग्ये स्वदृष्टमध्यतीव्रभेदेन तारतम्यावगमा
त् अपरेऽपि स्वानुभवानुरोधेन तदुपपादितमिति भावः कस्मिन् वैराग्ये सति को वा संन्यासः कर्तव्य इत्याकांक्षायां तदुक्तं मंदवैराग्ये सति संन्यासानधिकारमाह तत्र मं
देति तत्र गमकमाह यदेति यात्राद्यशक्तिशक्तिभ्यां तीव्रविरक्तस्य संन्यासद्वयमाह तीव्रेति तीव्रतरविरक्तस्य हंससंन्यासाधिकारमाह तीव्रतरेति तर्हि ते संन्यासा निरूपणीया
स्तेषामाचाराश्च वक्तव्या इति तत्राह एत इति मुमुक्षोः परमहंससंन्यासाधिकारमाह तीव्रतरेति परमहंससंन्यासं विभजते स चेति विविदिषासंन्यासस्य लक्षणमाह साधने... राम
५८

वाशब्द आश्रमान्तरे विध्यभावं निराकरोति विधिरेवायमपूर्वार्थत्वात् धारणवत् उपरिहितेवेभ्योधारयतीत्यत्र यथा तद्वत् सति चाश्रमान्तरे ब्रह्मसंस्थत्वं तत्कर्मिणामित्यभिप्राय इति॥ शा०॥ सू०॥ ६॥
तत्र प्रमाणमाह एतमेवेति लोको द्विविधः आत्मलोकोऽनात्मलोकश्चेति तत्रानात्मलोकः श्रुत्या त्रिविधः प्रतिपादितः अथ त्रयो वाव लोका मनुष्यलोक इति श्रुतिः आ
त्मलोकोऽपि श्रुत्या प्रतिपादितः अथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा ह वेदेनननूक्तोऽन्यद्वा कर्माकृतं यदि ह वाप्यनेवंविन्महत्पु
ण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्याद्याः श्रुतयः तत्र
श्च एतमिति सर्वनाम्नः प्रकृतपरामर्शित्वात् स वा एष महानज आत्मा इत्यात्मनः प्रकृतत्वादिहापि लोकमिति लोकशब्देनात्मलोको विवक्षित इति गम्यते एवं
च लोक्यतेऽनेनेति व्युत्पत्त्या लोकयात्मानं भवमिच्छंतः प्रव्राजिनो विरक्ताः प्रव्रजंति संन्यासं कुर्वंतीत्यर्थः अत्रापूर्वत्वात् संन्यासं कुर्युरिति विधिर्द्रष्टव्यः उपांशुयाज
मंतरा यजतीत्यत्र यथा तद्वत् तदुक्तं विधिर्वा धारणवदिति विविदिषासंन्यासं विभजते स चेति जन्मापादककर्म काम्यं फलाभिसंधिकृतं नित्यादि कर्म तस्य त्या

एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीत्यादिश्रुतिस्तत्र प्रमाणं स च द्विविधः जन्मापादककर्मत्यागात्मकः प्रैषोच्चारणपूर्वकदंडधारणा
द्याश्रमरूपश्चेति न कर्मणा न प्रजया न धनेन त्यागेनैकेऽमृतत्वमानशुरित्यादिश्रुतिराद्ये मानं विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्या
सप्रतिबंधे आद्ये संन्यासेऽधिकारः अत्र स्त्रीणामप्यधिकारः जनकादीनां मैत्रेयीप्रभृतीनां तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषूपलंभात्॥

गः काम्यकर्मणां स्वरूपेण त्यागो विवक्षितः नित्यादीनां फलाभिसंधित्यागमात्रं विवक्षितं न स्वरूपेणान्यथाऽवांतरभेदो न स्यादिति भावः तत्र प्रथमविविदिषासंन्यासे प्रमा
णमाह नेति कर्मणा काम्येन फलाभिसंधिकृतनित्यादिना वा कर्मणाऽमृतत्वं नाप्नुयुरेवं सर्वत्र योजनीयं प्रजया पुत्रेण धनेन हिरण्यादिना एके विरक्तास्त्यागेन यथोक्तजन्मा
पादककर्मत्यागात्मकसंन्यासेनामृतत्वं मोक्षसाधनं ब्रह्मसाक्षात्कारमानशुः प्राप्नुयुरित्यक्षरार्थः कस्य तत्राधिकार इत्याकांक्षायामाह विरक्तस्येति संन्यासप्रतिबंधे दंडधा
रणाद्याश्रमरूपसंन्यासप्रतिबंधे जन्मापादककर्मत्यागात्मकसंन्यासे स्त्रियोऽप्यधिक्रियंत इत्याह अत्रेति तत्र गमकमाह जनकादीनामिति आदिशब्देनाजातशत्रुया
ज्ञवल्क्यकहोलप्रभृतयो गृह्यंते मैत्रेयीप्रभृतीनामिति तत्र स्त्रीणामुपनयनाभावात् वेदाध्ययनानर्हतया कथं ब्रह्मज्ञानाधिकारस्तस्य महावाक्यजन्यत्वादिति वा
च्यं अतीतानेकजन्मसुकृतपरिपाकवशेन नितांतनिर्मलस्वांतानां मनुष्याणां पुराणश्रवणादिना तत्त्वज्ञानोत्पत्तौ बाधकाभावात्त्रैवर्णिकानामेव वेदांतश्रवणादिना

नोत्पत्तिः एतदभिप्राया श्रुतिरपि यदहरेव विद्यया सवैभवि

येनाभिमानेन धर्मादीन् त्यजसि तमपि निवारयेत्यर्थः॥४॥

ष्यंतो मनुष्या मन्यंत इति अत एवेतिहासपुराणेषु विदुरादीनां तत्त्वज्ञानं श्रूयते किमु वक्तव्यं ब्राह्मणीनां मैत्रेय्यादीनां तत्त्वज्ञानाधिकारे त्रैवर्णिकस्त्रीणां ज्ञानमात्रोप
पयोगी स्त्वत्यभ्यासे न विरोध इति केचित्तदाह श्रुतिस्मृतीति॥ द्वितीय विविदिषासंन्यासे प्रमाणमाह द्वितीय इति यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा
यदहरेव विरजेत्तदहरेव प्रव्रजेत् प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् त्यज धर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्या
नृते त्यक्त्वा येन त्यजसि तं त्यज कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते तस्मात्कर्म न कुर्वंति यतयः पारदर्शिन इत्यादिवचनान्यादिशब्देन गृह्यंते
विद्वत्संन्यासमुपपादयति गृहस्थाश्रमादाविति उत्पन्नः ब्रह्मसाक्षात्कारो यस्य स तथा तेनेति यावत् आदिशब्देन ब्रह्मचारिवानप्रस्थौ गृह्येते चित्त

द्वितीये तु दंडमाच्छादनं कौपीनं परिगृह्य शेषं विसृजेदिति संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमा
श्रिता १ इत्यादिवचनानि प्रमाणानि गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नसाक्षात्कारेण गृहस्थादिना विक्षिप्तचित्तस्य चित्तविश्रांति
लक्षणां जीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यासः तत्र एतमेव विदित्वा मुनिर्भवति अथ योगिनां परमहंसानामित्यादि पर
महंसोपनिषत् यदा तु विदितं तत्त्वं परं ब्रह्म सनातनं तदैकदंडं संगृह्योपवीतं शिखां त्यजेदित्यादिश्रुतिस्मृतिवचनानि प्रमाणानि
तत्राद्यसंन्यासो जन्मांतरीयोपि ज्ञाने उपकरोति जनकादीनां तत्त्वज्ञानोपलंभाच्छ्रुत्यादिषु॥ २२ विश्रांतिर्नाम विक्षेपोपशमः विद्वत्संन्यासे

प्रमाणमाह तत्रेति एतं परमात्मानं विदित्वा ब्रह्मास्मीति साक्षात्कृत्य मुनिर्मननशीलो भवतीत्यर्थः तच्च मननशीलत्वमसति कर्तव्यांतरे संभवतीति संन्यासो वि
धीयते तस्य जीवन्मुक्तिरेव फलं तत्त्वज्ञानस्य संपन्नत्वादिति भावः आदिशब्देनैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाच
र्यं चरंति न दंडं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः कंथा कौपीनवासास्तु दंडधृग्ध्यानतत्परः एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः कपालं वृक्षमूला
नि कुचैलमसहायता समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणं इत्यादिवचनानि गृह्यंते ननु विविदिषासंन्यासस्तत्त्वज्ञानहेतुरित्युक्तं तदयुक्तं याज्ञवल्क्यजनकप्रभृ
तीनां तत्त्वज्ञानोपलंभादित्याशंक्याह तत्रेति तयोर्मध्य इत्यर्थः जन्मांतरीयसंन्यासस्य ज्ञानोपकारित्वे गमकमाह जनकादीनामिति बृहदारण्यकश्रुत्यादिष्वित्यर्थः



प्रमाणत्वात्॥४॥ आतुरसंन्यासस्य॥४॥

गमकांतरमाह यदीति यदहरेव विरजेत्तदहरेव प्रव्रजेदिति वैराग्यहेतुकं संन्यासं संगकर्तव्यत्वेन विधाय दशाविशेषे यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदि
ति पूर्वविहितं वैराग्यहेतुकं संन्यासमनूद्य तेन रागव्यावृत्तये विकल्पेन वाङ्मनसरूपसाधनद्वयं विधीयते मनसा वाचा वा संन्यसेदिति तदानीं मुमूर्षोः श्रवणाद्यसं
भवेन तत्त्वज्ञानासंभवात् स च संन्यासो जन्मांतरे ज्ञाने उपकरोतीत्यंगीकर्तव्यं अन्यथा संन्यासस्य वैयर्थ्यं स्यादिति भावः नन्विदं ब्रह्मलोकसाधनं संन्यासांतरमस्तु नच
तत्र प्रमाणाभावः संन्यासाद्ब्रह्मणः स्थानमिति स्मृतेः सत्त्वात् तथा च न वैयर्थ्यमित्याशंक्याह आतुरेपीति तथा च संन्यासाद्ब्रह्मणः स्थानमिति स्मृतिः तस्यैव नांत
रीयकफलं प्रतिपादयति अथवा स्मार्त्तसंन्यासस्य तत्फलमस्तु प्रकृतस्य वैराग्यहेतुकस्य संन्यासस्य ज्ञानैकफलत्वादिति भावः विपक्षे दंडमाह अन्यथेति तत्र संम
तिमाह तदुक्तमिति एवं संन्यासं सप्रपंचं निरूप्य साधनसंपन्नस्य संन्यासिनः श्रवणादिकं तत्त्वज्ञानहेतुः तस्यैवान्वयव्यतिरेकानुविधानादित्युपसंहरति त

यद्यातुरः स्यान्मनसा वाचा वा संन्यसेदित्यातुरसंन्यासविधानाच्च आतुरेपि विरक्तस्यैवाधिकारात् न संन्यासांतरं अन्यथा प्रकरणविरोध
प्रसंगात् तदुक्तं जन्मांतरेषु यदि साधनजातमासीत्संन्यासपूर्वकमिदं श्रवणादिकं च विद्यामवाप्स्यति जनः सकलोपि यत्र तत्राश्रमादिषु व
सन्निवारयाम इति तदेवं पूर्वोक्ताधिकारिणः श्रवणादीनां तत्त्वज्ञानकरणत्वमन्वयव्यतिरेकाभ्यां निश्चीयते अर्हार्थे श्रोतव्य इत्यादित।
व्यप्रत्यय इति वाचस्पतिमिश्राः॥ २२ देवमिति यस्मात्कारणात्साधनचतुष्टयसंपन्नस्य जिज्ञासोः श्रवणादिकं तत्त्वज्ञानं प्रत्यंतरंगसाधनं तत्तस्मात्कारणा

दित्यर्थः नच तत्त्वज्ञानोद्देशेन श्रोतव्य इत्यादिना श्रवणादिविधिः किं न स्यादिति वाच्यं ———— विधेरप्राप्तविषयत्वात् यद्यपि साक्षात्कारं प्रति श्रवणादीनां का
रणत्वं मानांतरेणाप्राप्तं तथापि षड्जादिस्वरसाक्षात्कारं प्रति गांधर्वशास्त्राभ्यासस्य कारणताग्रहकाले श्रवणत्वेन दुर्ज्ञेयवस्तुसाक्षात्कारत्वेनान्वयव्यतिरेकाभ्यां
साक्षात्कारेण कार्यकारणभावस्य निश्चितत्वात् ब्रह्मणोप्यतिसूक्ष्मतया दुर्ज्ञेयत्वात्तत्साक्षात्कारं प्रत्यपि श्रवणादीनामन्वयव्यतिरेकाभ्यां कारणत्वं प्राप्तमेवेति न त
द्विधिरिति भावः ननु श्रोतव्य इत्यादितव्यप्रत्ययानां का गतिरित्याशंक्याह अर्हार्थ इति नियमादृष्टसाध्यस्य परमापूर्वस्यासंभवेन नियमविध्यसंभवादर्हार्थे श्रो
तव्य इत्यादितव्यप्रत्ययो युक्त इति वाचस्पतिमिश्राणामाशयः॥ ॥ ॥

विविदिषासंन्यासादन्यो नातुरसंन्यासः॥८॥

मतांतरमाह आचार्यास्त्विति आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि स्वयमाचरते यस्मादाचार्यस्तेन चोच्यत इति श्लोकोक्तलक्षणाः पंचपादिकाचार्यमतानु
सारिणो विवरणाचार्यप्रभृतय आचार्याः इत्युच्यंते वक्ष्यमाणरीत्या एवं शब्दार्थमाह यथेति साधनचतुष्टयसंपन्नस्य जिज्ञासोः कृतसंन्यासस्येत्यर्थः यथा तुषनिवृ
त्तिमुद्दिश्य व्रीहीनवहंतीत्यवघातो विधीयते एवं द्रष्टव्य इति ब्रह्मसाक्षात्कारमुद्दिश्य श्रोतव्यो मंतव्यो निदिध्यासितव्यः तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासे
त्पांडित्यं बाल्यं च निर्विद्याथ मुनिः तद्विजिज्ञासस्वेत्यादिवाक्यैः सांगोपांगैः श्रवणनामांगी विधीयते यत्साक्षात्फलसाधनत्वेन श्रुतं तदंगी शेषी प्रधानमिति चो
च्यते तत्संनिधौ फलं विना यत्कर्तव्यत्वेन श्रुतं तदंगं शेषः सहकारीत्यभिधीयते यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधिना दर्शपूर्णमासाग्नेयादयः षट्
यागाः साक्षात्फलसाधनत्वेन विहितास्त एवांगिनस्तत्प्रकरणे व्रीहीन्प्रोक्षति समिधो यजतीत्यादिना प्रोक्षणादयः समिधादयश्च साक्षात्स्वर्गफलमंतरेणाकर्तव्य
तस्माद्धुनातनोपि ब्राह्मः पंडाध्ययनजापात ब्रह्माधीनद्धान पंडितः तस्य कृत्यं पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलभावेन मननेनस्थातुमिच्छेत् तत इदं यं लब्ध्वा यश्रवणमननानंतरं मुनि निदि
ध्यासनं ॥४॥

आचार्यास्त्वेवं वर्णयंति यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवाक्यैर्दर्शनमुद्दिश्य मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां
सह श्रवणनामांगी विधीयते ॥

त्वेन विहितास्तान्यंगानि फलवत्संनिधावफलं तदंगमिति न्यायात् तानि चांगानि द्विविधानि स्वरूपोपकारीणि
फलोपकारीणि चेति तत्र प्रोक्षणादयः स्वरूपोपकारिणस्त एव संनिपत्योपकारिण इत्युच्यंते प्रयाजादयस्तु फलोपकारिण आरादुपकारिण इति भाष्यंते एवं प्र
कृतेपि वेदांतश्रवणं प्रमाणविचारात्मकतया साक्षाद्ब्रह्मसाक्षात्कारफलसाधनत्वेन विहितत्वादंगी विवेकादिगुरूपसदनांतानि तत्संनिधौ विहितानि स्वरूपोपका
र्यंगानि ज्ञानातिरिक्तफलाश्रवणान्मननादि फलोपकार्यंगं फलं विना तत्संनिधौ विहितत्वात् तथा च मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां श्रवणनामांगी विधी
यते श्रोतव्यो निदिध्यासितव्य इति न च तद्विषये श्रूयमाणलिङादयो नियोज्यविषयत्वात्कुंठीभवंतीत्यादिना भाष्यकृता निराकृतत्वात्कथं श्रवणविधिरिति वाच्यं
ज्ञानविधिरेव तत्र निराकृतः ननु श्रवणादिविधि——स्तत्र प्रवृत्त्यभावप्रसंगात् न च फलेच्छया तत्र प्रवृत्तिरिति वाच्यं द्वैतात्मविचारे पुराणादिविचारे च प्रवृत्तिप्रसंगेना 

फलभूतसाक्षात्कारे श्रवणाद्यपेक्षयाऽसहकार्यंतरस्याभावात्तस्य निदिध्यासनाख्यस्य विधिः श्रवणमननद्वयापेक्षया तृतीयं निदिध्यासनमेवात्र विधेयमित्यर्थः तद्धेतोः ब्रह्मपरो सर्वतः संन्यासिनः ॥ १॥
द्वैतविचारे वेदांतविचारे च नियमेन तन्मुमुक्षोः प्रवृत्त्यभावप्रसंगात् तस्माच्छ्रवणादिविधिरपेक्षितः तदुक्तं भगवता सूत्रकारेण सहकार्यंतरविधिः पक्षेण तृतीयं त
द्वतो विध्यादिवदिति न च सहकारिध्यानविधिरेव तत्र स्वीकृतः न श्रवणादिविधिरिति वाच्यं प्रधानविध्यभावे सहकारिविध्ययोगात् तस्माच्छ्रवणं विधेयमेव पुरुष
प्रवर्तको विधिः स च द्विविधः अभिधानविधिरभिधेयविधिश्चेति लिङादिघटितं वाक्यमभिधानविधिः स चतुर्विधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयो
गविधिश्चेति तत्र कर्मस्वरूपबोधको विधिरुत्पत्तिविधिः स यथा अग्निहोत्रं जुहोति सोमेन यजेतेत्यादिः श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानामन्यतमस
हायेनांगताबोधको विधिर्विनियोगविधिः स यथा दध्ना जुहोति पशुना यजेतेत्यादिः उत्पन्नस्य कर्मणः फलसंबंधबोधको विधिरधिकारविधिः स यथा अग्निहो
त्रं जुहुयात्स्वर्गकामः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिः सांगे कर्मणि अनुष्ठापको विधिः प्रयोगविधिः स यथा पौर्णमास्यां पौर्णमास्या यजेत अमावास्याया
ननु ब्रह्मपरवाक्ये कथं मौनविधिरित्याशंक्य दृष्टांतमाह विध्यादिवदिति यथा दर्शपूर्णमासप्रधानपरे वाक्ये अन्वाधानादेरंगजातस्य विधिस्तद्वदिति॥शा॰॥सू॰५॥ ननु मूलवस्तुसाक्षात्कारे निदिध्यासनस्य प्राप्तत्वा

**तस्य च दृष्टफलत्वान्नापूर्वविधिः अप्राप्तार्थविधायको ह्यपूर्वविधिः ॥ ६ ॥ ६ ॥**

न विधेयत्वमत आह पक्षेणेति यस्मिन्पक्षे भेद
दर्शनप्राबल्यं तस्मिन्पक्षे प्राप्त्यभावाद्वि
धिरर्थवानित्यर्थः ६॥ २
श्रवणमननयोः विषयदर्शनानंतरं स्वतउत्पन्नत्वात् ॥२ कर्तव्यता ४॥ मननादिनासह ३॥
समावास्यायां यजेतेत्यादिः एवं प्रकृतेपि तस्माद्ब्राह्मणः पांडित्यं निर्विद्येत्यादिरुत्पत्तिविधिः मंतव्य इत्यादिर्विनियोगविधिः तद्विजिज्ञासस्वेत्यधिकारविधिः तथाहि स
न्त्रत्ययवाच्यायाइच्छायाः प्रकृत्यर्थज्ञानस्य चकर्तुमशक्यतया सन्प्रत्ययेनानर्नीतं विचारं लक्षयित्वा प्रकृत्या फलीभूतज्ञानं च लक्षयित्वाऽद्वितीयब्रह्मज्ञानाय तत्कर्त
व्यता विधीयते ब्रह्मसाक्षात्कारकामो वेदांतश्रवणं कुर्यादिति अतोयमधिकारविधिः साधनचतुष्टयसंपन्नोधिकारी जिज्ञासुः संन्यासी सांगवेदांतश्रवणं कुर्यादिति
प्रयोगविधिः कल्प्यः कृतिसाध्यत्वे सतीष्टसाधनत्वमभिधेयविधिरयमेव लिङर्थः —— ननु भावनाविनियोगो वा प्रमाणाभावादिति भावः॥ ननु श्रोतव्य इत्यादि
वाक्ये श्रवणं विधिरित्युक्तं किमयं व्रीहीन्प्रोक्षतीति प्रोक्षणविधिवत् श्रवणविधिरपूर्वविधिराहोस्विद्व्रीहीनवहंतीत्यवघातविधिवन्नियमविधिरथवा इमामगृभ्णन्
रशनामृतस्येत्यश्वाभिधानीमादत्ते इति गर्दभरसनाग्रहणव्यावृत्तिविधिवत्परिसंख्याविधिर्वा नाद्यः श्रवणस्य दृष्टफलकत्वेन तदयोगात् अन्वयव्यतिरेकाभ्यां

रुद्रवेदशब्दो ब्रह्माहमस्मीत्याकारको नास्ति मुखे येषां तेऽरुन्मुखास्तानरुन्मुखान् यतीनहं शालावृकेभ्यः कपिक्रोष्टृश्वभ्यः प्रायच्छं दत्तवानिति मघवानवदीदित्यर्थः ॥ ३ ॥

वणस्य तत्त्वज्ञानसाधनत्वावगमेन दृष्टफलत्वं आप्ताप्राप्तार्थबोधकस्यैवापूर्वविधित्वेन श्रवणादेस्तथात्वाभावात् न द्वितीयः अवघातनियमादृष्टसाध्यपरमापूर्ववच्छ्रवणनियमादृष्टसाध्यस्याभावात् न च ज्ञानमेव तत्साध्यमस्त्विति वाच्यं अन्यत्र तथा दृष्टत्वात् न तृतीयः उपनिषदेकगम्यतया ब्रह्मणस्तत्त्वज्ञानं प्रत्युभयप्राप्त्यभावात् भावे वा प्रत्यवायाभावप्रसंगात् न हि पंचनखभक्षणाभावे प्रत्यवायो हि श्रूयते श्रूयते च प्रकृते प्रत्यवायः अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छमितिमास्तु श्रवणादौ विधिरिति चेत्तर्हि न तत्र प्रवृत्त्यभावप्रसंगात्तस्मात्कोऽयमत्र विधिर्विवक्षित इत्याशंक्य प्राप्तत्वेनापूर्वविध्यसंभवं वदन्नियमादिकमाह ॥ तस्येति श्रवणादेरित्यर्थः दृष्टेति अन्वयव्यतिरेकसिद्धफलत्वादित्यर्थः तथाप्यपूर्वविधिः कुतो न संभवतीत्याशंक्य तल्लक्षणलक्षितत्वाभावादिति तदसंभवसंभवं वक्तुमपूर्वविधेर्लक्षणमाह अप्राप्तेति मानांतरेणाप्राप्तस्यार्थस्य विधायकः कर्तव्यत्वेन बोधकोऽपूर्वविधिः कर्तव्यत्वबोधको विधिरपूर्वविधिरित्युक्ते नियमादिविधावतिव्याप्तिः तद्वारणाय अप्राप्तेति मानांतरेणाप्राप्तस्येत्युक्तं स्वर्गकामो यजेतेत्यादावपूर्वविधिः ॥

दृष्टान्तेऽवहननीयादौ पूर्वोक्तप्रकारेण नियमविधेर्दृष्टत्वादन्यत्र चादृष्टत्वादिति ५ ॥

**किंतु नियमविधिर्वा परिसंख्याविधिर्वा पक्षप्राप्तांशपूरको विधिर्नियमविधिः यथा व्रीहीनवहन्यादित्यवघातविधिः ॥ उभयप्राप्तावितरव्यावृत्तिबोधको विधिः परिसंख्याविधिः ॥**

२२ स्थिरत उक्तं मानांतराप्राप्तेति तर्हि को सौ विधिर्विवक्षित इति पृच्छति किं त्विति उत्तरमाह नियमेति नियमविधेर्लक्षणमाह पक्षेति तुषनिवृत्तिं प्रति एकस्मिन्पक्षेऽवघातः प्राप्त एकस्मिन्पक्षे नखविदलनादिः यदा नखविदलनादिः प्राप्तस्तदाऽवघातो न प्राप्त इति तत्र तुषनिवृत्तिं प्रति पक्षप्राप्तस्यावघातादेरप्राप्तांशं पूरयति व्रीहीनवहंतीति वाक्यं अवघातेनैव तुषनिवृत्तिः संपादनीयेति तत्रार्थान्नखविदलनादिव्यावृत्तिः अप्राप्तांशपूरको विधिर्नियमविधिरित्युक्ते अपूर्वविधावतिव्याप्तिस्तद्वारणायोक्तं पक्षप्राप्तेति तत्रोदाहरणमाह यथेति ॥ परिसंख्याविधेर्लक्षणमाह उभयेति यथा पंच पंचनखा भक्ष्या इत्यत्र रागतः पंचनखापंचनखभक्षणयोरुभयोः प्राप्तौ अपंचनखभक्षणव्यावृत्तिं बोधयति पंच पंचनखा भक्ष्या इति वाक्यं न तु पंचनखभक्षणं कर्तव्यत्वेन बोधयति तस्य रागतः प्राप्तत्वादितरव्यावृत्तिबोधको विधिः परिसंख्याविधिरित्युक्ते न कलंजं भक्षयेदित्यादिनिषेधवाक्येऽतिव्याप्तिरतस्तद्वारणायोक्तमुभयप्राप्ताविति



गीतालापांश्च वर्जयेदित्यादिवचनेनेति ॥ ६ ॥ अपूर्व२ ॥

वैदिकोदाहरणमाह यथेति अत्र मंत्रलिंगेन गर्दभरशनाऽश्वरशनयोर्ग्रहणप्राप्तावश्वाभिधानीमादत्त इति गर्दभरशनाग्रहणव्यावृत्तिर्विधीयते न त्वश्वरशनाग्रहणं विधीयते तस्य मंत्रलिंगप्राप्तत्वादतः परिसंख्याविधिः एतत्सर्वमभिप्रेत्योक्तं भट्टपादैः विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति नन्वस्त्वेवमन्यत्र प्रकृते किमायातमित्याशंक्याह एवमिति एवमुक्तरीत्या प्रकृते व्यवहारभूमौ ननु पक्षे साधनद्वयप्राप्तौ पक्षप्राप्तस्याप्राप्तांशपूरको विधिर्नियमविधिरित्युक्तत्वाद्ब्रह्मणो मानांतरागोचरत्वेन शास्त्रैकगम्यतया तज्ज्ञानं प्रति वेदांतव्यतिरिक्तसाधनांतराप्राप्तेः कथं नियमविधिः श्रवणादौ न च ब्रह्मज्ञानं प्रति पक्षे पुराणादिश्रवणस्य साधनतया प्राप्तौ नियमो युक्त इति वाच्यं अध्यात्मपुराणस्य वेदांतमूलतया तच्छ्रवणस्य साधनांतरत्वाभावात् न च पक्षे रागिणीनादिश्रवणस्य साधनत्वप्राप्तौ नियमो युक्त इति वाच्यं तस्य वचनांतरेण निवारितत्वात् न च द्वैतशास्त्रश्रवणस्य पक्षे साधनत्वप्राप्तौ स युक्त इति वाच्यं तस्य वि

वैशेषिकादेः१ ॥

**यथेमामगृभ्णान्रशनामृतस्येत्यश्वाभिधानीमादत्त इति गर्दभरशनाग्रहणव्यावृत्तिविधिः एवं प्रकृतेऽपि जिज्ञासुर्वेदांतश्रवणमेव कुर्यादिति नियमविधिः वेदांतश्रवणव्यतिरिक्तं न कुर्यादिति परिसंख्याविधिर्वा ॥**

२२ रुद्धत्वेनाद्वितीयब्रह्मज्ञानं प्रति साधनत्वायोगात् यतो वाचो निवर्तंते अप्राप्य मनसा सह तन्मनसा न मनुत इत्यादिश्रुत्या ब्रह्मणो वेदांतव्यतिरिक्तवाङ्मनसयोरविषयत्वेन तज्ज्ञानं प्रति प्रत्यक्षादीनां साधनत्वाप्राप्तेश्च अत एव न परिसंख्याविधिस्तस्मान्नियमः परिसंख्या वेति विकल्पाश्रयणमनुपपन्नमिति मैवं वेदांतश्रवणवद्ध्यात्मपुराणादिश्रवणस्यापि ब्रह्मज्ञानं प्रति स्वातंत्र्येण साधनत्वप्राप्तौ श्रवणादौ नियमविधिरभ्युपगम्यते न चापूर्वविधिरेवास्तु किमनेन क्लेशेनेति वाच्यं श्रवणादेर्दृष्टफलत्वेन तदसंभवस्योक्तत्वात् नन्वन्यत्र नियमादृष्टस्य परमापूर्वोपयोगदर्शनात्प्रकृते तदभावात्तस्य कुत्रोपयोग इति शृणु तत्त्वज्ञाने तस्योपयोगः न च प्रमाणपरतंत्रस्य कथमदृष्टसाध्यत्वमिति वाच्यं साक्षात्तदभावेऽपि प्रतिबंधकनिवृत्तिद्वारा तदुपपत्तेः किं चात्यल्पमिदमुच्यते सर्वादृष्टसाध्यत्वाद्ब्रह्मसाक्षात्कारस्य न च तत्र प्रमाणाभावः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेन कषायैः कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इत्यादिश्रुतिस्मृत्योः सत्वात् तस्माज्जिज्ञासुर्वेदांतश्रवणमेव कुर्यादिति नियमविधिरिति निरवद्यम् ॥ ६ ॥ ॥

कर्मफलप्रतिपादकान् वेदानित्यर्थः ॥६॥ वाक्ये ४॥

अतएवजिज्ञासुर्वेदांतश्रवणाद्यतिरिक्तंनकुर्यादितिपरिसंख्याविधिरपिसंभवति नचनियमपरिसंख्याविध्योः कोविशेषउभयत्रेतरव्यावृत्तेरविशेषादिति
वाच्यंनियमविधावितरव्यावृत्तिरार्थिकीपरिसंख्याविधौविधेयेतिविशेषः उक्तार्थंसंमतिमाह तदुक्तमिति अनात्मादर्शनेनानात्मदर्शनव्यावृत्त्याहंब्रह्मास्मी
तिपरमात्मानमुपास्महे ध्यायाम इत्यर्थः वस्तुतस्तुश्रवणादौनियमविधिरेवपरिसंख्याविधिर्वेत्यभ्युपगमवादस्तइतरथाऽकरणेप्रत्यवायश्रवणाविरोध
प्रसंगादिति द्रष्टव्यं ननुश्रवणंविधीयतइत्युक्तंतत् किंकाम्यमुतनित्यं अहोनैमित्तिकंप्रायश्चित्तं वानाद्यः स्वर्गकामोयजेतेतिवद्विध्युद्देशेफलाश्रवणात्नच
रात्रिसत्रन्यायेनतत्कल्प्यमिति वाच्यंगृहस्थादीनांब्रह्मज्ञानकामनायाअसंभवात् प्रत्युतब्रह्मज्ञानादुद्वेगदर्शनात् अतएवरागिणोनमपिश्लोकमुदाहरंति
अपिवृंदावनेशून्येशृगालत्वंसइच्छति नतुनिर्विषयंमोक्षंकदाचिदपिगौतमइतिकिंचवेदांतिमंलोकममुंचपरित्यज्यात्मानमन्विच्छेदित्यादिश्रुत्यासाधनच

तदुक्तंनियमः परिसंख्यावाविध्यर्थोहिभवेद्यतः अनात्मादर्शनेनैवपरमात्मानमुपास्महे इतितच्चश्रवणंसंन्यासिनांनित्यं नित्यकर्मप
रित्यज्यवेदांतश्रवणंविना वर्तमानस्तुसंन्यासीपतत्येवनसंशयः १ इत्यकरणेप्रत्यवायश्रवणात् आसुप्तेरामृतेः कालंनयेद्वेदांतचिं
तयेतिस्मृत्यायावज्जीवमग्निहोत्रंजुहुयादित्यादिश्रुत्याजीवननिमित्तीकृत्याग्निहोत्रादिविधानवज्जीवननिमित्तीकृत्यश्रवणादिविधाना
त्त्वंपदार्थविवेकायसंन्यासः सर्वकर्मणांश्रुत्याभिधीयते ॥ २१ तुष्टयसंपन्नस्यजिज्ञासोः संन्यासिनः श्रवणादिकर्तव्यतावगमेनगृहस्थादीनांतत्रान
धिकारात् अस्तुतर्हिसंन्यासिनामेतत्काम्यमिति चेन्नश्रवणादिरहितस्यसंन्यासिनः प्रत्यवायाभावप्रसंगात् नचेष्टापत्तिः अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छं
नित्यंकर्मपरित्यज्येत्यादिश्रुतिस्मृतिविरोधप्रसंगात् तस्मान्नश्रवणादिकाम्यंनद्वितीयः अग्निहोत्रादिवच्छ्रुत्याजीवननिमित्तीकृत्याविधानात् नतृतीयः गृहदाहा
दिवन्निमित्ताश्रवणात् नचरमः पापनिवृत्तिमुद्दिश्याविधानात् तरतिब्रह्महत्यांयोऽश्वमेधेनयजतेउपचैनमेवंवेदेत्यादिवत् तस्याश्रवणात् तस्माच्छ्रवणादिविधा
नमनुपपन्नं इत्याशंक्यतस्यनित्यत्वकाम्यत्वयोः संभवाद्विधिरुपपद्यतइत्यभिप्रेत्याह तच्चेति॥ यथाचातुर्णामाश्रमाणामुपकुर्वाणस्यब्रह्मचारिणः काम्यत्वेपिगृह
स्याश्रमंप्राप्तस्याकरणेप्रत्यवायश्रवणात् जीवननिमित्तीकृत्यविधानाच्च अग्निहोत्रसोमयागसंध्यावंदनादिनित्यंएवंस्वीकृतसंन्यासाश्रमस्यपरमहंसस्यविविदि राम: ५२

षोरपिश्रवणादिनित्यं अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छंश्रवणायापिबहुभिर्योनलभ्यः नित्यंकर्मपरित्यज्यवेदांतश्रवणंविनेत्यादिश्रुतिस्मृतिषुसंन्यासि
नांश्रवणाद्यकरणेप्रत्यवायश्रवणात् आसुप्तेरित्यादिस्मृतिषुजीवननिमित्तीकृत्यविधानाच्चश्रवणादिनित्यंनच आसुप्तेरामृतेः कालंनयेद्वेदांतचिंतयेत्यादि
स्मृतावेवजीवननिमित्तीकृत्यश्रवणंविधीयतेनश्रुताविति वाच्यंतद्वलेनतत्रापितत्कल्पनासंभवात् नकेवलंप्रत्यवायश्रवणाजीवननिमित्तविधिवलाभ्याम्
स्माभिरेवश्रवणनित्यत्वमभ्युपगम्यते किंत्वाचार्यैरंगीकृतंश्रवणादिरहितस्यपातित्याभिधानादित्याहत्वंपदार्थेति तत्वमसीत्यत्रत्वंपदस्ययोयंवाच्यार्थः
अंतः करणविशिष्टचैतन्यंतद्विवेकायांतः करणपरित्यागेनतदेकदेशलक्ष्यार्थप्रत्यक्चैतन्यज्ञानायेत्यर्थः सर्वकर्मणांनित्यादीनांविहितानामेतमेवेत्यादि
श्रुत्यातत्यागीश्रवणादित्यागीव्यंजकस्येतिश्रवणादेरित्यर्थः असौसंन्यासी ननुविवरणाचार्यतत्वदीपनाचार्याभ्यांश्रवणविधेः काम्यत्वमुक्तंकः पुनरस्यप्रसं
गइत्याक्षिप्यसमाधानावसरे तत्कथमुपपद्यतेइत्याशंक्यतस्यगृहस्थादिविषत्वान्नकाप्यनुपपत्तिरित्याह गृहस्थादीनामिति ननुगृहस्थादीनांसाधनचतुष्ट।

यस्मात्तत्यागीपतितोभवेत् १ कारकस्यकरणेननतत्क्षणाद्विस्रुरेवपतितोयथाभवेत् व्यंजकस्यपरिवर्जनादसौसद्यएवपतितोनसंशयः १
इतिवार्तिकाचार्यसंक्षेपशारीरकाचार्याभ्यांश्रवणादिरहितस्यसंन्यासिनः पातित्याभिधानाच्चगृहस्थादीनांश्रवणादिकाम्यम् ॥ ८ ॥ ९ ॥

यसंपत्त्यभावाद्ब्रह्मजिज्ञासानसंभवतीत्युक्तंसत्यमुक्तं अत्यंतवहिर्मुखानामसंभवेपिकेषांचित्परमेश्वरानुगृहीतानांफलासक्तिरहितकर्मानुष्ठायिनांसाधनसंपत्त्या
ब्रह्मजिज्ञासासंभवत्येवनिमित्तांतरप्रतिबंधेनसंन्यासाश्रमस्वीकाराभावेपिश्रवणादौप्रवृत्तिरुपपद्यतेतेषांश्रवणविधिः काम्योऽन्यथागृहस्थाश्रमादावुत्पन्न।
ब्रह्मसाक्षात्काराणांजीवन्मुक्तिमुद्दिश्यविद्वत्संन्यासविधानंकथंस्यात् नचविद्वत्संन्यासएवनास्तीतिवक्तुंशक्यंप्रमाणबलेनविविदिषाविद्वत्संन्यासयोर्निरूपितत्वा
त् किंचविविदिषासंन्यासेजिज्ञासुरधिकारी उत्पन्नसाक्षात्कारोविद्वत्संन्यासे यथाविविदिषासंन्यासस्यतत्वज्ञानंफलंतथाविद्वत्संन्यासस्यजीवन्मुक्तिर्यथातत्वज्ञान
साधनंश्रवणादिर्विविदिषासंन्यासिनानुष्ठेयः तथाजीवन्मुक्तिसाधनंवासनाक्षयाद्यभ्यासः विद्वत्संन्यासिनेत्यधिकारिफलानुष्ठेयानांभेदात् विविदिषाविद्वत्संन्यास।
॥योर्महान्भेदोस्त्येव॥ ९ ॥ ९ ॥

न च जीवन्मुक्तिरेव नास्ति प्रमाणाभावादिति वाच्यं स्वानुभवश्रुतिस्मृतीतिहासपुराणानां सत्वात्पुनश्चोत्तरत्र व्युत्पादयिष्यति उक्तं च जीवन्मुक्तिस्तावदस्ति प्र।
तीतेर्द्वैतच्छायातत्र चास्ति प्रतीतेः द्वैतच्छायारक्षणायास्ति लेशः अस्मिन्नर्थे स्वानुभूतिः प्रमाणमिति १ तस्माद्ब्रह्माश्रमादावुत्पन्नतत्वसाक्षात्कारिणां विद्वत्संन्या
स विधानानुरोधेन गृहस्थादीनामेव श्रवणविधिः काम्य इति विवरणाचार्यतत्वदीपनाचार्ययोस्तात्पर्यं द्रष्टव्यं गृहस्थादीनां श्रवणविधेः काम्यत्वे गमकमा
ह। दिने दिन इति ननु विवरणाचार्यैस्तृतीयवर्णके संन्यासस्य श्रवणांगत्वमभिधीयते तथा च वार्त्तिकाचार्यैरपि त्यक्ताशेषक्रियस्यैव संसारं प्रजिहासतः॥
जिज्ञासोरेव चैकात्म्यं त्रय्यन्तेष्वधिकारिता॥१॥ सर्वकर्मपरित्यागात्संत्यक्ताशेषसाधनात् श्रुत्युक्तोक्तपरिव्राट्स्यादैकात्म्यज्ञानजन्मन १ इत्यादिभिः तत्त्वभा
ष्यकारैरपि ब्रह्मसंस्थोऽमृतत्वमेतीत्यत्र संन्यासिनामेव ब्रह्मनिष्ठायामधिकार इति श्रुत्यापि॥ अतः संन्यस्य कर्माणि सर्वाण्यात्मावबोधतः॥ हित्वाऽविद्यां धियै

दिने दिने तु वेदान्तश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं लभेत् इति फलश्रवणात्॥ अन्ये तु वेदान्तश्रवणे साध
न चतुष्टयसंपन्नस्यैवाधिकारात् गृहस्थादेः श्रवणाधिकार एव नास्ति श्रुतिषु याज्ञवल्क्यजनकप्रभृतीनां तत्वज्ञानप्रतिपादकोपाख्यानस्य ब्र
ह्मात्मनि तात्पर्यात् स्वार्थे तात्पर्यमेव नास्तीत्याहुः॥ तदसत् याज्ञवल्क्यप्रभृतीनां गृहस्थस्य तुलाधारस्य च ज्ञानित्वस्मरणात् परवैराग्यं गुणवै
तृष्ण्यं गुणेषु जिहासेति यावत् तदुक्तं तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति॥ तच्चासंप्रज्ञातसमाधेरंतरंगसाधनं उक्तं च तीव्रसंवेगानामासन्नः स

वैयात् तद्विष्णोः परमं पदं १ वेदान्तिमं लोकममुं च परित्यज्यात्मानमन्विच्छेदित्याद्युपात्त तत्र गृहस्थादीनां श्रवण माधिलाभ इति अलमतिप्रसंगेन॥
धिकार एव नास्ति तस्माद्गृहस्थादीनां श्रवणादि काम्यं संन्यासिनां नित्यमित्यसंगतमिति चेत्तर्हि संन्यासिनामेव श्रवणादि नित्यं काम्यं च भवतु यथा गृहस्थस्याग्निहो॥
त्रादि नित्यं काम्यं च भवति तद्वत् पूर्वोक्तयुक्त्यैव श्रवणादीनां नित्यत्वं काम्यत्वं च तथा च न विवरणविरोधः नापि वार्त्तिकाचार्यादिवचनविरोध इत्यभिप्रेत्य मतांतर
माह अन्ये त्विति वैराग्यतारतम्येन संन्यासभेदनिरूपणप्रसंगात् श्रवणादिविधिं सप्रपंचं निरूप्य क्रमप्राप्तं परं वैराग्यं निरूपयति परं वैराग्यमिति उक्तार्थे पतंजलिस
त्रं संवादयति तदुक्तमिति प्रासंगिकं परिसमापयत्यलमिति॥ ६ ॥ ६ ॥





उक्तन्यायमन्यत्राप्यतिदिशति एवमिति ननूपक्रमादिभिर्वेदवाक्यानां तात्पर्यनिर्णयेऽपि लौकिकवाक्यानां कुतः तात्पर्यनिर्णय इत्यत्राह प्रकरणादिनेति लिंगा
दिरुपक्रमादिशब्दार्थः एवं तात्पर्यं सप्रपंचं निरूप्य प्रसंगात्पूर्वोक्तलक्षणाया बीजं दर्शयति एतादृशेति ननु अन्वयानुपपत्तिरेव लक्षणाबीजमस्तु गंगायां घोष इ
त्यत्र तस्यास्तथात्वेन दृष्टत्वादित्याशंक्याह नत्विति प्रतिज्ञातेऽर्थे हेतुमाह तस्या इति यद्यन्वयानुपपत्तिर्लक्षणाबीजं तर्हि यष्टीः प्रवेशयेत्यत्र यष्टीनां प्रवेशान्वय
स्य तात्पर्यानुपपत्तेरभावेन लक्षणा न स्यात् तेन सा लक्षणाबीजमिति भावः नन्वत्र तात्पर्यानुपपत्तिर्लक्षणाबीजमस्तु अन्यत्रान्वयानुपपत्तिः न चाननु
गतत्वं अनुगताऽलाभेन स्वीकार्यत्वाश्रयणीयत्वादित्याशंक्य तात्पर्यानुपपत्तेः सर्वत्रानुगतत्वेन लक्षणाबीजमंगीकर्तव्यमित्याह गंगायामिति आदिशब्देन शोणो
धावतीत्यादिग्रहणं एवं लक्षणाबीजं निरूप्य लक्षणा पदमात्रवृत्तिस्तस्य शक्तत्वादिति नैयायिकास्तान्निराकर्तुमाह न केवलमिति ननु वाक्यस्याशक्तत्वात्कथं वा

एवं कर्मवाक्यानामप्युपक्रमादिभिस्तात्पर्यनिर्णयः प्रकरणादिना लौकिकवाक्यानां तात्पर्यनिर्णयः एतादृशतात्पर्यानुपपत्तिः पूर्वोक्त
लक्षणाबीजं न त्वन्वयानुपपत्तिः तस्याः यष्टीः प्रवेशयेत्यादौ असंभवात् गंगायां घोष इत्यादौ तात्पर्यानुपपत्तेः संभवात् न केवलं लक्षणा
पदमात्रवृत्तिः किंतु वाक्यवृत्तिरपि गंभीरायां नद्यां घोष इत्यादौ पदसमुदायात्मकवाक्यस्य तीरे लक्षणास्वीकारात् अत एवार्थवादवाक्यानां प्राश
स्त्ये लक्षणा॥ अन्यथा पदान्तरवैयर्थ्यं स्यात् अत एव प्राशस्त्यपदार्थप्रत्यापकत्वेनार्थवादवाक्यानां पदस्थानीयतया पदैकवाक्यत्वं॥ ६ ॥

क्यवृत्तिर्लक्षणायाः शक्यसंबंधस्यैव लक्षणात्वात् उच्यते यथा शक्तिज्ञाप्यः पदार्थस्तथा वाक्यार्थोऽपीति लक्षणा वाक्यवृत्तिरपि भवत्येव पदानामितरान्विते पदा
र्थे व्यवधारणादन्वयांशे समुदायशक्त्यभावेऽपि प्रातिस्विकशक्तेः सत्वाद्वाक्यस्यापि शक्यसंबंधसंभवाल्लक्षणोपपद्यते न हि वाक्ये लक्षणास्वीकार इत्यत आ
ह गंभीरायामिति न च नदीपदमेव लक्षकं गंभीरपदं तात्पर्यग्राहकमित्युपपत्तेः वाक्ये लक्षणांगीकरणं मुधेति वाच्यं प्रकरणादिना तात्पर्यग्रहसंभवेन पदान्तरवैयर्थ्यापत्ता
वाक्ये लक्षणांगीकरणमर्थवदिति भावः तत्रोपोद्बलकमाह अत एवेति यतो वाक्ये लक्षणा स्वीकृता अत एव तत्पर्यथः स्तावकवाक्यं अर्थवादः स्तवः स्तुतिः सा च गुणिनि गुणासं
बंधारोपस्य इति स्तुतावित्यर्थः विपक्षे दंडमाहान्यथेति एवं चार्थवादवाक्यानां प्राशस्त्ये लक्षणास्वीकारे पदैकवाक्यत्वं सिद्धमित्याह अत एवेति केषां तर्हि वाक्यैकवा

स्तुत्यनंगीकारे ६॥ एकैकस्य ४ विधिवाक्येन सह ६॥

कौ॰
प्र॰
५४

नस्मिन्कल्पितत्वात्५॥

कारकमंगं तदुक्तं स्वार्थबोधे समाप्तानामंगांगित्वाद्यपेक्षया वाक्यानामैक्यवाक्यत्वं मिथः संहत्य जायत इति नन्वस्तु वाक्यैक्यवाक्यत्वं ततः किमित्यत आह एवं चेति न च तत्र प्रमाणाभाव इत्याह तथेति परमप्रकृतमुपसंहरति एवमिति शक्तिग्रह आकांक्षाज्ञानं योग्यताज्ञानं आसत्तिस्तात्पर्यज्ञानं अवांतरवाक्यार्थज्ञानं चेत्येते यथोक्तसहकारिणस्तैः संपन्नमित्यर्थः वाक्यं परोक्षापरोक्षभेदेन द्विविधां प्रमामुत्पादयति इत्युक्तं तदसंगतमदर्शनादित्याशंक्य तदुपपादयति तत्रेति परोक्षार्थस्य धर्माधर्मादेः प्रतिपादकं किमिदं परोक्षत्वमर्थस्येत्याशंक्याह परोक्षत्वं नामेति विषयस्यानावृत्तसंवित्तादात्म्याभावः परोक्षत्वमित्युक्ते धर्माधर्मयोः परोक्षत्वं न स्यादत उक्तं योग्यस्येति धर्माधर्मयोः संवित्तादात्म्यसत्त्वेप्ययोग्यत्वात्परोक्षत्वमित्यर्थः योग्येति विशेषणव्यावर्त्यमाह धर्मेति परोक्षार्थविषयत्वं प्रमायाः परोक्षत्वं विषयत्वे

स्वार्थे तात्पर्यवतां समभिधायं जजतिदर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानामुपकार्योपकारकाकांक्षायामैक्यवाक्यत्वं वाक्यैकवाक्यत्वं एवं चावांतरवाक्यार्थज्ञानमपि महावाक्यार्थज्ञाने कारणं तथान्वयव्यतिरेकानुविधानात् एवं यथोक्तसहकारिसंपन्नं वाक्यं परोक्षापरोक्षभेदेन द्विधां प्रमामुत्पादयति तत्र परोक्षार्थप्रतिपादकं वाक्यं परोक्षप्रमोत्पादकं यथा स्वर्गकामो यजेत् सदेव सौम्येदमग्र आसीत् दशमोस्तीत्यादिवाक्यं परोक्षत्वं नाम अनावृत्तसंवित्तादात्म्याभावो योग्यस्य विषयस्य धर्माधर्मयोरयोग्यत्वान्न प्रत्यक्षत्वं अपरोक्षार्थप्रतिपादकं वाक्यं अपरोक्षप्रमोत्पादकं यथा दशमस्त्वमसीति तत्त्वमसीत्यादिवाक्यं अपरोक्षत्वं नाम अनावृत्तसंवित्तादात्म्यम् ॥ २२ ॥

तत्त्वमभिन्नत्वं वा द्रष्टव्यं किं तर्ह्यपरोक्षप्रमोत्पादकमित्याशंक्याह अपरोक्षेति अपरोक्षत्वमर्थस्य निर्वक्ति अपरोक्षत्वं नामेति न च धर्माधर्मयोरनावृत्तसंवित्तादात्म्याद् परोक्षत्वापत्तिरिति वाच्यं तयोरयोग्यत्वादत एवात्रापि योग्यस्य विषयस्यानावृत्तसंवित्तादात्म्यमिति विशेषणीयं ननु शब्दादीनां घटादीनां च जडत्वात्कथमनावृत्तसंवित्तादात्म्यं चेतनाचेतनयोस्तादात्म्यायोग्यत्वात् किंच भवतां मते संविदो द्वितीयत्वेनानावृतत्वे कृत्स्नस्य प्रपंचस्य तत्कार्यत्वेन तादात्म्यसंभवेन सर्वदा प्रत्यक्षत्वापत्तिः अपि च संवित्तादात्म्यं प्रत्यक्षत्वमित्येवास्तु तस्याः स्वतो नित्यापरोक्षत्वेन विषयभानसंभवादनावृत्तेति विशेषणं व्यर्थं आवृत्तस्य संविदं तरस्याप्रसिद्धत्वात् संविदावृतत्वाभ्युपगमे जगदांध्यप्रसंगात्तर्ह्येतावदेवास्त्विति चेन्न उक्तदोषानपायात् तस्मादिंद्रियजन्यज्ञानविषयत्वं विषयस्यापरोक्षत्वं तद्भिन्नत्वं परोक्षत्वमिति अत्र ब्रूमः अनावृत्ततादात्म्यमेव विषयस्यापरोक्षत्व

प्रमाणाधीनत्वात्६॥ अनावृत्ततिरोधाने॥२॥

रामः
५४

अवच्छेदकम्३॥ करणत्वायोगात्४॥ अव्यवधानेनस्वस्यापेक्षायाऽऽत्माश्रयः॥२॥ स्थूलं८॥

मभ्युपगंतव्यं नत्विंद्रियजन्यज्ञानविषयत्वं इंद्रियजन्यत्वस्य ज्ञाने जन्यतावच्छेदकग्रहमंतरेण तद्दुर्ग्रहत्वात् न च साक्षात्त्वमेव तदवच्छेदकमिति वाच्यं तस्यानिर्वचनात् न चेंद्रियत्वेनेंद्रियजन्यज्ञानत्वं तदिति वाच्यं आत्माश्रयापत्तेः इंद्रियस्यानि इंद्रियत्वेन तद्घटितसाक्षात्त्वस्यापि तथात्वेन साक्षात्करोमीत्यनुभवाविषयत्वप्रसंगाच्च न च ज्ञानाकरणकज्ञानत्वं तदिति वाच्यं मनःकरणकानुमितिपक्षे तत्रातिव्याप्तेः न च तस्य निराकरणत्वान्नोक्तदोष इति वाच्यं परामर्शस्य व्यापाराभावेऽनुमितिकरणत्वायोगात् द्वितीयज्ञानस्य नष्टत्वेन तदयोगात् व्याप्तिज्ञानस्य विशकलितस्थले व्यभिचारेण तदयोगाच्च अतः परिशेषादनुमितेः मनःकरणत्वस्यावश्यकत्वात्तत्रातिव्याप्तिर्वज्रलेपायिता कथं तर्हि सिद्धांते व्याप्तिज्ञानस्यानुमितिकरणत्वं विशकलितस्थले व्यभिचारात्तस्माद्विशकलितस्थले पक्ष ... निहेतौ तदुभयवैशिष्ट्यभानादनुमितिर्भवतीत्यत्र मानाभावात्सर्वत्र व्याप्तिज्ञानमेवानुमितिकरणमन्यथा सिद्धांतविरोधप्रसंगात् ततश्च कुत्रातिव्याप्तिरिति ... सत्यं तत्त्वसाक्षात्कारे श्रवणादीनां व्यापारवत्त्वेन करणतयाऽव्याप्तेर्दुष्परिहरत्वादतो न ज्ञानाकरणकज्ञानत्वं साक्षात्त्वं नापि साक्षात्त्वं जातिः अविद्यानिरिक्त ... ज्ञाने निरस्तत्वात् किंचेश्वरज्ञानस्य भवन्मतेऽप्रत्यक्षत्वापत्तेश्च तस्येंद्रियजन्यज्ञानाविषयत्वादीश्वरस्य शरीरेंद्रियादेरनंगीकारादन्यथा न तस्य कार्यं करणं च विद्यत इति श्रुतिविरोधप्रसंगादस्मदादींद्रियस्य तत्रासामर्थ्यात्तस्मादिंद्रियजन्यज्ञानविषयत्वमपरोक्षत्वं तद्भिन्नत्वं परोक्षत्वमिति यदुक्तं तन्मनोरथमात्रं किं तर्ह्यपरोक्षत्वं विषयस्येति चेदुक्तमेव गृहाण स्वरूपेण संविदैक्यात्तस्याः नित्यापरोक्षत्वेप्यौपाधिकभेदाभ्युपगमेन कार्यबलादंतःकरणोपहितचैतन्यमनावृत्तं घटाद्यधिष्ठानचैतन्यमावृत्तमिति गम्यते घटादिष्वनवभाससंशयविपर्यासदर्शनादंतःकरणोपहितेन तदभावादेवं च सर्वदा न सर्वप्रत्यक्षतापत्तिः न ... णाकारवृत्तिदशायां तु विषयावरणनिवृत्तिसंभवाद्विषयचैतन्यप्रमातृसाक्षिणामेकोपाध्यवच्छेदेनैक्यादंतःकरणादिवद्घटादिकमपि साक्षिण्यध्यस्तमेवेति ... देरनावृत्तसंवित्तादात्म्यात्प्रत्यक्षत्वं न तु तदाकारवृत्तिविरहदशायां तु तदभावान्न प्रत्यक्षत्वं नन्वेवं सति परोक्षस्थलेपि तत्तदाकारवृत्तिदशायां तु वह्न्यादेरपि प्रत्यक्षत्वापत्तिः न तत्रेंद्रियसन्निकर्षाभावादिंद्रियद्वारा बहिर्निर्गतांतःकरणस्य विषयसंबंधेन तदाकारवृत्त्या तन्निष्ठावरणनिवृत्त्या विषयप्रत्यक्षत्वाभ्युपगमेन परोक्षस्थले ... कर्षाभावेन मनसो बहिरस्वतंत्रतया बहिर्गमनाभावेन विषयासंबंधात्तत्तदाकारवृत्तिदशायां न वह्न्यादेः प्रत्यक्षत्वापत्तिः कथं पुनर्वह्न्यादेर्भानमिति श्रुणु अंतःक ... पहितचैतन्येन तस्य वह्न्याद्यधिष्ठानचैतन्यस्य च वास्तवैक्याल्लिंगज्ञानादिना तदाकारवृत्त्याऽसत्त्वापादकमौढ्याज्ञाननिवृत्त्या वह्निरस्तीति परोक्षतया वह्न्यादेर्भा

...रंश्च॥ चेत्३॥ ज्ञानस्य२॥ तादात्म्य४॥ अंतरेव५॥

विशेषणस्य२॥ जडस्यघटादेः साक्षिचैतन्यधर्मीयोगात्‌द्वि॥ साक्षि५॥ घटादिः ५॥

नेना परोक्षतया अतएवबहिरस्तीत्यनुभवोनत्वयमितिएतेनसंविद ———— स्वभावैक्याद परोक्षत्वेन तत्तादात्म्यमेव तत्प्रयोजकमस्तु अनावृतेनेनिर्विशेषणं
न्यर्थमितिप्रत्युक्तं औपाधिकभेदप्रतिपादनेनतदर्थवत्वस्योक्तत्वाज्जडाजडयोर्वास्तव अवास्तवयोस्तादात्म्यासंभवेप्यवास्तवस्य नास्तवेन तादृशतादात्म्यबा
धकाभावात्‌तस्माद्योग्यस्यविषयस्यानावृतसंविन्तादात्म्य मपरोक्षत्वमितिनिरवद्यम् केयमनावृतसंविदित्याकांक्षायामाह अनावृतेनति कोयंसाक्षीत्याकांक्षायामाह
अंतःकरणेतिसचनित्यः नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते अविनाशित्वादितिश्रुतेः प्रातरारभ्य प्रहरमिदमद्राक्षमिति परामर्शात्साक्षिसिद्धिरितिभावः ननुसाक्षिचैत
न्यमप्यावृतमस्तुकोदोषइत्याशंक्याह तस्येति ननुघटादीनांकिमिदंसंविन्तादात्म्यं तन्निष्ठासाधारणधर्मोवासचासावात्मातदात्मातदात्मनोभावस्तादात्म्यंरोक्यभि
न्यर्थोवा भेदसहिष्णुरभेदस्तादात्म्यमित्यर्थोवानाद्यःजडस्यतद्योगान्नद्वितीयःजडाजडयोस्तमःप्रकाशवद्विरुद्धत्वेनैक्यस्यदूरनिरस्तत्वात् नतृतीयःसमानस

**अनावृतसंवित्साक्षिचैतन्यं अंतःकरणोपहितं चैतन्यं साक्षी तस्यावृतत्वे जगदांध्यप्रसंगः तत्तादात्म्यंनामतद्भिन्नत्वेसतितदभिन्नसत्ताकत्वं तथाच दशमस्त्वमसीत्यत्र दशमस्त्वंपदार्थाभिन्नतयाऽपरोक्षत्वेनवाक्याद्दशमापरोक्षप्रमैवजायते दशमोस्मीति ननुवाक्यात्परोक्षज्ञानं मनसात त्साक्षात्कारो मनसोऽनिंद्रियत्वस्योक्तत्वात्॥** २२

सत्ताकयोर्भेदाभेदयोर्विरुद्धत्वेननतद्योगादित्याशंक्य घटादेः कल्पितत्वेनसाक्षिसत्तातिरिक्तसत्ता
शून्यत्वमेवततादात्म्यंविवक्षितमित्यभिप्रेत्याह तदिति नन्वेवमर्थस्यानावृतसंविन्तादात्म्यमपरोक्षत्वंभवतु तथापि तत्प्रतिपादिकवाक्यस्यकथमपरोक्षप्रमोत्पा
दकत्वंगमानयेत्यादिवाक्यानांपरोक्षप्रमाजनकत्वस्यैवदृष्टत्वादित्याशंक्याह तथाचेति गोकर्मकानयनसंसर्गस्यानावृतसंविन्तादात्म्याभावेनपरोक्षत्वाद्वाक्यस्यपरो
क्षप्रमाजनकत्वेपिदशमस्त्वमसीत्यत्रदशमस्यत्वंपदार्थाभिन्नतयातद्विपरीत्याद्वाक्यस्यापरोक्षप्रमाजनकत्वमुपपद्यतेइतरथा अपरोक्षे वस्तुनि परोक्षप्रमाजनकंवा
क्यमप्रमाणंस्यादित्यर्थः नन्वेवमपिवाक्यस्यपरोक्षप्रमाजनकत्वस्वाभाव्याद्दशमस्त्वमसीतिवाक्यात्प्रथमं परोक्षमेवज्ञानंजायतेऽनंतरंमनसा दशमत्वसाक्षात्कारः आ
त्मतद्धर्मसाक्षात्कारस्यकरणजन्यत्वस्यावश्यकत्वेनचक्षुरादीनांतत्रासामर्थ्यात्परिशेषादन्वयव्यतिरेकाभ्यांमनएवतत्रकरणं अन्यथासुखादिसाक्षात्कारस्याप्रमात्वा
पत्तेः किंच परोक्षप्रमाजनकस्वभावस्यापरोक्षप्रमाजनकत्वंकल्प्यते नहिकुटजबीजादटांकुरोत्पत्तिरपिकल्प्यते तस्मान्मनसैवदशमत्वसाक्षात्कारः नवाक्यादित्या
स्वभावकल्पना१॥

अंतरिंद्रियबहिरिंद्रियभावेन३॥
शंक्यनिराकरोति नन्विति सुखादिसाक्षात्कारकरणत्वेनमनसइंद्रियत्वेसिद्धेवाक्यात्परोक्षज्ञानंमनसासाक्षात्कारइतिवक्तुंशक्येततत्पूर्वमेवनिरस्तमित्याह मनस
इति इंद्रियेभ्यः परंमनइति प्रथक्‌करणान्मनोनेंद्रियमित्युक्तंप्रत्यक्षनिरूपणावसरेइतिभावः॥ ननुसुखाद्युपलब्धिरिंद्रियकरणिका जीवाश्रयापरोक्षप्रमा
त्वात् रूपोपलब्धिवदित्यनुमानेनेंद्रियाणिदशैकं चेत्यादिस्मृत्याचमनसइंद्रियत्वसिद्धेः कथमनिंद्रियत्वोक्तिः प्रथक्‌करणस्यान्यथाप्युपपत्तेरितिचेन्नतत्सुखा
द्युपलब्धेर्नित्यसाक्षिस्वरूपतया सकरणिकत्वासिद्धेः नचसुखादिसाक्षात्कारस्यनित्यसाक्षिस्वरूपतयादुःखज्ञानंनष्टं सुखज्ञानमुत्पन्नमित्यनुभवस्यविरोधः
स्यादितिवाच्यं साक्षिणोनाशाभावेपिसुखादिविषयनाशात्तदुपपत्तेः नहिसुखादिविषयेसतितत् ज्ञानोत्पत्तिविनाशौकश्चिदनुभवतिस्मृतिस्त्वन्यथापिभविष्य
ति नचैवमप्यात्मसाक्षात्कारकरणत्वेनेंद्रियत्वंमनस इतिवाच्यं निरुपाधिकात्मनोवाङ्मनसयोरविषयातयात्साक्षात्कारत्वस्यतत्कारणत्वायोगात् अस्तुतर्हिसोपाधिका
त्मसाक्षात्कारेतत्करणमित्याशंक्याह वृत्तिमिति निमित्तकारणस्यकुठारादेः करणत्वदर्शनादुपादानस्यमृदादेस्तदर्शनात् वृत्त्युपादानस्यमनसःकरणत्वम

**वृत्तिंप्रत्युपादानत्वेनकरणत्वायोगाच्च परमाणजन्याऽपरोक्षज्ञानस्यैवभ्रमनिवर्तकत्वाच्च एवंतत्त्वमसीत्यत्रापि तत्पदलक्ष्यस्य ब्रह्मणस्त्वंपदलक्ष्यसाक्ष्यभिन्नतयाऽनावृतसंविन्तादात्म्यात्॥** २२

युक्तं कामः संकल्पोविचिकित्सेत्यादिश्रुत्यावृत्त्युपादानत्वंमनसोऽवग
म्यत इति किंचालोकादिवत्प्रमाणसहकारित्वेनमनसः प्रथक्‌प्रमाणत्वमनुपपन्नमेवेति अपिच प्रथक्‌ विषयाभावादपिनतत्संभवतिनहि चक्षुरादेरिवमनसः
तांतरमाह अन्येत्विति तंत्रांतरंन्यायशास्त्रादिप्रतिज्ञानार्थमुपपादयति तथाहीति॥ प्रागभावंव्युत्पादयति उत्पत्तेरिति अनादिप्रतियोगिजनकः प्रागभावः
इतिनिष्कर्षः अथवाविनाश्यऽभावोवासइतिद्रष्टव्यम् ध्वंसंव्युत्पादयति उत्पन्नेति जन्याभा‾ वोध्वंसइत्यर्थः अत्यंताभावंलक्षयतिप्रयोगीति प्रतियोग्यसम
नाधिकरणत्वंनामप्रतियोग्यनधिकरणाधिकरणत्वंप्रतियोग्यधिकरणानधिकरणत्वंचप्रतियोग्यधिकरणाभिन्नाधिकरणत्वंवानचैवंप्रागभावादावतिव्याप्ति

वेदान्तैकदेशिनः ३॥ अनित्यत्वे ५॥

सर्वस्यब्रह्मज्ञाननिवर्त्यत्वात् अन्येतुलौकिकतंत्रांतरवुद्धिमनुसरंतोऽभावभेदंस्वीचक्रुः तथाहिप्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्यो
न्याभावश्चेतिभेदाच्चतुर्विधोऽभावः उत्पत्तेःप्राक्कारणेकार्याभावः प्रागभावः यथामृदादौघटाद्यभावः उत्पन्नस्यकारणेऽभावोध्वंसाभावः यथा
मुद्गरादिप्रहरणानंतरंकपालादौघटाद्यभावःप्रतियोग्यसमानाधिकरणाभावोअत्यंताभावःयथाभूतलादौघटाद्यभावःप्रतियोगिसमानाधि
करणाभावोऽन्योन्याभावःयथाभूतलादौघटादिभेदःसर्वेप्यभावाअनित्याश्चएवमभावप्रमानिरूपिता॥ २२ रिति

लक्षणे १ वाच्यंतृतीयेतदभावात् द्वितीयं

विवक्षितमित्यर्थः अन्योन्याभावंलक्षयति प्रतियोगीति प्रतियोगिसमानाधिकरणत्वंनामतदधिकरणाधिकरणत्वंनचाकाशस्यविभुत्वेननिरधिकरणत्वात्तद
न्योन्याभावस्यप्रतियोगिसमानाधिकरणत्वाभावादव्याप्तिरितिवाच्यं आकाशोत्पत्तेःप्राक्साधितत्वेनकार्यद्रव्यतयाकाशस्यसावयवत्वात् घटादिवत्तदन्योन्याभा
वस्यप्रतियोगिसमानाधिकरणत्वसंभवान्नतत्राव्याप्तिः आकाशावयवोमायैवेतिनकोपिदोषइतिभावः सर्वेषामभावानांप्रतियोगिसमानसत्ताकत्वेनमाया
कार्यत्वाद्ब्रह्मज्ञानवाध्यत्वेनानित्यत्वमेवनतंत्रांतरवत्केषांचिन्नित्यत्वंकेषांचिदनित्यत्वमित्याह सर्वेतितच ध्वंसस्यानित्यत्वेप्रतियोग्युन्मज्जनप्रसंगइति वा
प्रतियोगिपदलक्षणम् च्यं प्रागभावध्वंसस्यघटस्यानित्यत्वस्यत्वमेवाभ्युपगतत्वाद्नोक्तदोषइतिभावः॥ ६॥ पुनरुत्पत्तिः १

अज्ञाननिवृत्तिस्त्वेवह्यादेः प्रत्यक्षतानंगीकरे॥ ५॥
अभावप्रमानिरूपणंनिगमयति एवमिति नन्वेवंप्रमानिरूपणमस्तुकिंतवतेनेत्यतआह एवमिति उक्तप्रकारेणषड्विधेति प्रत्यक्षानुमित्युपमितिशाब्दार्थाप
त्यभावप्रमितिभेदात् भिन्नयेत्यर्थः आवरणेनसहितंसावरणं आवरणंनामावरणशक्तिः साचनिरूपितातनश्चषड्विधप्रमाभिः प्रत्यक्षादिभिर्विषयावार
कमज्ञानंनश्यतीत्यर्थः नन्वेवंसतिपरोक्षस्थलेवह्न्यादेरपिप्रत्यक्षतापत्तिः तदावरकाज्ञानस्यतद्गोचरपरमयानिवृत्तत्वात् यदिननिवृत्तंतदावरकाज्ञानेनतद्बनु
मित्यादिनिरूपणमनर्थकंस्यान्नचानुमित्यादिनिरूपणस्यस्वगोचरव्यवहारजनकत्वेनार्थवत्त्वमितिवाच्यंस्वगोचरवह्न्याद्यावारकाज्ञाननिवृत्त्यभावेनतद्योगात्
अन्यथाप्रत्यक्षप्रमायानिवृत्तेप्यज्ञानेविषयस्यापरोक्षाभावप्रसंगात् तस्मादुभयतःपाशारज्जुरित्याशंक्यतद्व्यवस्थामाह तत्रेति षड्विधप्रमास्वित्यर्थः अज्ञानेन
स्वगोचरेद्विविधोव्यवहारउत्पाद्यतेविषयोनास्तीत्यसत्त्वव्यवहारोविषयोनप्रकाशतेइति अप्रकाशव्यवहारश्चेतितत्रासत्त्वव्यवहारकारणमसत्त्वावरणमि
त्युच्यते अप्रकाशव्यवहारकारणमभानावरणमित्युच्यते एवंचपरोक्षप्रमयाऽसत्त्वावरणशक्तियुक्तंमौढ्याज्ञानशब्दवाच्यंनिवर्त्तते अतएवानुमित्यादि

एवंषड्विधप्रमयासावरणमज्ञानंनिवर्त्तते तत्रपरोक्षप्रमयाऽसत्त्वापादकमौढ्याज्ञाननिवृत्तिः अपरोक्षप्रमयाऽसत्त्वाभानापादकाज्ञाननिवृत्ति
रिति श्रीतत्त्वानुसंधानेद्वितीयःपरिच्छेदः॥ २॥ २२ मौत्पत्त्यनंतरंनकश्चिदपिविषयोनास्तीत्यनुभवतिकिंतुवह्न्यादिरस्तीत्येवप्रतिपद्यते अन्य
थातत्रप्रवृत्त्यनुपपत्तेर्वह्न्याद्यर्थिनां अपरोक्षप्रमयातुद्विविधावरणशक्तिमदज्ञानंनिवर्तते अतएवघटःस्फुरतिघटंपश्यामीत्याद्यनुभवः तदिदमाह परोक्षे
त्यादिना असत्त्वेति विषयस्यासत्त्वमापादयति असत्त्वव्यवहारंजनयतीत्यसत्त्वापादकंनास्तीतिव्यवहारकारणं तच्चतत् मौढ्याज्ञानंचेतितथाऽसत्त्वावरण
शक्तियुक्तमौढ्याज्ञाननिवृत्तिरित्यर्थः मौढ्यंनामविषयसत्ताव्यवहारयोग्यत्वंततश्चषड्विधप्रमानिरूपणमर्थवदितिभावः ननुयथाप्रत्यक्षस्थलेप्रत्यक्षप्रमानं
तरंघटःस्फुरतीत्यनुभवात् यथाघटादिस्फुरणंतथापरोक्षस्थलेप्यनुमित्यादिप्रमानंतरंवह्न्यादिःस्फुरतीत्यनुभवात् वह्न्यादिस्फुरणमस्त्येवतथाचकथंयथो
क्तव्यवस्थासिद्धिरित्यत्रोच्यतेपरोक्षस्थलेवह्निसत्तामात्रस्फुरणं प्रत्यक्षस्थलेतुरूपादिविशिष्टत्वेनतत्स्फुरणमितिव्यवस्थासंभवति नन्वपरोक्षस्थलेघटादी
नांवृत्तिसंबंधइवपरोक्षस्थलेवह्न्यादीनांवृत्तिसंबंधोस्तिनवानाद्यः तत्रवह्नींद्रियसन्निकर्षाभावेनांतःकरणस्यवहिर्निर्गमनासंभवेनतद्योगात् अन्यथाप्रत्य

अ॰ कौ॰ द्वि॰ प्र॰ ६७

रूपादिभिः ३ पूर्वोक्तः ७॥ संबंधांतरवैयर्थ्येन॥ ४॥ स्फुरणं २॥ अविषयदतीतघटयोः ३

सस्स्थलेप्यंतःकरणस्य बहिर्निर्गमनं विना वृत्तिविषयसंबंधप्रसंगात् न द्वितीयः वह्न्यादिस्फुरणमेव न स्यात् न च तत्र वृत्तिविषययोः संयोगसंबंधाभावेपि संबं-
धांतरेण तत्स्फुरणमस्त्विति वाच्यं संबंधांतरानिरूपणात् तथाहि न तावद्वृत्तिविषययोः स्वरूपसंबंधेन तन् स्वरूपसंबंधस्याप्रामाणिकत्वात् किंच स्वरूप
संबंधाभ्युपगमेनैनैव सर्वत्र विशिष्टव्यवहारोपपत्तौ संबंधांतरं न सिध्येत् किंच ज्ञानस्वरूपं वा विषयस्वरूपं वा उभयं वा संबंधः नाद्यः घटज्ञानदशायां घटप्र
तीत्यापत्तेः न द्वितीयः अंधकारस्थघटस्यापि प्रतीत्यापत्तेः न तृतीयः पूर्वोक्तदोषापरिहारात् अनंतस्वरूपाणां संबंधकत्वकल्पने गौरवाच्च नापि विषय
विषयिभावः संबंधः तयोः संयोगसंबंधमंतरेण तदयोगात् अन्यथातिप्रसंगात् तस्मात्कथं व्यवस्थोपपत्तिरिति मैवं परोक्षस्थले विषयेंद्रियसंनिकर्षाभावे
नांतःकरणबहिर्निर्गमनाभावेन विषयाधिष्ठानचैतन्यस्य प्रमातृचैतन्येनैक्याभावेपि लिंगज्ञानेन वह्न्याद्याकारवृत्तौ सत्यां प्रमातृचैतन्यविषयचैतन्योर्वा
स्तवैक्यस्य विद्यमानत्वाद्वह्न्यादेर्भानमुपपद्यते न चातिप्रसंग इति वाच्यं तत्तदाकारवृत्तेस्तद्विषयभाने नियामकत्वात् अतएव वह्न्यादेः परोक्षत्वेन भानम परो
क्षस्थले त्विंद्रियार्थसन्निकर्षबहिर्निर्गतांतःकरणवृत्त्या विषयस्य संयोगसंभवात् वृत्त्यासावरणाज्ञानस्य निवृत्त्वाच्च विषयप्रमाणप्रमातृसाक्षिचैतन्यानामेकोपा
ध्याक्रांततयैक्यसंभवेन घटादिविषयस्य सुखादिवत्साक्षिण्यध्यस्ततयाऽनावृत्त संविन्नादात्म्याद्घटः स्फुरति घटं साक्षात्करोमीति ज्ञानविषयापरोक्षानुभवात्
परोक्षतया विषयस्फुरणं परोक्षस्थले तु तद्वैपरीत्यात्तल्लिंगज्ञानेन तत्तदाकारवृत्त्याऽसत्त्वापादकमौढ्याज्ञानस्य निवृत्तत्वाद्विषयप्रमाणचैतन्ययोर्भेदाच्च परोक्षत
या वह्न्यादेः सत्तामात्रेण स्फुरणमिति व्यवस्था संभवत्येव तस्मात् षड्विधप्रमयासावरणाज्ञाननिवृत्त्या तद्विषयभानं संभवति तत्त्वमस्यादिवाक्यजन्यापरोक्षप्रमया
ब्रह्मावरकमूलाज्ञाननिवृत्त्या तत्साक्षात्कारः संभवत्येवातः प्रमानिरूपणमर्थवत्तस्माद्दोषेद्धो वृत्तिर्वृत्तीद्धबोधो वा प्रमेति प्रमानिरूपणं सिद्धम्॥ इति श्रीमत्परमहं
सपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीविरचिते तत्त्वानुसंधानव्याख्यानेऽद्वैतचिंताकौस्तुभनाम्नि
द्वितीयः परिच्छेदः॥ २॥ समाप्तश्चायमद्वैतकौस्तुभद्वितीयपरिच्छेदः शुभं भूयाल्लेखकपाठकयोः॥ ॐ॥ ॐ॥

घटज्ञानेनापि पटस्फुरणं स्यात् तयोरपि विषयविषयिभावसंबंधत्वात्॥ १०॥

॥ इदं पुस्तकं काश्यां गोवर्धनदासाभिधेयेन मया हरिहर रत्नाकराख्यस्वीय यन्त्रालयेङ्कितम्॥ सम्वत् १९४८ ॥ ॥
॥ मुंबई याख्यप्रतियायां शोधितं ॥ यह सब पुस्तक काशी मे कुंजगली के पश्चिम फाटक पर गोवर्धन शाहू के दुकान पर है ॥ ॐ ॥



| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ।) | सत्यनारायण ··· | १) | ज्योतिषसार ···· | ८) | देवीभागवत ··· | ५) | जैमिनीन्यायमाला·· |
| १०) | सिद्धान्ततत्त्वबोधीनी· | ३॥) | माघकाव्य ···· | १०) | बालमीकी ···· | २) | ग्रहलाघवउदाहरण ·· |
| ६) | शब्दरत्नमनोरमा· | ५) | दिनकरीरामरुद्री सहित· | ५) | स्वराज्य सिद्धी ·· | ३॥) | अद्वैत कौस्तु ···· |
| ५) | शब्देन्दुसेखर ·· | ८) | वेदान्तपरिभाषा ·· | ।) | वडातिथिपत्र ·· | ॥) | रमनलवरत्न ··· |
| २॥) | बीजगणित् ···· | १२ | भागवत् ····· | १२) | शारिरकभाष्य स· | ऽ | पंचक्रोशीमाहात्म्य |
| २) | चित्तसुकीसटीक· | ६) | हरिवंश ····· | ५) | नीलकंठी सटीक· | ।) | काशीमाहात्म्य ·· |

इत्यद्वैतकौस्तुभस्यद्वितीयपरिच्छेदःसमाप्तः

शान्तस्वरूपोमनुजेन्द्रभूपः शीलादिगेहश्चिदपारदेहः॥ श्यामाभिरामोजनपूर्णकामोरामःप्रभुस्यान्ममनोसधामः॥१॥

अथाद्वैतकौस्तुभस्य तृतीय परिच्छेदप्रारम्भः

भेदोऽभिनेश्चमानादिसंशयोज्ञानसधनम्॥ विध्यभावश्चविद्वत्सुक्रमेणेहनिरूप्यते॥२॥

अ·कौ·
तु·प्र·
६६

ॐ श्रीगणेशायनमः॥ मेयोयः श्रीनमानेनध्येयोयश्च समाहितैः॥ गेयोगन्धर्वैकिंसुभिर्ज्ञानकीशः सपातुमाम्॥१॥ चराचरेति॥ यस्य कृपायास्यावतारश्चराचराणांगोपिकाजुमलार्जुनादीनानिशंसततंसुखायसुखाप्तेभवतीति
सन्तोवदन्तिनंजगतांयोनिमुपादानमाद्यमनन्तंकृष्णंशरणमहंप्रपद्ये प्रपन्नोऽस्मीत्यर्थः॥ १॥ श्रवणादेः॥ ३॥

श्रीगणेशायनमः॥ चराचराणामनिशंसुखाय यस्यावतारोभवतीतिसंतः वदन्तियोनिंजगतामनन्तंतंकृष्णमाद्यंशरणंप्रपद्ये वृत्तिर्द्विविधाप्रमाप्रमाभे
दादित्यत्रप्रमानिरूपितातत्राप्रतिबंधायाः प्रमाया अज्ञाननिवर्तकत्वेन प्रतिबंधतन्निवृत्त्युपायौ निरूपणीयौ तत्रासंभावनादिः प्रतिबंधः तदुक्तं पाराश
रेण भावनाविपरीता यायाचासंभावनाशुक कुरुते प्रतिबंधंसा तत्वज्ञानस्यनापरमिति तन्निवृत्त्युपायः श्रवणादिः श्रोतव्येत्यादिश्रुतेः यद्यप्यस्य ज्ञानसा
धनत्वमवगम्यते तथाप्यप्रमाणत्वेन साक्षात्तदनुपपत्त्या प्रतिबंधा—दिनिवृत्तिद्वारा महावाक्यात्प्रमोत्पन्नावस्योपयोग इति ज्ञानसाधनत्वमुपपद्यते
ततश्च प्रतिबंधस्यासंभावनादेरप्रमायामंतर्भावादवश्यमप्रमानिरूपणीयेत्यतः क्रमप्राप्तामप्रमांनिरूपयति प्रमेति प्रमात्वावच्छिन्नप्रमाभिन्नंज्ञानमप्र
मेतिनिष्कर्षः तेनघटप्रमाभिन्नपटज्ञानेऽतिव्याप्तिर्निरस्ता प्रमात्वंनामानधिगताबाधितार्थविषयज्ञानत्वं घटोघंघटोयमितिधारावाहिकज्ञानस्यलेविरो
धिपटाकारवृत्त्युत्पत्तिपर्यंतं यावद्घटस्फुरणंतावत्तघटाकारवृत्तिरेकैवेतिनाव्याप्तिः नचसर्वज्ञानंधर्मिण्यभ्रांतंप्रकारेतुविपर्यय इतिन्यायेनभ्रमादेर्ध

तत्वज्ञानंप्रतितत्वमस्यादेरेवप्रमाणत्वात्॥४॥

**श्रीगणेशायनमः प्रमाभिन्नंज्ञानमप्रमा साचद्विविधास्मृतिरनुभूतिश्चेति संस्कारमात्रजन्यंज्ञा**
**नंस्मृतिः सापिद्विविधा यथार्थाऽयथार्थभेदात् यथार्थस्मृतिरपिद्विविधा अनात्मस्मृतिरात्मस्मृतिश्चेति॥**

र्म्यंशेप्रमारूपत्वेनप्रमाभिन्नत्वाभावादव्याप्तिरिति वाच्यं धर्म्यंशज्ञानस्यांतःकरणवृत्तिरूपत्वेनभ्रमस्याविद्यावृत्तिरूपस्यतद्भिन्नत्वान्नाव्याप्तिरितिभावः
नांविभजते साचेति स्मृतेर्लक्षणमाह संस्कारेति प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेत्युक्तं तस्याः संस्कारसहितेंद्रियजन्यत्वेन तन्मात्रजन्यत्वाभावान्ना
तिव्याप्तिः संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमित्युक्तं संस्कारस्त्रिविधः वेगोभावनास्थितिस्थापकश्चेति क्रियाजन्यः क्रियाहेतुर्वेगः सचेषुदिनिष्ठोऽनुभव
जन्यस्मृतिहेतुर्भावनासंस्कारः सचांतःकरणनिष्ठः अस्मन्मतेन्यायमतेत्वात्मनिष्ठः अस्मदभिमताहंकारस्यैववैनेयायिकादीनामात्मत्वात् स्थितिस्थापकसं
स्कारोधनुरादिनिष्ठः यद्यपिवेगस्थितिस्थापकयोः क्रियाहेतुत्वमेव तथापि भावनासंस्कारस्य ज्ञानहेतुत्वात्तन्मात्रजन्यंज्ञानंस्मृतिरितिलक्षणमुपपद्यत॥ रामः ६६
॥ इतिभावः॥ ॥ छ ॥

विशेषणेन५॥ निश्चयस्य३॥

स्मृतिंविभजते सापीति यथोद्देशं यथार्थस्मृतिंविभागपूर्वकंनिरूपयति यथार्थेति यथार्थानात्मस्मृतिंनिरूपयति तत्र व्यावहारिकेति तयोर्मध्य इत्यर्थः
पक्षस्यवापक्षसमस्यवा दृष्टांतत्वासंभवेन तत्र व्याप्तिग्रहायोगात् पक्षंविशिनष्टि व्यावहारिकेति अज्ञातसत्ताकत्वंव्यावहारिकत्वं शुक्तिरजतादेः प्रतीयमान
सत्ताकत्वेनप्रातीतिकत्वात् दृष्टांत उपपद्यते ननुवादिप्रतिवादिनोः संप्रतिपत्तिविषयोदृष्टांतोवक्तव्यः प्रतिवादिभिः शुक्तिरजतस्यानंगीकारेणकथंदृष्टांतद
तिचेन्न अन्यथाख्यात्यादीनांपूर्वमेवनिराकृतत्वेन शुक्तिरजतस्यसाधितत्वात् दृष्टांतोपपत्तेः ततश्च तत्रहेतुसाध्ययोर्दृश्यत्वयोर्व्याप्तिग्रहसंभवेन पक्षेपिदृ
श्यत्वहेतुनामिथ्यात्वंसाधयितुंशक्यते व्यावहारिकेतिपक्षोनविशिष्यतेचैत्तेदाशुक्तिरजतस्यप्रपंचांतर्गतत्वेनपक्षकुक्षिनिक्षिप्तत्वादनुपसंहारिहेत्वाभासःस्या
द्दृश्यत्वहेतुरतः पक्षविशेषणमर्थवदितिभावः एवञ्च अनेनानुमानेनप्रपंचस्याकाशादेर्मिथ्यात्वसिद्धौ सत्यांतस्यसिद्धस्यमिथ्यात्वस्यपुनःपुनरनुसंधाने

दृश्यत्वंनामवृत्तिव्याप्यत्वं नचवेदान्तजन्यवृत्तिव्याप्यत्वेनब्रह्मण्यव्यभिचारइतिवाच्यं शुद्धंहिब्रह्मनदृश्यंयत्तदद्रेश्यम्॥ जडत्वञ्चानात्मकत्वम्॥१॥ परिच्छिन्नत्वञ्चत्रिविधंदेशतः कालतोवस्तुतश्चेतितत्राद्यमत्यन्ताभावप्रति
ग्राह्यमितिश्रुतेः॥ किन्तूपहितमेवतत्त्वमिथ्यैवेतिनदोषापत्तिः॥१॥

**तत्रव्यावहारिकप्रपंचोमिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्ति-**
**रूप्यवदित्यनुमानसिद्धमिथ्यात्वानुसंधानं यथार्थानात्मस्मरणम्॥ छ ॥**

योगित्वम् द्वितीयंध्वंसप्रतियोगित्वम्॥ तृतीयमन्योऽन्याभावप्रतियोगित्वमिति तथा चात्यन्ताभावाद्यन्यतमप्रतियोगित्वंपरिच्छिन्नत्वमितिनिष्कर्षः॥१॥

यथार्थानात्मस्मरणं ननुमिथ्यात्वंप्रपंचनिष्ठंनवा आद्येमायामयप्रपंचनिष्ठस्यकथं याथार्थ्यं याथार्थ्यस्यवस्तुधर्मत्वात्प्रपंचस्यावस्तुत्वाभ्युपगमादवस्तुधर्म
स्यमिथ्यात्वस्यावस्तुत्वावश्यंभावेनयाथार्थ्यानुपपत्तेः द्वितीयेपि पक्षेसाध्याभावेनानुमानस्यबाधएवस्यात्तस्मात् मिथ्यात्वानुसंधानं यथार्थानात्मस्मरण
मित्यनुपपन्नमितिचेन्नैषदोषः मिथ्यात्वंप्रपंचनिष्ठमेव नचावस्तुधर्मस्यावस्तुत्वात्तदनुसंधानस्यकथंयाथार्थ्यंज्ञानगतयाथार्थ्यस्यविषयप्रयुक्तत्वादितिवा
च्यं ज्ञानस्ययाथार्थ्यंनाम मानांतराबाध्यत्वं तदपिविषयकृतमेवस्वरूपेणाज्ञानस्यबाधाबाधयोरयोगाद्विषयबाधाबाधाभ्यांज्ञानस्यबाध्यत्वव्यपदेशात् एवं
चप्रपंचस्यमिथ्यात्वंनामाधिष्ठानसत्तातिरिक्तसत्ताशून्यत्वमेव तेनस्यकेनापिप्रमाणेनबाधाभावात् प्रत्यक्षादीनांवाचारंभणंविकारोनामधेयमित्यादिश्रुतिविरो
धेनाप्रमाण्योपपत्तेर्मिथ्यात्वस्याबाधत्वेनयाथार्थ्यात्तदनुसंधानस्यापियाथार्थ्यंसंभवत्येवेत्यनुमानसिद्धमिथ्यात्वानुसंधानं यथार्थानात्मस्मरणमितिसम्यगुपपन्न
मितिभावः॥

मिथ्यात्वस्य२॥

यथार्थात्मस्मरणं दर्शयति तत्वमिति तत्वमस्यादिवाक्यार्थस्त्वंपदलक्ष्यस्य ब्रह्मत्वं तदनुसंधानं यथार्थात्मस्मरणमित्यर्थः यथोद्देशं यथार्थस्मृतिं निरूप्य क्रमप्रा
प्तामयथार्थस्मृतिं विभज्य निरूपयति अयथार्थेति पूर्ववदिति यथार्थस्मृतिवदनात्मस्मृतिरात्मस्मृतिश्चेति द्विधेत्यर्थः अयथार्थानात्मस्मृतिं दर्शयति प्रपंच
स्येति ननु घटः सन् पटः सन्निति प्रत्यक्षेण प्राणा वै सत्यमिति श्रुत्या प्रपंचस्य सत्यत्वावगमात् प्रमाणसिद्धस्य ब्रह्मवद्यथार्थत्वात्कथं तत्स्मरणस्यायथार्थत्वम
न्यथा ब्रह्मानुसंधानस्याप्ययथार्थत्वापत्तेरित्याशंक्याह मिथ्येति प्रपंचस्य वाचारंभणं विकारो नामधेयं सोऽनृताभिसंधोऽनृतेनात्मानमंतर्धाय भेदश्च तस्यान्ना
न कृतो भवेदित्यादिश्रुतिस्मृतिशतैरारंभणाधिकरणन्यायेन ब्रह्मभिन्नस्य मिथ्यात्वस्य निश्चितत्वाद्घटः सन्नित्यादिप्रत्यक्षादेर्बाधेनाधिष्ठानसत्वविषयत्वो
पपत्तेः नच प्राणा वै सत्यमित्यादिश्रुत्येतरश्रुत्यादिबाधः किं न स्यादिति वाच्यं प्राणादीनामुत्पत्तिविनाशश्रवणेन कालत्रयाबाध्यत्वरूपसत्यत्वायोगात् न्या

तदनन्यत्वमारंभणशब्दादिभ्यः इत्यधिकरणसूत्रम् अस्यार्थस्तु तस्मात्कारणाद्ब्रह्मणोऽनन्यत्वमभिन्नत्वं कार्यस्य कुतः आरंभणशब्दादिभ्यः आरंभणशब्दो वाचारंभणमिति आदिशब्देन तदात्म्यमित्यादयः इति ॥२॥

तत्वमस्यादिवाक्यार्थानुसंधानं यथार्थात्मस्मरणं अयथार्थस्मृतिरपि द्विविधा पूर्ववत् प्रपंचस्य सत्यत्वानुसंधानमयथार्थानात्म
स्मरणं मिथ्यावस्तुत्वात्तस्याहंकारादिष्वात्मत्वानुसंधानम् ॥ ॥ २२

कृतघ्नत्वदानादेर्विनाशस्याकृताभ्यागमस्य दोषस्यैव देहानात्मत्वे प्रयोजकत्वादित्यर्थः ॥५॥

यशून्यत्वाच्च प्राणा वै सत्यमित्यादिश्रुतेर्व्यावहारिकसत्यत्वविषयत्वो
पपत्तेस्तयेतरश्रुतिबाधायोगात् प्रत्युत वाचारंभणादिश्रुतेर्न्यायमूल---त्वेन तयैव प्राणसत्यत्वश्रुतेर्बाधः तस्मात्प्रपंचस्य मिथ्यात्वात् सत्यत्वानुसंधानम
यथार्थानात्मस्मरणमिति युक्तमेवोक्तमिति भावः द्वितीयं निरूपयति अहंकारेति अहमिति कृतिः करणं यस्य सोऽहंकारः स आदिर्येषां तेऽहंकारादयस्तेष्वि
तियावत् ननु सर्वेषां परीक्षकाणामहमनुभवविषयस्यैवात्मत्वेनाभिमतत्वात्कथं तस्यात्मानुसंधानमयथार्थात्मस्मरणमिति चेत् शृणु तु भवान् देहाद्यज्ञान
सास्यंतोः सर्वेऽहमनुभवविषयास्तत्र कोऽयमात्मा तत्र न तावद्देह आत्मा उत्पत्तिविनाशवत्वाद्रूपादिमत्वाज्जडत्वाच्च घटवत् न चाप्रयोजकत्वं कृतहानाकृताभ्याग
मदोषप्रसंगात् तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमय इति श्रुतेश्च नापीन्द्रियाणामात्मत्वं करणत्वाद्दात्रादिवत् वनवद्बहुसमुदायत्वाच्च घट
वद्भौतिकत्वाच्च न चाप्रयोजकत्वं करणस्य ज्ञातृत्वायोगात् ॥ ७ ॥ कुठारादिवत् ॥१॥



एकसम्प्रदायिनां सभा ॥ ) करणत्वहेतोः ॥४॥ सांख्यादिभिः ॥ ३॥ अहंकारस्य ॥ वाचस्पतिमिश्रमतानुसारेण ॥४॥ दृश्यत्वायोगात् ६॥ कृतहान्यकृता ॥

नहि वास्यादेः करणस्य ज्ञातृत्वं दृष्टं जानामीत्यात्मनो ज्ञातृत्वस्यानुभवसिद्धत्वात् बहुसमुदायस्यात्मत्वे विरुद्धाभिप्रायतया सद्यः शरीरपातप्रसंगाच्च न
च वरगोष्ठीन्यायेन बहूनामात्मत्वमविरुद्धमिति वाच्यं योऽहं पश्यामि सोऽहं स्पृशामीत्यभेदप्रत्यभिज्ञाविरोधप्रसंगाच्च भौतिकस्यात्मत्वे पूर्वोक्तदोषानपाया
त् अतो नेंद्रियाणामात्मत्वं नापि प्राण आत्मा वायुविकारत्वात् बाह्यवायुवत् तस्माद्वा एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमय इति श्रुतेश्च नापि मन आत्मा
करणत्वादिन्द्रियवत् न च मनसः करणत्वस्य निराकृतत्वात्तस्य तस्यानात्मत्वं कथमिति वाच्यं मिश्रमतानुसारेणान्यायमतानुसारेण वा तदुपपत्तेः अस्य
त्वे तूत्पत्तिविनाशवत्वादिति हेतुर्द्रष्टव्यः तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमय इति श्रुतेश्च नाप्यहंकार आत्मा दृश्यत्वात् घटवत् न चाप्रयो
जकत्वं विपक्षे हेतूच्छित्तेरेव बाधकत्वात् न चेष्टापत्तिरन्यैस्तस्य दृग्रूपत्वानंगीकारात् अस्मन्मते कार्यत्वेन तदयोगात् एतेन बुद्धिचिनयोरात्मत्वं प्रत्युक्तं त
स्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमय इति श्रुतेश्च नाप्यानंदमयशब्दवाच्यमज्ञानमात्मा जडत्वात् ज्ञाननिवर्त्यत्वाच्च अत्रायं पुरुषः स्वयंज्योति
र्भवति अजो नित्यः शाश्वतोऽयं पुराणः आकाशवत्सर्वगतश्च नित्यः क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत नित्यः सर्वगतः स्थाणुरित्यादिश्रुतिस्मृतिभिरात्म
नश्चेतनत्वनित्यत्वावगमात् तद्विपरीत्यानुभवादज्ञानमनात्मैव एतेन शून्यमात्मेति प्रत्युक्तं तस्यापि साक्षिभास्यत्वात् कथं पुनर्देहादीनामहमनुभववि
षयत्वादनात्मत्वमित्युच्यते देहादीनां चिदात्मनश्चान्योन्याध्यासादहमनुभवविषयत्वं मृतदेहे तददर्शनादन्यथान्यत्रापि तत्प्रसंगात् तस्माद्देहंकारादि
ष्वात्मत्वानुसंधानमयथार्थात्मस्मरणमिति निरवद्यं कस्तर्ह्यात्मेति चेदज्ञानतत्कार्याणि सर्वाणि यो निजसत्तया प्रत्यक्षतया भासयति ममाज्ञानं ममाहंका
रो मम बुद्ध्यादिरिति स एवात्मा तस्य स्वप्रकाशचिद्रूपत्वात् स्मरणास्मरणे न संभवतः नहि नित्यस्य स्वप्रकाशानुभवस्यात्मनः स्मरणं वा विस्मरणं भवति
तथा च श्रुतिः त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः साक्षी चेता केवलो निर्गुणश्चेत्याद्या देहाद्यज्ञानांतवि
लक्षणं स्वप्रकाशं चिद्रूपं साक्षिणं दर्शयंति उक्तं च अज्ञानतत्कार्यतदीयभेदान् ध्वंसयंती निजसत्तयैव स्फुर्तं ॥ घटादे ॥४॥

अनुमानेऽप्रयोजकत्वञ्च अव्यभिचरतत्वादिग्राहिकानुकूलतर्कशून्यत्वम् प्रकृते च तन्नास्ति नयाहि दृश्यत्वरूपो हेतुरस्तु आत्मत्वाभावरूपं साध्यञ्च मास्त्वित्येवं विपक्षे कृते आत्मनोऽदृश्यत्वेन हेतूच्छेदप्रसंग एवा
नुकूलतर्कत्वात् नापि हेतूच्छित्तिरिष्टापत्तिर्वीप्सामतान्तरेऽपि तस्य सिद्धत्वादित्याह अन्यैरिति ॥१०॥

अ॰कौ॰
तु॰प्र॰
७१

अयंजीवः कर्ता कुतः स्वर्गकामो यजेतेत्यादिशास्त्रस्यार्थवत्त्वादिति शा॰॥ सू॰॥ ५॥
न शास्त्रधारो यथा कुठारादिव्यापारे हस्तादिकरणक्षेपकर्ता कुठारादिपरित्यागे च करादिमान् पितृद्यापारस्य कर्ता एवमात्मा पिवाद्युकरणक्षेपकर्ता तदभावे स्वरूपेचैतन्येनाकर्ता तुभयथा भवतीति॥ शा॰॥ सू॰॥ ७॥

चविस्मृतं महीन शक्या सुप्यादिषु स्वप्रभया भिसाचिदिति॥ १॥ स चात्मासंगः असंगो ह्ययं पुरुषः असंगो न हि सज्जत इत्यादिश्रुतेः अत एवाकर्तासः तदुक्तं भग
वता प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः यः पश्यति तथात्मानमकर्तारं स पश्यतीति अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोऽपि कौन्तेय न
करोति न लिप्यते यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा
कृत्स्नं प्रकाशयति भारत इति च तस्मादात्मासंगश्चिद्रूपः स्वप्रकाशोऽकर्ता कस्तर्हि कर्तेति चेदहंकार इति वदामः साभासांतःकरणमहंकारः कथं तर्ह्यात्मनोऽहं क
रोमीति कर्तृत्वानुभवः अहंकारचिदात्मनोरितरेतराविवेके नान्योन्याध्यासात् सः तस्मादात्मनि कर्तृत्वाद्यनुसंधानमयथार्थात्मस्मरणमित्याह आत्मनीति नन्वक
र्ता शास्त्रार्थवत्त्वादिति सूत्रकारेणात्मनः कर्तृत्वप्रतिपादनात्तस्मिन् कर्तृत्वानुसंधानस्य कथमयथार्थ्यमिति वाच्यं तत्र सोपाधिकात्मन एव कर्तृत्वप्रतिपाद
न् यथा च तक्षोभयथेत्युत्तराधिकरणे तेनैव शुद्धस्यात्मनः कर्तृत्वापवादादन्यथाऽनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवदित्युत्तरसूत्रविरोधापत्तेः नचात्मनः

आत्मनि कर्तृत्वानुसंधानं वा अयथार्थात्मस्मरणं स्वप्नस्त्वनुभव एव न स्मृतिरिति वक्ष्यते स्मृतिभिन्नं ज्ञानमनुभूतिः सा च द्विविधा-
यथार्थाऽयथार्था चेति यथार्थानुभूतिः प्रमा॥ ((

कर्तृत्वं प्रतिपाद्य पुनस्तदपवादे सूत्रकारस्य किं प्रयोजनं प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं
वरमिति न्यायादिति वाच्यं आत्मनः सोपाधिकं कर्तृत्वमपि नास्तीति वदतः सांख्यस्य निराकरणार्थेन दात्मनोऽस्तीति प्रसाध्य तच्च कर्तृत्वमात्मनः पारमार्थिकमि
वदतो नैयायिकादेर्निराकरणार्थमुत्तरसूत्रे कर्तृत्वमपोद्यते अन्यथा स्ववाक्यविरोधः श्रुतिस्मृतिविरोधश्च प्रसज्येत तस्मादात्मनः कर्तृत्वप्रतिपादनं तदपवा
श्चेति द्वयमर्थवदेव तस्मादात्मनि कर्तृत्वाद्यनुसंधानस्यायथार्थत्वमुपपन्नमेवेति भावः ननु स्वप्नस्याप्ययथार्थस्मृतित्वात्कुतो न ग्रहणमित्यत आह स्वप्नस्त्विति
पश्यामीत्यनुभवादिति भावः न स्मृतिरिति तयोल्लेखाभावादिति भावः स्मृतिनिरूप्यक्रमप्राप्तामनुभूतिं लक्षयति स्मृतीति स्मृतित्वावच्छिन्नं स्मृतिभिन्नं ज्ञानमनु
भवस्त्वत्यर्थः स्मृतावतिव्याप्तिवारणाय स्मृतिभिन्नेत्युक्तं घटादावतिव्याप्तिवारणाय ज्ञानमिति तां विभजते सा चेति प्रथमां व्युत्पादयति यथार्थेति यथा
र्थासावनुभूतिश्चेति कर्मधारयः तस्याः यथार्थत्वं नाम बाधितार्थविषयत्वं तद्रहितत्वं प्रकारकत्वं वा॥ ६॥ ॥ स्वतो भाष्यं तु येयादिन्यादिकाऽनुज्ञासौ रानपित्वेऽशिति परिहारो देहसा

पारमार्थिकानुभवस्य ६॥ ६॰ ज्ञा॰४॥ दण्डत्वप्रकारकतत्त्वावच्छिन्नविशेष्यकविशिष्टज्ञानस्येत्यर्थः॥ ४॥ सविकल्प॥ अनुमित्यादावपि विशिष्टप्रत्यक्षत्वं सामान्याभावविशेषणानि ज्ञानसत्वात्॥

नच निर्विकल्पकज्ञानस्य निष्प्रकारत्वादव्याप्तिरिति वाच्यं अशाब्दनिष्प्रकारकस्य तस्याप्रामाणिकत्वेनानंगीकारात् नन्वभिनवोत्पन्नघटाद्यसविकल्पकस्य
जन्यविशेषणज्ञानजन्यत्वस्य वक्तव्यत्वेन निर्विकल्पकत्वसिद्धिरिति चेन्न विशेषणसन्निकर्षादेव तदुपपत्तेः अन्यथातिप्रसंगाद्धि विशेषणज्ञानस्य विशिष्टज्ञान
त्वेयानाभावाच्च न च दंडीति ज्ञाने विशेषणज्ञानस्य विशिष्टज्ञानत्वावच्छेदेनान्वयव्यतिरेकाभ्यां कारणत्वस्य कॢप्ततयान्यत्रापि तदस्त्विति वाच्यं दंडीति ज्ञान
स्य विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन तत्र विशेषणतावच्छेदकप्रकारकज्ञानस्यैव कारणतयाऽन्वयव्यतिरेकयोरन्यथासिद्धत्वेन विशेषणज्ञानस्य तत्त्वेमा
नाभावात्तस्मादशाब्दनिष्प्रकारकज्ञानमप्रमाणिकमेवेति न क्वाप्यव्याप्तिः न च शाब्दनिष्प्रकारकप्रमायामव्याप्तिरिति वाच्यं अस्य व्यावहारिकप्रमालक्ष
णत्वेन तस्यालक्ष्यत्वादतो यथार्थानुभूतिः प्रमेति निरवद्यं आद्यव्याख्यान सर्वसाधारणं तर्हि सा प्रमा निरूपणीयेत्याकांक्षायामाह सेति द्वितीयपरिच्छेद इति
शेषः द्वितीयायाः लक्षणमाह बाधितेति विषयाभाव प्रमा बाधस्तद्विषयो बाधितः स विषयो यस्याः सा तथा प्रमायामतिव्याप्तिवारणायाद्यविशेषणमय

तद्वति तत्प्रकारकत्व स्यत्र॥
सा निरूपिता बाधितविषयानुभूतिरयथार्था सापि द्विविधा संशयो निश्चयश्चेति एकस्मिन्धर्मिणि भासमानविरुद्धनानाकोटिकज्ञानं संशयः
एकस्मिन् धर्मिणि स्वाकारविरुद्धधर्मद्वयवैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं संशय इति केचित् स च द्विविधः प्रमाणसंशयः प्रमेयसंशय
(( श्चेति॥

थार्थस्मृतावतिव्याप्तिवारणाय द्वितीयं तां विभजते सा चेति संशयं लक्षयति एकस्मिन्निति एकैकस्मिन् धर्मिणीत्यर्थः अन्यथैते आम्रावा
पनसा वेति समूहालंबनसंशये व्याप्तिः स्यान्न स्याणुपुरुषविति समूहालंबनभ्रमेऽतिव्याप्तिवारणाय भासमानेत्युक्तं समूहालंबनप्रमायामतिव्याप्तिवारणा
य विरुद्धेति उक्तं न नूक्तलक्षणं संशयस्य धर्म्यंशे प्रमायामतिव्याप्तिरित्याशंक्य मतांतरेण लक्षणमाहे केति एकैकस्मिन् विशेष्ये स्वस्य संशयत्वेनाभिमतस्य
यो यमाकारः स्थाणुत्वादिस्तद्विरुद्धो यो यमाकारः पुरुषत्वादिस्तदुभयवैशिष्ट्यावगाहि यद्ज्ञानं स्थाणुर्वा पुरुषो वेत्यादि विरुद्धं ज्ञानं संशय इत्यर्थः अस्मि
न् पक्षे एककोटिकज्ञानमपि क्वचित्संशयाभिमतं केचिन्नृसिंहाश्रमश्रीचरणाः संशयं विभजते स चेति प्रमाणसंशयं व्युत्पादयति तत्रेति नयोर्मध्ये इत्यर्थः

अयं स्थाणुर्वा पुरुषो वा इत्यत्र स्थाणुः पुरो वर्तीं धर्मी पुरोवर्तिप रुषो वाधर्मी तत्र ज्ञाने भेदविवक्षया ऽतिव्याप्तिः॥ ३॥
प्रमाणसंशयो द्विविधः प्रमाणसंशयः करणसंशयश्च॥
भ्रमे स्थाणौ पुरुषत्वभासने पुरुषे स्थाणुत्वं इति द्वयोर्धर्मिणोरेकैकस्मिन्धर्मिणि भासमानत्वाभावादतो नातिव्याप्तिः॥ ४॥ संशयगोचरत्वेन ३॥
धर्म्यंशस्य २॥

प्रथमः६॥ यावत्स्वाश्रयावयवाद्वृत्तित्वंप्रमात्वस्यज्ञानेरस्लिकुतः इदंरजतमित्यत्रेदमंशेप्रमात्ववर्तते तत्रप्रमायांप्रमात्वंनास्तिसांकर्यादित्यतोहेतोः॥१॥ १॥ १॥

तत्राद्यमाह यथेति प्रमाणसंशयः कस्मान्निवर्तत इत्याशंक्याह सचेति ननु प्रमाणस्यभावः प्रामाण्यं तदत्र परमात्वमेव किं जातिरुपाधिर्वा नाद्यः अव्याप्य
वृत्तित्वात् नद्वितीयस्तस्यानिर्वचनादित्याशंक्य प्रामाण्यलक्षणं वक्तुं प्रामाण्यं परतो गृह्यत इति नैयायिकाः स्वतो गृह्यत इति मीमांसकास्तत्र परमतं दूषयि
तुं स्वमतमाह प्रामाण्येति एवाकारेण प्रामाण्यस्य परतो गृह्यत्वं प्रतिषिध्यते तल्लक्षणमाह प्रामाण्यं नामेति प्रामाण्यनिश्चयस्तु स्वत एवेत्युक्तं तत्र प्रामा
ण्यस्वरूपं निरूप्य स्वतस्त्वं निर्वक्ति तस्येति प्रामाण्यस्येत्यर्थः स्वशब्देन प्रामाण्यमुच्यते तस्याश्रयो ज्ञानं तद्ग्राहिका यावती सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्य
क्षरयोजना अत्र भाट्टा एवं योजयंति प्रथमम् अयं घट इति ज्ञानं जायते ऽनंतरं मया घटो ज्ञात इति घटस्य ज्ञातत्वं प्रतिसंधीयते तया ज्ञाततया ज्ञानमनुमीयते तथा
हि घटो ज्ञानविषयः ज्ञाततावत्त्वात् सुखवदित्यनेन प्रकारेण ज्ञाततालिंगकानुमित्या घटज्ञानं तन्निष्ठं घटत्ववति घटत्वप्रकारकं प्रामाण्यं च गृह्यते तत
श्च स्वाश्रयस्य घटज्ञानस्य ग्राहिका यावती सामग्री ज्ञाततालिंगकानुमितिरूपा तद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमिति तच्चिंत्यं ज्ञानविषयतातिरिक्तज्ञातता

ज्ञाने२॥ विनाबीजंस्वयमेववदति१॥

**तत्र प्रमाणगतासंभावना प्रमाणसंशयः यथा ऽनभ्यासदशायां मामोत्पन्नं जलज्ञानं प्रमाणं न वेति संशयः स च प्रामाण्यनिश्चयान्नि
वर्तते प्रामाण्यनिश्चयस्तु स्वत एव प्रामाण्यं नाम तद्वति तत्प्रकारकत्वं तस्य स्वतस्त्वं नाम यावत्स्वाश्रयग्राहकग्राह्यत्वं॥ २॥** यां प्रमाणाभावात्।

ज्ञातो घट इति प्रतीतेर्ज्ञानविषयत्वेनाप्युपपत्तेः अन्यथा दृष्टो घटो ध्वस्तो घट इति प्रतीत्या दृष्टत्वादिकमपि सिध्येत किंचातीतो ज्ञात इत्यनुसंधानेन तत्रापि ज्ञातता
सिध्येत् न चेष्टापत्तिः निराश्रयधर्मासंभवात् किंच ज्ञाततया अपि ज्ञानविषयतया तत्रापि ज्ञाततास्वीकारे तथा नवस्थाप्रसंगस्तस्माद् ज्ञाततया अप्रामाणिकत्वा
त्तल्लिंगकानुमित्या ज्ञानं प्रामाण्यं च गृह्यत इत्यसंगतमेतदिति मन्यमानाः प्राभाकरास्तु एवं वर्णयंति घटमहं जानामीत्येवंरूपं ज्ञानं घटं कर्मतया भासयति आ
त्मानमाश्रयत्वेन स्वं स्वप्रकाशत्वेन तत्तश्च स्वाश्रयज्ञानस्य ग्राहिका यावती सामग्री स्वप्रकाशज्ञानरूपा तया स्वनिष्ठप्रामाण्यं गृह्यत इति प्रामाण्यस्य स्वतस्त्वं त
दपि न जन्यज्ञानस्य स्वप्रकाशत्वे मानाभावात् अन्यज्ञानेनान्यग्रहणे ऽतिप्रसंगात् तदिदमप्यसंगतमिति मन्यमाना मुरारिमिश्रा एवं योजयंति घटेंद्रियसन्निक
र्षानंतरमयं घट इति ज्ञानं जायते पश्चाद् घटमहं जानामीत्यनुव्यवसायेन व्यवसायज्ञानं गृह्यते विषयविशेषज्ञानं व्यवसायः विशेषविशिष्टज्ञानमनुव्यवसायः

प्रमाणस्य२॥

ऽनुव्य॰ प्रमा॰२॥ अहंसुखित्यादिः७॥ स्वामि२ व्यवसायेन१॥ प्रमाणस्य१॥ अहंकारेदृश्यत्वबलात्५॥ व्यवसायस्य२ अनुव्यवसायस्य२॥ भवन्मतेजातेरेनैमीकोऽपि भवन्मते४॥ साक्षिणस्ताप्यच४॥ ऽव्यकेदृकानिर्वचनात्६॥

यावती सामग्री अनुव्यवसायादिरूपा तया व्यवसायनिष्ठं प्रामाण्यं गृह्यते तेन तस्य पूर्वमुपस्थितत्वादिदमेव प्रामाण्यस्य स्वतस्त्वमिति तन्नुक्तं अनुव्यवसायस्य प्रा
गेव निरस्तत्वात्तेन तद्ग्रहणायोगात् मनसः प्रामाण्यस्य निराकृतत्वेनात्मनः संयोगासंभवस्योक्तत्वाच्च ज्ञानस्य मानसप्रत्यक्षत्वायोगात्तस्मादिदमप्यसंगतमित्यभि
प्रेत्य स्वपक्षे स्वतस्त्वलक्षणं योजयति स्वाश्रयेति तत्तश्च स्वाश्रयस्य ग्राहिका यावती सामग्री साक्षीरूपा तद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमित्याह इति स्वतः प्रा
माण्यमिति नन्वेवं भवतामपि साक्षिणि किं प्रमाणं न तावत्प्रत्यक्षं रूपादिहीनत्वेन चक्षुराद्यगोचरत्वात् मनसो ऽनिंद्रियत्वेनाप्रमाणत्वाच्च नाप्यनुमानं तद्व्या
प्यलिंगाभावात् न चाहंकारोऽनात्मा दृश्यत्वाद् घटवदित्यनुमानेन पक्षधर्मताबलात् साक्षिसिद्धिरिति वाच्यं पक्षतावच्छेदकानिर्वचनेनानुमानावतारात् अ
त एवाहंकारः स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात् संमतवदिति परास्तं नाप्युपमानं तस्य निपतविषयत्वान्नाप्यागमः तस्यार्थान्तरपरत्वान्नाप्यर्थापत्तिस्तेन विना
तदनुपपत्तेरभावात् न च सुखादिव्यवहारः स्वगोचरज्ञानं विना ऽनुपपन्नः संस्तत्कल्पयति तच्च साक्षिचैतन्यमेवेत्यर्थापत्त्या तत्सिद्धिरिति वाच्यं सुखादि

अहंकारेदृश्यत्वात्१॥ ज्ञानअहंकारस्यस्वज्ञान गुणेन दृश्यत्वाप नेः१॥ नियमेनसादृश्यविषयत्वात्२॥ साक्षिचेतनादृश्यादिः२॥ ज्ञानादिगुणपरत्वात्२॥ साक्षिणा२

**स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिचैतन्यं तेन तन्निष्ठं प्रामाण्यं गृह्यत इति स्वतः प्रामाण्यम्॥ छ॥**

व्यवहारस्यात्मसमवेतसुखादिविषयज्ञानेनोपपन्नत्वेनार्थापत्तेरन्यथोपपत्तेः तस्मात्प्रमाणाभावस्य तवापि तुल्यत्वात्कथं प्रामाण्यस्य साक्षिग्राह्यत्वं स्व
तस्त्वेत्यतः प्रामाण्यस्य परतस्त्वमभ्युपगंतव्यम् परतस्त्वं नाम यावत्स्वाश्रयग्राहकातिरिक्तग्राह्यत्वं तथाहि प्रामाण्याश्रयव्यवसायज्ञानमनुव्यवसाये
न गृह्यते प्रामाण्यं त्वनुमानेन गृह्यते तथाहि विवादगोचरापन्नं व्यवसायज्ञानं प्रमाणं भवितुमर्हति समर्थप्रवृत्तिजनकत्वाद्व्यतिरेकेणाप्रमाणज्ञानव
दिति अथवा प्रथमानुव्यवसायेन व्यवसायो गृह्यते द्वितीयानुव्यवसायेन तन्निष्ठं प्रामाण्यमन्यथा प्रथमोत्पन्नं जलज्ञानं प्रमाणमप्रमाणं वेति संशयो न स्या
दनभ्यासदशायां तस्मात्परत एव प्रामाण्यग्रह इत्यत्रोच्यते साक्षी चेता केवलो निर्गुणश्चेति वाचः साक्षी मनसः साक्षी एतद्यो वेत्ति तं प्राहुः सेत्रज्ञमिति तद्दिव्यज्यो
तिषामपि तज्ज्योतिस्तमसः परमुच्यत इत्यादिश्रुतिस्मृतिशतेभ्यो ज्ञानतत्कार्याद्यवभासकः साक्षी चिदात्मावश्यमभ्युपगंतव्यो ऽन्यथा दाहतश्रुतिस्मृतीनामप्रा
माण्यप्रसंगात् न च तासामर्थान्तरपरत्वमिति वाच्यं उपक्रमादिलिंगैस्तत्रैव तात्पर्यस्य निश्चितत्वेन तदयोगात् तथानुमानादपि तत्सिद्धिः तथाहि अंतःकरण

प्रवृत्त्यनंतरमिदंजलज्ञानंप्रमाणमितिद्वितीयानु४॥ व्यवसाय४॥ ऽर्थान्तरपरत्व१॥ शुक्तिरजतज्ञानवत्५॥

साक्षिसिद्धत्वेन १॥ भवन्मते आत्ममनसोः ३॥

तद्धर्मातिरिक्तः अहमनुभवगोचरोहमनुभवे प्रकाशमानो वा स्वव्यतिरिक्तद्रष्टृकः दृश्यत्वात् घटवत् ॥ नचाप्रयोजकत्वं निरुपाधिकत्वसहचारभंगप्रसंगात् एवं सुखादिव्यवहारस्य स्वगोचरज्ञानं विनानुपपत्त्या साक्षिसिद्धिः नचात्मसमवेतेन सुखादिविषयज्ञानेन तद्व्यवहार इति वाच्यं जन्यज्ञानस्यात्मसमवेतत्वासिद्धेः अन्यथा ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुतिविरोधप्रसंगात् जीवात्मसमवेतस्य नित्यज्ञानस्य त्वयानंगीकाराच्च किंचात्मनः संयोगस्य संबंधिनो निरवयवत्वाविनिराकृतत्वेनात्मनि ज्ञानोत्पत्तेरसंभवेन ज्ञानस्यात्मसमवेतत्वासिद्धेश्च तस्मादनन्यथासिद्धश्रुतिस्मृत्यनुमानार्थापत्तिस्वानुभवैः साक्षिसिद्धिरिति तेन प्रामाण्यं गृह्यत इति स्वतस्त्वं प्रामाण्यस्य संभवतीत्येतेन प्रामाण्यस्य परतोग्राह्यत्वं प्रत्युक्तं अनुव्यवसायस्य प्रागेव निरस्ततया तेन ज्ञानं गृह्यत इति दूरत एव द्वितीयानुव्यवसायेन प्रामाण्यग्रहो दूरतरः किंच निश्चितप्रामाण्येनानुव्यवसायेन प्रामाण्यं गृह्यत आहोस्विदनिश्चितेन वा नाद्यः ऽनवस्थापत्तेः तथाहि अनुव्यवसायस्य स्वतःप्रामाण्यनिश्चये ऽपसिद्धान्तापत्तेः अन्येन चेत्तस्याप्यन्येन तस्याप्यन्येनेत्यनवस्थापत्तेन च विषयान्तरासंचारादनवस्थोपरम इति वाच्यं तर्ह्यनिश्चितप्रामाण्येनानुव्यवसायेन प्रामाण्यग्रह इत्यायातं तत्राद्यानुव्यवसायेनैव प्रामाण्यग्रहोस्तु किं तेनापराद्धं नन्वेवं ज्ञानग्राहकेणानुव्यवसायेनैव व्यवसायप्रामाण्यनिश्चये इदं ज्ञानं प्रमाणं न वेति संशयो न स्यादिति चेन्न दोषवशेन तदुपपत्तेः न च निश्चितेर्थे दोषवशेन कथं संशय इति वाच्यं दोषघटितसामग्र्यास्तादृशस्वभावत्वात् अन्यथा प्राच्यां प्रतीचित्वभ्रमसंशयान्यतरानंतरं सूर्योदयादिना यं प्राचीति निश्चयानंतरं पुनः संशयाद्यभावप्रसंगात् न चेष्टापत्तिस्तयोरनुभवसिद्धत्वात्तस्मात् प्रामाण्यशंकाशून्येनाद्येनैवानुव्यवसायेन प्रमाण्यनिश्चयः अन्यथा सर्वत्रानाश्वासप्रसंगात् एतेन द्वितीयो विकल्पः परास्तः अनिश्चितस्य तद्ग्राहकत्वायोगात् अप्रामाण्यशंकाशून्यस्यैव ज्ञानस्य विषयनिश्चायकत्वाच्च अत एवानुमानेन प्रमाण्यं गृह्यत इत्यपास्तमुक्तदोषसत्त्वात् नन्वस्तु तर्ह्याद्येनैवानुव्यवसायेन प्रामाण्यग्रहः न तत्संभवस्योक्तत्वात् तस्मात्साक्षिणैव वृत्तिज्ञाननिष्ठं प्रामाण्यं गृह्यत इति निरवद्यमतस्स्वत एव प्रमाण्य निश्चय इति सिद्धम् ॥ छ ॥ छ ॥

ऽनुव्य॰ २॥ स्वतःप्रामाण्यत्वानंगीकारात् ७॥ अनिश्चितप्रामाण्येनानुमानेन प्रामाण्यं गृह्यते ऽनिश्चितेनेवे ऽन्येन चेदिति ३॥ यस्तेन द्वितीयानुव्य॰ ९॥ संशय ६॥ निपूर्वोक्तदोषसत्त्वात् २॥ २ ॥



नन्वेवं सत्यप्रामाण्यमपि स्वत एव गृह्यतामुक्तन्यायस्य तत्रापि तुल्यत्वादित्याशंक्याह अप्रामाण्यमिति किं तदप्रामाण्यमित्यत आह तच्चेति अस्ति च शुक्त्यादाविदं रजतमिति ज्ञाने रजताभाववति रजतप्रकारकत्वं वस्तुतो रजतस्य तत्राभावात् न च भूतले घट इति प्रमायामतिव्याप्तिरिति वाच्यं भूतलघटयोः कचैतन्याध्यस्तत्वेन तद्वृत्तितत्प्रकारकतया तत्प्रमायां तदभावाच्छुक्तौ तु तत्समानसत्ताकतया रजतस्य तत्रासत्त्वेन प्रातीतिकरजतसत्त्वेपि नाव्याप्तिर्न त्वासंभव इत्यर्थः वृत्तीति नेदं रजतं किंतु शुक्तिरिति बाधात्मकाधिष्ठानतत्त्वसाक्षात्कारवृत्त्या तदभाववत्त्वस्यानुपस्थितत्वेन तत्साक्षिणा गृहीतुं न शक्यते ऽन्यथाति प्रसंगात् तस्मादप्रामाण्यं परत एव गृह्यते ज्ञानग्राहिकातिरिक्तसामग्र्येत्यर्थः तथाहि ज्ञानानंतरं प्रवृत्तिर्द्विधा संवादिप्रवृत्तिर्विसंवादिप्रवृत्तिश्चेति आद्याफलपर्यंता द्वितीया तच्छून्या तत्र विसंवादिप्रवृत्त्या ऽप्रमाण्यं ज्ञानस्यानुमीयते तथाहि विवादास्पदं शुक्तौ रजतज्ञानमप्रमाणं भवितुमर्हति विसंवादिप्रवृत्तिजनकत्वाद्व्यतिरेकेण प्रमावदिति ज्ञानग्राहकातिरिक्तेनानुमानेन ज्ञानस्याप्रामाण्यं निश्चीयते ज्ञानं तु साक्षिणा गृह्यते ऽप्रमाण्यं पुनरनुमानेन

वृत्त्या घटग्रहे साक्षी परं गृह्णीयादिति ३॥ तदभाववतितत्प्रकारकत्वाभावात् ५॥ भ्रमकाले एवं भूतवृत्तेरुदयासंभवात् ४॥

अप्रमाण्यं तु परतो गृह्यते तच्च तदभाववति तत्प्रकारकत्वं तदभाववत्त्वस्य वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यतया परत एवाप्रामाण्यं गृह्यते ॥ छ ॥

प्रमायां प्रमात्वे १॥ चक्षुःधर्मादीनादि १॥

तस्मात्परत एवाप्रामाण्यं गृह्यत इति भावः एवं प्रमात्वं स्वत एवोत्पद्यते च स्वतस्त्वं नामोत्पत्तौ ज्ञानसामान्यसामग्रीमात्रप्रयोज्यत्वं न चाप्रमायामतिव्याप्तिस्तस्यास्तदतिरिक्तदोषजन्यत्वात् न च प्रमायामपि दोषाभावजन्यतया परतस्त्वापत्तिरिति वाच्यं परमते गुणजन्यत्वस्यैवोत्पत्तौ परतस्त्वेन विवक्षितत्वात् तस्यास्माभिरनंगीकारात् प्रमामात्रे ऽनुगतगुणस्यासंभवेन तस्याप्रामाणिकतया च प्रमायास्तज्जन्यत्वानुपपत्तेः किंच दोषाभावस्यापि न प्रमाहेतुत्वमभावमात्रस्याकारणत्वप्रतिषेधात् किंतु दोषाभावस्य परमतेदंडत्वादिवदनुकूलमात्रत्वं अपि च दोषस्यान्वयव्यतिरेकाभ्यां प्रमोत्पत्तिप्रतिबंधकत्वेन तदभावस्य कारणत्वेन संभवत्येव प्रतिबंधकाभावस्य कार्योत्पादकस्याग्रिमसमयसंबंधविघटकतयान्यथासिद्धत्वात्तस्मात्स्वत एव ज्ञानसामान्यसामग्रीमात्रात्प्रमोत्पद्यत इति सिद्धं अप्रमा तु परत एवोत्पद्यते ज्ञानसामान्यसामग्र्यतिरिक्तस्य दोषस्यान्वयव्यतिरेकाभ्यामप्रमाप्रतिकारणत्वावधारणाच्च तस्मादुत्पत्तावपि परत एवाप्रामाण्यमिति सिद्धं

पूर्वेसरा २॥ कारणतावच्छेदकं अनुकूलं ३॥

ज्ञाने १॥ वक्रकोटरादिकरचरणादिः ६॥

ननुप्रमाण्यस्योत्पत्तौज्ञप्तौचस्वतस्त्वांगीकारेऽनभ्यासदशायामिदंजलज्ञानंप्रमाणमप्रमाणंवेतिसंशयःकथंस्यान्निश्चितेऽर्थेसंशयायोगादत आह प्रामाण्येति ज्ञानग्राहकग्राह्यत्वपक्षइत्यर्थः दोषेतिदोषघटितसामग्र्याः बलवत्वात्प्रामाण्यसंशयउपपद्यतेइत्यर्थः एवमुत्पत्तौज्ञप्तौचप्रामाण्यस्यस्वतस्त्वस्यनिश्चितत्वात्प्रामाण्यनिश्चयेनसंशयनिवृत्तिरुत्पद्यतइत्यभिप्रेत्योक्तप्रामाण्यसंशयमुपसंहरति इतीति इदानींकरणसंशयंनिरूपयति वेदांतेति साकस्मान्निवर्त्ततेइत्यपेक्षायामाह साचेति तर्हिश्रवणंनिरूप्यतामित्याकांक्षायामाह तच्चेति द्वितीयपरिच्छेदेतात्पर्यनिरूपणावसरेइतिशेषः तच्चश्रवणंकुतोनिष्पद्यतेइत्याशंक्याह शारीरकइति प्रमाणगतासंभावनांद्विप्रकारांनिरूप्यप्रमेयगतासंभावनांनिरूपयितुंविभजते प्रमेयेति केयमनात्मगतासंभावनेत्याकांक्षायामाह स्थाणुर्वेति अयंसाधारणधर्मदर्शनजोविशेषदर्शनेननिवर्त्तते इतिद्रष्टव्यं विप्रतिपत्तिजन्यात्मसंशयोऽनेकप्रकारइत्याह आत्मेति

प्रामाण्यस्वतस्त्वपक्षेसंशयो दोषवशादुपपद्यते इत्ययंप्रमाणसंशयः वेदांताऽद्वितीयेब्रह्मणिप्रमाणंनवेतिसंशयःकरणगता संभावना साचश्रवणेननिवर्त्तते तच्चनिरूपितं तदपिश्रवणंशारीरकप्रथमाध्यायपठनेननिष्पद्यते प्रमेयगतासंभावनाद्विविधा अनात्मगतात्मगताचेति स्थाणुर्वापुरुषोवेत्यनात्मसंशयः आत्मसंशयोऽनेकविधः तथाहि॥

विरुद्धार्थप्रतिपादकानेकवचनंविप्रतिपत्तिः साभाष्यकारेणनिरूपिता देहमात्रंचैतन्यविशिष्टमात्मेतिप्राकृतालोकायतिकाश्चप्रतिपन्नाः इन्द्रियाण्यात्मेत्यपरे मनआत्मेत्यन्ये क्षणिकंविज्ञानमात्मेत्यपरे शून्यमात्मेत्यपरे देहेन्द्रियादिव्यतिरिक्तः संसारीकर्त्ताभोक्तेत्यन्ये आत्मातुकेवलभोक्तानतुकर्त्तेत्येके तदन्यःसर्वज्ञःसर्वशक्तिरीश्वरइतिकेचित् आत्मातुभोक्तासइत्येके एवंबहवोविप्रतिपन्ना इत्येवंविप्रतिपत्तिवशाज्जायमानमनेकप्रकारमात्मसंशयंदर्शयति तथाहीत्यादीति सलिलएकोद्रष्टाऽद्वैतइत्यादिश्रुत्याऽद्वैतात्मावगम्यते सचोपाधिभेदाद्द्विविधा परमात्माजीवात्माचेति तत्रमायोपाधिकः परमात्मा स्थूलसूक्ष्मकारणशरीरोपाधिकोजीवात्मा सएवकर्त्ताभोक्ता च उपाधिविवेके नद्वयंकिंतुशुद्धोऽद्वैतोभवति तदुक्तं जीवात्मापरमात्माचेत्यात्माद्विविधईरितः चित्तादात्म्यात्त्रिभिर्देहैर्जीवःसन्भोक्ततांव्रजेत्॥१॥ परमात्मा सच्चिदानंदस्तादात्म्यंनामरूपयोः॥ गत्वाभोग्यत्वमापन्नस्तद्विवेकेतुनोभयं॥२॥ एवंचपूर्वोक्तः परमात्मा तत्पदार्थः जीवस्त्वंपदार्थः ततस्तत्पदार्थस्यपरमात्मनः

सलिलंजलंतद्वदभिन्नइत्यर्थः॥४॥

---

आदिशब्देनज्ञानगुणकंवाज्ञानस्वरूपंवासनाजातिमद्वासनास्वरूपंवासगुणंवानिर्गुणंवेत्यादिसंशयागृह्यंते त्वंपदार्थेसंशयमनेकप्रकारंदर्शयन्नात्मेति आदिशब्देनेंद्रियादयोगृह्यंते अत्राप्यादिशब्देनपरिणामीवाकूटस्थोवासत्ताजातिमान्वासद्रूपोवेत्यादिसंशयागृह्यंते एवंपदार्थसंशयंप्रदर्श्यवाक्यार्थसंशयमाह जीवस्येति इदानींमोक्षसाधनेसंशयंदर्शयति ऐक्येपीति ऐक्यगतेति ऐक्यगतस्तज्ज्ञानगतःसंशयः अयंसंशयःकस्मान्निवर्तते इत्यत आह अयमिति ननुकोयंतर्कः येनसर्वोपिसंशयोनिवर्त्तते तत्राह तर्कोनामेति प्रसंजयतीतिप्रसंगः अनिष्टप्रसंजक इत्यर्थः तमेवविवृणोति व्याप्येति व्यापकेति व्यापकप्रसंजनमित्यर्थः ननुकिंतद्व्याप्यंकिंतद्व्यापकमित्याकांक्षायां तदुभयंव्युत्पादयति व्याप्तीति व्याप्तिंनिरूपयति ज्ञापयतीतिव्याप्तिनिरूपकं व्याप्तिप्रतियोगीत्यर्थः व्याप्तिः पूर्वमेवनिरू

ब्रह्माद्वितीयंसद्वितीयंवा अद्वितीयत्वेपि आनंदगुणकंवानंदस्वरूपंवेत्यादिपरमात्मगतःसंशयः आत्मादेहाद्यतिरिक्तोनवादेहाद्यतिरिक्तत्वेपिकर्त्तावाऽकर्त्तावा अकर्तृत्वेपि चिद्रूपोवाऽचिद्रूपोवा चिद्रूपत्वेपि आनंदात्मकोनवेत्यादिजीवगतः संशयः जीवस्यसच्चिदानंदरूपत्वेपि। परमात्मनासहैक्यंसंभवतिनवा ऐक्येपितज्ज्ञानंमोक्षसाधनंनवा मोक्षसाधनत्वेपितज्ज्ञानंकर्मसमुच्चितंमोक्षसाधनंवाकेवलज्ञानंवेत्यैक्यगतसंशयः अयंसर्वोपि संशयोमननेनतर्कात्मकेननिवर्त्तते तर्कोनामानिष्टप्रसंगः व्याप्यारोपेणव्यापकापादानमितियावत् व्याप्तआश्रयो। व्याप्यंव्याप्तिनिरूपकंव्यापकं तथाचयदिप्रपंचःसत्यःस्यात्तर्हि अद्वितीयश्रुतिविरोधःस्यात्॥

पिताइतिभावः एवंतर्कंनिरूप्यबहूंस्तर्कांस्तत्संशयनिवर्त्तकानुदाहरति तथाचेतिप्रपंचस्यसत्यत्वेजडाजडयोरैक्यायोगात्परमात्मनोऽद्वितीयत्वसाधकंतर्कमुदाहरति यदीति नचभेदश्रुतिविरोधादद्वितीयाश्रुतेरन्यपरतयाननद्विरोधइतिवाच्यं फलवत्यज्ञातेर्थेश्रुतेस्तात्पर्यनियमादद्वैतस्याज्ञातत्वेनतज्ज्ञानान्निरतिशयपुरुषार्थसंभवेनचाद्वैतेश्रुतितात्पर्येस्ययुक्तत्वात्नतच्छ्रुतेरन्यपरत्वंभेदस्यमानांतरसिद्धत्वेनतत्प्रतिपादकश्रुतेरनुवादकतयाऽप्रामाण्यप्रसंगात् उदरमंतरंकुरुतेऽथतस्यभयंभवतीतिभेददर्शिनोऽनर्थश्रवणात् अथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशुरितिभेदस्यनिंदितत्वाच्चश्रुतेस्तत्रतात्पर्यंनसंभवत्येवातोद्वैतश्रुतेरनन्यपरत्वेनदुर्बलत्वाद्द्वैतश्रुतेस्तत्परत्वेनबलवत्वाद्बलवद्विरोधोऽनुपपन्नः इतिप्रपंचस्यसत्यतानुपपन्ना एवंचब्रह्मणःपारमार्थिकमद्वितीयत्वमनेनतर्केणसिद्ध्यति

उद्यपर्थे अरमीषदर्थेच ३॥

नसोऽर्थोयेषांतेऽनर्थास्तेषांवाक्यानामनर्थकत्वमित्यर्थः॥२॥ श्रुति ३॥ ईश्वरः ३ परमात्मा ५॥

अ·कौ जीवपरमात्मैक्यसंशयनिवर्तकंतर्कमुदाहरति यदिपरमात्मेतिनचपरमात्मैववनास्तियस्यानित्यत्वमापद्येतेतिवाच्यं श्रुतिस्मृतीतिहासपुराणेस्तस्यावश्यमभ्युपे
न·प्र यत्वात् नन्वाम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानामितिजैमिनिनोक्तत्वस्यवेदस्यविधिनिष्ठतयाप्रामाण्यस्यप्रतिपादितत्वादीश्वरप्रतिपादकश्रुतीनांत
७५ द्विरुद्धतयास्वार्थेप्रामाण्यायोगात्कथंतद्बलेनतदभ्युपगमः नचेश्वरप्रतिपादकश्रुतेरध्ययनविधिपरिगृहीतत्वेनकथमप्रमाण्यमितिवाच्यंकर्त्रादिस्तावकत
याविध्यपेक्षितदेवतादिप्रकाशनपरत्वेनवाविधिपरत्वेनप्रामाण्योपपत्तेः नचभिन्नप्रकरणनिष्ठानांकथंकर्मविधिपरत्वमितिवाच्यं तर्ह्युपासनाविधिपर॥
त्वोपपत्तेः नचोपासनाविधिशेषत्वेनपरमात्मनः सिद्धत्वात्कथंतदभावइति वाच्यं असावादित्योदेवमधुः इत्यादिनाऽऽदित्येमधुत्वोपासनवज्जीवे अविद्य
मानमारोप्योपासनोपपत्तेः परमात्मप्रतिपादकश्रुतीनां तत्प्रतिपादनेप्रवृत्तिनिवृत्त्योरसंभवेननत्रसंगतिग्रहायोगात्परमात्मनःसिद्धवस्तुत्वेनापरिच्छिन्न
तयाहेयोपादेयशून्यतयाचतत्प्रतिपादनफलाभावाच्चतस्मादेदमात्रस्यविधिपरत्वेनप्रामाण्यमभ्युपगंतव्यंतस्मात्कथंश्रुत्यादिभिःपरमात्माभ्युपगमोऽतो

यदिपरमात्माजीवभिन्नःस्यात्तर्हिघटादिवदनात्मत्वेनानित्यएवस्यात्॥ ६ ॥

ॐकारः ३

निर्विषयोयंतर्कइति अत्रोच्यतेपरमात्मावश्यमभ्युपगंतव्यः नचतत्रप्रमाणाभावः श्रुतिस्मृतीतिहासपुराणानांसत्वात् तथाहि सदेवसौम्येदमग्र आसीदेकमेवा
द्वितीयंसत्यंज्ञानमनंतंब्रह्म विज्ञानमानंदंब्रह्म यः सर्वज्ञः ससर्वविद्यस्यज्ञानमयंतपः एषसर्वेश्वरएषसर्वज्ञएषोंतर्यामी यः पृथिव्यांतिष्ठन् पृथिव्या अंतरोयंपृथि
वीनवेदयस्यपृथिवीशरीरं यः पृथिवीमंतरोयमयत्येतआत्मांतर्याम्यमृतः ब्रह्मवाइदमग्रआसीत् आत्मावाइदमेकएवाग्रआसीत् यद्वेदादौस्वरःप्रोक्तोवेदांतेच
प्रतिष्ठितः तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः१ नारायणःपरंब्रह्मतत्वंनारायणःपरंनारायणःपरंज्योतिरात्मानारायणःपरं॥२॥ ऋतं
सत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं ऊर्द्ध्वरेतंविरूपाक्षंविश्वरूपायवैनमः३ तमीश्वराणांपरमंमहेश्वरंतंदेवतानांपरमंचदैवतं॥ पतिंपतीनांप्रथमंपुरस्ताद्विदाम
देवंभुवनेशमीड्य४ सएषइहप्रविष्टआनखाग्रेभ्यः।सईक्षांचक्रे। एतद्वैसत्यकाममपरंचापरंब्रह्महिरण्यगर्भंजनयामासपूर्वंसनोबुद्ध्याशुभयासंयुनक्तुयोब्रह्माणं
विदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मैतंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये१ सर्वाणिरूपाणिविचिंत्यधीरोनामानिकृत्वाभिवदन् यदास्तेउपद्र

सर्वोपाधिकम्३॥ प्रकाशितत्वात् १॥ व्यवहरन्नेवर्तते१॥

समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं विनश्यत्स्वऽविनश्यंतंयः पश्यतिसपश्यति॥१॥ उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः॥ ईश्वरःसर्वभूतानांहृद्दे
शेर्जुनतिष्ठति॥ आकाशमेकंहियथाघटादिषुपृथक्पृथक् तथात्मैकोप्यनेकःस्यात् जलाधारेष्विवांशुमान्१ सेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिःपरमामता ममा
तरात्मांतवचयेचान्येदेहिसंज्ञकाः२ सर्वेषांसाक्षिभूतोसौनग्राह्यःकेनचित्क्वचित् विश्वमूर्द्धाविश्वभुजोविश्वनासाक्षिवाहुकः३ एकश्चरतिभूतेषुस्वैरचारीय
थासुखं॥ यदक्षरंपरंब्रह्मयईश्वरःपरःपुमान्४ गुणोर्मिसृष्टिस्थितिकालसंलयःप्रधानबुद्ध्यादिजगत्प्रपंचसूः॥ सुनोऽस्तुविष्णुर्मतिभुक्तिमुक्तिदः॥ ब्रह्मास्व
रमजंनित्यंयथासौपुरुषोत्तमः हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे॥ ॐनमोवासुदेवायशुद्धज्ञानस्वभाविने॥ यस्यात्तयाजगत्स्थाविरंचिःपालकोहरिः
संहर्ताकालरुद्राख्योनमस्तस्मैपिनाकिने॥१॥ अपुण्यपुण्योपरमोयंपुनर्भवनिर्भयाः॥ शांताः संन्यासिनोयांतितस्मैमोक्षात्मनेनमः॥ १ ॥ इत्यादिश्रुतिस्मृ
तीतिहासपुराणवचनसहस्राणिनित्यशुद्धबुद्धमुक्तस्वभावंसर्वशक्तिमनंतकल्याणगुणकपरमात्मानमुपक्रमोपसंहारादिलिंगनिश्चिततात्पर्याणिप्रतिपा
दयंतिनचैषामर्थांतरतायुक्ताश्रुतहान्यश्रुतकल्पनाप्रसंगात् नचैषांकर्त्रादिस्तावकत्वंभिन्नप्रकरणस्थत्वात् नचोपासनाविधिपरत्वंतदश्रवणात् नचा।
त्मावारेद्रष्टव्यइत्यादिश्रवणाज्ज्ञानविधिपरत्वंज्ञानस्यप्रमाणवस्तुपरतंत्रतयाकर्तुमकर्तुमन्यथाकर्तुमशक्यत्वेनविधेयत्वायोगात् नचैषांविधिपरत्वानं।
गीकारेप्रवृत्तिनिवृत्त्योरसंभवेनसंगतिग्रहायोगादप्रामाप्रामाण्यापत्तिरितिवाच्यंपुत्रस्तेजातइतिवाक्यश्रवणानंतरंहर्षादिनानुमानेनपुत्रादिपदानांसं
गतिग्रहदर्शनात्तथात्रापितदुपपत्तेर्नाप्रामाण्यापत्तिः नचनद्यास्तीरेपंचफलानिसंतीत्यादिवदृष्टांतानांसिद्धार्थपरत्वेनाप्रामाण्यंतत्प्रतिपाद्यपरमात्मनो
ऽपरिच्छिन्नत्वेनहेयोपादेयत्वाभावेनानर्थक्यंचेतिवाच्यं परमात्मनोमानांतरायोग्यतयाऽज्ञातत्वेनतज्ज्ञानात्परमपुरुषार्थसंभवेनचतत्प्रतिपादकवेदां
तानांप्रामाण्यप्रयोजनवत्त्वोपपत्तेः किंचज्ञानविधिपरत्वेवेदांतानांविधेयज्ञानसाध्यस्यमोक्षस्यस्वर्गादिरिवानित्यत्वंप्रसज्येत अदृष्टजन्यभावकार्यस्यानि
त्यत्वनियमात् नच तदिष्टंसर्वेमोक्षवादिनोमोक्षंनित्यमभ्युपगच्छंतिनत श्चसर्वतंत्रविरोधःप्रसज्येत अनावृत्तिःशब्दादितिसूत्रविरोधश्चतस्माद्युक्तमे
तत् अपिचमोक्षोनामब्रह्मभावोवाऽज्ञाननिवृत्तिर्वासर्वथापितस्यज्ञानैकसाध्यत्वेनविधेयज्ञानजन्यापूर्वस्यानुपयोगान्निरर्थकोज्ञानविधिः किंचमोक्षस्यो
त्पत्त्याद्यसंभवेनज्ञानैक्यव्यंग्यतयाज्ञानविधिर्निरर्थकः उत्पत्त्याद्यन्यतमस्यविधिफलत्वात्॥ ६ ॥ नचपुनरावर्ततइत्यादिशब्दप्रामाण्यात् ब्रह्मलोकप्राप्तानांप्राणि
नांनपुनरावृत्तिरिति॥ शा०॥ सू०॥ २॥

७५

फलंसुखदुःखादिअतःपरमेश्वरात्कृतश्चेतनोहिकश्चित्स्वतंत्रोजीवशुभाशुभंविज्ञायतदनुसारिप्रयच्छतीत्युपपनेरिति॥ शा०॥ सू०॥ ७॥

ऋग्वेदादेः शास्त्रस्यकारणत्वादिति॥ शा०॥ सू०॥ ४॥ अवश्यमभ्युपगंतव्यःवापाठः ६॥ सर्ववेदायत्पदमामनंतीति श्रुतेःकथंवेदांतानांविधिपरत्वमितिचेन्न॥ ४॥

अभिव्यक्तिस्तु प्रमाणजन्येनकेवलज्ञानेनापिसंभवतिकिंचब्रह्मज्ञानेविधिरहोस्वित्तत्साधनेश्रवणादौवानाद्यःब्रह्मणोविधेयज्ञानविषयत्वायोगात् अन्य देवतद्विदितादथो अविदितादधीत्यादिश्रुत्याब्रह्मणोविदिक्रियाकर्मत्वप्रतिषेधात् किंचास्तुतर्हिप्रदेशांतरविहितोपासनाकर्मत्वमितिचेदतिनिपुणमति र्भवान्यतोज्ञानाविषयस्योपासनाविषयत्वं ब्रवीति किंचयद्वाचानभ्युदितंयेनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइत्यादिश्रुतिरुपासनकर्मत्वमपि तस्यनिषेधति॥ अविषयत्वेब्रह्मणःशास्त्रयोनित्वादित्यधिकरणविरोधइति चेन्नतन्निष्ठाज्ञाननिवर्तकत्वेनतद्विषयत्वोपचारादविरोधःनद्वितीयःदृष्टापत्तेःवे दांतानांब्रह्मणिमहातात्पर्येप्यवांतरतात्पर्येणश्रवणादिविध्युपगमेबाधकाभावात्तस्माद्वेदांतानांविधिपरत्वासंभवात्संगतिग्रहसंभवाच्चफलवदज्ञातार्थबो धकत्वेनप्रामाण्यसंभवाच्चतन्मूलभूतस्मृत्यादीनामपितुल्यन्यायत्वाच्छ्रुत्यादिभिःपरमात्मागीकार्यःकिंचजडस्यकर्मणःफलदातृत्वायोगात्परमात्मावश्य श्यमभ्युपगंतव्यःतदेतत्सर्वमभिप्रेत्यभगवद्बादरायणेनोक्तंफलमतउपपत्तेरिति तस्मात्परमात्मायदिजीवभिन्नःस्यात्तर्हिघटादिवदनात्मत्वेनानित्यएव

यद्यात्मानंदोनस्यात्तर्हिकोपिनव्याप्रियेतेत्यादि व्याप्यारोपेणव्यापकप्रसंजनरूपास्तर्काः श्रुत्युक्ताद्रष्टव्याःएतच्चमननंनिरूपितमेतन्मन ११नम॥

तर्कान्॥ श्रुत्यादिभिःपरमात्माङ्गीकारेण१॥

स्यात्तच्चतदैश्वंनित्यत्वप्रतिपादकश्रुतिस्मृतीतिहासपुराणविरोधप्रसंगात् एतेनसांख्यादयःपरास्तावेदितव्याःअचेतनस्यप्रधानस्याप्रमाणि कत्वेनपरमेश्वरस्यैवजगतोऽभिन्ननिमित्तोपादानत्वादतएवपतंजलिनैयायिकादयोपिनिराकृताःनिरपेक्षेश्वरस्यनिमित्तत्वेवैषम्यनैर्घृण्यप्रसंगात्श्रु त्यानंदंगीकारेयथाश्रुतिसोपाधिकसगुणेश्वरस्याभिन्ननिमित्तोपादानत्वंतस्यैवमायाविनिर्मुक्तस्यप्रत्यगभिन्नत्वमुक्तदोषपरिहारायश्रुत्याद्यविरोधा यचसर्वैरवश्यमभ्युगंतव्यंतस्माद्यथोक्ततर्कस्यसविषयत्वात्तेनोब्रह्मात्मैक्यसंशयोनिवर्ततइतिभावः इदानींशोधितत्वंपदार्थस्यसुखात्मत्वसाधकंतर्कमु दाहरतियद्यात्मेति आत्माशोधितत्वंपदार्थःआनंदःआनंदस्वरूपःकोपिकश्चिदपिजनोनव्याप्रियेतनप्रवर्तेतस्वार्थमित्यक्षरार्थः तथाचश्रुतिःकोह्येवान्यात्कः प्राण्यात्यदेषआकाशआनंदोनस्यादितियद्यप्यत्राकाशशब्दःपरमात्मपरःआकाशोऽर्थांतरत्वादिव्यपदेशादितिन्यायेनरसंह्येवायंलब्ध्वानंदीभवतीतिपू र्ववाक्येरसशब्देनानंदवाचिनापरमात्मनोविवक्षितत्वादेषह्येवानंदयातीत्युत्तरवाक्येपिएतच्छब्दार्थस्यान्येषामानंदपित्वप्रतिपादनेनतस्यैवविवक्षितत्वाच्च १९

आकाशोऽर्थांतरत्वादिव्यपदेशात्॥ ... ॥ शा०॥ सू०॥ २२॥

अमेरेपि१॥ अधुंदुरकस्य॥ वैंकुवस्य॥

अत्रापिश्रुतिःप्रमाणंभवत्येवनन्वेवंदुःखसमवेतसुखार्थमपिप्रवृत्तिसंभवात्कथमनेनतर्केणात्मनःसुखात्मनःसुखात्मकत्वसिद्धिर्नसुखत्वेनैवसुखस्योद्दे श्यत्वान्नस्वसमवेतसुखत्वेनगौरवात् नचैवंवैरिसुखोद्देशेनापिप्रवृत्तिप्रसंगइतिवाच्यं तस्यप्रेमगोचरत्वाभावात् स्वस्वरूपसुखस्यनिरुपाधिकप्रेमगो चरत्वेनतदुद्देशेनैवनिरुपाधिकप्रवृत्तेर्दर्शनात्नचनिरुपाधिकप्रेमगोचरत्वमपिसुखसमवायित्वेनात्मनइति वाच्यंतर्हिदुःखसमवायित्वेननिरुपाधि कद्वेषगोचरत्वमपिस्यात् नचतनत् कस्याचिदस्तिनस्मात्सर्वेषांस्वार्थेप्रवृत्तिदर्शनादात्मासुखस्वरूपएवेतिभावः आदिशब्देनयदिपरमात्मानंदोनस्यात्तत्प्रा प्तेरपुरुषार्थत्वंस्यात् यदिपरमात्माचिद्रूपोनस्यात्तर्हिघटादिवज्जडत्वेनसूर्याद्यवभासकत्वंनभवेत् नचेष्टापत्तिःतस्यभासासर्वमिदंविभातितच्छुभ्रंज्यो तिःआधारमानंदमखंडबोधंविज्ञानमानंदंब्रह्मज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यतइत्यादिश्रुतिस्मृतिविरोधप्रसंगःयदिपरमात्मासगुणःस्यात्तर्हि

शारीरकद्वितीयाध्यायपठनेननिष्पद्यतेसंशयविरोधिज्ञानंनिश्चयःसचद्विविधः यथार्थोऽयथार्थश्चेति अविसंवादीयथार्थनिश्चयःस चोक्तएवविसंवाद्ययथार्थनिश्चयःसचद्विविधःतर्कोविपर्ययश्चेति तर्कस्तूक्तएवविपर्ययोमिथ्याज्ञानं अतस्मिंस्तद्बुद्धिरितियावत् सच द्विविधःनिरुपाधिकःसोपाधिकश्चेति तत्राद्योद्विविधःबाह्यःआभ्यंतरश्चेति॥ ११ निर्विशेषस्वरूपप्रतिपादकश्रुतिविरोधःस्यात् यदीजीव

श्चिद्रूपोनस्यात्तर्हिजडत्वेनसावयवतयाघटादिवदनात्मत्वेनजगदांध्यप्रसंगःयोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषःस्वयंज्योतिर्भवतिसत्त्रसेत्रौतथा कृत्स्नंप्रकाशयतिभारतेत्यादिश्रुतिस्मृतिविरोधश्चप्रसज्येतयद्यात्माकर्तास्यात्तर्हिविकारितयापरिणामित्वेनानित्यस्यात् यदिकर्मसमुच्चितंज्ञानंमोक्षसा धनंस्यात्तर्हिमोक्षस्यापिकर्मजत्वास्वर्गस्येवानित्यत्वंप्रसज्येदित्येवमादितर्काःगृह्यंतेतर्हितर्कात्मकंमननंनिरूपणीयमित्याकांक्षायामाह एतदिति इदंम ननंकुतोनिष्पद्यतेऽत्राह एतच्चमननमितिक्रमप्राप्तनिश्चयस्यलक्षणमाह संशयेति तंविभजतेसचेतियथोद्देशंयथार्थंनिरूपयति अविसंवादीतिफलपर्यवसा यिज्ञानंयथार्थनिश्चयःनिष्फलंज्ञानंविसंवादिअयथार्थनिश्चयंविभजतेसचेतितर्कइतिउक्तोनिरूपितःअतोनानंतरग्रंथइतिशेषःविपर्ययलक्षणमाह विप र्ययइतिकिमिदंज्ञानस्यमिथ्यात्वंनतावद्बाध्यत्वंज्ञानस्यस्वरूपेणतदयोगात् नापिनिर्विषयत्वंनिर्विषयज्ञानाभावादित्याशंकायामाहअतस्मिंस्तेति॥ ७६ ॥

तदभाववतितत् ज्ञानंमिथ्याज्ञानमित्यर्थः स्वतोज्ञानस्यवाधाभावेपिविषयवाधेनतत्संभवात् वाध्यत्वंज्ञानस्यमिथ्यात्वमित्यर्थः विपर्ययंविभजते सचेति
निरुपाधिकंविभज्ययथोद्देश्यंव्युत्पादयति आद्येतिशुक्ताविति इदंरजतमितिभ्रमः वाह्योनिरुपाधिकभ्रमइत्यर्थः अहमित्याभ्यंतरोनिरुपाधिकभ्रमइ
त्यर्थः सोपाधिकंभ्रमंविभज्ययथाक्रमंव्युत्पादयतिसोपाधिकेतिलोहितेतिवाह्यः सोपाधिकभ्रमइत्यर्थः सोपाधिकेतिसोपाधिकभ्रमइत्यर्थः नन्वाकाशा
दिप्रपंचभ्रमस्यकथंसोपाधिकभ्रमत्वंजपाकुसुमादिवत्तदनुपलंभादित्याशंक्याह कर्मेति नन्वस्तुकर्माविद्याकार्यंतथापिकथंसोपाधिकत्वंइत्याशंक्याह त
त्वज्ञानेनेति ज्ञानेनावरणशक्तिमदज्ञानेनिवृत्तेपिविक्षेपशक्तिमदज्ञानात् प्रारब्धक्षयपर्यंतं आकाशादिप्रपंचस्यानुभूयमानत्वात् तद्भ्रमः सोपाधिकएव नचो
पाधेरनुपलंभः कर्मसहितविक्षेपशक्तिमदज्ञानस्यैवोपाधित्वादितिभावः आभ्यंतरंसोपाधिकभ्रमंदर्शयति कर्तृत्वादीति अहंकर्तेत्यात्मनिकर्तृत्वादिबुद्धिराभ्यं

कर्मसहकृत २

शुक्त्यादाविदंरजतमित्यादिवाह्यः अहमज्ञोब्रह्मनजानामीत्याद्याभ्यंतरः सोपाधिकोद्विविधः वाह्य आभ्यंतरश्चेति लोहितःस्फटिकइत्यादि
वाह्य आकाशादिप्रपंचभ्रमोपिवाह्यःसोपाधिकः कर्माविद्याकार्यत्वात् तत्वज्ञानिनोनिवृत्तेप्यज्ञानेप्रारब्धक्षयपर्यंतंप्रपंचोपलब्धिदर्शनात्
कर्तृत्वादिभ्रमआभ्यंतरःस्वप्नोप्याभ्यंतरःसोपाधिकभ्रमएव नतुस्मृतिः तथाहिजाग्रद्भोगप्रदकर्मोपरमेसति स्वप्नभोगप्रदकर्मोद्रेके ॥ ॥

तरः सोपाधिकभ्रमः तत्रांतःकरणमुपाधिस्तन्निष्ठकर्तृत्वादिरात्मन्यविवेकेनारोप्यतेतस्यासंगत्वेनस्वतःकर्तृत्वायोगादतस्तस्यसोपाधिकत्वंयुक्तमितिभावः नैया
यिकास्तुस्वप्नमयथार्थस्मरणंवदंतितान्निराकर्तुंस्वप्नस्यसोपाधिकभ्रमत्वमेंतर्भावमाह स्वप्नोपीति सोपाधिकभ्रमोऽनुभवइत्यर्थः ननुस्वप्नस्यसोपाधिकस्यनिरूप
त्वात्कथंभ्रमानुभवत्वं नचतथोल्लेखाभावाद्रथंपश्यामीत्यनुभवाच्चतथात्वमितिवाच्यंदोषवशेनतदितिस्थानेइदमित्युदयात् स्वप्नःस्मृतिरेवनिद्रादोषवशात्प
श्यामीत्यपिभ्रमएवान्यथारथतदुचितदेशानामसंभवात् रथाद्युपादानसामग्र्यभावात् कथंतदुत्पत्तिस्तदनुभवोवास्यात् तस्मात्स्मृतिरेवस्वप्नइत्याशंक्याह ननु
स्मृतिरिति जाग्रत्कालीनरथतदुचितदेशानदुत्पादकसामग्र्यभावेपिजाग्रत्कालीनरथोत्पादकसामग्रीतोविलक्षणसामग्रीवशेनप्रातिभासिकरजतोत्पत्त्यनुभवाविव
स्वप्नकालप्रातिभासिकरथोत्पत्त्यनुभवौनविरुद्धावित्युपपादयति तथाहीति दारुतक्षादिर्व्यावहारिकरथोत्पादकसामग्रीजाग्रदनुभवजनितवासनाविशिष्टमंतः



कसामग्रीतद्विलक्षणाचततोरथाद्युत्पत्तिस्तदनुभवश्चेतिद्वयंयुक्तमेवातःस्वप्नोनस्मृतिरितिभावः ननुजाग्रद्भोगप्रदकर्मणोस्तितिकथंस्वप्नःस्यादित्याशंक्याह जा
ग्रदिति तथापिभोगप्रदकर्मोपरमेसुषुप्तिरेवस्यात्स्वप्नइत्याशंक्याह स्वप्नेति॥ ननुस्वप्नेप्रमाणप्रमेयव्यवहारस्यजाग्रद्व्यवहारस्यतुल्यत्वात्कथंरथादेःप्रातिभा
सिकत्वमित्याशंक्यजाग्रत्पदार्थस्यभौतिकत्वेनचिरस्थायित्वात्स्वप्नपदार्थस्यवासनाविशिष्टांतःकरणपरिणामत्वेनवासनामयत्वात् उभयोर्वैलक्षण्यमस्ती
त्यभिप्रेत्याह सकलेति विषयाश्चेंद्रियाणिचविषयेंद्रियाणितेषांवासनाः तानाभिर्वासितंवासनाश्रयमितियावत् ननुभ्रमस्यदोषजन्यत्वात्प्रकृतेतदभावा
त् कथंभ्रमःस्यात् स्वप्नइत्याशंक्याह निद्रेतिनिद्रारूपदोषसत्वात् भ्रमःसंभवतीत्यर्थः नह्यंतःकरणंसर्वाकारेणपरिणमतेचेत्तदानीग्राह्यग्राहकव्यवहारः
कथंस्यात् तद्ग्राहकेंद्रियाणामुपरतत्वादित्याशंक्यांतःकरणस्यैवग्राह्यग्राहकोभयाकारेणपरिणतत्वात् तथाव्यवहारउपपद्यत इत्याह रथादीति नन्वालोक

संयुक्तं १

सकलविषयेंद्रियादिवासनावासितंनिद्रादोषोपप्लुतमंतःकरणं रथादिविषयाकारेण तद्ग्राहकेंद्रियाद्याकारेण रथादिविषयाकारवृत्याका
रेणचपरिणमते अंतःकरणोपहितसाक्षीस्वयमन्याऽनवभास्यः तत्सर्वमवभासयति अतएवस्वप्नेसाक्षिणःस्वप्रकाशत्वंसुविज्ञेयं जाग्रदव
स्थायांसूर्यादितेजोभिःसंकीर्णत्वात्साक्षिणःस्वप्रकाशत्वंदुर्विज्ञेयंस्वप्नेतुसूर्यादीनांजाग्रत्पदार्थानामुपरतत्वात्स्वप्रकाशत्वंविवेक्तुंशक्यते ॥ ॥

आलोक १॥

हकृतचक्षुषएवरूपग्राहकत्वात्तदानींतदभावात्कथंरूपाद्यनुभवइत्याशंक्यसर्ववासनाश्रयांतःकरणोपहितसाक्षिबलेनरूपादिसर्वविषयानुभवउपपद्यत
इत्याह अंतःकरणेति ननुसाक्षी साक्ष्यंतरेणप्रथतेचेत्तदानवस्थास्यान्नचेदज्ञायमानोजडःकथंविषयमवभासयेदित्याशंक्याह स्वयमितिस्वयंप्रकाशमान
त्वात्साक्षीस्वमन्यानवभास्यः यतःसर्वंस्वप्नपदार्थजातमवभासयतीत्यर्थः ननुजाग्रदवस्थायांसाक्षिणःस्वप्रकाशत्वस्याननुभूयमानत्वात्कथमन्यानवभास्यत्व
मित्याशंक्यजाग्रतिसूर्यादिज्योतिर्भिःसंकीर्णतयाऽविवेकिनांसाक्षिणःस्वप्रकाशत्वाननुभवेपिस्वप्नेसूर्यादिज्योतिषामुपरतत्वात्तस्यस्वप्रकाशत्वंसुग्रहमित्याह
अतएवेति यतःस्वयमन्यानवभास्यःसन् तत्सर्वमवभासयति अतएवेत्यर्थः सुज्ञेयत्वमेवोपपादयति जाग्रदिति यद्यपिजाग्रदवस्थायामपिस्वप्रकाशसाक्षिबले
नैवसूर्यादिज्योतिषांभानंयेनसूर्यस्तपतितेजसेद्धः तमेवभांतमनुभातिसर्वं तस्यभासासर्वमिदंविभातीत्यादिश्रुतेः स्वयमादित्यादिभिरनवभास्यः ततत्रसूर्योभाति

स्वप्नोपाधिना ६॥ ऽभिमानं ६ पदार्थान् ६॥ साधिने १

स्वप्रकाशत्वं दुर्विज्ञेयमेव जडप्रकाशैः संकीर्णत्वात् स्वप्ने तु न संकराभावात्सुज्ञेयमिति भावः॥ स्वप्नपदार्थानामंतःकरणपरिणामत्वेन ननु साक्षिणः स्वप्रकाश
त्वे श्रुतिमुदाहरति तथा चेति स बुद्ध्युपाधिको जीवः यत्र यस्यामवस्थायां लोकस्य जाग्रत्पदार्थजातस्य मात्रां वासनां स्वयं विहत्य स्थूलशरीराभिमानं मनुष्योहमि
त्याकारं त्यक्त्वा स्वयं निर्माय वासनामयान् रथादिपदार्थान् सृष्ट्वा स्वेन भासा स्वोपाधिभूतांतःकरणविषयाकाररूपया वृत्त्या स्वेन ज्योतिषा स्वप्रकाशचैतन्यज्यो
तिषा अत्र स्वप्नावस्थायां स्वयं ज्योतिर्भवतीति जडप्रकाशानामादित्यादीनामुपरतत्वादात्मा स्वप्रकाशचिद्रूपः सन् विविक्ततया ऽवतिष्ठत इत्यर्थः तत्र स्वप्नावस्था
यां रथादयस्तदुचितदेशाश्च केपि न संतीत्यर्थः अथ तदा रथादीन् वासनामयान् तदुचितदेशांश्च सृजति उत्पादयति निद्रादोषेणात्मन्यारोपयतीत्यर्थः आ
दिशब्देन स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुषः एकहंस इत्याद्याः श्रुतयो गृह्यंते श्रुतिं व्याचष्टे स यं ज्यो
तिरिति ननु किमिदं स्वप्रकाशत्वं न तावत् ज्ञानाविषयत्वं तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिविरोधप्रसंगात् नापि स्वसमानजातीयज्ञानाविषयत्वं अप्रसिद्धे

वासना २ इतितान् = १

तथा च श्रुतिः स यत्र प्रस्वपित्यस्य लोकस्य सर्वतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्यो
तिर्भवति न तत्र रथा न रथयोगा न पंथानो भवंति अथ रथान् रथयोगान्पथः सृजत इत्यादि स्वयंज्योतिः स्वयंप्रकाशश्चैतन्याविषय इति यावत्॥ ॥

आत्मत्वादि २ फलचैतन्याविषयत्वं १ धर्मीधर्मादिसाक्षिणस्तदुदृत्तेनाभासेन १

रसंभवः नापि स्वविषयत्वं एकस्य कर्मकर्तृभावायोगात् एतेनावेद्यत्वं स्वप्रकाशत्वमिति प्रत्युक्तं न च फलाव्याप्यत्वं तदिति वाच्यं आत्मनोऽसंगतया निर्धर्मकत्वेन योग्यतावच्छेदकापरिज्ञानाच्च योग्यत्वस्यासंभवात् तस्मात्स्वप्रकाशत्वं दुर्निरूपमिति तत्रा
परोक्षव्यवहारयोग्यत्वं तदिति वाच्यं आत्मनोऽसंगतया निर्धर्मकत्वेन योग्यतावच्छेदकापरिज्ञानाच्च योग्यत्वस्यासंभवात् तस्मात्स्वप्रकाशत्वं दुर्निरूपमिति तत्रा
ह चैतन्येति नन्वा — त्मनः सर्वज्ञानाविषयत्वे व्यवहारः कथं स्याद्व्यवहारस्य स्वसमानविषयव्यवहर्तव्यज्ञानसाध्यत्वादिति चेन्न लाघवाद्व्यवहर्तव्यज्ञानमेव
व्यवहारकारणं न तु स्वसमानविषयत्वेन गौरवात् ज्ञानस्य स्वस्मिन्स्वविषयद्वेषसंशयादिनिवर्तकत्वनियमाद्विषयत्वमन्यथा जडत्वप्रसंगात् नन्वेवं सति व्य
वहर्तव्यज्ञानस्य चैतन्यस्य सदातनत्वेन — सर्वदा घटादिव्यवहारप्रसंगः स्वसमानविषयत्वस्य तत्राप्रयोजकत्वात् न हि कस्यचित् सर्वदा घटादिव्यवहारो
भवति किं च वृत्तिनिर्गमनाभ्युपगमवैयर्थ्यप्रसंगः घटादीन्द्रियसन्निकर्षे सति साक्षिचैतन्येनैव व्यवहारोपपत्तेः तस्मात्स्वसमानविषयत्वमंतरेण व्यवहर्तव्य

अयं आत्मेति ४॥



कार्यकारणव्यभिचारस्यैवातिप्रसङ्गत्वात् योविशेषयोः कार्यकारणभावः स सामान्ययोर्नैयंगीकारे नीलघटकर्ता कुलालः पीतघटकर्तानस्यादिति॥ २॥ अविषयत्वे सतिः॥ स्वप्रकाशत्वेन॥

ज्ञानं व्यवहारकारणमित्यसंगतमिति निमेवं व्यवहर्तव्यज्ञानत्वेन व्यवहारत्वेन सामान्यतः कार्यकारणभावः घटादिव्यवहारे तु स्वसमानविषयत्वेन विशेषतोपि य
त्सामान्ययोः कार्यकारणभावः बाधकं विना तद्विशेषयोरपीति न्यायात् अन्यथा सर्वत्रातिप्रसंगात् एवं च स्वप्रकाशसाक्षिचैतन्यं व्यवहर्तव्यज्ञानत्वेन स्वव्यवह
रहेतुः घटादिव्यवहारे तु स्वसमानविषयकत्वेन तद्धेतुः न तन्नश्च न सर्वदा घटव्यवहारापत्तिः न वा वृत्तिनिर्गमनवैयर्थ्यं इंद्रियसंप्रयोगस्य ज्ञानशब्दवाच्य
त्वाभावेन तद्धेतुत्वायोगादात्मनः स्वप्रकाशत्वेन सामान्यसामग्रीतो व्यवहारस्तद्वैपरीत्यात् घटादेः सामान्यविशेषाभ्यां उपपद्यते तस्माच्चैतन्याविषयत्वं
स्वप्रकाशत्वमिति निरवद्यं न च श्रुतिविरोधः तज्जन्यवृत्तिविषयत्वाभ्युपगमादन्यथा तद्भज्ञान — निवृत्तिर्न स्यात् न च यत्मनसा न मनुत इत्या
दिश्रुतिविरोधः तस्याः फलव्याप्यत्वप्रतिषेधपरत्वात् इंद्रियजन्यवृत्त्यभिव्यक्तचैतन्यं फलं न च तद्विषयत्वमात्मनः स्वप्रकाशत्वात् तदुक्तं ब्रह्मण्यज्ञा
ननाशाय वृत्तिव्याप्तिरपेक्षिता फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितमिति अथवाऽवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वं फलाव्याप्यत्वमवेद्य
त्वं अपरोक्षव्यवहारः प्रमाणाजन्यवृत्तिस्तद्योग्यत्वमात्मचैतन्यस्वरूपमेव न त्वतिरिक्तं येन योग्यतावच्छेदकज्ञानाभावात्तन्निरूपणाभावः प्रसज्येत ए
वं च घटादौ धर्माधर्मयोश्चातिव्याप्तिवारणाय विशेषणद्वयं तस्मात्स्वप्रकाशत्वस्य निरूपितत्वादात्मा स्वयंज्योतिःस्वभावः एवमात्मनः स्वप्रकाशत्वेऽर्थापत्ति
रपि प्रमाणं तथाहि अंतःकरणतद्धर्मगोचरानुभवस्य भासकत्वं स्वप्रकाशत्वं विनाऽनुपपन्नं सत्तस्य स्वप्रकाशत्वं कल्पयति न ह्यज्ञायमानस्य वानुव्यवसा
यविषयस्य वा संदिह्यमानस्य वानुभवस्य स्वविषयसत्तानिश्चायकत्वं संभवति अज्ञायमानस्य विषयसत्तानिश्चायकत्वे निर्विकल्पादपि विषयसिद्धिप्रसं
गः अनुव्यवसायविषयस्य तथात्वे नवस्थापत्तेः संशयेत्वर्थनिश्चायकत्वाभावस्य सर्वानुभवसिद्धत्वात् तस्मात्स्वप्रकाशत्वं विनांतःकरणतद्धर्मविषयानु
भवस्य तदवभासकत्वानुपपत्त्या तदवश्यमभ्युपगंतव्यं अन्यथा तस्य जडत्वेन जगदांध्यप्रसंगः एवं च जन्यज्ञानस्य स्वप्रकाशत्वे प्रमाणाभावादनादिनित्य
त्वमवश्यमभ्युपगंतव्यं अंतःकरणतद्धर्मगोचरानुभवस्योत्पत्तिविनाशयोरनिरूपणात् न च दुःखज्ञानं नष्टं सुखज्ञानमुत्पन्नमित्यनुभवात् कथं तदनिरूप
णमिति वाच्यं साक्षिणोऽनादिनित्यत्वेन सुखदुःखयोरुत्पत्तिविनाशाभ्यां तत्र तदुपचारोपपत्तेः अन्यथा नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्यादिश्रुतिविरोध
प्रसंगात् तस्मादनाद्यनंतोऽसंगस्वप्रकाशचिद्रूप आत्मेति सिद्धम्॥ ॥

अंतःकरणादिः ३॥ तत्राभिव्यक्तस्वरूपत्वं॥ चैतन्याविषयत्वस्य प्रकाशत्वमित्युक्ते आत्मन्येवात्मानं पश्येदित्यादि श्रुतिविरोधः स्यात् १२॥ ॥ऽहं कर्ताऽहं सुखीत्यादि ७॥ ऽतिरिक्तत्वेन १॥ ऽनुभवस्य ७॥

आ॰कौ॰

एवंप्रसंगादात्मनः स्वप्रकाशत्वमुक्त्वा प्रकृतमुपसंहरति एवमितिविपक्षे दंडमाह अन्यथेतितस्मात्स्वप्नस्यस्मृतिरूपत्वमनुपपन्नमितिभावः नन्वेवम
पिस्वप्नस्यानुभवत्वे स्वप्नाध्यस्तपदार्थानांरथादीनांतदधिष्ठानब्रह्मसाक्षात्काराभावेनबाधाभावान्निवर्त्तकांतराभावाच्चजाग्रदवस्थायामनुवृत्तिः स्यात्त
चेष्टापत्तिरनुभवविरोधात्तस्मात्तदनुभवत्वमनुपपन्नमित्याशंक्याह स्वप्नेतिद्विविधः कार्यनाशः बाधोलयश्चेति अधिष्ठानतत्वसाक्षात्कारेणबाधोभव
ति अनुभूयमानस्याभावप्रमाबाधः अथवाऽधिष्ठानतत्वसाक्षात्कारेणस्वोपादानाज्ञानेनसहकार्यस्यनाशोबाधः उपादानेसत्यपिकार्यस्यतिरोभावोलयः त
थाचशुक्तितत्वसाक्षात्कारेणरजतबाधवदिदानींस्वप्नपदार्थाधिष्ठानब्रह्मसाक्षात्काराभावेनस्वप्नपदार्थानांबाधाभावेपिउपाधिभूतजपाकुसुमादिनि
वृत्त्यास्फटिकेलौहित्यादिनिवृत्तिवत्स्वप्नपदार्थानामुपाधिनिवृत्त्यानिवृत्तिसंभवान्नजाग्रदवस्थायांस्वप्नपदार्थानुवृत्तिरितिभावः कस्तत्रोपाधिरित्यत आह

(स्वप्नपदार्थानां) (स्वप्न)

एवंस्वप्नोऽनुभवएवनस्मृतिः अन्यथारथंपश्यामीत्यनुभवविरोधप्रसंगात् स्वप्नपदार्थानामंतःकरणमायाद्वाराशुद्धचैतन्याध्यस्तत्वेन
इदानींतत्साक्षात्काराभावेनबाधाभावेपिसोपाधिकतयोपाधिनिवृत्त्यातन्निवृत्तिरितिनजाग्रदवस्थायामनुवृत्तिः कैर्मनिद्रोपप्लुतमंतःकर
णमुपाधिः केचित्तुस्वप्नाध्यासंनिरुपाधिकंवदंतितत्रविरोधिजाग्रत्प्रत्ययेनतन्निवृत्तिः पुनश्चविपर्ययः प्रकारांतरेणद्विविधः अंतःकरण
वृत्तिरूपोऽविद्यावृत्तिरूपश्चेति ॥ १२ कर्मेति जाग्रद्वासनावासितमित्यपिविशेषणीयं अन्यथानिर्वासनस्योपाधित्वायोगात् उपाधिर्नामस्वस्मिन्निव
स्वसंसर्गिणिस्वधर्माऽऽसंजकः तथाचस्वप्नस्यसोपाधिकभ्रमत्वादनुभवत्वमुपपन्नमितिभावः मतांतरमाह केचित्त्विति ननुस्वप्नाध्यासस्यनिरुपाधित्वेत
दानीमधिष्ठानसाक्षात्काराभावेनस्वप्नपदार्थानांबाधाभावाज्जाग्रदवस्थायामनुवृत्तिः स्यादित्याशंक्यरजतभ्रमानंतरंशुक्तितत्वसाक्षात्काराभावेपिविरोधिदं
डादिज्ञानात्सर्परजतभ्रमनिवृत्तिरुपादानाज्ञानेसत्यपितथाधिष्ठानसाक्षात्काराभावेपिविरोधिजाग्रत्प्रत्ययेनस्वप्नपदार्थनिवृत्तिरुपपद्यते अतोनजाग्रदव
स्थायामनुवृत्तिरित्याह तत्रेति स्वप्नस्यनिरुपाधिकत्वेनचोत्पन्नब्रह्मसाक्षात्काराणामज्ञानस्यनिवृत्तत्वात्स्वप्नाध्यासोनस्यादिति वाच्यं ज्ञानेनाज्ञानेनिवृत्तेपि
तत्कार्यनिवृत्तेरभावात्स्वप्नपदार्थानांसाक्षादंतःकरणस्योपादानत्वेनज्ञानिनामपिस्वप्नाध्यासोभवत्येव अन्यथाजाग्रदवस्थायामपिविषयानुभवाभावप्रसं
(अंतःकरणस्य॥) (गादिति॥)



अंतःकरणवृत्तिरूपंविपर्ययंव्युत्पादयति स्वप्नेति आदिशब्देनमनोराजनष्टपुत्रसाक्षात्कारोगृह्यते द्वितीयंव्युत्पादयतिरजतादीति आदिशब्देनरज्जुसर्पा
दिर्गृह्यतेनेनचरजतभ्रमस्येदमाकारवृत्त्युपहितसाक्षिरूपतयाकथमविद्यावृत्तिरूपत्वमिति वाच्यं साक्षिणोऽनादिनित्यतयोत्पत्तिविनाशशून्यत्वेता
न्याकारवृत्तिनाशेनान्यसंस्कारोत्पत्त्यावतिप्रसक्त्याकालांतरेप्रातिभासकरजतस्मृतिहेतुसंस्काराविद्यावृत्तेरावश्यकत्वेनोक्तत्वादितिभावः ननुकिंसंशयो
पिवृत्तिद्वयात्मकः नेत्याह संशयस्त्विति ननुविपर्ययनिवृत्तिः कस्माद्भवतीत्यत आह तत्रेति एवमुक्तप्रकारेणद्विविधेविपर्ययेनिरूपितेसतितयोर्मध्येनिदि
ध्यासनेननिरुपाधिकस्यनिवृत्तिमाह निरुपाधिकेतिसोपाधिकः कस्मान्निवर्त्तइत्यत आह सोपाधिकस्त्वितिनिवर्त्ततइत्यनुषज्यतेवाक्यांतरेश्रुतंपदंवा
क्यांतरेआकृष्ययोजनमनुषंगः तर्हितन्निरूप्यतामित्याशंक्याह निदिध्यासनमितिशाब्दप्रमानिरूपणावसरेतात्पर्यनिरूपणप्रसंगेनेतिशेषः तन्निदिध्या

(आकाशादिभ्रमः २) (२हमत्त इति १)

स्वप्नादिरंतःकरणवृत्तिरूपः रजतादिभ्रमोऽविद्यावृत्तिरूपः संशयस्त्वविद्यावृत्तिरेवतत्रैवंसतिनिरुपाधिकविपर्ययोनिदिध्यास
नेननिवर्त्तते सोपाधिकस्तूपाधिनिवृत्त्यानिदिध्यासनंनिरूपितमेवतदपिशारीरकतृतीयाध्यायपठनेननिष्पद्यते एवंचश्रवण
मननिदिध्यासनैरसंभावनाविपरीतभावनानिवृत्तौ असत्यन्यस्मिन्प्रतिबंधेतत्वमस्यादिवाक्यादहंब्रह्मास्मीतिअपरोक्षप्रमाजा
यते तदुक्तं ऐहिकमप्यप्रस्तुतप्रतिबंधेतद्दर्शनादिति ॥ १२ सतंकुतोनिष्पद्यतइत्याशंक्याह तदपीति ततः किमित्यत आह एवंचेति श्रवणेनप्रमा
णगताऽसंभावनानिवर्त्तते मननेनप्रमेयगतासंभावनानिदिध्यासनेनविपरीतभावना तदुक्तं श्रुतवंत्वज्ञाततत्त्वास्तेजानन्कस्माच्छृणोम्यहं मन्यंतांसंशयाप
न्नाः नमन्येहमसंशयः १ विपर्यस्तो निदिध्यासेत्किंध्यानमविपर्ययइतिननुश्रवणमनननिदिध्यासनानिकुर्वतांकेषांचित्कुतः साक्षात्कारोनजायत इत्याशंक्या
ह असत्यन्यस्मिन्निति भूतभाविवर्त्तमानः प्रतिबंधोयेषांवर्त्ततेज्ञानोत्पत्तौयावत्तावत्तेषांनज्ञानोदयः श्रवणादिकुर्वतामपियेषांसनास्तितेषांविचारितत्वम
स्यादिवाक्याद्ब्रह्मसाक्षात्कारोभवत्येवेत्यर्थः उक्तार्थेव्याससूत्रंसंवादयति तदुक्तमिति तृतीयेस्थितंब्रह्मज्ञानमुद्दिश्यांतरंगबहिरंगसाधनानिनिरूपिता
नि तत्रकृतैः श्रवणमनननिदिध्यासनैर्ब्रह्मज्ञानमिहैवभवतिवामुत्रापिवा ॥ ८ ॥

तत्रैहैवज्ञानंभवतीतिप्राप्ते अस्मिन्नेवजन्मनिब्रह्मापरोक्षज्ञानंमेभूयादितिश्रवणादीनामनुष्ठानात् ननुयज्ञादीनामपिब्रह्मज्ञानसाधनत्वश्रवणेन
तेषामामुष्मिकफलत्वात्कथंश्रवणादिनाऽस्मिन्नेवजन्मनिज्ञानंस्यादितिचेन्नतेषांविविदिषाहेतुत्वेनसाक्षात् ज्ञानसाधनत्वाभावात् श्रवणादीनांसाक्षा
त् ज्ञानसाधनत्वेनतेषुसत्सुब्रह्मज्ञानमिहभवत्येवतस्यप्रमाणफलत्वात् तस्माद्ब्रह्मज्ञानमैहिकमेवेतिप्राप्ते ब्रूमः अप्रस्तुतप्रतिबंधेब्रह्मज्ञानमैहिकंभवति
प्रस्तुतप्रतिबंधेत्वामुष्मिकमपितथाचश्रुतिः प्रतिबंधयुक्तानामात्मनोदुर्ज्ञेयतांदर्शयतिश्रवणायापिबहुभिर्यो नलभ्यः शृण्वंतोबहवोयंनविद्युरितिस्मृति
रपि आश्चर्यवच्चैनमन्यः शृणोतिश्रुत्वाप्येनंवेदनचैवकश्चिदित्युक्तार्थमेवदर्शयति ननुजन्मांतरकृतश्रवणादीनांब्रह्मसाक्षात्कारहेतुत्वंकुतोऽवगम्यते
इतिचेद्गर्भएवैतच्छयानोवामदेवएवमुवाचेत्यादिश्रुत्याः तस्माच्छ्रवणाद्यनुतिष्ठतःपुंसः प्रस्तुतप्रतिबंधाभावेइहैवब्रह्मापरोक्षज्ञानंभवतितस्मिन्सत्यमुत्रज

प्रतिबंधस्त्रिविधोभूतभाविवर्त्तमानभेदात् भूतप्रतिबंधः पूर्वानुभूतविषयस्यावेशेनपुनःपुनःस्मरणं तदुपाधिकब्रह्मानुसंधानेनतन्निवृ
त्तिः यथाभिक्षोः पूर्वानुभूतमहिष्यादिस्मरणेनतत्वज्ञानानुत्पत्तौगुरूपदिष्टतदुपाधिकब्रह्मानुसंधानेनतन्निवृत्तिरितिवदंति भाविप्रतिबंधोद्वि
विधः प्रारब्धशेषोब्रह्मलोकेच्छाचेति तत्रप्रारब्धकर्मद्विविधंफलाभिसंधिकृतंकेवलंचेति तत्रफलाभिसंधिकृतेफलंदत्त्वैवनश्यति तस्मिन्सति
तिज्ञानंनोत्पद्यते तस्यप्रबलत्वात् तथाचश्रुतिः सयथाकामोभवतितथाक्रतुर्भवतियत्क्रतुर्भवतितत्कर्मकुरुतेयत्कर्मकुरुतेतदभिसंपद्यत

न्मांतरेभवतियत्कर्मफलोत्सुखंब्रह्मसाक्षात्कारोत्पत्तिविरोधिवासनावासएवप्रतिबंधस्तदभावेज्ञानमैहिकमन्यथावैपरीत्यमितिसिद्धं सूत्रोक्तप्रतिबंधंवि
भजते प्रतिबंधइति तत्राद्यप्रतिबंधतन्निवृत्त्युपायंचसदृष्टांतमाह भूतेति भाविप्रतिबंधंविभजते भावीति ननुप्रारब्धस्यकर्मणोज्ञानप्रतिबंधकत्वेकस्य
चिदपिब्रह्मसाक्षात्कारोनस्यात् तथाचश्रोतव्यइत्यादिविधेरप्रामाण्यापत्तिरित्याशंक्यतत्परिहाराय प्रारब्धकर्मविभजते तत्रप्रारब्धमिति तत्राद्यंफलभोगेनेव
सीयतइत्याह तत्रेति तयोर्मध्येइत्यर्थः स्वर्गोमेभूयादित्यादीच्छाफलाभिसंधिः अस्तुततः किंतत्राह तस्मिन्निति फलाभिसंधिकृतेकर्मणितत्रयुक्तिमाह तस्येति
इच्छाघटितसामग्र्याः प्रबलत्वेनेतरकार्योत्पत्तिप्रतिबंधकत्वात्तस्यप्राबल्यमितिभावः फलाभिसंधिकृतस्यप्राबल्येप्रमाणमाह तथाचेति सपुरुषः यथाकामःय 



फलितमाह तादृशेति द्वितीयस्यफलाभिसंधिरहितस्यप्रारब्धस्यकर्मणः पुण्यस्यब्रह्मज्ञानोत्पत्त्यनुकूलत्वमाह केवलमिति फलाभिसंधिरहितमित्यर्थः सुकृ
तप्रारब्धस्यफलाभिसंधिरहितस्यपापनिवृत्तिद्वारातत्वज्ञानानुकूलत्वेप्रमाणमाह तथाचेति पापप्रारब्धंफलाभिसंधिकृतंकेवलंचोभयमपिज्ञानप्रतिबं
धकमेवप्रबलतरत्वेनजैकेनतिरोभूयगच्छति अन्यथाज्ञानोत्पत्तिंबध्नातीतिभावः अस्तुप्रकृतेकिमायातमित्याशंक्याह एवंचेति तथाचभोगेनभाविप्रतिबं
धस्ययेश्रवणादिनासाक्षात्कारसंभवात्नतत्साधनविधापिशास्त्राप्रामाण्यापत्तिरितिभावः ननुभाविप्रतिबंधस्यकियताकालेनक्षयोभवतीत्याशंक्यनतत्र
नियमोस्तीत्यभिप्रेत्यसंमतिमाह यथाहुरितिवामदेवस्यैकेनजन्मनाभाविप्रतिबंधः क्षीणः भरतस्यत्रिजन्मभिः क्षीणस्तथाचनकालनियमइतिभावः द्विती

तादृशप्रारब्धशेषः भाविप्रतिबंधः केवलप्रारब्धंतत्वज्ञानहेतुः पापनिवृत्तिद्वारा तथाचश्रुतिस्मृती धर्मेणपापमपनुदति ज्ञान मुत्पद्य
तेपुंसांक्षयात्पापस्यकर्मण इति कषायेकर्मभिः पक्वेततोज्ञानंप्रवर्त्ततइतिच एवंचभाविप्रतिबंधस्यप्रारब्धशेषस्यभोगेनानिवृत्तौ
सत्यपिश्रवणादौनज्ञानोदयः यथाहुः वामदेवस्यएकेनजन्मनाक्षीणोभरतस्यत्रिजन्मभिरिति ब्रह्मलोकेच्छायाब्रह्मसाक्षात्कारोत्पत्तिप्र
तिबंधकत्वंविद्यारण्यस्वामिनोवदंतिस्म ब्रह्मलोकाभिवांछायांसम्यक्सत्यांनिरुध्यतांविचारयेदात्मानंनतुसाक्षात्करोत्ययमितिस
पुनर्वेदांतश्रवणादिमहिम्नाब्रह्मलोकंगत्वानिर्गुणंब्रह्मसाक्षात्करोति तथाचश्रुतिः वेदांतविज्ञानसुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्ध
सत्वाः तेब्रह्मलोकेतुपरांतकालेपरामृतात्परिमुच्यंतिसर्वेइति॥ २२ यंभाविप्रतिबंधंविद्यारण्यवचनेनस्पष्टयति ब्रह्मलोकेति अभिवांछायामि॥
च्छायांतांनिरुध्येतियोजना ननुततकृतश्रवणादीनांव्यर्थत्वात्सकिमधः पततीत्याह सपुनरिति तत्रप्रमाणमाह तथाचेति नहिकल्याणकृत्कश्चिद्दुर्ग॥
तिंतातगच्छतीतिस्मृतिंचकारेणसमुच्चिनोति वेदांतविज्ञानेनश्रवणजनितेनसुष्ठुनिश्चितोऽर्थोऽद्वितीयब्रह्मरूपोयेषांतेनथोक्ताः संन्यासयोगात् श्रुतिस्मृ
तिविहितसर्वकर्मपरित्यागपूर्वकज्ञानाभ्यासयोगाच्छुद्धसत्वानिर्मलांतःकरणायतयःसंन्यासिनोयेतेब्रह्मलोकेनिर्गुणंब्रह्मसाक्षात्कृत्यपरस्यहिरण्यग
र्भस्यांतकालेऽवसानेपरामृताद्उत्पन्नसाक्षात्काराद्बंधनात्परिमुच्यंतेमुक्ताभवंतीत्यर्थः॥ ६॥

प्रतिसंचरे प्राकृतप्रलये संप्राप्ते सति परस्य हिरण्यगर्भस्यान्ते मुक्तिकाले ते सत्यलोकनिवासिनः कृतात्मानः प्राप्ततत्त्वसाक्षात्काराः सर्वे ब्रह्मणा सह परं पदं विदेहकैवल्यं प्रविशन्तीत्यर्थः ॥ १ ॥

तथा च स्मृतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति तत्रैव विदेहकैवल्यमनुभवन्तीत्याह स पुनरिति वर्त्तमानप्रतिबन्धं संमतिप्रदर्शनेनोत्पादयति वर्त्तमानेति विषयेति विषयेष्वासक्तिरागद्वेषादिनियावत् प्रज्ञाया बुद्धेर्मान्द्यं श्रुतार्थग्रहणधारणापटुत्वं कुतर्कः श्रुतिविरोधी तर्क इत्यर्थः विपर्यये आत्मनः कर्तृत्वे दुराग्रहः आत्मा कर्तैवेत्यभिमानः एतेषां चतुर्णां वर्त्तमानप्रतिबन्धानां निवृत्त्युपायं तत्संमत्या दर्शयति शमाद्यैरिति शमदमादिभिर्विषयासक्तिलक्षणस्य वर्त्तमानप्रतिबन्धस्य निवृत्तिः श्रवणेन प्रज्ञामान्द्यस्य मननेन कुतर्कस्य निदिध्यासनेन विपर्ययदुराग्रहस्य शमाद्यैरित्यनेन दमादयो गृह्यन्ते शमादीन् उपपदमेव निरूपयिष्यति श्रवणाद्यैरित्यादिशब्देन मनननिदिध्यासने गृह्येते श्रवणादीनि निरूपितानि तत्र तत्र तस्मिन् तस्मिन् प्रतिबन्धे प्रथमस्य

स पुनस्तत्रैवमुच्यते वर्त्तमानप्रतिबन्धं तन्निवृत्त्युपायं च विद्यारण्यस्वामिनो वर्णयांचक्रुः प्रतिबन्धो वर्त्तमानो विषयासक्तिलक्षणः प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः शमाद्यैः श्रवणाद्यैर्वा तत्र तत्रोचितैः क्षयं नीतेऽस्मिन् प्रतिबन्धे तु स्वस्य ब्रह्मत्वमश्नुते इति तत्र श्रवणादिभिः सकलप्रतिबन्धकनिवृत्त्या महावाक्याद् ब्रह्मसाक्षात्कारोत्पत्तौ शमदमोपरतितितिक्षाश्रद्धासमाधानान्यन्तरंगसाधनानि अन्तरिन्द्रियनिग्रहः शमः बाह्येन्द्रियनिग्रहो दमः उपरतिः संन्यासः तितिक्षा द्वंद्वसहिष्णुता श्रद्धा गुरुवेदान्तवाक्ये विश्वासः समाधानं श्रवणादिषु चित्तैकाग्र्यं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदित्यादिश्रुतेः ॥ २ ॥ निवृत्तौ शमादिरुचितः कारणत्वेन द्वितीयस्य निवृत्तौ श्रवणं तृतीयस्य मननं चतुर्थस्य निदिध्यासनं क्षयं नीते नाशं गते यथोक्तसाधनचतुष्टयेन यथोक्तवर्त्तमानप्रतिबन्धचतुष्टयेन क्षेत्रे सतीत्यर्थः स्वस्यान्तःकरणतद्वृत्तिसाक्षिणोऽहंपदलक्ष्यस्य ब्रह्मत्वमखण्डैकरसानन्दस्वरूपत्वमश्नुते मुमुक्षुरनुभवतीत्यर्थः श्रवणादिनाऽधिकारिणो ब्रह्मसाक्षात्कारोत्पत्ताविव अन्तरंगसाधनानि दर्शयति श्रवणादिभिरिति शमादीनि साधनानि उत्पादयति अन्तरिन्द्रियेति अन्तरिन्द्रियं मनः इदं मतान्तररीत्या द्रष्टव्यं अन्यथा पूर्वोत्तरव्याघातापत्तेरिति भावः पंच ज्ञानेन्द्रियाणि पंच कर्मेन्द्रियाणि बाह्येन्द्रियाणि द्वन्द्वशीतोष्णसुखदुःखमानावमाननिन्दास्तुत्यादीनि द्वंद्वानि श्रवणादीत्यादिशब्देन मनननिदिध्यासने गृह्येते चित्तस्यान्तःकरणस्यैकाग्र्यं ऐकाग्र्यं नाम विजातीयप्रत्ययतिरस्कारेणालक्ष्यैकगोचरसजातीयप्रत्ययप्रवाहः तदुक्तं शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणाम इति शमादीनामन्तरंगसाधनत्वं

समाहितचित्तस्य पूर्वप्रत्ययः शान्तः उत्तरस्तत्सदृश उदितो द्वावपि समाहितचित्तत्वेन तुल्यावेकरूपालम्बनत्वेन सदृशौ उभयत्रापि समाहितचित्तस्यान्वयित्वेनावस्थानमेकाग्रतापरिणाम इत्युच्यते इति यो० ॥ सू० ॥ १२ ॥



अत्र समुद्रपत्न्योर्गङ्गायमुनयोर्जलसन्निपाते संगमे अभिषेकात् ... ॥

तत्र संमतिमाह सूत्रकारोऽपीति बहिरंगसाधनानि दर्शयति यज्ञादय इति श्रवणादिना सकलप्रतिबन्धनिवृत्तौ वाक्याद् ब्रह्मसाक्षात्कारोत्पत्ताविव ... यज्ञादीनां सत्त्वशुद्धिद्वारा विविदिषोत्पादनमुखेन ब्रह्मसाक्षात्कारोपयोगाद् बहिरंगसाधनत्वमित्यर्थः तत्र प्रमाणमाह तमेतमिति वेदानुवचनेन ब्रह्मचर्येणाध्ययनेन वा विविदिषन्ति यज्ञेन दानं हितमितमेध्याशनं तपः अत एवानाशकेनेति विशेषणं केचित्तु नशनं वाक्कायानुष्ठानं वा तपः तपो नानशनात्परमित्यादिश्रुतिरिति वदन्ति अस्मिन्पक्षे नाशकेनेति पदच्छेदः अयमर्थः नाशकेन पृथूदकगंगायमुनासंगमादिषु बुद्धिपूर्वकतनुत्यागेन विविदिषोत्पत्तिद्वारा ब्रह्मसाक्षात्कारो भवति सम्यतीति हासपुराणेषूपलम्भात् अत एवोक्तं कालिदासेनापि समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात् तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्ध इति तत्त्वावबोधेन विनेति प्रशंसा अन्यथा ब्रह्म वेद ब्रह्मैव भवतीति श्रुतिविरोधप्रसंगात् ज्ञानमेवाज्ञाननिवर्तकं न कर्मेति न्यायविरोधापत्तेश्चेति अन्ये तु बुद्धिपूर्वकप्रयागादिमरणं युगान्तरविषयं त्रैवर्णिकव्यतिरिक्तविषयं वा कलिकाले सति सामर्थ्ये ब्राह्मणादीनां तन्निषेधात् धर्मशास्त्रे मरणान्तिकप्रायश्चित्तप्रतिषेधाच्चेति वदन्ति

वृ० ३० ४

सूत्रकारोऽप्याह शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वादिति यज्ञादयो
बहिरंगसाधनानि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः ॥

यज्ञादीनां समुच्चित्य विविदिषासाधनत्वमिति केचित् विकल्पेनेत्यपरे न च कर्मणां साक्षादेव मुक्तिसाधनत्वात् कथं विविदिषाहेतुत्वमिति वाच्यं ॥ मुक्तेरविद्यानिवृत्तेर्वा ब्रह्मभावस्य वाज्ञानैकसाध्यत्वात् शुक्त्यज्ञानस्याधिष्ठानसाक्षात्कारान्निवृत्तेर्दृष्टत्वाच्च ब्रह्मात्मभावस्यानादित्वाच्च मुक्तेः कर्मसाध्यत्वमनुपपन्नं तदुक्तं भ्रान्त्याप्रतीतः संसारो विवेकान्न तु कर्मभिः न रज्ज्वारोपितः सर्पो घण्टाघोषान्निवर्तत इति तस्माद्यज्ञादीनां विविदिषाहेतुत्वमेव न मोक्षहेतुत्वमिति अत्र च यज्ञादिश्रुतेरविशेषात् फलाभिसंधिमन्तरेणानुष्ठितानि नित्यनैमित्तिककाम्यप्रायश्चित्तरूपाणि सर्वकर्माणि विविदिषाहेतवः सगुणोपासनं चित्तैकाग्र्यहेतुरिति केचित् आचार्यास्तु काम्यानां कर्मणां न्यास इति स्मृत्या काम्यकर्मणामननुष्ठेयत्वं प्रतिपाद्य फलाभिसंधिमन्तरेण नित्यकर्माणि मुमुक्षुभिरनुष्ठेयत्वप्रतिपादनात् नित्यकर्माण्यग्निहोत्रादीनि विविदिषाहेतुत्वेन विधीयन्ते खादिरतावद्यूपायेत्याहुः ॥ ॥ ॥

यदि कश्चिन्मन्येत यज्ञादीनां विद्यासाधनभावो नेत्याश्रमो विध्यभावात् तु विद्यार्थी शमाद्युपेतः स्यात् तद्विधेः तेषां शमादीनामित्यादिपक्रम्य पश्चेदितिविधेः तदंगतया तस्या विद्याया अङ्गत्वेन विधिर्यतस्ततो विद्यार्थिनां तेषामवश्यानुष्ठेयत्वादन्तरङ्गसाधनत्वं तेषामिति ॥ शा० ॥ सू० ॥ ८ ॥

यतो ज्ञानादेव मोक्षः अत एव विद्यायाः स्वफले ऽग्नीन्धनादिकर्मणामनपेक्षा च कारः कारणान्तरं व्यावर्तयतीति ॥ शा॥ सू॥ अस्य मूलभवसूत्रेण पूर्वापरभावः॥ १॥ १॥
वाशब्दो विध्यभावं निराकरोति विधिरेवायम् अपूर्वार्थत्वात् पारणावत् उपरिहितेवेभ्यो धारयतीत्यत्र न हूत् स निचाश्रमान्तरे ब्रह्मसंस्थत्वं न कर्मिणामित्यभिप्राय इति॥ शा०॥ सू०॥ ७॥

कौ॰ यज्ञादीनां बहिरंगसाधनत्वे सूत्रसंमतिमप्याह सर्वापेक्षा चेति तृतीये स्थितं ब्रह्मविद्या मुक्तिफले जनयितव्ये कर्माणि नापेक्ष्यं त इत्युक्तमत एव चाग्नींधनाद्यनपे
प्र॰ क्षेत्यत्र इदानीं ब्रह्मविद्या स्वोत्पत्तौ कर्माण्यपेक्षते न वेति संशये नापेक्षत इति तावत्प्राप्तं प्रमाणप्रवृत्तौ सत्यां ज्ञानस्य स्वत एवोत्पत्तिसंभवेन कर्मणां तत्राप्रयोज
८२ कत्वात् किंच स्वर्गोद्देशेन यजेतेति यागविधिवत् ब्रह्मज्ञानोद्देशेन कर्मविधानाभावान्न कर्मणां ज्ञानहेतुत्वं न च विविदिषन्तीति विविदिषावाक्ये तदुद्देशेन तद्वि
धानात् कर्मणां ज्ञानहेतुत्वमिति वाच्यं तत्र विधिप्रत्ययाश्रवणेन वर्तमानोपदेशतया तस्य स्तावकत्वात्तस्माद्ब्रह्मविद्या स्वोत्पत्तौ कर्माणि नापेक्षत इति प्राप्ते ब्रूमः
अस्ति सर्वकर्मापेक्षा ब्रह्मविद्यायाः स्वोत्पत्तौ कस्मात्तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतेः न च वर्तमानोपदेशितया ऽनु
वादकत्वेनास्य स्तावकत्वमिति वाच्यं विविदिषासंयोगस्यापूर्वत्वेन लेट्परिग्रहेण विधायकत्वोपपत्तेः अन्यथा उपांशुयाजमन्तरा यजति पूषा प्रपिष्टभाग इत्यादौ सर्वत्र
विध्यभावप्रसंगः विधिर्वा धारणवदिति सूत्रविरोधप्रसंगश्च स्यात्तस्माद्यथाश्वः लांगलाकर्षणे ऽयोग्यतया न नियुज्यते किंतु योग्यत्वेन रथचर्यायां नियुज्यते तथा कर्मा
सर्वस्याश्रमादिकर्मकलापस्य विद्योत्पत्तावपेक्षा कुतः यज्ञेन दानेनेत्या[illegible]दिश्रुतेः अश्ववदिति [illegible] यथाश्वो रथवहने [illegible] पेक्षितो न तु लाङ्गलवहने तथा विद्याया उत्पत्तौ कर्मापेक्षा न तु ज्ञानफल इति॥ शा॥ सू॥ १॥ मू०

**सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदित्यप्युक्तम्॥ ७॥**

शमादीनां ४ — यज्ञेन दानेनेत्यादिश्रुतेः ४॥

णि ब्रह्मविद्यया मोक्षफले जनयितव्ये नापेक्ष्यन्ते तेषां तत्रायोग्यत्वात्स्वोत्पत्तौ त्वपेक्ष्यन्ते चित्तशुद्धिविविदिषोत्पत्तिद्वारा तद्योग्यत्वात् तथा च स्मृतिः कषायपक्तिः कर्माणि ज्ञानं
तु परमा गतिः कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इति ज्ञानस्य प्रमाणफलत्वेपि पापिष्ठस्य श्रुतेपि वाक्ये ब्रह्मज्ञानानुदयेन कर्मणां पापनिवृत्तिद्वारा ब्रह्मसाक्षात्का
रहेतुत्वं भवत्येव यदि कर्मणां तद्धेतुत्वमनुपपन्नमित्याग्रहस्तथापि शमदमाद्युपेतः स्यादधिकारी शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदि
त्यादितद्विधेः शमादेर्विधानात् विहितानां तेषां ब्रह्मविद्यांगतयावश्यानुष्ठेयत्वात् न च कर्मणां विद्योत्पत्तावत्यन्तानपेक्षा यज्ञादिश्रुतेः नन्वेवमपि शमादीनामन्तरंग
साधनत्वं कुतो ऽवगम्यत इति चेत् शृणु एवं तस्मादेवंविच्छान्तो दान्त इति शमदमादीनां विद्यासंयोगावगमादन्तरंगसाधनत्वं विद्योत्पत्तौ यज्ञादीनां विविदिषन्ति यज्ञेनेत्या
दीनां विविदिषासंयोगावगमाद्बहिरंगसाधनत्वमिति विवेकः न चैवमन्तरंगबहिरंगसाधनविवेकेन किं प्रयोजनमिति वाच्यं ज्ञानसाधनश्रवणादिप्रवृत्तेः तेन विनाऽसं ॥ रामः
भवात् नहि कश्चिदन्तरंगबहिरंगसाधनमज्ञात्वा सर्वकर्मसंन्यासपूर्वकं श्रवणादौ प्रवर्तते तस्मात्तद्विवेकोपि वैराग्यादिवच्छ्रवणादिप्रवृत्तौ कारणमेवेति सप्रयोजन एवे ८२
कषायाणां मलानां पक्तिः पाकः कर्माणि भवन्ति तत्साधनेन निर्देशात् ज्ञानं तु परमा गतिः स्वर्गादिगत्यपेक्षया परमा गतिः [illegible] मिति यावत् कर्मभिः संध्यावन्दनाग्निहोत्रादिभिः कषाये मले पक्वे सति ततः अनन्तरं ज्ञानमुत्प
द्यते न त्वपापनिवृत्ति [illegible] साक्षात्कारहेतुत्वं [illegible] ॥ २॥

मुमुक्षो॥ ४॥ — ज्ञानिन्यध्यासाभावात् ६॥ — विषय ३

एवमन्तरंगबहिरंगसाधने निरूप्य सहकारिसंपन्नमहावाक्याद्ब्रह्मसाक्षात्कारेण ज्ञाननिवृत्तौ मुमुक्षुस्थितिमुपसंहरति तदेवमिति यस्मात्कारणात्प्रतिबंधनन्नि
वृत्त्युपायान्तरंगबहिरंगसाधनानि निरूपितानि तस्मात्कारणादेवमुक्तेन प्रकारेण मननादीत्यादिशब्देन निदिध्यासनं गृह्यते न तु ज्ञानेनाज्ञाने निवृत्ते विषयानुभ
वो ऽनुपपन्नः मुमुक्षोर्देहाभिमानशून्यत्वात् न च प्रारब्धवशात्तदनुभव इति वाच्यं क्लृप्तकारणाभावे तदयोगाद्देहाभिमाने सत्येव प्रमाणप्रमेयव्यवहारदर्शनात् तद
भावे चादर्शनात् अन्वयव्यतिरेकाभ्यां देहाभिमानस्य विषयानुभवं प्रति कारणत्वस्य क्लृप्तत्वात् तदभावे ज्ञानिनां प्रारब्धवशात्कथं विषयानुभवः स्यादत एवोक्तं
भाष्यकृता तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिकाः वैदिकाश्च प्रवृत्ता इति अन्यथा व्यवहारो ऽध्यासपू
र्वकः व्यवहारत्वादित्यस्य ज्ञानिव्यवहारे ऽनैकान्तिकत्वप्रसंगात् न च ज्ञानिनामपि बाधितानुवृत्त्या देहाभिमानसत्वान्नानैकान्तिकतेति वाच्यं शुक्तिसाक्षात्कारे
ण तदज्ञाननिवृत्त्या रजतभ्रमनिवृत्तौ पुनस्तदनुवृत्तेरदृष्टत्वादन्यथा तत्रापि तत्प्रसंगः न च सोपाधिकस्य लेशुक्तः स्फटिक इति साक्षात्कारे सत्यपि जपाकुसुमोपा

रजतभ्रमे १

**तदेवं मननादिसंस्कृतचित्तदर्पणेन सहकृतविचारितमहावाक्येनोत्पन्नेनाहं ब्रह्मास्मीत्यप्रत्यवरुद्धब्रह्मसाक्षात्कारेण ज्ञाननिवृ**
**त्ते संचितकर्मणां नष्टत्वादागामिकर्मणामश्लेषात् प्रारब्धापादितविषयमनुभवन् मुमुक्षुरखण्डैकरससच्चिदानन्दब्रह्मात्मनावति**
**॥ष्ठते ॥**

अभिमानमर २ — भक्तेनो =

धिसन्निधाने लोहितः स्फटिक इत्यनुभवस्य सार्वजनीनत्वात्तथात्रापि भविष्यतीति वाच्यं तद्वदत्रोपाधेरनिरूपणात्तस्माज्ज्ञानेनाज्ञा
ने निवृत्ते तत्कार्यनिवृत्त्या ज्ञानिनः प्रारब्धवशाद्विषयानुभवो ऽसंगत एवेति उच्यते ज्ञानिनो निवृत्ताज्ञानस्य प्रारब्धवशाद्विषयानुभव उपपद्यते न च क्लृप्त
कारणं देहाभिमानाभावे कथं स इति वाच्यं बाधितानुवृत्त्या तस्य सत्वात् न च कारणीभूताज्ञानस्य निवृत्तत्वेन तत्कार्यस्य देहाभिमानस्य कथमनुवृत्तिरुपादान
नाशे सत्युपादेयानुवृत्तेरदृष्टचरत्वादिति वाच्यं उपादाननाशानन्तरं क्षणमुपादेयानुवृत्तेस्तार्किकैरभ्युपगतत्वेन तथास्माकमपि संभवात् न च तेषामभ्युपग
मस्याप्रामाणिकत्वात्सिद्धान्तेपि तथा प्रसज्येतेति वाच्यं अस्माकं श्रुतिस्मृतियुक्त्यनुभवप्रमाणानां सत्वात् न च एवमपि यदुपादाननिवर्तकं तदुपादेयनिव
र्तकमपि भवतीति ज्ञानस्याज्ञान ॥ ॥ न्यायेन १॥ तस्य तावदेव चिरं इत्यादया १॥ येषां मते समवायिकारणनाशात्कार्यनाशो भवतीति तन्मताभिप्रायेणेदम्॥ २॥

इतरेषु कृतदुःखफलेन आरब्धकार्ये भोगेन क्षपयित्वा ऽनन्तरं ब्रह्मसम्पद्यत इति॥ शा०॥ सू०१॥
ज्ञाने१॥ फलाप्रवृत्तप्रवृत्तफलत्वस्वभावत्वेन स्यादिति॥२॥ प्रासनाद्विर्गतशरवत्॥२॥ अज्ञानेन३॥ ज्ञान१॥ वार्तिकाचार्यैः७ विस्तार७॥

अ॰ कौ॰ तत्कार्यनिवर्तकत्वेन तस्मिन्सति देहाभिमाननिवृत्तेरावश्यकत्वेन कथं ततो विषयानुभव इति वाच्यं तदपेक्षया प्रारब्धस्य प्रबलत्वात् तथाहि यद्यपि ज्ञानम
तृ॰ प्र॰ ज्ञानतत्कार्यनिवर्तकं तथापि प्रवृत्तफलत्वान्मुक्तेषुवत्प्रारब्धं तत्त्वज्ञानात्प्रबलं तस्य ज्ञाननिवृत्तिरपि ज्ञानान्नस्यात् प्रबलेन प्रारब्धेन तस्य प्रतिबंधादिति
८३ चेन्न ज्ञानस्याज्ञाननिवर्तकत्वांशे प्रारब्धस्याप्रतिबंधकत्वात् तेन विनापि स्वफलभोगोपपत्तेः पुरुषस्याज्ञानकार्याभावे कर्मफलभोगासंभवात् ज्ञानस्याज्ञान
कार्यनिवर्तकत्वांशं प्रारब्धं प्रतिबध्य पुरुषस्य फलं प्रयच्छतीत्यतो ज्ञानेनाज्ञाननिवृत्तावपि ज्ञानिनो बाधितानुवृत्त्या देहाभिमानसत्त्वेन प्रारब्धापादितविषयभोगो न
विरुध्यते तथा च पारमर्षसूत्रं भोगेन त्वितरे क्षपयित्वा संपद्यत इति तदभिप्रायतो भगवान् वार्तिककारोप्याह स्म शास्त्रार्थस्य समाप्तत्वान्मुक्तिः स्यात्तावतापि ते ग
गादयः संतु कामं न तद्बाधोऽपराध्यते १ इति सर्ववेदांतरहस्यज्ञैर्विद्यारण्यैरप्युक्तं अप्रवेश्य चिदात्मानं पृथक् पश्यंत्यहं कृतिं इदं तु कोटिवस्तूनि न बाधो ग्रंथिभे
दिनः॥१॥ ग्रंथिभेदेपि संभाव्या इच्छा प्रारब्धभोगतः बुध्वापि पापबहुल्याद्दसंतोषाय यथा तवेति॥२॥ ननु तैरेव रागादिः प्रतिषिद्धः रागो लिंगमबोधस्य चित्तव्या
याममभूमिषु॥ न चाध्यात्माभिमानोपि विदुषोस्त्यासुरत्वतः विदुषोप्यासुरत्वं चेन्निष्फलं ब्रह्मदर्शनमिति१ उद्धृतत्त्वो न विध्यर्ह इति चेद्वासनाबलात् अबुद्ध इव
संक्लिश्यन् विधिं ध्यानेन तदार्हति॥१॥ इत्याक्षेपपूर्वकं ज्ञानिनो ध्यानविधिमंगीकुर्वद्भिर्विद्यारण्यैरप्याभासरागोपि ज्ञानिनः प्रतिषिध्यत इति मैवं आचार्यैरध्यास
पूर्वकरागस्यैव प्रतिषेधात् अन्यथा पूर्वोत्तरव्याघातः स्यात् सर्वथा वर्तमानोपि न स भूयोऽभिजायत इति स्मृतिविरोधश्च प्रसज्येत विद्यारण्यवचनमप्यह
दज्ञानिविषयं दृढज्ञानिनो ध्यानविध्यसंभवः तत्त्वविद् विरोधित्वात् लौकिकं सम्यगाचरेदित्यादिनोक्तत्वात् पुनश्चाग्रे विस्तरेणाज्ञानिनो ध्यानविध्यसंभवं वक्ष्या
मः ननु तर्हि ज्ञानिनो यथेष्टाचरणं किमभ्युपगम्यते भ्रांतोसि न हि वयं ज्ञानिनो यथेष्टाचरणमप्यभ्युपगच्छामः किं तर्हि प्रारब्धभोगानुकूलाभासरागद्वेषानु
वृत्तिं न तत्त्वज्ञानविरोधिनी अन्यथा तत्त्वज्ञानमेव न स्यात् कस्यापि तदुक्तं कादाचित्कं रागलेशं चिकित्सितुमशक्नुवन् यो ब्रह्मनिष्ठां संद्वेष्टि कदा स्यात्तत्त्वनि
श्चयः॥१॥ इति एतेनैव बाधितदेहाभिमानानुवृत्तौ ज्ञानिनोभ्युपगम्यमानायां बाधितरजतभ्रांत्यनुवृत्तिरपि स्यादिति प्रत्युक्तम् शुक्तिज्ञानस्य भ्रमनिवर्तकत्वांशे
प्रतिबंधाभावात् अथवा मुमुक्षोः तत्त्वज्ञानानंतरं अज्ञानलेशानुवृत्त्या प्रारब्धभोगोस्तु तदुक्तं द्वैतच्छायारक्षणाय स्ति लेशोऽस्मिन्नर्थे स्वानुभूतिः प्रमाणमिति रामः
ननु ज्ञानेन निवृत्तस्याज्ञानस्य कोयं लेशो नाम न तावदवयवः निरवयवत्वेन सावयवमज्ञानमित्यभ्युपगमात् ॥ ८३
प्रारब्धभोगीकारेण३॥ ज्ञानिन्याभासरागाद्यंगीकारेण४॥ भक्तिः१॥

विक्षेपशक्तिमदज्ञानस्य॥
अवयविनि निवृत्ते सत्यवयवानुवृत्तेरयोगाच्च नापि शक्तिरेव लेशः ज्ञानेन शक्तिमतोऽज्ञानस्य नाशे निराश्रयशक्त्यवस्थानायोगात् तस्मात्कथं लेशानुवृत्त्या
भोग इति उच्यते ज्ञानेनावरणशक्तिनाशात्त्याध्यासो नश्यतः अज्ञानं विक्षेपशक्तिमद्वर्तते अयमेव लेश इत्युच्यते विक्षेपशक्तेर्ज्ञानाविरोधित्वात् तेन प्रारब्ध
भोगो ज्ञानिनो न विरुध्यते नन्वेवं तर्हि तेनैव जन्मांतरमपि ज्ञानिनः स्यादिति चेन्न निमित्ताभावात् न ह्यज्ञानं स्वरूपेण जन्महेतुः किं तर्हि धर्माधर्मौ तावपि न प्रा
रब्धौ जन्मांतरहेतू किंत्वनारब्धौ तत्स्थितिहेतुरावरणशक्तिमदज्ञानं तस्य ज्ञानेन निवृत्तौ संचितकर्मापि नष्टत्वादागामिकर्मणामश्लेषात् भोगेन प्रारब्धस्य क्षया
च्छरीरारंभककारणाभावान्न ज्ञानिनो जन्मांतरं विक्षेपशक्तिमदज्ञानं तु दग्धबीजवत् प्रारब्धभोगोपयोगिविषयोपदर्शनहेतुर्न जन्मांतरहेतुः तन्निवृत्तिस्तु
प्रतिबंधकप्रारब्धक्षयादेव न तत्र ज्ञानमपेक्षते तदवस्थानप्रयोजकीभूतावरणशक्तिमदज्ञानस्य पूर्वमेव निवृत्तत्वात् तस्माज्ज्ञानेनाज्ञाननिवृत्तावपि तल्लेश

एतादृशं फलं चतुर्थाध्यायपठनेन भवतीति सांप्रदायिकानां रीतिः अन्ये तु गुरुमुखात्संपूर्णशास्त्रपठनं श्रवणं तस्य पठितस्य युक्तिभिरनु
संधानं मननं तस्यैव पुनरावृत्तिर्निदिध्यासनं अनंतरं साक्षात्कार इत्याहुः वस्तुतस्तु शुद्धसत्त्वानां मुख्याधिकारिणां व्युत्पन्नानामव्युत्पन्नानां
च श्लोकेन श्लोकार्धेन वा ब्रह्मसाक्षात्कारो भवत्येव॥ ११ नुवृत्त्या ज्ञानिनः प्रारब्धभोगो न विरुध्यते यद्वा आवृतितादात्म्ये केवलाज्ञानकृते अत एव ज्ञानो
त्पत्त्या नश्यतस्तयोर्निरुपाधिकभ्रमत्वात् कर्मसहिताविद्याकृतो विक्षेपस्तु नश्यद्विद्ययाऽविद्यानिवृत्तावपि प्रारब्धक्षयपर्यंतं विक्षेपो न निवर्तते तस्य सोपाधिकभ्रम
त्वात् कर्मसहितविक्षेपशक्तिमदज्ञानमुपाधिः भोगेन प्रारब्धक्षये ज्ञानेन स्वावस्थानप्रयोजकीभूतावरणशक्तिमदज्ञाननिवृत्त्याऽनारब्धकर्मनिवृत्त्या च तैलव
र्तिनाशे दीपनाशवद्विक्षेपशक्तिमदज्ञानं स्वयमेव नश्यति न तत्र योगं वा ज्ञानं वाऽपेक्षते प्रमाणाभावात् तथाहुः अविद्याऽऽवृतितादात्म्ये विद्ययैव विनश्यतः विक्षे
पस्य स्वरूपं तु प्रारब्धक्षयमीक्षते॥१॥ इति ततश्च ज्ञानिनो विषयानुभवस्य सोपाधिकतया साक्षात्काराविरोधित्वेन तत्त्वज्ञानेनाज्ञाननिवृत्तेपि प्रारब्धापादितविषयमनु
भवन्मुमुक्षुर्ब्रह्मात्मनाऽवतिष्ठत इत्यविरोधः तस्मात्सर्वं समंजसं इदं फलं कुतो भवतीत्याह एतादृशमिति शारीरक इति शेषः मतांतरमाह अन्ये त्विति॥ ननु शास्त्रा
नधिकारिणां मैत्रेयीप्रभृतीनां विदुरप्रभृतीनां च तदधिकारिणां जनकजडभरतप्रभृतीनां शास्त्रश्रवणादिकमंतरेण सिद्धगीतादिश्रवणमात्रेण श्रुतिस्मृतीतिहासपुर
विक्षेपशक्तिमतः५॥

श्रीः रा॰ प्र॰ ८४

सगुणब्रह्मसाक्षात्कारपर्यंतं कृतोपासका मुख्याधिकारिणः जन्मांतरश्रवणादिसामग्रीसंपन्नाः प्रतिबंधवश्यान्मानुषं जन्म प्राप्ता वा मुख्याधिकारिणः विदितपदपदार्थसंगतिकाः व्युत्पन्नास्तद्विपरीता अव्युत्पन्नाः ननु भवतु व्युत्पन्नानामुक्तप्रकारेण साक्षात्कारः अव्युत्पन्नानां संगतिग्रहाभावात्कथं वाक्याद्ब्रह्मसाक्षात्कार इत्याशंक्याह शब्दस्येति यथा सुप्तप्रबुद्धस्येंद्रियार्थसन्निकर्षानंतरं चक्षुरादिना घटादिसाक्षात्कारो जायते तथाऽतीतानेकजन्मसुकृतपरिपाकवशेन भगवदनुगृहीतस्य नितांतनिर्मलस्वांतस्य श्लोकश्रवणेन श्लोकार्द्धश्रवणेन वाक्यमात्रश्रवणेन वा ब्रह्मसाक्षात्कारो भवत्येव न ह्युन्मत्तानां विक्षिप्तचित्तानामिंद्रियार्थसन्निकर्षानंतरं घटादिषु विपरीतव्यवहारो दृष्ट इति स्वस्थचित्तानामपि तादृशश्चव्यवहारो भवतीति शक्यं कल्पयितुं एवं विषयाभिलाषिणां रजस्तमोवृत्त्युपचितचित्तानां पंडितानां ब्रह्मसाक्षात्काराभावेऽपि करुणामृतवारिराशिभक्तवत्सलश्रीकृष्णानुगृहीतस्य निरस्तरजस्तमोवृत्तिस्वांतस्य वाक्यमात्रश्रवणेन ज्ञानोत्पत्तौ बाधकाभावात्कोऽपि दोष इति भावः ननु तर्हि शारीरकादिशास्त्रप्रणयनं व्यर्थं स्यात्तेन विनापि ब्रह्मसाक्षात्कारसंभवादित्याशंक्याह शास्त्रेति मुख्याधिकारिणां श्लोकेन श्लोकार्धेन वा

१टादि१॥

**शब्दस्याचिंत्यशक्तित्वात् शास्त्रस्य शारीरकादेरमुख्याधिकारिविषयोपपत्तेः तदुक्तं महाभारते आत्मानं विंदते यस्तु सर्वभूतगुहाशयं श्लोकेन यदि वार्द्धेन क्षीणं तस्य प्रयोजनमिति सांप्रदायिकैरप्युक्तम् वाक्यश्रवणमात्रेण पिशाचवदवाप्नुयादिति॥ २॥**

यस्मात्१

ब्रह्मसाक्षात्कारो भवतीत्यत्र वचनमुदाहरंति तदुक्तमिति विंदते लभते साक्षात्करोति देहादिविलक्षणत्वेनात्मानं स्वस्वरूपं सच्चिदानंदलक्षणमपरिच्छिन्नं यैश्चाप्नोति यदादत्ते यच्चात्ति विषयानिह यच्चास्य संततो भावस्तस्मादात्मेति चोच्यते १ इति स्मरणात् आत्मा त्रिविधपरिच्छेदशून्यो भवति पुनः कथंभूतं सर्वभूतगुहाशयं सर्वेषां भूतानां ब्रह्मादिस्थावरांतानां हृदि गुहायामंतःकरणे शेते तत्साक्षितया तिष्ठतीति सर्वभूतगुहाशयं सर्वभूतबुद्धिसाक्षिणमित्यर्थः तस्य ज्ञानिनः मानुषानंदमारभ्य ब्रह्मानंदांतस्य त्रिरूपप्रयोजनं श्लोकेन श्लोकार्धेन वा देहादिविलक्षणप्रत्यग्रूपाखंडैकरसानंदात्मलाभे क्षीणमंतर्भूतं एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेरित्यस्य श्लोकस्य तात्पर्यार्थः तत्र नैष्कर्म्यसिद्धिश्लोकार्द्धमुदाहरंति सांप्रदायिकैरपीति कृत्स्नानात्मनिवृत्तौ तु कश्चिदाप्नोति निर्वृतिं श्रुतवाक्यस्मृतेश्चान्यः स्मायते चवचोऽपर इति पूर्वश्लोकः अत्र चत्वारः श्रोतारः विराट् भृगुः श्वेतकेतुः पिशाचश्चेति तत्र श्वेतकेतोरत्यन्तापेक्षायामपीतरेषां तदभावान्मुख्याधिकारिणां श्लोकेन वा त

प्रसंगे१॥

पूर्वमस्मानि२॥ असंभावनाविपरीतभा०५॥ संशये४॥

ननु मुख्याधिकारिणां व्युत्पन्नानामव्युत्पन्नानामुक्तप्रकारेण ब्रह्मसाक्षात्कारे संपन्ने कर्तव्यशेषोऽस्ति न वेति विमर्शे निर्णयमाह एतावानिति अत्र व्यवहारभूमौ अव्युत्पन्नानां ब्रह्मसाक्षात्कारानंतरं ध्याननिष्ठाऽपेक्षितेति संबंधः तत्र युक्तिं वक्ति परतंत्रेति परतंत्रा परोपदेशाधीना प्रवृत्तिर्येषां ते तथोक्ताः परतंत्रप्रवृत्तास्तेषां भावस्तत्त्वं तस्मादित्यर्थः अस्तु परतंत्रप्रवृत्तत्वं साक्षात्कारानंतरं किं ध्याननिष्ठयेत्याशंक्याह असंभावनेति आदिशब्देन विपरीतभावना गृह्यते तथा चाव्युत्पन्नानां स्वतः प्रमाणकुशलत्वाभावादुत्पन्नस्यापि साक्षात्कारस्यासत्संगादिदोषवशेनासंभावनाविपरीतभावनाभ्यां प्रतिबद्धस्याज्ञाननिवर्तकत्वायोगात् परमपुरुषार्थो न स्यादतो निरंतरं ध्याननिष्ठायामभ्यस्यमानायामसत्संगादीनामभावात्प्रतिबंधककारणाभावेनाप्रतिबद्धसाक्षात्कारेण परमपुरुषार्थः संभवतीति ध्याननिष्ठाऽवश्यमपेक्षितेति भावः तत्र गीतावचनमुदाहरंति तदुक्तमिति ध्यानदीपकश्लोकमुदाहरंति विद्यारण्यैरिति पंचीकरणोक्तप्रकारेण निर्गुणं ब्रह्म ध्यातव्यमित्यर्थः तेन ध्यानेन किं भवतीत्याशंक्य वि

**एतावानत्र विशेषः अव्युत्पन्नानां परतंत्रप्रवृत्तत्वात् असंभावनादिसंभवात् ध्याननिष्ठाऽपेक्षिता तदुक्तं भगवता अन्ये त्वेवमजानंतः श्रुत्वान्येभ्यः उपासत इति विद्यारण्यैरप्युक्तं अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोऽनिशं इति मरणे ब्रह्मलोके वा तत्त्वं ज्ञात्वा विमुच्यते इति च पतंजलिनाप्युक्तं ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्चेति प्रमाणाकुशलानां संशयादिग्रस्तानां पंडितानामपि ध्याननिष्ठाऽपेक्षिता॥ ३॥**

परमेश्वरस्य३॥ वाक्यश्रवणमात्रेण४॥

द्यारण्यसंमत्युत्तरमाह मरणे इति उक्तार्थे योगसूत्रं संवादयंति पतंजलिनेति ततः परमात्मध्यानात्प्रत्यक्चेतनाधिगमः प्रत्यगात्मसाक्षात्कारः ज्ञानोत्पत्तौ सकलप्रतिबंधनिवृत्तिश्च भवतीति शेषः तदुक्तं बादरायणेन पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययाविति श्रुतिरपि ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इति॥ नन्वव्युत्पन्नानां प्रमाणकौशल्याभावेन परतंत्रप्रवृत्ततया ब्रह्मसाक्षात्कारानंतरं संभावितप्रतिबंधवारणाय ध्याननिष्ठापेक्षायामपि प्रमाणकुशलानां पंडितानां स्वतंत्रप्रवृत्तत्वेन ध्याननिष्ठानापेक्षितेत्याशंक्य किं सर्वेषां सा नापेक्षिता उत केषांचित् न द्वितीयः इष्टापत्तेरित्यभिप्रेत्य नाद्यः नानाशास्त्रपरिशीलनेन जन्मांतरीयदुरितवशेन च संशयविपर्ययसंग्रस्तानां पंडितानामुत्पन्नस्यापि साक्षात्कारस्याप्रमाणशंकाकलंकितत्वेनाज्ञाननिवर्तनक्षमत्वाभावात् परीक्ष्य यो न गृह्णाति गृह्णाति च विपर्ययात् दृढपूर्वश्रुतत्वाच्च प्रमादाच्चापि लौकिकात्॥ १॥ चतुर्भिः कारणैरेते

नित्यशुद्धत्वादिकं नास्तीति न किन्तु तिरोहितं तर्हि प्रादुर्भावे क उपायस्तत्राह पराभिध्यानात् परस्परमात्मनोऽभिध्यानान्निदिध्यासनात् उत्पन्नसाक्षात्कारस्य प्रादुर्भवति कुत इत्यत आह ततो ह्यस्य बन्धविपर्ययौ हि यस्मात् ततः परमात्मनः सकाशादस्य जीवस्य तदज्ञानाद्बन्धः संसारः ज्ञानाद्विपर्ययो मोक्षः ज्ञात्वा देवमित्यादिश्रुतेरिति॥ शां०भा०सू०॥५॥

कार्यं३ प्रकृतमेवैतावत्त्वं२॥ रूपद्वयम्४॥ स्थूलपंचभूतं२॥ सूक्ष्मपंचभूतं२॥

नांब्रह्मापरोक्षज्ञानिनांध्याननिष्ठापेक्षाभावेपितद्विपरीतानांध्याननिष्ठापेक्षितैवेत्याह प्रमाणेति तथासंशयादिनिवृत्त्याऽप्रतिबद्धब्रह्मसाक्षात्कारेणपरमपुरुषार्थोमो
क्षस्तेषांभवतीतिभावः॥तत्राचार्यसंमतिमाह तदुक्तमितितृतीयेस्थितंप्रकृतैतावत्त्वंहिप्रतिषेधतितनोब्रवीतिचभूयःद्वेवावब्रह्मणोरूपेमूर्त्तंचैवामूर्त्तंचेति उपक्रम्या
धिदैवमथाध्यात्मंचब्रह्मणोमूर्तामूर्तलक्षणेद्वेरूपेमूर्तामूर्त्तेरसौसमष्टिव्यष्टिरूपौमहारजनाद्युपमलिंगगतवासनारूपंचोपन्यस्याम्नायते अथात आदेशो अ
स्तिनेतिनेतीति अत्रयद्यपिनिषेध्यंकिंचिन्नप्रतीयतेतथापीवंशब्दसमानार्थकेनेतिशब्देनसंनिहितवाचिनानिषेध्यंकिंचित्समर्प्यते तत्रसंशयः किमत्ररूपे
परिशिनष्टिब्रह्मप्रतिषिध्यत आहोस्वित् ब्रह्मपरिशिनष्टिरूपेप्रतिषिध्येत इतितत्रप्राप्तंतावद्रूपेपरिशिनष्टिब्रह्मप्रतिषिध्यतइतिकुतइतिचेत् प्रत्यक्षादि
सिद्धस्वरूपादेःप्रतिषेधायोगात् यतोवाचोनिवर्त्तन्तेऽप्राप्यमनसासहेतिश्रुत्याब्रह्मणोवाङ्मनसातीतत्वप्रतिपादनेनतस्यैवनिषेधोयुक्तइतिप्राप्तेऽभिधीय
तेनतावद्ब्रह्मणःप्रतिषेधःसंभवतिरूपिणंविनारूपानवस्थानात् किंचब्रह्मव्यतिक्तस्यमूर्त्तामूर्त्तलक्षणस्यकार्यत्वपाऽनित्यत्वेनब्रह्मप्रतिषेधेशून्यवादः

## तदुक्तं अपिसंराधनेप्रत्यक्षानुमानाभ्यामिति॥

प्रसज्येततर्हिकिंप्रतिषिध्यतइतिचेत् प्रकृतैतावत्त्वंहिप्रतिषेधतिनेतिनेतीतिश्रुतिः पूर्ववाक्येप्रकृतंब्रह्मणोरूपत्वेनोपन्यस्तंमूर्तलक्षणंतद्रसंनद्धतवास
नारूपमेतावन्मात्रंप्रतिषेधति अथात आदेशोनेतिनेतीतिनरूपिणंब्रह्मप्रतिषेधतिशून्यवादप्रसंगात्सर्वप्रतिषेधेआदरार्थेनेतिनेतीतिवीप्साइदंकुतो
ज्ञायतइतिचेत् ततःप्रतिषेधानंतरंभूयोब्रवीतिनह्येतस्मादितिनेत्यन्यत्परमस्तीतिकोर्थःनेत्येतस्मान्निषेधावधिभूताद्ब्रह्मणःअन्यत्परंनह्यस्तीतियोजनाय
द्यनुनेत्येतस्मादितिदेशादन्यत्परमतिदेशांतरंनह्यस्तीतियोजनाक्रियतेतदा ततोब्रवीतिचभूयइत्यस्यायमर्थः॥ततःनेत्यादेशानंतरोभूयोब्रवीतिश्रुतिः अथ
नामधेयंसत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यमिति यदुक्तंप्रमाणसिद्धस्यरूपस्यप्रतिषेधायोगादितितदसत् रूपस्याविद्याविलसितत्वेनतद्बोधकमाना
नामाभासत्वात् यच्चोक्तंब्रह्मणोवाङ्मनसातीतत्वप्रतिपादनेनप्रतिषेधोयुक्तइतितन्नुक्तंनहिब्रह्मणोनिरात्मकतयावाङ्मनसातीतत्वंप्रतिपाद्यतेकिंतर्हिब्रह्मणः
सर्वेषांतःप्रत्यागात्मतयाऽविषयत्वेनश्रुत्यातत्प्रतिपाद्यतेतस्माद्ब्रह्मपरिशिनष्टिरूपेप्रतिषेधतितर्ह्येतद्ब्रह्मसर्वैःकस्मान्नगृह्यतइतिचेत् अव्यक्तत्वात् तदपिकुतइ

नामएववर्दति३॥ स्थूलशरीरापेक्षयालिंगशरीराणि३॥



अस्थूलमनणुयत्तदद्रेश्यमग्राह्यं अव्यक्तोयमचिंत्योयमविकार्योयमुच्यत इत्यादिश्रुतिस्मृतिभिरिंद्रियाद्यग्राह्यत्वप्रतिपादनाद्ब्रह्मणोऽव्यक्तत्वं॥तर्हि
तत्ब्रह्ममुमुक्षवःकथंकदासाक्षात्कुर्वंतीत्याकांक्षायांतत्प्रकारंसूत्रकारोभगवाननुपदिशति अपीतिसंराधनेध्यानकालेएकाग्रचित्तेनप्रत्यगात्मतयाब्रह्म
साक्षात्कुर्वंतिकस्मात् प्रत्यक्षानुमानाभ्यांप्रत्यक्षंश्रुतिःप्रमाण्यंप्रतिनिरपेक्षत्वात् अनुमानंस्मृतिःप्रमाण्यंप्रतिसापेक्षत्वात् श्रुतिस्तावत् ज्ञानप्रसादेनविशु
द्धसत्वस्ततस्तुतंपश्यतिनिष्कलंध्यायमानःकश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नित्याद्या यंविनिद्राजितश्वासाःसंतुष्टाःसंयतेन्द्रियाःज्यो
तिःपश्यंतियुंजानास्तस्मैयोगात्मनेनमः॥१॥इत्याद्यातत्तश्च ध्यानेनप्रतिबंधनिवृत्तौब्रह्मसाक्षात्कारात्मोक्षोभवत्येवंतर्हेदंध्यानंसर्वसाधारण्येनोपदिश्यमानं
संशयादिग्रस्तपंडितकर्त्तव्यत्वेनोपदिष्टमितिकथमुच्यतइति वाच्यं शास्त्रदृष्ट्यातूपदेशोवामदेववदित्यत्रसंशयादिरहितानांपंडितानांतत्वमस्यादिमहावा
क्यार्थज्ञानमात्रेणपरमपुरुषार्थप्रतिपादनेनास्यसूत्रस्यसंशयादिग्रस्तपंडितविषयत्वावगमात् अन्यथापूर्वोत्तरयोर्विरुद्धवदत्सूत्रकारउन्मत्ततुल्यःस्यात्

## अन्यत्राप्युक्तंबहुव्याकुलचित्तानांविचारात्तत्वधीर्नचेत् योगोमुख्यस्ततस्तेषांधीदर्पस्तेननश्यतीति संशयादिरहितानां।
## ध्याननिष्ठाचेत्स्यादृष्टसुखंतदुक्तंभगवता अनन्याश्चिंतयंतोमांयेजनाःपर्युपासतेतेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहमिति॥ ॥

तस्मादिदंसूत्रंसंशयादिग्रस्तपंडितविषयमेवनसर्वसाधारणमितिभावः॥संमत्यंतरमाह अन्यत्रेतिधीदर्पःसंशयादिः ननुकेचित्ज्ञानिनःसंशयादिरहिताःपं
डिताःध्यानंकुर्वंतोदृश्यंतेनतुकिमर्थंकुर्वंतीत्याशंक्यादृष्टसुखार्थमित्याह संशयेपंडितानामित्यनुषंगः दृष्टेतितदर्थंध्यानंकुर्वंतीतिभाः तत्रभगवद्वचनमु
दाहरति तदुक्तमितिनविद्यतेऽभिनिवेशोऽन्यस्मिन्मायिकेयेषांतेऽनन्याःमांसर्वेषांप्रत्यगात्मानंवासुदेवंज्ञेयंयत्तत्प्रवक्ष्यामीत्युपक्रम्य अनादिमत्परंब्रह्म
नसत्तन्नासदुच्यतइत्यादिनाप्रतिपाद्यमानंचिंतयंतः अन्वेषणंकुर्वंतःयेजनाःसाधनचतुष्टयसंपन्नाःपर्युपासतेविजातीयप्रत्ययानंतरिततयाध्यानं
कुर्वंतिअतएवनित्याभियुक्तानांतेषामहंयोगक्षेमंवहामि अप्राप्तप्राप्तिर्योगःप्राप्तस्यपरिपालनंक्षेमः नन्वखंडैकरसानंदब्रह्मात्मनिष्ठानांलौकिकानंदजाता
स्यतत्रैवांतर्भावात्प्राप्तनाशस्यैवाभावात् ब्रह्मानंदस्यप्रत्यग्रूपतयानित्यप्राप्तत्वात् कथंभगवान् तेषांयोगक्षेमंवहामीतिवदतीतिचेत् उच्यतेयद्यपितेषामप्रा

नंदात्मनोऽवस्थानं योग इत्युपचर्यते प्रबलप्रारब्धभोगेनापि ब्रह्मनिष्ठातोऽप्रच्युतिः क्षेम इत्युपपर्यते एतादृशयोगक्षेममेव वहामीति भगवानाह त्य॥
क सर्वैषणानामन्यादृशयोगक्षेमवहनायोगात् अतो ध्याननिष्ठानां निरंतरं दृष्टसुखं भवतीति भावः॥ भगवद्वचनांतरमुदाहरति मच्चित्तेति मयि सर्वे
षां प्रत्यगात्मन्यखंडानंदैकरसे नित्यशुद्धबुद्धमुक्तस्वभावे वासुदेवे चित्तं येषां तेन तथोक्ताः एवं सर्वत्रबोध्यं नन्वेवं ज्ञानिनां ध्यानविधिः कुतो न स्यात्॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति श्रुतेः सत्वात् न चैवं साक्षात्कारमुद्दिश्य निदिध्यासनविधिरेवेति वाच्यं धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः इति सा
क्षात्कारोत्तरकालं ध्यानविध्यवगमादन्यथा विज्ञायेति क्त्वाप्रत्ययविरोधः स्यात् न च साक्षात्कारेण परमपुरुषार्थलाभात्तदुत्तरं ध्यानविधिर्निष्फल इति वाच्यं
इदानीं ब्रह्मसाक्षात्कारे सत्यपि यथापूर्वं सुखदुःखादिसंसारोपलंभान्न तावता पुरुषार्थसिद्धिः किंतु गुरूपसत्तिपूर्वकं श्रवणादिना ब्रह्म निश्चित्य यावज्जीवं ब्र
ह्मध्यानाभ्यासः कर्तव्य एव अन्यथा यथेष्टचेष्टाप्रसक्त्या मुमुक्षोर्नरकपातः स्यात् यथाहुः निःसंगता मुक्तिपदं यतीनां संगादशेषाः प्रभवंति दोषाः आरूढयोगो

मच्चित्ता मद्गतप्राणा बोधयंतः परस्परमिति ननु ज्ञानिनो ध्यानविधिर्देहाभिमानशून्यतया कर्तृत्वाभावेन तस्य विधिकिंकरत्वायोगा

रागेण ३॥

पि निपात्यतेऽधः संगेन योगी किमुताल्पसिद्धिरिति अतो विषयासंगलक्षणाय यथेष्टचेष्टानिवृत्त्यर्थं ध्यानविधिरपेक्षितः तदप्युक्तं संगं त्यजेत भिक्षु ॥त्॥
तद्वृत्तीनां मुमुक्षुः सर्वात्मना न विसृजेद्धि हि रिंद्रियाणि॥ एकश्चरेद्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः१ इति न चेदं साधकविषयं न सिद्धविषयं
मिति वाच्यं यस्माद्विक्षुर्हिरण्यं रसेन दृष्टं चेत् स ब्रह्महा भवेदित्यादिना सिद्धस्यापि विषयासक्त्यापातित्याभिधानात् तमेव धीरो विज्ञायेति श्रुतिमूलत्वाच्च अत
एव वेदांतशास्त्रं ध्यानविधिपरमिति वदंति अन्यथा प्रवृत्तिनिवृत्तिप्रयोजनत्वाभावेन परिनिष्पन्नवस्तुपरतयाऽनुवादकत्वेन शास्त्रस्याप्रामाण्यप्रसंगात् तस्मा
च्छास्त्रेण ज्ञानानंतरं ध्यानविधानात् सर्वैर्मुमुक्षुभिः पंडितैरपंडितैः संशयादिरहितैः ब्रह्मज्ञानोत्तरं यावज्जीवं ब्रह्मध्यानं कर्तव्यमेवेत्याशंक्याह ननु ज्ञानिन इति
देहाभिमानो द्विविधः कर्मजो भ्रांतिजश्चेति कर्मजस्य यावदायो निवर्तते द्वितीयस्याज्ञानमूलत्वेन ज्ञानेनाज्ञाने निवृत्ते तन्मूलभ्रांतेरपि निवृत्तत्वाज्ज्ञातिजोऽभिमानो
पि निवर्तते ततश्च ज्ञानिनो देहाभिमानशून्यस्य कर्तृत्वादिनिवृत्तौ सर्वाधिकारनिवृत्तेः कुतो ध्यानविधिः तदुक्तं व्याचस्पतिना शास्त्राणि वेदाध्याययंतु वा येत्राधिका

वेदांतशास्त्रस्य विधिपरत्वानंगीकारे ध्यानेयाप्रवृत्तिनिवृत्त्योपाभिवृत्तिसाभ्यांपदेदांतशास्त्रस्य दुःखनिवृत्तिसुखावाप्तिरूपप्रयोजनत्वेनस्याभावेन ४॥ संगंत्यजेरित्यस्य ५॥



यथेष्टचेष्टा ६॥ सिद्धपरत्वेन २॥ नद्ब्रह्मजगत्कारणं कुतो वेदांतानां तस्मिन्नेव तात्पर्यात् ३॥ अनुवादकत्वस्य ४॥

विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यय इति न चैवं शास्त्रस्याप्रामाण्यापत्तिः ब्रह्मात्मभावस्यमानांतरायोग्यतया शास्त्रस्य विधिपरत्वानंगीकारे ततः प्रवृत्तिनिवृ
त्त्यभावेन शास्त्रत्वमेव न स्यादिति वाच्यं हि न शासनात् शास्त्रत्वोपपत्तेः न चैवमप्यनुवादकत्वेनाप्रामाण्यमिति वाच्यं ब्रह्मणो मानांतरायोगात्वेन तद्योगात् तस्मा
द्वेदांतशास्त्रं न ध्यानविधिपरं अत एव सूत्रकारभाष्यकाराभ्यां समन्वयाध्याये चतुर्थाधिकरणे तत्तु समन्वयादित्यत्र शास्त्रस्य विधिपरत्वं पूर्वपक्षीकृत्य सिद्धां
तेवस्तुनिष्ठत्वेन वेदांतानां प्रामाण्यं समर्थितं नन्वेवं सति तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति श्रुतेरप्रामाण्यप्रसंग इति न विज्ञायेत्यनेन श्रवणजन्यज्ञानस्यै
व विवक्षितत्वेन तदुत्तरं साक्षात्कारमुद्दिश्य ब्रह्मध्यानविधानोपपत्तेः नाप्रामाण्यं श्रुतेः न चैवमपि साक्षात्कारानंतरं ध्यानविध्यनंगीकारे यथेष्टचेष्टाप्रसंग
इति वाच्यं देहाभिमानशून्यत्वेन तद्योगात् निःसंगता मुक्तिः पदं संगं त्यजेतेति वचनद्वयस्य साधकविषयत्वाच्च यद्यपि यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत्स
दिवाक्यं विद्वत्संन्यासप्रकरणे पठितं सिद्धविषयमिवाभाति तथापि सिद्धस्य देहाभिमानशून्यतया रागादिप्रसक्तेरभावेन साधकविषयमेवेदं वाक्यं सिद्धं स्तो।

## तदुक्तं अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवदिति॥ ६॥

तितदेतत्सर्वमभिप्रेत्याह देहाभिमानेति ज्ञानिनो ध्यानविध्यभावे व्यासस्त्रं संवादयति तदुक्तमिति अधिकरणं पूर्वमनुक्रांतं यद्यात्मा ब्रह्म स्यात्तर्ह्यनुज्ञापरिहा
रौ निर्विषयौ स्यातामिति चेत् न देहसंबंधात् देहाभिमानात् गृहस्थः सदृशीं भार्यामुपेयादित्यनुज्ञा गुर्वंगनां नोपगच्छेदिति परिहारः एतावनुज्ञापरिहारौ देहा
भिमानात् आत्मनोऽब्रह्मत्वज्ञानदशायामुपपद्येते ब्रह्मज्ञानदशायामात्मनस्तदभावात् उभयमपि नास्त्येव तत्र ज्योतिरादिवदिति दृष्टांतः यथाऽग्निः श्मशा
नसंबंधी परिह्रियते अन्यस्तूपादीयते यथा वा पुरीषं मनुष्यशरीरसंबंधि परित्यज्यते गवां शरीरसंबंध्युपादीयते तस्य पवित्रत्वात् तद्वद्देहाभिमानिनोऽ
नुज्ञापरिहारौ तच्छून्यस्य ज्ञानिनो न किमपि कर्तव्यमस्ति तदुक्तं यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १ नैव त
स्य कृतेनार्थो नाकृतेनेह कश्चन॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय॥ २॥ इति पुराणेप्युक्तं ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः॥ नैवास्ति किंचित्क
र्तव्यमस्ति चेन्न स तत्वविदिति॥ तथात्मनो देहाभिमानादनुज्ञापरिहारौ दर्शयत्सूत्रं अर्थात्तच्छून्यस्य ज्ञानिनः सर्वकर्तव्याभावं दर्शयतीत्यभिप्रायः॥ ॥

देहाभिमानस्य ५॥

अ॰ कौ॰
टी॰ प्र॰
८७

तत्रभाष्यसंमतिमाह भाष्यकारैरिति सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति श्लोकोक्तलक्षणं भाष्यं कुर्वन्तीति
भाष्यकाराः तैरित्यनेन ब्रह्मविदां वचनमपि संवादयति गौणेति आत्मा त्रिविधः गौणात्मा मिथ्यात्मा मुख्यात्मा चेति पुत्रभार्यादयो गौणात्मानः अन्नमयाद
यः पंचकोशाः मिथ्यात्मानः तेषामधिष्ठानभूतो यश्चिदात्मा सद्यानंदैकरसः स मुख्यात्मा आत्मनोऽसत्त्वे इत्यार्षत्वाद्रूफलोपो न दोषाय ननु स्वगौणमिथ्यात्म
नोरसत्त्वेपि मिथ्यात्वनिश्चये पुत्रदेहादीनामात्मत्वबाधनात्सर्वेषामधिष्ठानभूतसच्चिदानंदैकरसब्रह्माहमस्मीति बोधे साक्षात्कारे जाते सति कार्यं कर्त्तव्यं क
थं भवेत् न किमपि कर्तव्यं स्यादित्यर्थः तथा च श्रुतिः स ब्रह्मणः केन स्याद्येन स्यात्तेनेदृश एवेति एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान्
नित्याद्यास्मृतिरपि एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृदित्याद्या ज्ञानिनः सर्वकर्तव्यताभावं कृतकृत्यतां च द

भाष्यकारैरप्युक्तं अहंब्रह्मास्मीत्येतदवसाना एव सर्वे विधयः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति देहेंद्रियादिष्वहं
ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति च गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् तत्सद्ब्रह्माहमस्मीति
बोधे कार्यं कथं भवेदित्युक्तं ज्ञानिनो ध्यानाभावे व्यवहारप्राचुर्याद्दृष्टदुःखमात्रं न मोक्षप्रतिबंधः॥ २२ शंकयति तस्माज्ज्ञानिनः कर्त्तव्यताभावाद्ध्या

न निष्ठा चेत् स्यात्तदा दृष्टसुखं भवति न तद्विधिगंधोपीति भावः ननु ज्ञानिनो ध्यानविध्यभावे प्रारब्धवशेन बहिर्व्यवहारप्रसक्त्याऽसंभावनादिप्रसक्त्या मोक्षो न
स्यादित्याशंक्याह ज्ञानिन इति दृष्टेति। दृष्टेतिमात्रशब्देनासंभावनादिव्यावर्तनेन हि श्रवणमनननिदिध्यासनैर्निश्चिततत्त्वस्य स्वतो निर्धूतस्य करतलामलकवत्
स्वस्वरूपमद्वयानंदमनुभवतः संशयादि संभवति तदुक्तं विद्याविग्रहमग्रहेणापिहितं मृत्यं च मुच्चैस्तरामुत्कृष्योत्तमपूरुषं मुनिधियामुंजादिषीकामिव को
शात्कारणकार्यरूपविकृतात्पश्यामि निःसंशयं नासीदस्ति भविष्यति क्वनुगतः संसारदुःखोदधिरिति॥१॥ ननु मास्तु संशयादिः अज्ञानमेव मोक्षप्रतिबंधकं स्या
त्कथमन्यथा प्रारब्धभोग इत्याशंक्याह नेति अपरोक्षज्ञाने विरोधिनि सति ब्रह्मज्ञानायोगात् बाधितानुवृत्त्या द्वैतदर्शनमात्रेण प्रारब्धभोगोपपत्तेः न मोक्षप्रतिबंधः त
दुक्तं वार्तिकाचार्यैः तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः अविद्या सह कार्येण नासीदस्ति भविष्यति॥१॥ संक्षेपशारीरकाचार्यैरप्युक्तं॥ पश्यामि वि राम॰ ८

अहिः शुर्पः निर्ल्वयनी तत्कंचुकः तद्वच्छरीरं स्वरूपेणाहं पश्यामीत्यर्थः॥२॥ रज्जुभुजग॥

त्रमिव सर्वमिदं द्वितीयं तिष्ठामि निष्कलचिदेकवपुष्यनंते आत्मानमद्वयमनंतसुखैकरूपं पश्यामि दग्धरशनामिव च प्रपंचं॥ अद्वैतमप्यनुभवामि क
रस्थबिल्वतुल्यं शरीरमहिनिर्ल्वयनीवदीक्षे॥ एवं च जीवनमिव प्रतिभासनं च निःश्रेयसाधिगमनं च मम प्रसिद्धमिति॥१॥ तस्मात् ज्ञानेनाज्ञानतत्कार्यसं
शयादीनां निवृत्तत्वात्प्रारब्धाधीनव्यवहारे सत्यपि मोक्ष उपपद्यत इति भावः॥ तत्र संमतिमाह तदुक्तमिति समन्वयलक्षणे स्थितं ईक्षतेर्नाशब्दं स
देव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेत्यादिश्रुत्या जगतः कारणं किंचित् श्रूयते तत्र संशयः प्रधानादिजगत्कारण
महोस्विद्ब्रह्मैवेति संशये तत्र ज्ञानक्रियाशक्तिमत्त्वात् परिणामित्वाच्च त्रिगुणात्मकं प्रधानमेव जगत्कारणं न ब्रह्म तस्यापरिणामित्वादिति प्राप्तेऽभिधी
यते न प्रधानं जगत्कारणं सच्छब्दवाच्यं अशब्दं यतः कथमशब्दमिति चेत् तदैक्षत बहु स्यां प्रजायेयेति कारणस्येक्षितृत्वश्रवणात् ईक्षितृत्वस्य चेतन

तदुक्तं तन्निष्ठस्य मोक्षोपदेशादिति तस्मिन् ब्रह्मात्मनि निष्ठाऽनन्यव्यापारतया परिसमाप्तिः पर्यवसानं यस्य स तथोक्तस्तस्य ज्ञानै
कशरणस्येति यावत् तथा भगवानप्याह॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोपि न स भूयोभिजायते १ यस्य ना
हंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यते। २ इति शेषो ष्ठि हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघात
लक्षाणि परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलशय इति॥ २३ धर्मत्वात्प्रधानस्याचेतनत्वेन तद्योगात् ननु प्रधानस्यापि गौणमीक्षि

पृथिव्यप्तेजांसि॰ ईक्षितृत्व॰१

तृत्वं भविष्यतीति चेत् न सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति कारणे सत्यात्मशब्दप्रयोगात् अचेत
नेन तद्योगात् अचेतनेप्यात्मशब्दो गौणो भविष्यतीत्याशंक्य तदुत्तरत्वेनेदमाह तन्निष्ठस्येति सूत्रं व्याचष्टे तस्मिन्निति अयमर्थः यदि प्रधानं जगत्कारणं स्या
त्तर्हि आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्षेऽथ संपत्स्ये इति तन्निष्ठस्य मोक्षोपदेशो न स्यात् न ह्यचेतनप्रधाननिष्ठस्य मोक्षोपदेशः संभ
वति तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति परमात्मविज्ञानादन्यस्य मोक्षसाधनत्वप्रतिषेधात् किंच तत्त्वमसीति चेतनस्य श्वेतकेतोरचे
तनतादात्म्यनिष्ठोपदेशायोगात् न तत् ज्ञानान्मोक्षः संभवति तस्मान्न प्रधानं जगत्कारणं किंतु ब्रह्मैव न तन्निष्ठस्य मोक्षोपदेशाद्ब्रह्मज्ञानैकशरणस्य न मो
प्रधानं जगत्कारणं न किंतु ब्रह्मैवेति २॥

कौ॰ प्र॰ ८८

अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचेतिभगवद्वचनाच्चेतिभावः तत्रभगवत्संमतिमाह तथैवेतिपुरुषंपूर्णमपरिछिन्नानंदस्वरूपमितियावत् गुणैः
सत्वादिभिः सहप्रकृतिंचनिवृत्तांचवेत्तीति संबंधः निवृत्ताविद्योब्रह्मीभूतः सर्वथासर्वप्रकारेणवर्त्तमानः यथेष्टव्यवहारंकुर्वन्नपीत्यर्थः उक्ताभिप्रायोभगव
तैवोह्याटिनइतिदर्शयितुमष्टादशाध्यायश्लोकमुदाहरति यस्येति उक्तार्थेशेषवचनमुदाहरति शेषोपीति हयमेधोऽश्वमेधः परमार्थविदहंब्रह्मास्मीतिब्र
ह्मसाक्षात्कारवान्॥ दृढवचनांतरमाह विद्यारण्यैरितिवैराग्योपरमावन्योद्वौवैराग्यबोधोपरमाः सहायास्तेपरस्परंप्रायेणसहवर्त्तंतेनवियुज्यंतेक्वचित् क्व
चित् वैराग्यादीनांपरस्परसहायत्वमुक्त्वा क्वचित्क्वचित्कस्यचिद्वियोगमुक्त्वाकस्यपुंसः त्रयाणांसहावस्थानंकेनवाकस्यचिद्वियोगोभवतीत्याकांक्षायांत्र
योप्यन्यंतपक्वाश्चेन्महतस्तपसः फलंदुरितेनकदाचित्किंचित्कदाचित्प्रतिबध्यतइतिकस्यचिदुत्तमाधिकारिणः पुरुषधौरेयस्यमहतातपसापरमेश्वरानुग्रहे
णचवैराग्यादीनांसहावस्थानमुक्त्वामध्यमाधिकारिणः दुरितेनत्रयाणामन्यतमस्यप्रतिबंधमुक्त्वाकस्मिन् पूर्णेकिंफलंभवतीत्याकांक्षायांवैराग्योपरती

विद्यारण्यैरप्युक्तं पूर्णेबोधेतदन्यौद्वौप्रतिबद्धौयदातदामोक्षोविनिश्चितः किंतुदृष्टदुःखंननश्यतीति बोधस्यपूर्णत्वावधिर्विष्णुपुराणे
पराशरेणदर्शितः अहंहरिस्सर्वमिदंजनार्दनोनान्यत्ततः कारणकार्यजातं ईदृङ्मनोयस्यनतस्यभूयोभवोद्भवाद्वंद्वगदाभवंतीति॥ ७

पूर्णबोधस्तुप्रतिबध्यतेयस्यतस्यतमोक्षोस्तिपुण्यलोकस्तपोबलादितिवैराग्योपरमयोः पूर्णत्वेबोधस्यप्रतिबंधेफलमुक्त्वातद्विपरीतइदमाह पूर्णइति तत
श्चत्रयाणांसाधनस्वरूपंफलंचतैरेवव्युत्पादितं॥ दोषदृष्टिर्जिहासाचपुनर्भोगेष्वदीनता असाधारणहेत्वाद्यावैराग्यस्यत्रयोप्यमी॥१॥ श्रवणादित्रयंत
द्वत्तत्वमिथ्याविवेचनंपुनर्ग्रंथेरनुदयोबोधस्यैतेत्रयोमताः॥२॥ यमादिर्धीनिरोधश्चव्यवहारस्यसंक्षयः स्युर्हेत्वाद्याउपरतेरित्यसंकरईरितं॥३॥ इतित्र
याणांपूर्णत्वावधिश्चदर्शितः॥ ब्रह्मलोकतृणीकारोवैराग्यस्यावधिर्मतः सुप्तवद्विस्मृतिःसीमाभवेदुपरमस्यहि॥१॥ देहात्मवत्परात्मत्वदार्ढ्येबोधःसमा
प्यत॥ इतितत्तश्चयस्यबोधः पूर्णोवैराग्योपरमौप्रारब्धकर्मणाप्रतिबद्धौयदातदातस्यमोक्षःसिद्धएवब्रह्मवेदब्रह्मैवभवतिब्रह्मविदाप्नोतिपरमित्यादिश्रुतेः
किंतुप्रारब्धकर्मवशेनव्यवहारप्राचुर्याद्दृष्टदुःखंननश्यतीतितन्निवर्तकस्ययोगस्यप्रतिबद्धत्वादितिभावः नचप्रारब्धापेक्षयायोगस्यप्रबलत्वात्कथंतस्य ८

प्रारब्धेनकर्मणाप्रतिबध्यत्वादित्यर्थः १॥

ष्यापिप्रबलत्वात्तदुक्तं अवश्यंभाविभावानांप्रतीकारोभवेद्यदितदादुःखैर्नलिप्येरन्नलरामयुधिष्ठिराइतितत्रबोधेपूर्णेवैराग्योपरमयोः प्रतिबंधेपिमो
क्षोभवतीत्युक्तं तत्रबोधस्यपूर्णत्वंकीदृशमित्याकांक्षायामसंभावनाविपरीतभावनाराहित्यंब्रह्मसाक्षात्कारस्यपूर्णत्वमित्यभिप्रेत्यतत्रविष्णुपुराणवच
नमुदाहरतिबोधस्येति अज्ञानतत्कार्यंहरतीतिहरिर्भगवान् वासुदेवः परमात्मातत्तोहरेः कारणंचकार्यजातंचकारणकार्यजातंअन्यत्किमपिनास्तिकार्य
कारणयोर्ब्रह्मणिकल्पितत्वेनतद्व्यतिरेकेणाभावादितिभावः द्वंद्वगदाः शीतोष्णमानावमानादिद्वंद्वव्याधयः संशयविपर्ययशून्यतयागुरूपदिष्टम

ब्रह्मगीतायांब्रह्माणंप्रतिशिवेनोक्तं अहंहिसर्वंनचकिंचिदन्यन्निरूपणायामनिरूपणायां इयंहिवेदस्यपरात्मनिष्ठा
ममानुभूतिश्चनसंशयश्चेतिउपदेशसहस्रिकायामपिदेहात्मज्ञानवज्ज्ञानंदेहात्मज्ञानबाधकं आत्मन्येवभवेद्यस्यसो
ऽनिच्छन्नपिमुच्यतेइति अयमस्मीतिपूरुषः इत्यत्रायमितिश्रुतेस्तात्पर्यंप्रतिपादनव्याजेनविद्यारण्यैरपिदर्शितं
तृप्तिदीपे असंदिग्धाविपर्यस्तबोधोदेहात्मनीक्ष्यते तद्वदात्मनिनिर्णेतुमयमित्युच्यतेपुनरितिसर्वथापिश्रवणादिना
ब्रह्मसाक्षात्कारः ततोब्रह्मभावलक्षणामुक्तिर्भवतीतिसिद्धम् तमेवविदित्वातिमृत्युमेति इति तरतिशोकमात्मविदिति॥

हावाक्याद्ब्रह्मसाक्षात्कारेसत्यज्ञानंतत्कार्यंचविनश्यतितरतिशोकमात्मविदितिश्रुतेरितिभावः॥ तत्रस्कंदपुराणवचनमप्युदाहरति ब्रह्मेतिशिवेना
पिबोधस्यपूर्णत्वावधिर्दर्शितइत्यनुषज्यतेतत्राचार्यवचनमप्युदाहरति उपदेशेतिग्रन्थान्तरसंमतिमप्याह अयमित्यादिनापरमप्रकृतमुपसंह
रति सर्वथेति ततः किंतत्राह ततइतितंपरमात्मानंविदित्वाहंब्रह्मास्मीतिसाक्षात्कृत्यमृत्युंसंसारकारणमज्ञानमत्येतिअतिक्रामतिनाशयतीत्यर्थः
शोकमितिसंसारकारणाज्ञानमुपलक्ष्यते सम्यक्प्रसीदत्यस्मिन् जीवइतिसंप्रसादः सुषुप्तिः सुषुप्तिवाचकेनसंप्रसादशब्देनतद्वान् जीवोलक्षण
याप्रतिपाद्यते ॥ ७ ॥ ७ ॥

अ·कौ अस्माच्छरीरात्स्थूलसूक्ष्मरूपात् समुत्थायविवेकेनतदभिमानंत्यक्त्वास्वेनरूपेणाब्रह्माभिनिष्पद्यते अयमर्थः अहंब्रह्मास्मीतिस्वस्वरूपेणब्रह्मसाक्षा
तृ·प्र त्कृत्य परंज्योतिः संपद्यते परमात्माभवतीतियोब्रह्मीभूतः सउत्तमः पुरुषः उद्गतनिवृत्ततमअज्ञानंयस्मात्सोत्तमः अज्ञानतत्कार्यातीतः पुरुषः पू
८९ र्णः नैतेनकिंचनानावृतंनैतेनकिंचनासंवृतमितिश्रुतेः॥ अयंनित्यापरोक्षस्वरूपः पुरुषएवपूरुषःसर्वसाक्षी अहमस्मीत्यात्मानंप्रत्यगात्मानंजा
नीयाच्चेत्कश्चित्सः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदितिसंबंधः अत्रचेदितिज्ञानाधिकारिणोऽत्यंतदुर्लभत्वंसूचयतिकश्चिद्धीरः प्रत्यगात्मा

ब्रह्मवेदब्रह्मैवभवतीति एवमेवैषसंप्रसादोऽस्माच्छरीरात्समुत्थायपरंज्योतिरुपसपद्यस्वेनरूपे
णाभिनिष्पद्यतेसउत्तमः पुरुषः॥ आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन् कस्यकामा
यशरीरमनुसंज्वरेदिति यत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीतिकृतकृत्योभवति ॥ ० ॥ ० ॥

नमेस्तदितिश्रुत्यंतरान्मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये यततामपिसिद्धानांकश्चिन्मांवेत्तितत्वतः इतिभगवद्वचनाच्चकृतकृत्यंयेनासौ
कृतकृत्यः एतत्कृतकृत्यत्वंविद्यारण्यश्रीपादैः प्रपंचितं ऐहिकामुष्मिकव्रातसिध्यैमुक्तेश्चसिद्धयेबहुकृत्यंपुराऽस्याभूत्तत्सर्वमधनाकृतं१ तदेतत्
कृतकृत्यत्वंप्रतियोगिपुरःसरंअनुसंदधदेवायमेवतृप्यतिनित्यशः॥२॥ दुःखिनोऽज्ञाःसंसरंतुकामंपुत्राद्यपेक्षयापरमानंदपूर्णोहंसंसरामिकिमिच्छयार
अनुतिष्ठंतुकर्माणिपरलोकयियासवःसर्वलोकात्मकःकस्मादनुतिष्ठामिकिंकथं४ व्याचक्षतांतेशास्त्राणिवेदानध्यापयंतुवायेत्राधिकारिणोमत्यांना राम
धिकारोऽक्रियत्वतः॥५॥० ॥ ० ॥ ० ॥ ८९

निद्राभिक्षेस्नानशौचेनेच्छामिनकरोमिचद्रष्टारश्चेत्कल्पयंतिकिंमेस्यादन्यकल्पनात् ६ गुंजापुंजादिदह्येतनान्यारोपितवह्निनानान्यारोपितसंसारध
र्मानेवमहंभजे७ इत्यादिएतद्ब्रह्मात्मतत्वंबुद्धाहंब्रह्मास्मीतिसाक्षात्कृत्यबुद्धिमान्कुशलःनत्रशेषवचनमुदाहरतिशेषोपीतितस्माद्विचारितत्वम

एतद्बुद्धाबुद्धिमान्स्यात्कृतकृत्यश्चभारतइतिश्रुतिस्मृतिशतेभ्यः शेषोप्याह त्वसाग्राच्युतपादोयद्रदनिच्छन्नपिक्षितौ
पततितद्वद्गुणपुरुषज्ञोऽनिच्छन्नपिकेवलीभवतिइति॥ इतिश्रीतत्वानुसंधानेतृतीयः परिच्छेदः समाप्तः॥ ० ॥

स्यादिवाक्यजन्यसाक्षात्कारेणनित्यनिरतिशयाखंडैकरसानंदब्रह्मभावलक्षणामुक्तिर्भवतीतिसिद्धम् ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्री
मत्स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीमुनिवरविरचितेतत्वानुसंधानव्याख्यानेऽद्वैतचिंताकौस्तुभेतृतीयःपरि
च्छेदः॥३॥समाप्तोयमद्वैतकौस्तुभेतृतीयपरिच्छेदः॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

## इत्यद्वैतकौस्तुभस्यतृतीय परिच्छेदःसमाप्तः



यस्यप्रभोस्थावरजङ्गमेभ्योभव्यप्रदानायनभेदलेशः॥गोप्यः प्रभोऽहंभवनेतिवाचंसमीहनेऽहंनमनीहमीडे ॥१॥

## अथाद्वैतकौस्तुभस्यचतुर्थ परिच्छेदप्रारम्भः

श्रौतमानस्वरूपाभ्यांयोगादिसाधनैस्तथा ॥ पञ्चप्रयोजनैश्चापिजीवन्मुक्तिरिहोच्यते॥२॥

ॐ श्रीगणेशायनमः॥ यस्यनाम्नो महत्वेनकुरूपोऽप्येकदन्तभाक्॥ पूज्योऽस्तिसर्वलोकेषु तन्नमामि रघूत्तमम्॥१॥ यच्चिन्तेति यस्यकृपास्यचिन्तया ध्यानेनन्यक्कृतेषणाविगतेच्छावन्तः संयमिनः शमादिसम्पन्ना महान्तः पूज्या अज्ञाननत्कार्यप्रपञ्चनिवर्तनेन तु परमात्मभावं सच्चिदानन्दस्वरूपमाप्ताःप्राप्तास्तमार्यकृपाणाधारणामहं प्रपद्ये प्रपद्येऽस्मीत्यर्थः॥१॥

जी॰ प्र॰ ९१

ॐ श्रीगणेशायनमः ॐ यच्चिन्तयाप्ताः परमात्मभावमज्ञाननत्कार्यनिवर्तनेन न्यक्केषणाः संयमिनो महान्तस्तंकृष्णमनाद्यंशरणंप्रपद्ये ननु ब्रह्मसाक्षात्कारा
द्विदेहमुक्तिरेकैव भवतिन जीवन्मुक्तिः तत्र प्रमाणाभावात् न च मुक्तश्च विमुच्यते स जीवन्मुक्त उच्यते स्थितप्रज्ञस्तदोच्यत इत्यादिश्रुतिस्मृतिवचनानां
सत्वात्कथं प्रमाणाभाव इति वाच्यं तेषामन्यपरत्वात् किंच केयं जीवन्मुक्तिः अज्ञाननिवृत्तिर्वा ब्रह्मभावो वा अहोस्विज्जीवदवस्थायां कर्तृत्वादिविधनिवृत्तिर्वा
नाद्यः विदेहमुक्तावतिव्याप्तेः अत एव न द्वितीयः नापि तृतीयः जीवदवस्थायां भोगप्रदे प्रारब्धे कर्मणि सति कर्तृत्वादिविधनिवृत्तेरयोगात् किंच कर्तृत्वादिविधः
किं साक्षिणो निवार्यते अहोस्विदहंकारान्नाद्यः तत्वज्ञानेनैव वारितत्वात् न द्वितीयः भोगप्रदप्रारब्धकर्मणि सत्यहंकारगतस्य स्वाभाविकस्य कर्तृत्वादेर्वार
णायोगात् न च योगेन तदभिभव इति वाच्यं योगात्प्रारब्धस्य वलवत्वात् किंच साधनाभावाच्च जीवन्मुक्तिर्न सिध्यति तत्वज्ञानस्य विदेहमुक्तिकारणत्वात् न च
योगाभ्यास एव तत्साधनमिति वाच्यं तस्य तत्वज्ञानसाधनत्वेनातत्साधनत्वात् ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः॥ नैवास्ति किंचित्कर्तव्यमस्ति चेन्न

साधनसम्पत्तेरवश्यफलदत्वेजीवन्मुक्तिप्रतिपादक वाक्यस्य तात्पर्य्यत्वादित्यर्थः॥५॥ ५॥

## साचमुक्तिर्द्विविधा विदेहमुक्तिर्जीवन्मुक्तिश्चेति॥

मुक्तस्य मोक्षप्रतिपादिका श्रुतिरेषा विदेहकैवल्यतः प्राग्जीवनमुक्तिं वोधयतितया च न प्रमाणाभाव इति भावः॥६॥

सतत्ववित्॥१॥ तस्य कार्यं न विद्यते इति च साक्षात्कारोत्तरं कर्तव्यप्रतिषेधाच्च किंच ज्ञानिनो देहाभिमानशून्यस्य कर्तृत्वाभावेन कर्तव्यप्रवृत्त्यसंभवे ननत्रा
धिकारासंभवात्तान संभवतिन हि निरधिकारजीवन्मुक्तिसाधनाभ्यासः संभवति किंच प्रयोजनं च न पश्यामस्तिस्मिद्धेः न च ज्ञानरक्षादिकमेव प्रयोजनमिति वाच्यं प्रमा
णजन्यज्ञानस्याज्ञाननिवर्तनक्षमस्य वाधकाऽप्रसक्तौ तद्रक्षायादुर्निरूपत्वात् तपसोऽन्यफलत्वाद्विसंवादाभावस्य शमाद्यंतर्भूततया ज्ञानसाधनत्वेनात
त्फलत्वात् दुःखनाशसुखाविर्भावयोः ज्ञानफलत्वाच्च तस्मात्प्रमाणस्वरूपलक्षणसाधनाधिकारिप्रयोजनानां दुर्निरूपत्वात् जीवन्मुक्त्यभ्युपगमो निरर्थकः
तस्मात्तत्वज्ञानान्मुक्तिरेकरूपैवेति केचिद्वावदूका मन्यंते तान्निराकर्तुकामो मुक्तिं विभजते साचेति द्वैविध्यमेवाह विदेहेति अयंभावः जीवन्मुक्तेः स्वरूपप्र
माणसाधनफलान्यनुपदमेव निरूपयिष्यामि तत्तदाक्षेपाणां तन्निरूपणावसरे सरे समाधानं वक्ष्यामः न चात्राधिकार्यसंभव उत्पन्नब्रह्मसाक्षात्कार
स्य चित्तविश्रांतिं कामयमानस्य विद्वत्संन्यासिनस्तत्राधिकारित्वात् न च निवृत्ताविद्यस्य साक्षात्कारेणाभिमानशून्यतया कर्तृत्वाभावेन कथं तत्राधिकार॥ रामः ९१

वहुवक्तारः३॥

आचार्य्यः१॥

इति वाच्यं ज्ञानेनावरणशक्तिमदज्ञाननाशेपि प्रारब्धानुसारेण विक्षेपशक्तिमदज्ञानस्य लेशशब्दवाच्यस्य संस्कारस्याभ्युपगमेन वाधितानुवृत्त्या विद्
षो देहाभिमानकर्तृत्वसंभवात् न च तस्य कार्यं न विद्यते ज्ञानामृतेन तृप्तस्येत्यादिस्मृत्या विदुषः कृतकृत्यस्य कर्तव्यप्रतिषेधात्कर्तव्यशेषाभ्युपगमइति
वाच्यं अकृतोपास्तेः विदुषोऽविश्रांतचित्तस्य कर्तव्यशेषसत्वेन निरंकुशकृतकृत्यत्वाभावात् न चाकृतोपास्तेरविश्रांतचित्तस्य ज्ञानमेव नास्तीति वाच्यं
ज्ञानस्य प्रमाणवस्तुपरतंत्रत्वेन सर्वसाधारणत्वात्॥ अन्यथा याज्ञवल्क्यकहोलादीनां तत्वज्ञानाभावप्रसंगात् न चेष्टापत्तिः तद्दृष्टांतेनास्मदादेः कस्यापि ज्ञान
साधनश्रवणादौ प्रवृत्त्यभावप्रसंगात् उदाहृतस्मृतेर्विश्रांतचित्तज्ञानिविषयत्वात्तस्मादुत्पन्नब्रह्मसाक्षात्कारोचित विश्रांतिं कामयमानो विद्वत्संन्यासी जीव
न्मुक्तिसाधनाभ्यासेऽधिकारीति मुक्तिविभागो युक्त इति संतोष्टव्यमायुष्मतेति प्रथमोद्दिष्टां विदेहमुक्तिं निरूपयति तत्रेति तयोर्मध्य इत्यर्थः तत्र संमतिमा
ह तदुक्तमिति तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति वाक्यविषयः तत्र ज्ञानिनो वर्तमानदेहपाते वासनावशाज्जन्मांतरं भवति न वेति संश

## तत्र तत्वज्ञानिनो भोगेन प्रारब्धकर्मक्षये वर्तमानशरीरपातो विदेहमुक्तिः तदुक्तं भोगेनत्वितरे क्षपयित्वा संपद्यत इति॥ ७॥

यः तत्र तत्वज्ञानिनो ज्ञानेनाज्ञाने निवृत्तेपि यथा वासनावशात् प्रारब्धभोगस्तथा भोगेन प्रारब्धक्षये वर्तमानदेहपाते वासनावलादपूर्वदेहांतरप्राप्तिलक्ष
णं जन्म भवत्येवेति प्राप्तेऽभिधीयते भोगेन सुखदुःखानुभवेन इतरे प्रारब्धपुण्यपापे क्षपयित्वा नाशयित्वा ब्रह्म संपद्यते अखंडैकरसानंदब्रह्मात्मनावति
ष्ठते न देहांतरप्राप्तिलक्षणं जन्म प्राप्नोति कारणाभावात् तथाहि ज्ञानेनाज्ञानसंचितकर्मणां नष्टत्वात् आगामिकर्मणामश्लेषात् भोगेन प्रारब्धकर्मणि प्रतिबंधेन
ष्टे सवासनस्य विक्षेपशक्तिमदज्ञानस्यापि नष्टत्वात् ज्ञानी देहांतरप्राप्तिलक्षणं जन्म न प्राप्नोति किंतु ब्रह्मैव संपद्यते तथा च श्रुतिः तस्य तावदेव चिरं यावन्न वि
मोक्ष्येऽथ संपत्स्य इति नन्वनेकजन्मप्रदप्रारब्धकर्मणि सति प्रथमजन्मनि तत्वज्ञानोत्पत्तौ जन्मांतरं भवति न वा आद्ये ज्ञानस्यापाक्षिकत्वप्रसंगः द्वितीये ना
भुक्तं क्षीयते कर्म इति शास्त्रविरोधः प्रसज्येतेति चेत् अत्र केचित् यथायावदधिकारमवस्थितिरधिकारिकाणामित्यत्र देवादीनां देहांतरप्राप्तावपि तत्व
ज्ञानस्यवाधो नास्ति स्वाधिकारावसाने मोक्षश्च भवतीत्यभ्युपगतं तथाऽत्रापि प्रमाणवलात्तत्वज्ञानोत्पत्तावपि प्रथमजन्मनि प्रारब्धकर्मप्रावल्येन जन्मांतरं

आचार्य्यैरितिशेषः१॥ ज्ञानस्यापाक्षिकत्वं नाम पक्षे फलाजनकत्वम् भोगोन्मुखादृष्टप्रतिवन्धकसत्वे फलाजनकत्वे सति वाध्यत्वम् तदसत्वे च फलजनकत्वमितिभावः॥३॥

प्रारब्धफलज्ञानयोर्विरोधस्वीकारे अधिकारिणां व्यासवसिष्ठादीनां ज्ञानस्यापि जन्मान्तरे बाधितत्वप्रसङ्गादिति भावः ॥ १॥
हे महामते यस्य पुरुषस्येदं पाश्चात्यं जघन्यं जन्म तमुत्तम मामिवानूणाम वयमुक्ता वेणुमिव मौक्तिकं त्वक्सारमिव विमला विद्या विशति प्रविशतीत्यर्थः यथा कस्मिंश्चिद्वेणुस्तम्बे वैणवे दैवान्मौक्तिकमुत्पद्यते न तथा सर्वस्तम्बे तस्मात्ते ब्रह्म

भवति न ज्ञानस्य बाधः प्रारब्धफलस्य ज्ञानाविरुद्धत्वादन्यथाधिकारिपुरुषाणामपि तथात्वप्रसंगात्तत्तन्य ब्रह्मभावलक्षणो मोक्षोपि न विरुध्यते अनो ज्ञानस्य न पाक्षिकत्वं न वा नाऽभुक्तम्॥ क्षीयते कर्मेति शास्त्रविरोध इति वदंति अपरे तु यस्तु विज्ञानवान् भवत्यमनस्कः सदाशुचिः स तु तत्पदमाप्नोति न स भूयोभिजायते य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह सर्वथा वर्तमानोपि न स भूयोभिजायते इत्यादिश्रुतिस्मृतिभ्यां तत्त्वज्ञानिनो जन्मप्रतिषेधात् तादृशप्रारब्धकर्मणि सति प्रथमजन्मनि श्रवणादौ सत्यपि ज्ञानं नोत्पद्यते किंतु चर्मजन्मनि तत्त्वज्ञानमुत्पद्यते तदुक्तं यस्येदं जन्म पाश्चात्यं तमाऽश्वेव महामते विशंति विद्या विमला मुक्ता वेणुमिवोत्तममिति कालिदासेनाप्युक्तम् जंतोरपश्चिमतनोः सति कर्मसाम्ये निःशेषपाशपटलच्छिदुरा निमेषात् कल्याणिदेशिककटाक्षसमाश्रयेण कारुण्यतो भवति शांभवबोधदीक्षेति सर्वथापि प्रारब्धक्षये ज्ञानी ब्रह्मात्मनावतिष्ठत इति सिद्धमिति चतुर्थे निरूपितं विदेहमु

शारीरके १

अन्ये तु भाविशरीरानारंभो विदेहमुक्तिः सा च ज्ञानोत्पत्तिसमकालैव ज्ञानेनाज्ञाननिवृत्तेः संचितकर्मणां नाशात् आगामिकर्मणामश्लेषात् भोगेन प्रारब्धक्षयात् शरीरांतरारंभकस्यासंभवात् भाविशरीरानारंभस्य ज्ञानसमकालत्वं युज्यते तदुक्तं तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहं ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति एवं वर्णयांचक्रुः श्रवणादिभिरुत्पन्नसाक्षात्कारस्य विद्वत्संन्यासिनः कर्तृत्वाद्यखिलबंधप्रतिभासनिवृत्तिर्जीवन्मुक्तिः भोगापादकप्रारब्धप्राबल्येपि योगाभ्यासेन तदभिभवसंभवात् प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात्॥ २२

कौ॰ पक्षांतरमाह अन्ये त्विति भाविशरीरानारंभलक्षणाया विदेहमुक्तेर्ज्ञानसमकालत्वं कथमित्याशंक्याह ज्ञानेनेति तत्र संमतिमाह तदुक्तमिति क्रमप्राप्तां जीवन्मुक्तिं निरूपयति श्रवणेति जीवदवस्थायामिति शेषः अन्यथा विदेहमुक्तावतिव्याप्तिः स्यात् यदुक्तं भोगप्रापकप्रारब्धकर्मणि जाग्रति सति कर्तृत्वादिप्रतिभासस्यावश्यकत्वात् तस्य साक्षिणः सकाशात्तत्त्वज्ञानेन निवारितत्वाज्जगतइवतत्त्ववदंतःकरणनिष्ठस्य वारयितुमशक्यत्वात्तद्वारेण प्रारब्धभोगायोगात्कर्तृत्वादिप्रतिभासनिवृत्तिर्जीवन्मुक्तिरित्यसंगतमिति तत्राह भोगेति तत्त्वज्ञानापेक्षया यथा प्रारब्धं प्रबलं तथा प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात् तेन प्रारब्धभोगानुकूलकर्तृत्वादिप्रतिभासस्यात्यंतिकनिवृत्त्यभावेपि तदभिभवो भवत्येव तथा

हि कल्याणि न पश्चिमा तनुर्यस्य सोऽपश्चिमतनुस्तस्य जन्तोर्जीवस्य कर्मसाम्ये सति कर्मणां वैषम्यनिवृत्तौ कारुण्यतो देशिककटाक्षसमाश्रयेण अनुकम्पया गुरोरपाङ्गदर्शनमात्रेण निःशेषपाशपटलच्छिदुरा या वत्या शपटलविनाशिका शांभवबोधदीक्षा त्रस्य विद्यापरपर्याया निमेषात् अस्मिन्नल्पकाले भवतीत्यर्थः ॥ ११॥

॥ ४ ॥

---

शारीरकसूत्रे प्रथमाध्यायस्य तृतीयपादगं देवताधिकरणं तत्र देवतानामस्वरूपबोधिकानां श्रुतीनां ...

विपक्षे दंडमाह अन्यथेति न च योगाभ्यासेन प्रारब्धप्रतिबंधेनाभुक्तं क्षीयते कर्मेति शास्त्रविरोध इति वाच्यं असति विरोधिनि तदुपपत्तेः अन्यथाजन्मान्तरकृतपापं व्याधिरूपेण बाधते तच्छांतिरौषधैर्दानैर्जपहोमार्चनादिभिरिति नवापि शास्त्रविरोधः प्रारब्धकर्मण्येव त्यक्तस्य प्रसज्येत तस्मात्प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वात्तेन कर्तृत्वादिबंधप्रतिभासाभिभवरूपा जीवन्मुक्तिः सिध्यतीति न कोपि दोष इति भावः प्रारब्धापेक्षया योगाभ्यासस्य प्रबलत्वे प्रमाणमाह अत एवेति पुरुषप्रयत्नो द्विविधोऽशास्त्रीयः शास्त्रीयश्चेति तत्र पुरुषोऽशास्त्रीयेण प्रयत्नेन नरकं प्राप्नोति तस्य रागद्वेषपूर्वकत्वात् द्वितीयेन बाल्यमारभ्य शास्त्रसत्संगादिभिरभ्यस्तैर्गुणैः शान्त्यादिभिर्युक्तेन पुरुषप्रयत्नेन परमपुरुषार्थो हितः संप्राप्यते तथा चोक्तं उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितमिति एवं जीवन्मुक्तिस्वरूपं निरूप्येदानीं तस्यां प्रमाणमाह तत्रेति जीवन्मुक्तिः सप्रम्यर्थः न च श्रुत्यादीनां ब्रह्मण्येव तात्पर्यात्कथं तत्र प्रामाण्यमिति वाच्यं ब्रह्मणि महातात्पर्येपि देवताधिकरणन्यायेन मानांतराविरोधेऽन्यत्राऽवांतरतात्पर्ये बाधकाभावात् अन्यथा ब्रह्मवेद ब्रह्मैव भवति

नाभुक्तमिति ७॥

अन्यथा पुरुषप्रयत्नवैयर्थ्येन चिकित्साशास्त्रमारभ्य वेदांतशास्त्रपर्यंतस्यानारंभप्रसंगात् अत एव पुरुषप्रयत्नस्य साफल्यमाह वशिष्ठः आबाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः गुणैः पुरुषयत्नेन सोऽर्थः संप्राप्यते हित इति तत्र श्रुतिस्मृतीतिहासपुराणवचनानि प्रमाणानि।

श्रोतव्यो मंतव्य इत्यादीनां अप्रामाण्यं प्रसज्येत तस्माद्यत्किंचिदेतत् कठवल्लीवाक्यमुदाहरति विमुक्तश्च विमुच्यत इति ॥ निविमुक्तश्च विमुच्यत इति श्रुतिः ॥

यद्यपि ज्ञानात्पूर्वमपि रागादिभिर्मुक्तः शांतो दांत इत्यादिश्रुत्या शमदमाद्युपेतस्य श्रवणाद्यधिकारावगमात्तथापि ज्ञानात्पूर्वं रागद्वेषादिभिर्मुक्तिः यत्नसाध्या ज्ञानोत्तरं तु योगाभ्यासेन वासनाक्षयमनोनाशयोर्दृढतरसंपन्नत्वेनाभासरूपस्य रागादेरप्यसंभवेन रागद्वेषादिमुक्तिः स्वतः सिद्धा भवतीत्यतो विमुक्तः विशेषणमुक्तः आत्यंतिकरागद्वेषादिनिवृत्तिमानित्यर्थः एतादृशो जीवन्मुक्तो विमुच्यते भोगेन प्रारब्धे कर्मणि क्षीणे वर्तमानदेहपाते भाविबंधाद्विशेषेण मुच्यते यद्यपि प्रलयकाले किंचित्कालं भाविबंधान्मुच्यते तथापि नात्यंतिकी तत्र मुक्तिरिति विशेषणमुच्यते इत्युक्तं ज्ञानानंतरं भोगेन प्रारब्धकर्मक्षये वर्तमानदेहपाते पुनर्देहांतरसंबंधाभावात्तस्मादियं श्रुतिः तत्त्वज्ञानोत्तरं विदेहमुक्तिविलक्षणायां कर्तृत्वादिबंधप्रतिभासनिवृत्तिरूपायां जीवन्मुक्तौ प्रमाणं तथा तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्य

अहिः सर्पः तन्निर्ल्वयनी कञ्चुकः यथा सर्पागारे वल्मीके प्रत्यस्ता प्रक्षिप्ता शयीत वर्तेत एवमेवेदं शरीरं सर्पस्थानीयेन मुक्तेनानात्मभावेन परित्यक्तं मृतमिव शेते अथायं मुक्तोऽशरीरोऽमृत एव चामृतः प्राणः प्राणितीति ।
प्राणः प्राणस्य प्राणमिति श्रुत्या परमात्मैवेत्यर्थः ॥ १॥

अ॰ कौ॰ ब॰ प्र॰ ८३

नः प्राणो ब्रह्मैव तेज एवेत्यादिश्रुतिस्तत्र प्रमाणत्वेनोदाहर्त्तव्या तत्र वशिष्ठवचनमप्युदाहरति योजागर्तीति॥ योब्रह्मविद्रिंद्रियाणामुपरमाभावाज्जा
गर्ति जाग्रदवस्थामनुभवति इंद्रियैरर्थग्रहणाभावात् सुप्तिस्थ अत एवेंद्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणा जाग्रद्यस्य न विद्यते यस्य निर्वासनः शुभा
शुभवासनारहितो बोधः स्वस्वरूपाखंडैकरसानंदानुभवः स जीवन्मुक्त उच्यते इत्यर्थः भगवद्गीतासु द्वितीयाध्यायगतस्थितप्रज्ञलक्षणगतश्लोकमुदाहरति
प्रजहातीति यदा यस्यामवस्थायां मनोगतान् त्रिप्रकारान् बाह्याभ्यांतरवासनारूपान् कामान् प्रजहाति सर्वात्मना परित्यजति आत्मनि प्रत्यग्भूतास्वंडैकरसानं
दे आत्म—नायोगाभ्यासपाटवेन वशीकृतमनसा वृत्तिरहितेनांतःकरणेन स्वस्वरूपानंदमनुभवन् संतुष्टः तदा तस्यामवस्थायां स्थिता प्रतिष्ठिता प्रज्ञा यस्य स तथो
क्तः प्रज्ञा हि द्विधा स्थिराऽस्थिरा चेति जन्मांतरीयपुण्यपुंजपरिपाकेनाकाशफलपातन्यायेन तत्त्वमस्यादिवाक्यश्रवणमात्रेण ब्रह्मात्मैक्यगोचरमहं ब्रह्मास्मीति ज्ञा

योजागर्ति सुषुप्तस्थो यस्य जाग्रन्न विद्यते यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते इति वासिष्ठे तथा भगवतोक्तम् प्रजहाति यदा कामान् सर्वा
न् पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः स
मी संतुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रिय इति अत्र जीवन्मुक्त भक्त उच्यते प्रकाशं च प्रवृत्तिं चेत्या
रभ्य गुणातीतः स उच्यते इत्यंतेन जीवन्मुक्तो दर्शितः॥ २१ ॥ नमुत्पद्यते ग्रहकृत्यादिव्यासंगेन पुनर्विस्मर्यते सेयमस्थिरप्रज्ञा यदा पुनर्योगाभ्यासेनात्यं
तवशीकृतचित्तस्य जारानुरक्तायाः जारमिव बुद्धिस्तत्त्वमेव निरंतरं ध्यायति सेयं स्थिरप्रज्ञा एतदभिप्रायेणोक्तं वशिष्ठेन परव्यसनिनी नारी व्यग्रापि गृहकर्मणि त
देवास्वादयत्यंतः परसंगरसायनं एवं तत्त्वे परे शुद्धे धीरो विश्रांतिमागतः तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि इति अयं स्थिरप्रज्ञ एव जीवन्मुक्त इत्यर्थः तत्र द्वा
दशाध्यायवचनमप्युदाहरति अद्वेष्टेति नन्वनेन वचनेन भगवद्भक्तः प्रतिपाद्यते इत्याशंक्याह अत्रेति नन्वेवं साधकोपि यथोक्तगुणविशिष्टः शांतो दांत इत्या
दिश्रुतेस्ततो जीवन्मुक्तस्य को विशेष इति उच्यते अस्त्येव विशेषस्तयोः साधकस्याद्वेष्टृत्वादयो गुणाः यत्नसाध्या जीवन्मुक्तस्य स्वभावसिद्धा इति ततो विशेषः तदु
क्तं उत्पन्नात्मैक्यबोधस्य ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवंत्यस्य न तु साधनरूपिण इति तत्र चतुर्दशाध्यायगतगुणातीतलक्षणमप्युदाहरति प्रकाशं चेत्यादि
जारउपपतिः मुख्यभर्तुरन्य इति यावत् तदनुरक्तायाः स्त्रियास्तमिव तत्त्वविदो बुद्धिस्तत्त्वमेव स्मरतीत्यर्थः ५॥

जीवन्मुक्तिविवेके रामः ८३

तानि न निवृत्तानि कांक्षति॥ १॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्त्तंत इत्येवं योवतिष्ठति नेंगते॥ २॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांच
नः तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ३॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गुणातीतः स उच्यते॥ ४॥ गुणात्ययसाध
नं भक्तियोगमप्याह मां च योऽव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते॥ ५॥ तत्र भारतवचनमप्युदाहरति निराशिषमिति त
त्र स्कंदपुराणवचनमप्युदाहरति यथेति मय्यंतःकरणोपलक्षितप्रत्यगात्मनि मायया विजृंभितः कल्पितः मायात्वं नाम निरूपयितुमशक्यत्वे सति विस्पष्टं
भासमानत्वं तदुक्तं न निरूपयितुं शक्या विस्पष्टं भासते च या सा मायेतीन्द्रजालादौ लोकाः संप्रतिपेदिरे इति तस्माज्जीवन्मुक्तौ श्रुतिस्मृतीतिहासपुराणानां प्रमा
णानां संभवाज्जीवन्मुक्तिरवश्यं विदेहमुक्तिवदस्त्येव तदुक्तम् जीवन्मुक्तिस्तावदस्ति प्रतीतेः द्वैतच्छाया तत्र चास्ति प्रतीतेः द्वैतच्छायारक्षणायास्ति लेश अ
स्मिन्नर्थे स्वानुभूतिः प्रमाणमिति॥ १॥ यदुक्तं साधनानिरूपणाज्जीवन्मुक्तिरनुपपन्ना तत्राह सेयमिति तत्त्वज्ञानं च वासनाक्षयश्च मनोनाशश्च तत्त्वज्ञानवास

निराशिषमनारंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुरिति महाभारते यथा स्वप्नप्रपंचोयं मयि मायाविजृंभितः
एवं जाग्रत्प्रपंचोयं मयि मायाविजृंभित इति॥ यो वेद वेदांतैः सोऽतिवर्णाश्रमी भवेदिति पुराणे सेयं जीवन्मुक्तिस्तत्त्वज्ञानवासनाक्षयमनोना
शाभ्यासान् सिद्ध्यति॥

नाक्षयमनोनाशास्तेषामभ्यासः यत्नतः पुनः पुनरावर्त्तनं तस्माज्जीवन्मुक्तिर्यथोक्तस्वरूपा सिध्यति तत्रापि तत्त्वज्ञानवासना
क्षयमनोनाशानां समकालोऽभ्यासो अपेक्षितः अन्वयव्यतिरेकाभ्यां तेषां परस्परहेतुत्वात् तथाहि दृश्यमानस्य सर्वस्य मिथ्यात्वेनाद्वितीयात्मनः पारमार्थिकत्वे
नात्मैव सर्वं ततोऽन्यत्किमपि नास्तीति तत्त्वज्ञाने संपन्ने विषयाभावाद्रागद्वेषादिलक्षणा वासना क्षीयते तत्त्वज्ञानाभावे विषयसत्यत्वात् पापादुत्तरोत्तरं रागद्वेषादिलक्ष
णा वासना प्रवहतीत्यतोऽन्वयव्यतिरेकाभ्यां तत्त्वज्ञानं वासनाक्षयं प्रतिकारणं एवं वासनाक्षयोपि अन्वयव्यतिरेकाभ्यां तत्त्वज्ञानं प्रतिकारणं तथाहि विवेकदो
षदर्शनप्रतिकूलवासनोत्पादनादिना रागद्वेषादिवासनायां क्षीणायां श्रुत्याचार्यप्रसादेन निर्मले मनसि तत्त्वज्ञानमुदेति इदं सर्वमात्मैव ततो नान्यत् किंचिदस्ती
ति एवं वासनाक्षयाभावे मनसो रागादिकलुषितत्वेन शमदमादिसाधनसंपत्तेरभावाच्छ्रवणाद्यसंभवेन विषयोन्मुखस्य तत्त्वज्ञानं नोत्पद्यते इत्यतोऽन्वयव्यति

रेकाभ्यां वासनाक्षयः तत्वज्ञानं प्रति कारणं एवं तत्वज्ञानवासनाक्षययोरन्योऽन्यकारणत्वं एवं तत्वज्ञानमनोनाशयोरन्योन्यकारणत्वमन्वयव्यतिरेका।
भ्यां तथाहि तत्वज्ञाने सति मिथ्यात्वनिश्चयेन प्रपंचस्य बाधितत्वेन मनस्तत्र न प्रवर्त्तते सत्यत्वेन निश्चितस्यात्मनोऽविषयत्वेन तत्रापि मनो न प्रवर्त्तते न तत
श्च निरिंधनाग्निवत्स्वयमेवोपशाम्यति तथाश्रूयते यथा निरिंधनो वह्निः स्वयोनावुपशाम्यति तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति॥१॥ इति एवं
तत्वज्ञानाभावे प्रपंचसत्यत्वबुद्धेरनिवारणात् रतिभिरुपचीयमानं चित्तं पीनं भवति न तत्स्वकृतो मनोनाशः स्यादतोऽन्वयव्यतिरेकाभ्यां तत्वज्ञानं
मनोनाशकारणं एवं मनोनाशे सति निखिलद्वैतवृत्तीनां उपरमात् निरूपाधिकतया श्रुत्याचार्य्यप्रसादेन ब्रह्मसाक्षात्कारो भवति तदभावे न भवतीति ताभ्यां
मनोनाशोपि तत्वज्ञानकारणमित्येतयोरन्योन्यकारणत्वं एवं वासनाक्षयमनोनाशयोरप्यन्योन्यकारणत्वमन्वयव्यतिरेकाभ्यां तथाहि वासनाक्षयाभावे रागद्वे
षादिभिरुपचीयमानं चित्तं विषयोन्मुखं तदाकारेण परिणमते ततो मनोनाशः कुतः स्यात् क्षीणायां वासनायां बीजनाशाद्वृत्तीनामनुदयान्मनो नश्यति एवं मनो

उत्पन्नस्य तत्वज्ञानस्याभ्यासो नाम पुनः पुनः केनाप्युपायेन तत्वानुसंधानम् ॥ ६ ॥

नाशे सति निखिलवृत्तीनामनुदयात्सर्वा वासनाः क्षीयंते मनोनाशाभावे प्रारब्धकर्मवशेन विषयोपयोगे प्रवर्त्तमाने चित्ते सति हविषा कृष्णवर्त्मवद्रागादिवास
ना उद्भवंति तथा च श्रुतिः न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥१॥ इति तस्मादन्वयव्यतिरेकाभ्यां वासनाक्षयो मनोना
शे हेतुस्ताभ्यां मनोनाशोपि वासनाक्षये हेतुरित्यनयोरन्योन्यकारणत्वं तस्मात्तत्वज्ञानवासनाक्षयमनोनाशानां परस्परकारणत्वात्समकालमभ्यासः क
र्त्तव्यः ततो जीवन्मुक्तिः सिध्यति तदुक्तम् वासनाक्षयविज्ञानमनोनाशा महामते समकालं चिराभ्यस्ता भवंति फलदायिनः॥१॥ इति तत्साधनचतुष्टयसंपत्यनं
तरं तत्वज्ञानोद्देशेन विविदिषासंन्यासं कृत्वा श्रवणमनननिदिध्यासनानि कुर्वतस्तत्वज्ञानमुत्पद्यते इति वदंति तत्वज्ञानानंतरं जीवन्मुक्त्युद्देशेन विद्वत्संन्यासं कृ
त्वा तत्वज्ञानमनोनाशवासनाक्षयाभ्यासं कुर्वतो जीवन्मुक्तिः सिद्ध्यतीत्युच्यते तत्र श्रवणाद्यनन्तरं प्रमाणजन्यज्ञानाभ्यासः कीदृशस्तत्र तत्वज्ञानस्य कर्तव्यत्वं राम. ९५
संभवति तस्य प्रमाणफलत्वेन निष्पन्नत्वाद्वस्तुपरतंत्रत्वेन कर्तुम्——कर्तुमन्यथा कर्तुमशक्यत्वाच्च नापि तत्साधनश्रवणादिकर्त्तव्यत्वं युक्तं फलिभूतज्ञानत्वे सति

कामानां काम्यमानानां विषयाणां कामः इच्छा उपभोगेन भूरिभोगप्राप्त्या न हि शाम्यति प्रत्युत हविषा कृष्णवर्त्मेव घृतेन वह्निमिव भूय एवाभिवर्द्धते पुनर्वृद्धिं प्राप्नोतीत्यर्थः॥ ६॥

ब्रह्मगोप्र चोदितमित्यर्थः॥ ६॥

रूप इत्याशंक्याह उत्पन्नस्येति केनेति श्रवणेन वा कथनेन वा पुस्तकावलोकनेन वा पठनेन वा केनापि प्रकारेणेत्यर्थः॥ तत्र संमतिमाह तदुक्तमिति तस्य तत्व
स्य याथात्म्यस्य ब्रह्मात्मैक्यस्य चिंतनं अनुचिंतनमनुसंधानमनुस्मरणमिति यावत्॥ अथवा तच्चिंतनं तत्वविचारः तत्वं याथात्म्यं ब्रह्मात्मैकमिति यावत् त
त्कथनं तत्वकथनमन्यस्मै मुमुक्षवे यथोक्तसाधनसंपन्नाय विनीताय शिष्याय भक्ताय विश्वासिने तथा च श्रुतिः तस्मै स विद्वानुपसन्नाय प्राहेति सम्यक् प्रशा
न्तचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्यां तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमार इत्याद्यास्मृतिरपि य
इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः भविता न च मे तस्मादन्यः प्रियतरो भुवी
इति यथोक्तलक्षणरहिताय मुमुक्षवे तत्वं न वक्तव्यं तथा च श्रुतिः॥ वेदांते परमं गुह्यं पुराकल्पप्रचोदितं नाप्रशांताय दातव्यं नापुत्राय शिष्याय वै पुनरिति स्मृ
तिरपि इदं ते नातपस्काय नाभक्ताय कदाचन न चाशुश्रूषवे वाच्यं न च मां योभ्यसूयति॥१॥ अशिष्याय विरक्ताय यत्किंचिदुपदिश्यते तत्प्रयात्यपवित्रत्वं गो

तदुक्तं तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधा इति॥ यद्यपि तत्वज्ञानात्प्रागपि वास
नाक्षयमनोनाशाभ्यासोऽपेक्षितः॥ २१ क्षीरं श्वदृतौ यथा॥२॥ नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः जानन्नपि हि मेधावी जडवल्लोकमा
चरेत्॥३॥ धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तादृशी तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे॥४॥ इत्याद्याः समाभ्यां मुमुक्षुभ्यामन्योन्यं तत्प्रबोधनं किं बहुना सर्वथा
केनाप्युपायेन ब्रह्मैकव्यापारतयाऽवस्थानं ब्रह्माभ्यासं विदुर्बुद्धाः ब्रह्मात्मवेदिन इत्यक्षरार्थः स्यादेतत् प्राक् तत्वज्ञानात्साधकस्यापि वासनाक्षयमनोनाशाभ्यासो
ऽपेक्षितः विषयासक्तचित्तस्य शमादिशून्यस्यानेकाग्रचित्तस्य तत्वज्ञानासंभवात्॥ ननु तत्वज्ञानस्य प्रमाणवस्तुपरतंत्रतया सतो विषयप्रमाणयोस्तदुत्पन्ने एव
स्यकत्वेन वासनाक्षयमनोनाशाभ्यासः क्वोपयुज्यत इति चेत् सत्यं ज्ञानं प्रमाणवस्तुपरतंत्रं तथापि प्रमाणानव्यासक्तस्य ज्ञानमुत्पादयितुं शक्नोति स्वविषयेऽनेकाग्र
चित्तस्य व्यासंगादेर्ज्ञानोत्पत्तिप्रतिबंधकत्वात् अन्यथा सर्वेषां ज्ञानोत्पत्तिप्रसज्येत न चेष्टापत्तिः शास्त्रारंभवैयर्थ्यापत्तेः तत्तश्च व्यासंगादिः ज्ञानोत्पत्ति प्रतिबंधक
एव एवं च वासनाक्षयमनोनाशाभावेन ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ विद्वत्संन्यासिनः तथापि ॥४॥ तत्पाठांतरं २॥

दृतिश्चर्मपुटकः कुक्कुरचर्मपुटके दुग्धवदित्यर्थः॥६॥

तत्वज्ञानासंभवात्साधकस्यापि ज्ञानार्थःसोऽपेक्षित एव तस्मात्प्राक्तत्वज्ञानात्सिद्धयोर्वासनाक्षयमनोनाशयोः सतोस्तयोर्ज्ञानेनरभ्यासो नापेक्षित एवैषा कथं ततो जीवन्मुक्तिरित्याशंक्य परिहरति यद्यपीति एतदुक्तं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्य इत्यादिश्रुत्या साधनचतुष्टयसंपन्नस्य विविदिषासंन्यासिनस्तत्वज्ञानमुद्दिश्य श्रवणाद्यभ्यासः प्रधानः श्रवणस्य प्रमाणविचारात्मकत्वेन मननस्य तदर्थविचारात्मकत्वेन निदिध्यासनस्यापि तथात्वेन ज्ञानं प्रत्यंतरंगसाधनत्वान्मनोनाशवासनाक्षययोः प्रमाणसहकार्यंतःकरणशोधकत्वेन श्रवणादिसहकारित्वात् तयोरभ्यासस्तस्योपसर्जनभूतः ततश्च यथाकथंचिद्वासनाक्षयमनोनाशावभ्यस्य निरवशेषश्रवणाद्यनुतिष्ठतस्तत्वज्ञानमुत्पद्यते उत्पन्ने तत्वज्ञाने स्य विद्वत्संन्यासिनस्तु ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः॥१॥ इत्युक्तप्रकारेण तत्वज्ञाने संपन्ने पूर्ववच्छ्रवणाद्यभ्यासे प्रयोजनाभावात् प्रारब्धापादितविषयभोगकाले वासनाभिभवार्थं श्रवणाद्यभ्यासोऽपेक्षित इति स उपसर्जनभूतः पूर्ववासनाक्षयमनोनाशयोर्दृढतराभ्यासाभावे चित्तविश्रांतेरभावान्नरर्थे

तथापि विविदिषासंन्यासिनः स उपसर्जनभूतः श्रवणाद्यभ्यास एव प्रधानः विद्वत्संन्यासिनस्तु तत्वज्ञानाभ्यास उपसर्जनभूतो वासनाक्षयमनोनाशाभ्यासः प्रधान इत्यविरोधः॥ कृतोपासनस्य मुख्याधिकारिणस्तदपेक्षाभावेप्यकृतोपास्तेरस्मादादेस्तदभावे चित्तविश्रांत्यभावात्॥

ज्ञानोत्तरं नियमेन वासनाक्षयमनोनाशाभ्यासोवश्यं कर्तव्य इति विद्वत्संन्यासिनस्तदभ्यासः प्रधानः ततो जीवन्मुक्तिः सिद्ध्यतीति न कोपि दोषः तत्फलमग्रे वक्ष्यते॥ नन्वेवमप्यधिकारिणः श्रवणादिना प्रतिबंधापगमे तत्वमस्यादिवाक्यजन्यापरोक्षज्ञानकृतावरणनिवृत्त्या परमपुरुषार्थलाभात्तेन ततः परं किमवशिष्यते कर्तव्यं न च चित्तविश्रांत्यर्थं वासनाक्षयमनोनाशाभ्यासः कर्तव्यशेषो वर्तत इति वाच्यं वाक्यजन्यापरोक्षज्ञानस्य नित्यनिरतिशयब्रह्मानंदविषयतया तल्लग्नमनसोऽन्यत्र प्रवृत्त्यसंभवेन विश्रांतेः स्वभावसिद्धत्वात् नहि सार्वभौमानंदमनुभवन् राजा ग्रामाधिपतिं सुखं तु कमपेक्षते एवं मुमुक्षुरखंडैकरसपरमानंदमनुभवन्नान्यत्तुच्छसुखमपेक्षत इति ज्ञानिनश्चित्तविश्रांतेः स्वतः सिद्धत्वान्न किंचित्कर्तव्यमवशिष्यते तस्मात्तत्वज्ञानोत्तरं वासनाक्षयमनोनाशाभ्यासकर्तव्यतानियमनं निरर्थकमित्याशंक्याह ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ राम: ८५

श्रवणादिष्वनन्ययानामावृत्तिः करणीया श्रोतव्यो मंतव्य इत्यादिनाभ्यस उपदेशादिति॥ शा० सू० ७॥
आप्रायणात्तत्रापि हि दृष्टम्॥ तत्रापि मरणकालेपि सा यावत्कत्वस्माज्ञीकास्ते नीति श्रुत्यापि यं यं वापि स्मरन्भावमित्यादिस्मृत्या ध्यानप्रत्ययानुवर्तने दृष्टमिति॥ शा० सू० ७॥

कृतोपासनस्येति शास्त्राधिकारिणो हि द्विविधाः मुख्या अमुख्याश्चेति ये सगुणब्रह्मसाक्षात्कारपर्यंतमुपास्तिं कृत्वा परमेश्वरप्रसादेन दोषदर्शनाद्वैराग्यादिसाधनसंपन्नाः ज्ञानोद्देशेन श्रवणादौ प्रवर्तंते तेषां सकृच्छ्रवणादिना जीवन्मुक्तिपर्यवसायितत्वज्ञानमुदेति प्रागेव योगाभ्यासेन चित्तैकाग्रतायाः संपन्नत्वात् कृतोपासनानां तादृशमुख्याधिकारिणां वासनाक्षयमनोनाशाभ्यासो नापेक्षितः ये पुनरिदानींतना अकृतोपास्तिकाः साधनसंपन्नाः जिज्ञासया श्रवणादौ प्रवर्तंते तेषाममुख्याधिकारिणामस्मदादीनां सम्यगनुष्ठितश्रवणादिभिस्तत्वसाक्षात्कार उत्पद्यते एव उत्पन्नेपि तत्वसाक्षात्कारे वासनाक्षयमनोनाशयोः सम्यगनभ्यस्तत्वेन चित्तविश्रांतेरभावात्प्रमाणजन्यत्वाद्विषयाबाधाच्च प्रमारूपोऽपि ब्रह्मसाक्षात्कारः कदाचिदसंभावनादिप्रतिबंधसंभवेनाज्ञाननिवर्तनयोग्योपि प्रारब्धापादितभोगवासनया दोधूयमानत्वात् वातस्थदीपवदज्ञाननिवर्तने समर्थो न स्यात् तस्मात्तेषाममुख्याधिकारिणां संभावितप्रतिबंधनिवृत्त्यर्थं वासनाक्षयमनोनाशाभ्यासः कर्तव्योऽपेक्षितः अतः एवैतदभिप्रेत्य चतुर्थाध्याये आवृत्तिरसकृदुपदेशात् आप्रायणात्तत्रापि हि दृष्टमिति भगवान्सूत्र-

कंपायमानत्वात् २॥

उत्पन्नमपि तत्वज्ञानं विषयाबाधात् प्रमारूपमज्ञाननिवर्तकमपि असंभावनादिसंभवान्न तत्सुखकरमिति वासनाक्षयमनोनाशाभ्यासोपेक्षितः॥ वासनासामान्यलक्षणं तद्विभागं तत्प्रयोजनं तल्लक्षणं च वशिष्ठ आह॥ दृढभावनया त्यक्तपूर्वापरविचारणं यदादानं पदार्थस्य वासना सा प्रकीर्तिता॥ २१॥ कारो ब्रवीतीति तद्व्याकुर्वन्भगवान् भाष्यकारोप्यावृत्त्यधिकरणे यः पुनर्निपुणमतिर्यथोक्तलक्षणो मुख्याधिकारी सकृच्छ्रुत्वा प्रत्यंचं ब्रह्म साक्षात्करोति तं प्रत्यावृत्त्यानर्थक्यमिष्टमेव यः पुनरमुख्याधिकारी यथोक्तलक्षणस्तस्यैव प्रत्यावृत्तिलक्षणो ध्यानयोगो नियम्यते श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यसकृदुपदेशादिति इममेवार्थं स्फुटीचकार अत एवात्मेत्येवोपासीतेति श्रुतिरप्येतदभिप्रायान विरुध्यते अत एवैतदभिप्रायेण भाष्यकारस्तत्रापि नियमविधिमंगीचकार अत एव विद्यारण्ये वार्तिकसारे यमर्थो दर्शितः बुद्धतत्वो न विध्यर्ह इति चेद्वासनाबलात् अबुद्धवत्संक्लिष्टं तद्विधिं ध्यानेनदार्हतीति तस्मान्मुख्याधिकारिणां वासनाक्षयमनोनाशाभ्यासाभावेप्यमुख्याधिकारिणां तत्वज्ञानोत्तरं चित्तविश्रांत्यर्थं वासनाक्षयमनोनाशाभ्यासोपेक्षितः तदाह वशिष्ठः तस्मात्प्रयत्नेन पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेदिति तस्मात्सर्वं समंजसं ॥ छ ॥

मनोनाशः वासनाक्षयः तत्वज्ञानं च इत्येतत्त्रयम् १॥

ननु केयं वासना यस्याः स्वयायप्रयत्नेनेत्याशंक्य वशिष्टेन सा दर्शितेत्याह वासनेति समानस्य भावः सामान्यं साधारणलक्षणमित्यर्थः तस्याः वासनायाः वि भागं ता सा विभक्तानां प्रत्येकं लक्षणं यया भावनया त्यक्तपूर्वापरविचारणाय था भवति तथा पदार्थस्याभिमनस्यादानग्रहणं भवति अस्मद्भाषा समीचीना अस्मद्देशः समीचीनोऽस्मद्वंशोऽस्मत्पुत्र इति सा वासना प्रोक्ता पण्डितैरित्यर्थः मोक्षहेतुः शुद्धा बंधहेतुर्मलिना इममेवार्थं स्पष्टयति मलिनेत्यादिना मलिना जन्महेतुः स्यादित्युक्तमेवार्थं स्पष्टयति अज्ञानेति ब्रह्मस्वरूपावरकेणाज्ञानेन सुष्टु घनीभूत आकारो यस्य स तथोक्तः स चासौ घनाहंकारश्चेति तथा तच्छा लिनी तत्सहितेति यावत् अहंकारस्य घनाकारोऽभ्रांतिपरंपरा सा चासुरसंपत्प्रस्तावे भगवता दर्शिता इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं इदमस्तीदम पि मे भविष्यति पुनर्धनं असौ मया हतः शत्रुर्हनिष्ये चापरानपि ईश्वरोहमहं भोगी सिद्धोहं बलवान् सुखी आढ्योभिजनवानस्मि कोन्योस्ति सदृशो मया यै

वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी अज्ञानसुघनाकारघनाहंकारशालिनी।
पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः॥ पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभ्रष्टबीजवत् देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते
इति तत्र मलिनवासना जन्महेतवोनेकप्रकारा दर्शिताः लोकवासनया जंतोर्देहवासनयापि च शास्त्रवासनया ज्ञानं यथावन्नैव जा

से दास्याभिमोदिष्य इत्यज्ञानविमोहिता इति शुद्धा जन्मविनाशिनीत्युक्तार्थं स्पष्टयति पुनरिति जन्मांकुरं जन्ममूलं त्यक्त्वा परित्यज्य विनाश्ये''यते इति॥ नि यावत् भर्जितबीजवत् प्रारब्धभोगाश्रयदेहार्थं देहास्थित्यर्थं ज्ञातं ज्ञेयमखंडैकरसानंदात्मवस्तु यया सा तथोक्ता या वासना ध्रियते सा शुद्धेति योजना पुन र्जन्मकरीति पदं व्याचष्टे तत्रेति तत्र योर्मध्य इत्यर्थः॥ ननु मलिनवासनाः कतिविधाः व्युत्पाद्यंतामित्याशंक्य मलिनवासना अनंताः संक्षेपतस्त्रिधा व्युत्पा दिताः स्मृता वित्याह लोकेति यथा सर्वे न निंदंति यथा स्तुवंति तथा चरिष्यामीत्यभिनिवेशो लोकवासना सा संपादयितुमशक्या जन्मकोटिशतैरतः साम लिना वासना कथं लोकवासना संपादयितुमशक्येति चेत् यत एवं लोके श्रूयते॥ ॥ ॥ ॥

अहं यस्य येय सेनाप्यन्यान् अभिभविष्यामि नटादिभ्यो दास्याभिमोदिष्ये अतिशयेन हर्षं च प्राप्स्यामि इत्यर्थः॥ २॥ ९॥



वागे वासिः वाग सिः वाग सेः स्फुरणं मुषिनः परिहृत आलोकः प्रकाशो येषां ते वागसि स्फुरणमुषिना लोका एवंभूता लोकाः संसारिणो मूढाः सदन्ति के सतां समीपे निरवधिगुणग्रामेऽ नन्तशुभगुणवति निरा गसि निरपराधे या पापपराधयो रागइत्यमरः रामे दाशरथौ वरतनुहति श्रेष्ठतनवः सीता या हरणं वालिद्रोहं वालिना सह कारणाद्वेषमनागपसर्पणं वालिवधार्थं किंचित्तत्र गतोऽपसरणमित्येवं वदन्ति यथा वत्तर स्पष्टा चेष्टा प्रसिद्धा गुणचारिणि परिमितगुणे कनिपयगुणवति जीवे मुधा वृथा किमु दासते कथमुदासीना भवन्तीत्यर्थः यदि रामादीनामस्या लोकप्रसिद्धा न दीनरेषा का कथेति भावः हे रीणितनमिदमिति॥ १॥

निरवधिगुणग्रामे रामे निरागसि वागसिस्फुरणमुखिता लोका लोकावदंति सदंति केवरतनुहृतिं वालिद्रोहं मनागपसर्पणं परिमितगुणे स्पष्टा चेष्टसुधा किमु दासत इति निर्दिष्टमपि परमात्मानं राममनंतकल्याणगुणानिलयं प्रणतिमात्रेण सर्वपुरुषार्थदं श्रीरामं केचन पुरुषधौरेयाः स्तुवंति केचन पुरुषाऽपसदा निंदंति किमु वक्तव्यमस्म दादिषु तस्माल्लोकवासनायाः संपादयितुमशक्यत्वात्स्वहितमेव कर्तव्यं तदाह विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः सर्वथा स्वहितमाचर णीयं किं करिष्यति जनो बहुजल्प इति तथा भर्तृहरिरपि निंदंतु नीतिनिपुणा यदि वा स्तुवंतु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं अद्यैव वा मरणमस्तु युगांतरे वान्या य्यात्पथः प्रविचलंति पदं न धीरा इति तस्माल्लोकवासनायाः संपादयितुमशक्यतया तत्राभिनिविष्टचितस्य ज्ञानप्रतिबंधकतया मलिनत्वं एतदभिप्रेत्योक्तं न लोकैश्चित्तग्रहणे रतस्य न भोजनाच्छादनतत्परस्य न शब्दशास्त्राभिरतस्य मोक्षो न चातिरम्यावसथप्रियस्येति शास्त्रवासना त्रिविधा पाठव्यसनमर्थव्यसनमनु ष्ठानव्यसनं चेति त्रयाणामपि दुःसंपादत्वान्मलिनत्वं तथाहि पाठस्य दुःसंपादत्वं तैत्तिरीयकश्रुतौ भरद्वाजोपाख्यानेनावगम्यते भरद्वाजो हि त्रिभिरायुभिर्ब्रह्मच र्यमुवास तं ह जीर्णं स्थविरं शयानमिंद्र उप''''व्रज्योवाच भरद्वाज यत्ते चतुर्थमायुर्दद्यां किमेतेन कुर्या इति ब्रह्मचर्यमेवैतेन चरेयमिति होवाच तं ह त्रीन् गि रिरूपानविज्ञातानिव दर्शयांचकार तेषां हैकैकस्मान्मुष्टिनाददे स होवाच भरद्वाजेत्यामंत्र्य ह वेदा वा एते अनंता वै वेदाः एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः अथ इतरदनूक्तमेव ह्यीमं विद्धीति पंचसप्ततिवार्षिकं स्वाध्यायमधीयानेशयानं भरद्वाजं दृष्ट्वा चतुर्थमायुर्दास्यामीत्युक्तवांस्तच्छ्रुत्वा भरद्वाजोध्ययनेमतिं चकार प श्चात्तद्दोषदर्शनेन ततो निवार्य तस्मै ब्रह्मविद्यामुपदिदेशेत्युपाख्यानश्रुतेरर्थः अत एवाह अनंतशास्त्रं बहुवेदितव्यमल्पश्च कालो बहवश्च विघ्नाः यत्सारभू तं तदुपासितव्यं हंसो यथा क्षीरमिवांबुमिश्रम् अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः यस्तु ब्रह्म न जानाति दर्वीपाकरसं यथा॥

लोकानां हृदयाकर्षणे रतस्य केवलभोजनादौ प्रवृत्तस्य च व्याकरण शास्त्रेऽनुरागवतश्च अथवा शब्दः वीणादिभवः शास्त्रं न्यायादि शब्दश्च शास्त्रं च शब्दशास्त्रे तयोरभिरतः शब्दशास्त्राभिरतस्तस्य रम्या वसथं गृहं प्रियं यस्य स रम्यावसथप्रियस्तस्य इत्येतेषां मोक्षो न भवतीत्यर्थः॥ ७॥

आयुभिरुक्तवान् ४॥

कौ॰ प्र॰ ९७

बहुशास्त्रकथाकंथारोमंथेन वृथैव किं अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरांतरमिति तस्मादर्थव्यसनमपि दुःसंपादनमेव अनुष्ठानव्यसनं विष्णुपुराणेनि
दाघस्योपलभ्यते ऋभुणा पुनः पुनर्बोध्यमानोपि निदाघोनुष्ठानव्यसनेन तत्त्वं न बबुधे ततो योपदेशेऽतिक्लेशेन सर्वपरित्यागेन तत्त्वं विज्ञातवान् अतोनु
ष्ठानव्यसनमपि तत्त्वज्ञानप्रतिबंधकमेव तस्मात्त्रिविधवासनाया ज्ञानप्रतिबंधकत्वान्मलिनत्वं देहवासना द्विधा आत्मवासना तत्संबंधिवासना चेति मनु
ष्योहमित्यात्मवासना इतरा द्विविधा शास्त्रीया लौकिकी चेति प्रथमा द्विविधा गुणाधानप्रयुक्ता दोषापनयनप्रयुक्ता चेति गंगास्नानसालिग्रामोदकाभिषेकादिना
द्याशौचाचमनादिना द्वितीया लौकिकी वासना द्विविधा तैलपानमरिचभक्षणादिना प्रथमा अभ्यंगस्नानादिना द्वितीया ज्ञानप्रतिबंधकत्वात् जन्महेतुत्वाच्च
समस्तदेहवासनानां मलिनत्वमिति अन्यदपि ज्ञानप्रतिबंधकीभूतं मलिनवासनाजातं भगवता दर्शितं दंभेति स्वानुभवसिद्धं मलिनवासनाजातमन्यदस्ती

दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च अज्ञानं चाभिजातस्य पार्थ संपदमासुरीमिति योषित्पुत्रादिविषयाभिलाषाश्च मलिन
वासना द्रष्टव्याः विवेकदोषदर्शनसत्संगसंनिधित्यागप्रतिकूलवासनोत्पादनेनोक्तानां मलिनवासनानामंतःकरणगतानाम
नुत्पादो वासनाक्षयाभ्यासः तथैव वसिष्ठादिभिर्दर्शितं दृश्यासंभवबोधेन रागद्वेषादितानवे रतिर्घनोदिता यानुबोधाभ्यासविदः परेद
ति असंगव्यवहारित्वाद्भवभावनवर्जनात् शरीरनाशदर्शित्वाद्वासना न प्रवर्तते इति च नैष्कर्म्येण न तस्यार्थो न तस्यार्थोस्ति कर्मभिः ॥

त्याह योषिदिति उक्तानामनेकजातीनां मलिनवासनानां कुतो निवृत्तिरित्याशंक्याह विवेकेति तत्र संमतिमाह तथैवेति दृश्यमानं सर्वमात्मव्यतिरिक्ततया व
स्तुतो नास्तीति बोधो दृश्यासंभवबोधः तेन स्वात्मनि रागादिप्रतिबंधासंभवादात्मव्यतिरिक्तविषयस्य परमार्थतोऽभावाद्रागादीनां तनुत्वं संपद्यते ततश्च राग
द्वेषादितानवे स्वात्मानंदानुभवे यारतिरुपैति रतिराभिमुख्येनात्मन्यंतःकरणस्य आत्मानंदैकाकारितेति यावत् बोधाभ्यासं वासनाक्षयाभ्यासं बुद्धाः पंडिताः
ब्रह्मनिष्ठा इत्यर्थः ॥ मलिनवासनानामनंततत्वात्प्रकारांतरेण तन्निवृत्त्युपायप्रतिपादकं श्लोकं पठति असंगेति असंगोहमितिव्यवहारोऽस्यास्तीत्यसंगव्यवहा
री तस्य भावस्तत्त्वं तस्मादित्येतद्व्यवहारो द्विविधः अभिज्ञाव्यवहारोभिलपनव्यवहारश्चेति तत्रासंगोहमिति निरंतरं प्रत्ययावृत्तिं कुर्वतः तदितरवासनानप्रव

रामः ९७

त्तिरिति तर्के एनं जीवं मृत्योरन्तिके समीपे सति कोऽर्थः कामो वा सुखं करोतीति न कोपीत्यर्थः अघातं नीयमानस्य हननार्थं गृहीतस्य वध्यस्य विनाशयोग्यस्य पुरुषस्य यथा नकोऽप्यर्थः स्तोषयतीति तद्वदित्यर्थः ॥ ४ ॥

र्तते आत्मानुसाधनवासनायाः प्रबलत्वात् तदुक्तं अजस्रमेवमनुस्मृत्य जातेनेव तु पश्यतीति वक्ष्यमाणप्रकारेण दोषदर्शनेन भवस्य संसारस्य भावनस्य स्मर
णानुकूलसंस्कारात्मकवासनाया विवर्जनात्परित्यागात्तिरोभावादित्यर्थः ततो वासना न प्रवर्तत इति तदाहुः दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तत इति शरीर
स्य नाशमरणं द्रष्टुं शीलमस्यास्तीति शरीरनाशदर्शी तस्य भावस्तत्त्वं तस्माद्वासना रागादिरूपा न प्रवर्तते तथा चोक्तं मस्तकस्थायिनं मृत्युं यदि पश्येदयं जन आहा
रोपि न रोचेत किमुतान्या विभूतय इति श्रीमद्भागवते भगवताप्युक्तं कोन्वर्थः सुखयत्येनं कामो वा मृत्योरन्तिके आघातं नीयमानस्य वध्यस्येव न तुष्टिद इति अ
थवा शरीरनाशदर्शित्वाद्भवभावनवर्जनं ततोऽसंगव्यवहारित्वं ततो वासनानिवृत्तिरित्युत्तरोत्तरहेतुत्वं द्रष्टव्यं दोषप्रतिपादकवचनं पठति दुःखमिति एवमा
त्मव्यतिरिक्तं सर्वं दुःखात्मकमनुसंदधतः सर्वाऽनात्मवासनानिवृत्तिर्भवतीति तात्पर्यं लेपटसंगराहित्यस्य मोक्षसाधनप्रतिपादकं श्लोकं पठति निःसंगतेति सं

नसमाधानजप्याभ्यां यस्य निर्वासनं मनः ॥ आत्मासंगस्ततोऽन्यत्स्यादिंद्रजालमिदं जगत् इत्यचंचलनिर्णीते कुतो मनसि वासनेति ॥ दुःखं
जन्मजरादुःखं दुःखं मृत्युः पुनः पुनः संसारमंडलं दुःखं पच्यंते यत्र जंतवः ॥ इतीतिहासे निःसंगता मुक्तिपदं यती नां संगादशेषाः प्रभवंति दोषाः
आरूढयोगोपि निपात्यतेधः संगेन योगी किमुताल्पसिद्धिरिति विष्णुपुराणे तथा श्रीभागवतेपि संगं त्यजेन्मिथुनव्रतिनो मुमुक्षुः सर्वात्मना
न विसृजेद्बहिरिंद्रियाणि एकश्चरेद्रहसि चित्तमनंत ईशे युंजीत ॥ २२

गराहित्यमित्यर्थः मुक्तिपदं मोक्षमार्गः तदुक्तं मनुना अध्यात्मरतिरासीनो नि
रपेक्षो निराशिषः आत्मनैव सहायेन सुखार्थी विचरेदिह ॥ १ ॥ कपालं वृक्षमूलानि कुचैलमसहायता समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणमिति ॥ २ ॥ अन्य
त्रापि तथा चरेत्तु वै योगी सतां धर्ममगर्हयन् ॥ जना यथावमन्येरन् गच्छेयुर्नैव संगतिमिति ॥ १ ॥ भारतेऽपि अहेरिव गणाद्भीतः सन्मानान्नरकादिव कुणपादिव स्त्री
भ्यस्तं देवा ब्राह्मणं विदुरिति ॥ २ ॥ संगे सति किं भवतीत्याह संगादिति दोषा रागद्वेषमोहाः मोहो भ्रांतिः ॥ किं कुर्वंतीत्यत आह आरूढेति ॥ संगोत्पन्नदोषैरारूढयोगो
योग्यधो नरके पात्यते किमु वक्तव्यमल्पसिद्धिरारुरुक्षुः पात्यत इत्यत्र न स्मान्निःसंगत्वं मुमुक्षूणामावश्यकमिति भावः इदानीं दंपतिसंगत्यागप्रतिपादकं सौभरिवच
नमुदाहरति संगमिति मिथुनव्रतिनां दंपतीनां एकादशेंद्रियाणि बहिर्न विसृजेत् न हि सर्जनेन नरकपातमाहमनुः ॥ अकुर्वन्विहितं कर्म निंदितं च समाचरन् ॥ प्रसज्ज

अहेरिव सर्पस्येव गणात् जनसमुदायात् भीतः त्रस्तः सत्सु मानं सन्मानं तस्मात् नरकादिव भीतः स्त्रीभ्यो यः कुणपादिव निर्जीवशरीरादिव भीतः तं देवा ब्राह्मणं तत्त्ववेत्तारं विदुः जानन्तीत्यर्थः ॥ ४ ॥

एक इति एकाकिना स्थित्वा निरंतरं ब्रह्मध्यानं कर्त्तव्यमित्यर्थः॥ ननु मनः चंचलत्वात् परमात्मनि न निश्चलति चेत्किं कर्त्तव्यमित्याशंक्याह तदिति तस्मिन्परमात्म
निरतिर्येषां तेन द्वन्द्वयः तेषु साधुषु संगः कर्त्तव्य इति शेषः कदापि लंपटसंगो न कर्त्तव्य इत्याह स्त्रीणामिति कदापि युवतीं भिक्षुर्न स्पृशेल्लिखितामपि स्पृशन्
न्करीव बध्येत करिण्या अंगसंगतः इति स्त्रीसंगस्य बंधहेतुत्वप्रतिपादनेन तत्संगिसंगस्यापि तथात्वेन च तदुभयं त्यक्त्वा मनोरमे एकांतदेशे स्थित्वा सर्वे
षामात्मानं वासुदेवं सर्वसाक्षिणं अहं ब्रह्मास्मीति निध्यायेदित्यर्थः तथा च स्मृतिः तत्फलबोधनी अहमस्मि परं ब्रह्म वासुदेवाख्यमव्ययं इति यस्य स्थिरा बुद्धिः
समुक्तो नात्र संशयः इति विष्णुपुराणे यमोपि भृत्याननुप्रत्याह सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः इति मतिरचला भवत्यनंते हृदयगते व्र

तद्द्वितिषु साधुषु चेत्प्रसंग इति स्त्रीणां तत्संगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमी विविक्त आसीनश्चिंतयेन्मामतंद्रितः इति महत्सेवां द्वार
माहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये इति च तत्संगे पातित्यमाह योषिद्धिरण्या
भरणांबरादिद्रव्येषु मायारचितेषु मूढः प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिरिति प्रतिकूलवासना मैत्र्यादिवासनास्ता
श्च दर्शिताः मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति अस्यार्थः सुखिषु प्राणिषु एते मदी
या इति मैत्री दुःखिषु प्राणिषु यथा मम दुःखं मा भूयादेवमन्येषामपि दुःखं मा भूयादिति करुणां पुण्यकारिषु पुरुषेषु मुदितां पापेषु उपेक्षां भा
वयतः अन्येषां भावनामकुर्वतः रागद्वेषासूयामदमात्सर्यादि निवृत्त्या चित्तस्य प्रसादो भवतीति॥ २१ जनान्विहाय दूरादिति तथा च दंपतीलंपटसंग
त्यागपूर्वकं ब्रह्मानुसंधानेन सर्ववासनानिवृत्तिः फलं भवति सत्संगस्य वासनाक्षयद्वारा मोक्षसाधनत्वप्रतिपादकं वचनमुदाहरति महदिति द्वारं साधनं स्त्रीसंगिसं
गो न कर्त्तव्यः तस्य नरकसाधनत्वादित्याह तमोद्वारमिति नरकप्राप्तिसाधनमित्यर्थः ते के महांत इत्याकांक्षायामाह महांत इति समे ब्रह्मणि चित्तं येषां ते तथोक्ताः समं
सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमिति स्मृतेः अथवा शत्रुमित्रयोः समं चित्तं येषां ते तथा सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते
इति भगवद्वचनात् अनुपकृतोपकारिणः सुहृदः शमदमसंपन्नाः साधवः तत्संगे स्त्रीतत्संगिसंगे मूढोऽविवेकी प्रलोभित उत्पादितलोभः आत्मा मनो यस्य स तथोक्तः ९८

प्रतिकूलवासनां नराभ्यासेनापि मलिनवासना नश्यतीत्याह तथेति के यं दैवी संपदित्याशंकायामाह दैवीति॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं दम
श्च यज्ञश्च स्वाध्यायस्तप आर्जवं॥ १॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं॥ २॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमा
निता भवंति संपदं दैवीमभिजातस्य भारत॥ ३॥ इत्यनेन दैवी संपद्दर्शितेत्यर्थः वासनानामनंतत्वात्प्रकारांतरेण प्रतिकूलवासनाभ्यासेन मलिनवासनानां निवृत्ति
माह अमानित्वेति अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥ १॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युज
तथा दैवी संपदभ्यासेनासुरसंपन्नश्यति दैवी संपद्भगवता दर्शिता अभयं सत्त्वसंशुद्धिरित्यारभ्य भवंति संपदं दैवीमभिजातस्य भारतेत्यंतेन अमा
नित्वमित्यादिनोक्तामानित्वादिधर्माभ्यासेन तद्विपरीतमानादयो नश्यंति तथा च मैत्र्यादिवासनां संकल्पपूर्वकमभ्यस्यानंतरमजिह्वत्वादिध
र्मानभ्यसेत् अजिह्वत्वादयो दर्शिताः॥ अजिह्वः षंडकः पंगुरंधो बधिर एव च॥ मुग्धश्च मुच्यते षड्भिर्भिक्षुरेतैर्न संशयः॥ १॥ इदमिष्टमिदं
नेति योऽश्नन्नपि न सज्जते हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते॥ २॥ अद्यजातां यथा नारीं तथा षोडशवार्षिकीम् शतवर्षां च यो दृष्ट्वा निर्वि
कारः स षंडकः॥ ३॥ भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च योजनान्न परं याति सर्वथा पंगुरेव सः॥ ४॥ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दू
रगं चतुर्युगां भुवं मुक्त्वा परिव्राट् सोंऽध उच्यते॥ ५॥ हिताहितं मनोरामं वचः शोकावहं च यत् श्रुत्वापि यो न शृणोति बधिरः स प्रकीर्तितः॥ ६॥
सान्निध्ये विषयाणां च समर्थोऽविकलेंद्रियः सुप्तवद्वर्तते नित्यं स भिक्षुर्मुग्ध उच्यते॥ ७॥ इति॥ २२ ए व्याधिदुःखदोषानुदर्शनं॥ २॥ असक्तिरन
भिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥ ३॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि॥ ४॥ अध्या
त्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनमित्यनेनोक्तामानित्वादि ज्ञानसाधनाभ्यासेन तद्विपरीतभ्रांतिसाधनमानादयो नश्यंतीत्यर्थः ननु मलिनवासनानामनंतत्वा
त्तासाममूर्तित्वेन संमार्जनीसमूहीकृतधूलीराशिवत्त्यक्तुमशक्यत्वात् कथं वासनाक्षयः स्यादित्याकांक्षायामाह तथा चेति प्रैषमंत्रेण संकल्पपूर्वकमुपवासजा
गरणान्यायेन मैत्र्यादिवासनादैवी संपदमानित्वादिषु धर्मेष्वभ्यस्यमानेषु सर्वा मलिनवासनाः क्षीयंते सूर्योदये तमइव तेषु सम्यग्जितेषु अजिह्वत्वादीन् धर्मान् व
रथशकटादीनामवयवविशेषो युगः तेन चतुर्वीरप्रमापितामित्यर्थः ६॥ सन्यासाभिधायकमंत्रेणेत्यर्थः अथ प्रैषमंत्रोच्चारः ॐ भूः सन्यस्तं मया ॐ भुवः सन्यस्तं मया ॐ स्वः सन्यस्तं मया ॐ भूर्भुवः स्वः सन्यस्तं मयेति
मंद्रमध्योच्चस्वरेणोक्त्वा अभयं सर्वभूतेभ्यो मत्तः स्वाहेति जलं जले क्षिपेदिति॥ २॥

कौ· प्र· ९९

अजिह्वत्वादिधर्मेषु जितेषु किं कर्तव्यमित्याकांक्षायामाह तदनंतरमिति केयं चिन्मात्रवासनेत्याकांक्षायामाह नामरूपात्मकस्येति चिन्मात्रवासनां विभजते सेयमिति प्रथमां चिन्मात्रवासनामभिनीय दर्शयति सर्वमिति तदभ्यस्यमानायाश्चिन्मात्रवासनायाः योगांतर्भावः स्यादिति चेद्दिष्टापत्तिः प्रथमायाश्चिन्मात्रवासनायाः कस्मिन्योगेऽन्तर्भाव इत्यत आह सेति द्वितीयामभिनीय दर्शयति कर्त्रिति ननु सर्वं चिन्मात्रं भावयामीति प्रथमा वासनोदाहृता तत्र सर्वस्य चिन्मात्रत्वं कुतोऽवगम्यत इत्याशंक्य वलिशुक्रसंवादादवगम्यत इत्याह सर्वस्येति किमिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव ततत्॥ कस्त्वं कोऽहं क एते वै लोका इति वदाशु मे इति पृष्टवंतं वलिं प्रति सर्वस्य चिन्मात्रत्वं शुक्रेणोपदिष्टमिति योजना द्वितीयायाः कुत्रांतर्भाव इत्याकांक्षायामाह द्वितीयेति एवं चिन्मात्रवासनायां जातायां किं भवती

तदनंतरं चिन्मात्रवासनामभ्यसेत् नामरूपात्मकस्य जगतश्चैतन्ये कल्पितत्वेन स्वतः सत्ताशून्यतया चैतन्यसत्तास्फुरणपूर्वकमेव स्फुरणं भवति तत्र नामरूपे मिथ्यात्वनिश्चयेनोपेक्ष्य चिन्मात्रोऽहमिति भावयेत् सेयं चिन्मात्रवासना द्विप्रकारा कर्तृकरणकर्मानुसंधानपूर्विका केवला चेति तत्र सर्वं जगच्चिन्मात्रमेवाहं मनसा भावयामीति क्रियमाणा प्रथमा सा संप्रज्ञातसमाधिकोटावंतर्भवति कर्तृकरणकर्मानुसंधानरहिता चिन्मात्रोऽहमिति भावना केवला सर्वस्य चिन्मात्रत्वं शुक्रेण बलिं प्रत्युपदिष्टं चिदिहास्तीह चिन्मात्रं सर्वं चिन्मयमेव ततत् चित्त्वं चिदहमेते वै लोकाश्चिदिति संग्रहः द्वितीयाऽसंप्रज्ञातसमाधिकोटावंतर्भवति तस्यां चिन्मात्रवासनायां दृढतयाऽभ्यस्तायां पूर्वोक्ता मलिना वासनाः सर्वाः क्षीयंते सोयं वासनाक्षयाभ्यासः जतुसुवर्णादिवत्तावयवं कामादिवृत्तिरूपेण परिणम्यमानमंतःकरणं मननात्मकत्वान्मनः॥ ६॥

न्याशंक्याह तस्यामिति वासनाक्षयसाधननिरूपणमुपसंहरति सोयमिति ननु जीवन्मुक्तिसाधनत्वेन मनोनाशाभ्यासः प्रतिज्ञातः स नोपपद्यते मनसो नित्यत्वेन तन्नाशायोगात् न च तत्र प्रमाणाभावः धर्मिग्राहकमानेनैव तत्सिद्धेः तथाहि सुखाद्युपलब्धयः करणसाध्याः जन्यसाक्षात्कारत्वात् रूपादिसाक्षात्कारवदिति सुखादिसाक्षात्कारं प्रति चक्षुरादीनां करणत्वबाधात् तत्करणत्वेन सिद्ध्यन्मनो नित्यमेव सिध्यति तत्कारणानिरूपणात् तथाहि आत्मनो विभुत्वेन निरवयवतया न तदारंभकत्वायोगात् अत एवाकाशादीनां तदारंभकत्वमपास्तं न च पृथिव्यादीनां तथात्वमस्त्विति वाच्यं निःस्पर्शद्रव्यत्वेन तत्कार्यत्वायोगात् अन्यस्य कारणांतरस्यानिरू



श्वरमिति श्रुत्या तत्सिद्धिरिति वाच्यं तस्या अर्थांतरपरत्वात् अन्यथात्त्वापि नान्विकप्रमाणसिद्धतया मिथ्यात्वाभावात् किं चैवमनित्यत्वे मनसोऽनंतप्रागभाववध्वंसाः कल्प्याः अनंतमनांसि चैकैकस्य कल्पनीयानि तन्नश्च कल्पनागौरवं तस्माल्लाघवादेकैकस्यैकैकमेव नित्यं निरवयवं मनोऽभ्युपगंतव्यं तस्य विभुत्वे आत्ममनःसंयोगानंगीकारेण समवायिकारणस्यात्ममनःसंयोगस्याभावेन ज्ञानाद्यनुत्पत्तिप्रसंगात् तस्मादणवेव मनो नित्यं चेति तन्नाशासंभवात् तन्नाशे जीवन्मुक्तिः संभवतीत्यसंगतमिति अत्र ब्रूमः एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेतन्मनोऽकुरुतेत्यादिश्रुतिभ्यः परमात्मनः सकाशान्मनस उत्पत्त्यवगमेनानित्यमेव मनः भावकार्यस्यानित्यत्वावश्यंभावात् न च परमात्मनोऽद्वितीयत्वेन निरवयवतया कथं तदारंभकत्वमिति वाच्यं आरंभवादानंगीकारेण तस्य तद्विवर्तत्वे बाधकाभावात् न च मायाया अप्रमाणिकत्वेनान्यस्योपाध्यंतरस्यानिरूपणान्निरुपाधिकस्य कथं न द्विवर्ताधिष्ठानत्वमिति वाच्यं मायायां प्रमाणस्य सत्त्वात् नेह नानास्ति किंचनेत्यादिश्रुतिविरोधकत्वात् न च तस्याः प्रामाणसिद्धत्वे मिथ्यात्वाभावप्रसंग इति वाच्यं न हि प्रमासौ तस्याः वास्तवत्वं वोध्यते एकमेवाद्वितीयं नेह नानास्ति किंचनेत्यादिश्रुतिविरोधप्रसंगात् अपि त्वसत्त्वशंकाव्यावृत्तिमात्रं क्रियते न चैतावता मिथ्यात्वाभावप्रसंगः सद्विलक्षणत्वस्यैव मिथ्यात्वलक्षणत्वात् ततश्च मायोपहितात्परादाकाशाद्युत्पत्तौ पंचमहाभूतोपहिताद्ब्रह्मणोऽन्तःकरणोत्पत्तेः संभवान्मनोऽनित्यमेव किं च नित्यत्वे मनसो येनाश्रुतं श्रुतं भवतीत्याद्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञाबाध्येत ततोपि कार्यमनित्यं मनः किं चैवं सुखाद्युपलब्धिकरणत्वेन मनः सिद्ध्यतु तस्य नित्यत्वं कथं सिद्ध्येत् अणुत्वादिति चेन्न तत्र प्रमाणाभावात् न चोत्पत्तिकारणानिरूपणात्तथात्वमिति वाच्यं तस्य श्रुत्यादिभिः प्रतिपादितत्वात् न चोत्पत्तिमत्त्वे मनस एकैकस्यानंतप्रागभावध्वंसकल्पनागौरवमिति वाच्यं प्रमाणमूलत्वेन तस्यादोषत्वात् अन्यथा नैयायिकादीनां कथं परमाणवो जगदुपादानत्वेन सिद्ध्येयुः अस्तु वा मनसोऽणुत्वं तथापि तस्य कथं नित्यत्वं परिच्छिन्नस्य घटादेः सावयवतयानित्यत्वस्य लोकेऽदृष्टत्वात् दृष्टपूर्वकत्वाददृष्टकल्पनायाः तस्मात्कार्यद्रव्यं सावयवं मध्यमपरिमाणमनित्यं मन इति सिद्धं अतो मनोनाशाज्जीवन्मुक्तिरुपपद्यते न च मनसो विनाशे विदेहमुक्तिरेव स्यात्प्रतिबंधकाज्ञानतत्कार्ययोर्नष्टत्वादिति वाच्यं मनोनाशो हि द्विविधः अरूपनाशः स्वरूपनाशश्चेति आद्यस्यादेव द्वितीयेऽखिलवृत्तिनाशेपि स्वरूपेणांतःकरणस्य सत्त्वेन भोगप्रापकप्रारब्धेन पुनरुत्थानसंभवात् स्वरूपमनोनाशेन जीवन्मुक्तिरेव सिध्यति न विदेहमुक्तिः न हि विदेहमुक्तस्योत्थानं संभवति तद्बीजस्य नष्टत्वादित्यभिप्रेत्य जीवन्मुक्तिसाधनमनोनाशं निरूपयितुं तत्प्रतियोगिमनो निरूपयति योगिमने

प्रमाणसत्त्वेपि दोषप्रसक्तौ न्यायमतेपि तत्प्रलयोऽणुसद्भावात् परं वा त्रुटेरित्यादिसूत्रेण परमाणुभ्यो द्व्यणुकक्रमेणोत्पत्तितास्पर्थेण प्रमाणत्वेपि निरवयवयोः परमाण्वोः संयोगासम्भवाद्व्याप्यवृत्तिसंयोगस्य चवक्रमशक्यत्वादसमवायिकारणानिरूपणाच्चेत्यादिदोषदूषितत्वेन तद्व्यणुकक्रमेण जगदुत्पत्तिसम्भव इति भावः॥ ५॥

तस्यस्वरूपनाशंदर्शयितुंत्रिगुणात्मकत्वमाह तच्चेतित्रिगुणात्मकत्वेहेतुमाह तदितिसुखंसत्वविकारःदुःखंरजोविकारःमोहस्तमोविकारः एतेषांत्रया
णामंतःकरणाश्रयत्वेनोपलंभात् तत्सत्वाद्यात्मकमेवेत्यर्थः ततःकिंतत्राह रजइतिपीनंस्थूलंनचतावताकथमात्मदर्शनायोग्यत्वमस्येतिवाच्यं आ
त्मनो अतिसूक्ष्मत्वेनस्थूलमनसातद्दर्शनासंभवात् नहिस्थूलेनखनित्रेणसूक्ष्मपटस्यूतिःसंभवत्यतःसूक्ष्मेणमनसात्मदर्शनंकर्त्तव्यंदृश्यतेत्वग्र्ययाबु
द्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतेःतस्मादात्मदर्शनार्थंमनसःसूक्ष्मत्वमपेक्षितंसएवमनोनाशइत्याहइत्यतइतिइतिशब्दोहेत्वर्थःयतःपीनंमनःआत्मदर्शना
योग्यमतःकारणादित्यर्थः ननुवृत्तिनिरोधेमनसःसूक्ष्मतापादनंमनोनाशश्चेत्तर्हिवृत्तिनिरोधःकस्माद्भवतीत्यतआह वत् साधनानीतिप्रतिचोअत्रैकावि
द्याप्राप्तिरध्यात्मविद्याधिगमःनामरूपात्मकंदृश्यमानंसर्वंमिथ्यैवअहमेवपूर्णःपरमात्मानंदैकरसोमत्तोऽन्यत्किमपिकारणंकार्यंवानास्तिअहमेवस

तच्चसत्वरजस्तमोगुणात्मकंतदाश्रयत्वेनसत्वरजस्तमोविकाराणांसुखदुःखमोहादीनामुपलंभात्रजस्तमोवृत्तिभिरुपचीयमानमं
तःकरणंपीनमात्मदर्शनायोग्यंभवतिइत्यतस्तदर्थंवृत्तिनिरोधनेनसूक्ष्मतापादनंमनोनाशइत्युच्यते तत्साधनानिदर्शितानिअध्यात्मवि
द्याधिगमःसाधुसंगमएवचवासनासंपरित्यागःप्राणस्पंदनिरोधनं एतास्तुयुक्तयःपुष्टाःसंतिचित्तजयेकिलेति॥ ॥ वेमित्यध्यात्मविद्याधिगमेदृश्य

स्यमिथ्यात्वेननिश्चितत्वात्दविषयत्वादात्मनउभयत्राप्रवर्तमानंचित्तंनिरिंधनाग्निवदखिलवृत्तिनाम्नुस्याच्चित्तंस्वयोनावुपशाम्यतितेनतस्याध्यात्मविद्याधिग
मोमनोनाशंप्रतिमुख्यंसाधनंबुद्धिर्वाद्यादिनातत्राशक्तचित्तंप्रत्युपायांतरंसाधुसंगमःसाधवस्तुपुनःपुनःस्मारयंतिपुनःपुनःबोधयंतितेनतोऽध्यात्मविद्याप्रा
प्त्यामनोनाशोभवतिविद्यामदधनमदकुलमदसदाचारमदादिनापीड्यमानःसाधूननुवर्तितुंनोत्सहतेचेत्तंप्रत्युपायांतरंवासनासंपरित्यागःविवेकेनवास
नानांनिवर्तनं तथाहि अहमत्रपंडितोऽन्यःकोवाकिंजानातिसर्वोप्यप्रयोजकःनमत्तोऽस्तीतिमनसोऽभिनिवेशोविद्यामदःअयंविरोधिविवेकेननिवर्तनीयःद्व
स्ववालाकिशाकल्यप्रभृतीनांपंडिताभिमानिनामजातशत्रुयाज्ञवल्क्यप्रभृतिभिःपरिभवदर्शनात्मनुष्यमारभ्यदक्षिणामूर्तिपर्यंततारतम्येनविद्योत्कर्षदर्श रामः
नाच्चचंद्रशेखरस्वामिनःसर्वेषामादिगुरोःसदाशिवस्यदक्षिणामूर्तेरेवनिरतिशयविद्योत्कर्षःइतरेषांसातिशयःतस्मान्मामप्यधिकःकश्चित्पंडितःप्राभविष्य १००

ऽबोधकः३ ऽन्य पण्डितो३

तीतिनिरंतरंचिंतयेत्ततोविद्यामदोनिवर्तते एवंधनमदस्याप्यासुरसंपद्रूपत्वेनपूर्वोक्तदैवीसंपदभ्यासेनधनमदंनिवर्तयेत् एवंलक्षपतिनायावत्व्यव
हारःक्रियतेतावतोऽलक्षपतिनाकर्तुमशक्यत्वात्तेननस्यपराभवसंभवाच्च अहंकोवावराकः१मत्तोऽधिकाःकुबेरतुल्याबहवोवर्तंतेइत्येवंचिंतयतोधनाभि
मानोनिवर्तते एवमन्येपिनिवारणीयाः॥ वासनाप्राबल्येनविवेकेनतत्त्यागोऽशक्यश्चेत् तंप्रत्युपायांतरंप्राणस्पंदनिरोधनं॥ तदपिकस्माद्भवतीत्यतआह
प्राणेतिकथंप्राणायामाभ्यासःकर्तव्यइत्याकांक्षायामाह प्राणायामेतिकारिकांव्याचष्टे इडयेतिप्राणायामेतिप्राणनिरोधद्वारेतिशेषःयोगोद्विविधःदैवी
संपदादिशुभवासनोपेतस्तद्रहितअसुरसंप[...]त्मलिनवासनायुक्तश्चेतिआद्यस्यपूर्वेणमंत्रेणब्रह्मानुसंधानलक्षणोराजयोगउपदिष्टःत्रिरुन्नतंस्थाप्य

प्राणनिरोधोपायोदर्शितःप्राणायामदृढाभ्यासाद्युक्त्याचगुरुदत्तयाआसनाशनयोगेनप्राणस्पंदोनिरुध्यतेइतिप्राणायामप्रकारोद
र्शितःइडयापिबषोडशभिःपवनंचतुरुत्तरषष्टिकमौदरिकंत्यजपिंगलयाशनकैःशनकैर्दशभिर्दशभिर्दशभिर्द्वाधिकैरिति इडयावा
मनासिकयापिबपूरयपश्चात्त्यजरेचयपिंगलयादक्षिणनासिकयेत्यक्षरार्थःप्राणायामस्यमनोनाशोपायत्वंश्रुतावप्युक्तं प्राणान्प्रपीड्ये
हसंयुक्तचेष्टःक्षीणेप्राणेनासिकयोच्छ्वसीत दुष्टाश्वयुक्तमिववाहमेनंविद्वान्मनोधारयेताप्रमत्तइति आसनयोगंतत्साधनंतत्फलंचप
तंजलिरसूत्रयत॥ तत्रस्थिरसुखमासनं॥१॥ प्रयत्नशैथिल्यानंतसमापत्तिभ्यां॥२ ततोद्वंद्वानभिघातश्चेति३ प्रयत्नशैथिल्यंलौकिकवैदि
ककर्मत्यागःफणानांसहस्रेणधरित्रींधृत्वायोऽनंतोवर्ततेसएवाहमस्मीत्यनुसंधानमनंतसमापत्तिः॥ ॥ समंशरीरंहृदींद्रियाणिमनसास

न्निवेश्यब्रह्मोडुपेनप्रतरेतविद्वान् स्रोतांसिसर्वाणिभयावहानीतिद्वितीयस्योत्तरेणमंत्रेणहठयोगःप्राणनिरोधोपायोदर्शितःपूर्वोक्तपूरककुंभकरेचक
क्रमेणप्राणान्प्रपीड्यप्राणायामंकृत्वाप्राणेक्षीणेगतिविच्छेदेनप्राणवृत्त्युपरोधेसतीत्यर्थःसुष्टुयुक्ताचेष्टायस्मिन्सतथोक्तःएवंप्राणायामाभ्यासेनप्राणनि
रोधंकुर्वन्पुनःकिंकुर्यादित्यतआह दुष्टेति अशिक्षिताश्वयुक्तंवाहंरथशकटादिकंयथासारथिरप्रमत्तोरश्मिग्रहणेनसन्मार्गेधारयेत्तथायोगीश्वरो
ऽप्रमत्तोविद्वान्ब्रह्मनिष्ठोदुष्टेंद्रिययुक्तंमनोविषयेभ्योनिवार्यानंदैकरसेब्रह्मणिधारयेत् तत्रैवैकाग्रचित्तोभवेदित्यर्थःआसनाशनयोगेनप्राणस्पंदोनि

रुध्यते इत्युक्तम् तत्रासनं पतंजलिसूत्रेणाप्युत्पादयति आसनेति सूत्रं व्याचष्टे प्रयत्नेति लौकिकवैदिककर्मसु वर्तमानस्यासंभवात्तत्त्यागस्तत्साधनमि
त्यर्थः अनंतसमापत्तिमुत्पादयति फणेति अनंतसमापत्तेः फलमाहानयेति फलसूत्रं व्याचष्टे आसनेति अशनयोगं संमतिप्रदर्शनेनोत्पादयति अश
नेति॥ ननु प्राणायामादिना प्राणस्पंदे निरुद्धे किं भवतीत्यत आह एवमिति तत्रोपपत्तिमाह प्राणेति यथा तंत्वधीनः पटस्तंतुनिरोधे निरुध्यते यथा वा चि
ताधीनानि वाह्येंद्रियाणि चित्तनिरोधे निरुध्यंते एवं प्राणस्पंदाधीनाश्चित्तवृत्तयस्तन्निरोधे निरुध्यंते इत्यर्थः ततः किमित्यत आह ततश्चेति अयमेव वृत्ति
निरोधो मनोनाश इत्युच्यते तस्मिन्मनोनाशे सम्यक् संपन्ने आत्मैकाकारेण मनसाऽनंदैकरसोऽपरिच्छिन्नप्रत्यगात्माऽनुभूयते यदा यात्यमनीभावं तदा तत्प
रमं पदमित्यादिश्रुतेरिति भावः तत्र वृद्धसंमतिमाह यथाहुरिति अयमेव वृत्तिनिरोधो योगविद्भिर्योग इत्युच्यते इत्याह अयमिति तत्र योगशास्त्रसंमतिमाह

अनयाऽऽसनप्रतिबंधकदुरितं क्षीयते आसनाभ्यासस्य फलं द्वंद्वनिवृत्तिः अशनयोगोपि दर्शितः द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत्
मारुतस्य प्रचारार्थं भागमेकं विशेषयेदिति॥ एवं प्राणायामादिना प्राणस्पंदे निरुद्धेऽखिलाश्चित्तवृत्तयो निरुध्यन्ते प्राणस्पंदाधीनत्वात् चि
त्तवृत्त्युदयस्य ततश्च स्वभावत आत्मानात्माकारमंतःकरणमनात्माकारवृत्तिनिरोधादात्मैकाकारं भवति यथाहुः आत्मानात्माकारं स्वभावतो
ऽवस्थितं सदा चित्तं आत्मैकाकारतया निरस्कृत्यानात्मदृष्टिं विदधीतेति अयमेव योगः तथाहुः योगश्चित्तवृत्तिनिरोध इति तत्साधनं चाहुः ॥

तथाहुरिति प्रमाणविपर्ययविकल्पनिद्रास्मृतीनां पंचानां निरोधो योगः प्रत्यक्षानुमानागमाः प्रमाणानि इति पातंजलाः प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनु
पलब्धयः षड्विधानि प्रमाणानीति तु वयं प्रमाकरणं प्रमाणं प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणं अनुमितिप्रमाकरणमनुमानं उपमितिप्रमाकरणमुपमानं
शाब्दप्रमाकरणमागमः उपपादकप्रमाकरणमर्थापत्तिः ज्ञानकरणाजन्याभावानुभवा— साधारणकारणमनुपलब्धिः सामान्यविशेषलक्षणाभ्यां विस्त
रेण प्रमा निरूपिता करणं च निरूपितं विपर्ययो निरूपितः विकल्पः — संशयः असत् ज्ञानं सोपि निरूपितः तामसी वृत्तिर्निद्रा स्मृतिर्निरूपिता एतासां सर्वासां राम: 
वृत्तीनां निरोधो योग इत्यर्थः अथवा दैवासुरवृत्तीनां निरोधो योग इत्यर्थः दैवासुरवृत्तयः पूर्वमेव निरूपिताः ननु किं तन्निरोधनसाधनमित्याकांक्षायां सूत्रेणात् १०१
रात्रिभोजनमुपपादितम् ३॥

दाह तत्साधनं चेति तत्र भगवद्गीतावचनमप्युदाहरति भगवानपीति किं तद्वैराग्यमित्याकांक्षायामाह वैराग्यमिति तद्वैभ्यासो निरूपणीय इत्यपेक्षायामभ्यासस्य
योगं प्रत्यंतरंगसाधनत्वाद्बहिरंगसाधने न विना तदसिद्धेः सोपायं बहिरंगसाधनं निरूप्य तन्निरूपयितुं निरोधं विभजते निरोध इति वृत्तिनिरोध इत्यर्थः संप्र
ज्ञातस्य लक्षणमाह तत्रेति तयोर्मध्य इत्यर्थः अंगसमाधिव्यावृत्त्यर्थं कर्त्राद्यनुसंधानं विनेत्युक्तं आदिशब्देन कर्मकरणग्रहणम्॥ तत्र संमतिमाह यथाहुरिति स्थू
लसूक्ष्मक्रमात्सर्वं चिदात्मनि विलापयेदिति वार्तिकोक्तन्यायेन कृत्स्नां विकृतिमध्यस्तं अज्ञानतत्कार्यं स्थूलसूक्ष्मक्रमेण चिदात्मनि विलाप्य तद्व्यतिरेकेण
नास्तीति निश्चित्येत्यर्थः संभवेति विपर्ययेणानुक्रमोऽत उपपद्यते चेति न्यायेनोत्पत्तिक्रमापेक्षया विपरीतक्रमादित्यर्थः एवमुक्तप्रकारेण ज्ञानपर्यंतं चिन्मात्रे
विलाप्य परिशिष्टं चिन्मात्रं गुरूपदिष्टमहावाक्येन स्वात्मत्वेन चिंतयेद्ध्यायेत् सच्चिदानंदब्रह्मैवाहमस्मीति॥ संप्रज्ञातसमाधेरंतरंगबहिरंगसाधनानि वि

अभ्यासवैराग्याभ्यां तन्निरोध इति भगवानपि तत्राह असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते इति
वैराग्यं निरूपितं निरोधो द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति तत्र कर्त्राद्यनुसंधानं विना चिन्मात्रलक्ष्यैकगोचरप्रत्ययप्रवाहः संप्रज्ञातसमाधिः
यथाहुः विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात् परिशिष्टं तु चिन्मात्रं सदानंदं विचिंतयेत् इति ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं
विना संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षज इत्यस्य संप्रज्ञातसमाधेरंगिनो यमादीन्यष्टांगानि तत्र यमनियमासनप्राणायामप्रत्याहा
भज्य दर्शयितुं तदंगान्नामियतामाह अस्येति बहिरंगसाधनान्युपदिश्यति तत्र यमेति धारणाद्वारा संप्रज्ञातोपायत्वं बहिरंगत्वं ( राः बहिरंगानि॥
मान्युपदिशति अहिंसेत्यादिना मनसा वाचा कर्मणा प्राणिनामपीडनं अहिंसा यथार्थभाषणं सत्यं वचनया परस्वापहरणं स्तेयं न स्तेयोऽस्तेयः ब्रह्मचर्यं निरू
पयति अष्टांगेति किं तदष्टांगमैथुनमित्याकांक्षायां स्मृत्यात दाह यथाहुरिति तद्वर्जनं कस्माद्भवतीत्याकांक्षायामाह विपरीतमिति अष्टांगमैथुनं परित्यज्य तूष्णी
मवस्थानं मुमुक्षुभिः संपाद्यमित्यर्थः यदिच्छंतो ब्रह्मचर्यं चरंति सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यं अंतः शरीरे ज्योतिर्मयो हि शुभ्रो यं
पश्यंति यतयः क्षीणदोषा इत्यादिश्रुतेः सत्संगस्य ब्रह्मचर्यसाधनत्वमाचार्यैर्दर्शितं॥ कौलवकांताधरगतचिंता वातुलतव किं नास्ति नियंता त्रिजगति स
हे वातुल विक्षिप्तचित्त तव कांताधरगतचिन्ता योषिद्गतविचारः का कीदृगस्ति किं तवोपरि कश्चिन्नियन्ता प्रेरकोऽधिपतिर्नास्ति त्रिजगति त्रिलोक्यां भवार्णवतरणे संसारसागरपारार्थं त्वया सतां संगति वैकल्यानौका ज्ञे
येत्यर्थः॥१॥

ज्जनसंगतिरेकाभवनिभवाणीवनरणेनोके तिदोषदर्शनंप्रह्लादेनदर्शितं मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ देहे चेत्प्रीतिमान्मूढो भविता
नरकेपिसइतिभगवतापिस्वदेहाशुचिगंधेननविरज्येतयः पुमान् वैराग्यकारणंनस्यकिमन्यदुपदिश्यतइति एवंदोषमनुसंदधतः कथंतत्रप्रवृत्तिःस्या
दतःसत्संगमसन्निधित्यागदोषदर्शनैर्ब्रह्मचर्यंसुसंपाद्यमितिभावः तत्रोपष्टंभकमाह अतएवेतिनियमानाह शौचेत्यादिनामितांशनादितपःप्रणवा
दिपवित्रमंत्राणांजपःस्वाध्यायःस्वेनानुष्ठितनित्यादिकर्मणःपरमेश्वरेवासुदेवेपरमगुरौसमर्पणमीश्वरप्रणिधानम्॥ रेचकेतिकुंभकोद्विविधः आभ्यंतरो
वाह्यश्चेतिपूर्वोक्तप्रकारेणवायुमापूर्यहृदयेवायुरोधआभ्यंतरः यथाशास्त्रंवायुंविरिच्यशरीराद्बहिर्वायुनिरोधोवाह्यकुंभकः एवमन्येप्रकाराग्रंथांतरे

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः अष्टांगमैथुनवर्ज्यंब्रह्मचर्यं यथाहुःस्मरणंकीर्त्तनंकेलीप्रेक्षणंगुह्यभाषणं संकल्पोऽध्यवसा
यश्चक्रियानिर्वृत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषणः विपरीतंब्रह्मचर्यमनुष्ठेयंमुमुक्षुभिः सत्संगसन्निधित्यागदोषदर्शनतोभ
वेदिति अतएवस्त्रीणांसंभाषणादिनिषेधोपिमुमुक्षूणांनसंभाषेत्स्त्रियंकांचित्पूर्वदृष्टांचनस्मरेत् कथांविवर्जयेत्तासांनपश्येल्लिखिता
मपीत्यादिस्मृतौ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाः आसनंनिरूपितंतच्चपद्मस्वस्तिकाद्यनेकप्रकारं॥ रेचकपूरककुं
भकाःप्राणायामाः इंद्रियाणांविषयेभ्योनिवर्त्तनंप्रत्याहारः एतेषुबहिरंगेषुजितेषुअंतरंगेषुयत्नःकर्त्तव्यः धारणाध्यानसमाधयःसंप्र
ज्ञातसमाधेरंतरंगसाधनानि धारणानाममूलाधारमणिपूरकस्वाधिष्ठानानाहतविशुद्धाज्ञाचक्रदेशानामन्यतरस्मिन्प्रत्यगात्मनिवाचि

क्तास्तत्रैवानुसंधेयाः एतेष्विति अयंशास्त्रीयोऽनुक्रमोऽजितचित्तस्ययस्यतुजन्मांतरसुकृतपरिपाकवशेनशुद्धसत्वस्यप्रथममेवधार ॥तत्संस्थापनम्॥
णाद्यंतरंगसाधनानितेनबहिरंगयमादिषुयत्नोनकर्त्तव्यःकानितान्यंतरंगसाधनानीत्यतआह धारणेतिकेयंधारणेत्यतआह धारणानामेतिमनःसंकल्प
कंध्यात्वासंक्षिप्यात्मनिबुद्धिमान् धारयित्वातथात्मानंधारणापरिकीर्त्तितेतिश्रुत्याप्रत्यगात्मनिमनसःसंस्थापनंधारणाभवत्येवेत्याह प्रत्यगात्मनिचेतिकिंत
च्चित्तस्यस्थापनमित्याकांक्षायामाह तदितिध्यानंलक्षयतिध्यानंनामेति तत्रलक्ष्येप्रत्ययानांसजातीयवृत्तीनांएकतानतानाप्रवाहीकरणंइममेवार्थमाह॥ ॥ रामः १०२
गुदचक्रंमूलाधारसंज्ञिकम्॥१॥ उपस्थस्थंमणिपूरकम्॥२॥ नाभिभवस्वाधिष्ठानम्॥३॥ हृदयगतमनाहतम्॥४॥ कण्ठगंविशुद्धम्॥५॥ भ्रूमध्यगमाज्ञाचक्रम्॥६॥ इत्येतेषांषण्णांचक्राणांमध्येऽन्यतमस्मिंश्चित्तस्थापनंधारणेत्यर्थः॥५॥

लक्ष्येतिध्यानसमाध्योर्भेदंवक्तुंप्रत्ययप्रवाहंविभजते सचेति अंतरितोविच्छिन्नःनहिपरीतोऽनंतरितः यद्दृष्टेविभागस्तमाह आद्यइति ननुसंप्रज्ञातसमा
धेरंगित्वात्कथमंगस्थानेतदुदाहरणं नचांगसमाधिस्ततोभिन्नइतिवाच्यं अंगांगिनोर्वैलक्षण्यादर्शनादित्याशंक्यतयोर्वैलक्षण्यंवक्तुंसमाधिंविभजते
सोपीतिविभागफलमाह आद्येति आद्यसमाधिंभगवत्पादउदाजहार दृशिस्वरूपंगगनोपमंपरंसकृद्विभातंत्वजमेकमक्षरं अलेपकंसर्वगतंयदद्वयंतदे
वचाहंसततंविमुक्तमोमितिद्वितीयंवार्त्तिककाचार्यउदाजहार ज्ञात्वाविवेचकंचित्तंतत्साक्षिणिविलापयेत् चिदात्मनिविलीनंचेत्तत्तन्नविचालयेद्बुधःपूर्णबोधा
त्मनाऽऽसीतपूर्णाचलसमुद्रवदितिसमाध्यभ्याससंभावितविघ्नान्परिहर्तुंतानन्वस्त्यादयतिसंप्रज्ञातेतिकेतेलयादयइत्याकांक्षायांतानाह लयेति॥ तत्रगौडपादा

तदेकस्मरणमितियावत् ध्यानंनामतत्रप्रत्ययैकताननतालक्ष्यैकगोचरप्रत्ययप्रवाहइत्येतत्सचप्रत्ययप्रवाहोद्विविधःविजाती
यप्रत्ययांतरितस्तदनंतरितश्चेति आद्योध्यानंद्वितीयःसमाधिःसोपिद्विविधःकर्त्राद्यनुसंधानपूर्वकस्तद्रहितश्चेति आद्योंगसमा
धिःद्वितीयोंगीसंप्रज्ञातसमाध्युदये लयविक्षेपकषायरसास्वादाश्चत्वारोविघ्नाःसंतिलयोनिद्रापुनःपुनर्विषयानुसंधानंविक्षेपःचित्त
स्यरागादिनास्तब्धीभावःकषायःसमाध्यारंभसमयेसविकल्पानंदास्वादोरसास्वादः॥ यथाहुः लयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः
सकषायंविजानीयात्समप्राप्तंनचालयेत् नास्वादयेद्रसंतत्रनिःसंगःप्रज्ञयाभवेदिति अस्यार्थः प्राणायामादिनालयाभिमुखंचित्तमुत्थाप
येत् दोषदर्शनब्रह्मानुसंधानादिनाविक्षिप्तंचित्तंशमयेत् ब्रह्मप्राप्तंचित्तंनचालयेत्॥ ॥तत्संस्थापनम्॥ यथाहुरिति संभ
तिंव्याचष्टेऽस्यार्थइति आदिशब्देननिद्राशेषपरिहारस्वल्पभोजनादयोगृह्यंते तदुक्तंसमाप्यानिनिंद्रांसुजीर्णोऽल्पभोजीश्रमत्याज्यऽबाध्येविविक्तप्रदेशे॥
समासीतनिस्तृष्णएषप्रयत्नोथवाप्राणरोधोनिजाभ्यासमार्गादिति॥ दोषइति तथाचोक्तंदुःखंसर्वमनुस्मृत्यकामभोगान्निवर्त्तयेत् अजंसर्वमनुस्मृत्यजातं
नैवतुपश्यतीति आदिशब्देनसगुणध्यानसत्संगादयोगृह्यंते तदुक्तम् भगवताविषयान् ध्यायतश्चित्तंविषयेषुविषज्जते मामनुस्मरतश्चित्तंमय्येवप्रविलीयत
इतिवसिष्ठेनापिसंतःसदैवगंतव्यायद्यप्युपदिशंतिनइति॥ याहिस्वैरकथास्तेषांउपदेशाभवंतितइति तथाभगवंतंप्रतिमुचुकुंदेनभवापवर्गोभ्रमतोयदाभवेज्ज
न्दस्वच्छन्दयोः स्वैरइत्यमरः संतोयेयदृच्छयापरस्परवार्तालापास्तएवोपदेशीभूताभवंतीतिभावः॥१॥ हे अच्युतभ्रमतोजनस्यास्यर्यदासतांसमागमोभवतितदैवभवापवर्गःसंसारनिवृत्तिस्तदेवचसद
तौत्वयिपरावरेशेप्रकृतितत्कार्यस्वामिनिमतिर्जायतइत्यर्थः॥१॥

तस्यतद्ध्यस्तु नसत्समागमः सत्संगमोयर्हिनदैवसद्गतौ परावरेशे त्वयि जायते मतिरिति तथाचार्यैरपि संगः सत्सु विधीयतां भगवतो भक्तिर्दृढा धीयतामिति उक्तसाधनकलापैर्विघ्नेषु परिहृतेषु संप्रज्ञातसमाधिरुदेति तेन संप्रज्ञातसमाध्यभ्यासेन प्रत्यगात्मन्येकाग्रतामापन्ने मनसि ऋतंभराप्रज्ञोदेतीति योगशास्त्रप्रक्रियामनुसरन्नाह एवमिति केयं ऋतंभराप्रज्ञेत्यत आह अतीतेति ऋतंभराप्रज्ञानिष्ठस्य निर्विकल्पकसमाधेरसंभवात्तां निरुध्य संप्रज्ञातसमाधिमभ्यसत आत्मसाक्षात्कारद्वारा परं वैराग्यं भवतीत्याह तामिति तर्हि परं वैराग्यं निरूप्यतामित्याकांक्षायामाह तदिति ततः परं किं कर्तव्यमित्याकांक्षायामाह ततोपीति परं वैराग्यानन्तरमित्यर्थः ततः परं कीदृशोऽभ्यासः कर्तव्य इत्याकांक्षायामाह उत्साहेति केनाप्युपायेन निखिलवृत्तिपरोधरूपाऽसंप्रज्ञातसमाधौ

**रागादिकषायसहितं चित्तं यदा भवेत् तदा विजानीयात् समाध्यारंभसमये सविकल्पानंदं नास्वादयेत् किं तूदासीनो ब्रह्मप्रज्ञया युक्तो भवेदिति एवं निर्विघ्नेन संप्रज्ञातसमाध्याभ्यासेनाध्यात्मप्रसादमापन्ने मनसि ऋतंभरा प्रज्ञोदेति अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मवस्तुविषयं योगिप्रत्यक्षं ऋतंभराप्रज्ञातामपि निरुध्य समाधिमभ्यसतो गुणवैतृष्ण्यं परवैराग्यमुदेति तच्च निरूपितं ततोप्यभ्यासः कर्तव्यः उत्साहप्रयत्नोऽभ्यासः यथाहुः तत्र स्थितौ यत्नोऽभ्यास इति तस्यापि निरोधे सर्वधीनिरोधो भवति अयमेवासंप्रज्ञातसमाधिः न केवलं परवैराग्यादेव समाधिलाभः किं त्वीश्वरप्रणिधानादपि तथा चोक्तं ईश्वरप्रणिधानाद्वा॥१॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः॥२॥ तस्य वाचकः प्रणवः॥३॥ तज्जपस्तदर्थभावनमिति॥४॥**

१ तिष्ठामीत्यु- त्साह एव यत्नः स एवाभ्यास इत्यर्थः॥ तत्र संमतिमाह यथाहुरिति तत्र प्रशांतवाहितायां स्थितौ ननु तेनाभ्यासेन किं भवतीत्याकांक्षायां तेन सर्ववृत्तिनिरोधे स्वस्यापि निरोधादसंप्रज्ञातसमाधिर्भवतीत्याह तस्यापीति ननु तस्याहं निरोधेऽन्यत्साधनमस्ति न वा नाद्यः अनवस्थाप्रसंगात् न द्वितीयः तन्निरोधायोगात् न च स्वयमेव स्वस्य निरोधक इति वाच्यं विरुद्धत्वात् लोके तथाऽदर्शनाच्च तस्मादिदमसंगतमिति चेन्न कतककरजोन्यायेन तस्य स्वपरनिर्वाहकत्वात् तस्मादिदं संगतमिति भावः ननु भवतु सर्वधीनिरोधः प्रकृते किमायातमित्याशंक्याय: पूर्वमुपदिष्टः द्वितीयोऽसंप्रज्ञातः स एवायमित्याह अयमेवेति सर्वधीनिरोध एवेत्यर्थः अत्र धीशब्देन वृत्तिरित्युच्यते॥ छ॥ छ॥



२ कतकोनिमित्याख्यौषधिविशेषस्तद्रजो यथा सलिलमलमुत्सार्य स्वयमपि निवर्तते तद्वदित्यर्थः॥२॥

४ पुण्यपापाभ्यां विलक्षणं कर्म योगिनो भवति योगजधर्मप्रकर्षजन्यत्वान्निष्कामपि नालीति भावः॥४॥

तदुक्तं मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः असंप्रज्ञातनामासौ समाधिरभिधीयते प्रशान्तवृत्तिकं चित्तं परमानंददीपकं असंप्रज्ञातनामासौ समाधिर्योगिनां प्रिय इत्यादि असंप्रज्ञातसमाधिप्रति साधनांतरमाह न केवलमिति तत्र संमतिमाह तथा चेति सूत्रतात्पर्यमाह एतदुक्तमिति वेति विकल्पार्थं उक्तक्रमाद्वा समाधिलाभः ईश्वरप्रणिधानाद्वेति विकल्पार्थः कोयमीश्वर इत्याकांक्षायां क्लेशकर्मेत्यादिसूत्रं प्रवृत्तं तदर्थमाह क्लेशेति आदिशब्देन कर्मविपाकाशया गृह्यंते अस्यार्थः अविद्यादयः पंच क्लेशाः कर्म त्रिविधं शुक्लं कृष्णं मिश्रं चेति पुण्यं शुक्लं कृष्णं पापं उभयं मिश्रं तदुक्तम् कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति विपाकः कर्मफलं तदुक्तं विपाको जात्यायुर्भोगा इति आशयस्तु तज्जन्यवासना ततश्च क्लेशकर्मविपाकाशयैः संबद्धा जीवास्तद्विपरीत ईश्वरः पुरुषविशेष इति सूत्रांशस्यार्थमाह सर्वज्ञ इति तस्येश्वरस्य प्रणिधानं कीदृशमित्याकांक्षायां तदुक्ति तस्य वाचकः प्रणव इति सूत्रं तद्व्याकरो

**एतदुक्तं भवति ईश्वरप्रणिधानाद्वा समाधिलाभः क्लेशादिभिरसंबद्धः सर्वज्ञः सर्वशक्तिरीश्वरः ईश्वरस्याभिधायकः शब्दः प्रणवः प्रणवजपः मांडूक्योपनिषत्स्वीकरणतद्वार्तिकोक्तप्रकारेण वार्थानुसंधानं चेश्वरप्रणिधानम्॥ अथवा तयोर्हंसः सोऽसौ योऽसौ सोऽहमित्यत्र सशब्देन परमात्मोच्यते अहंशब्देन प्रत्यगात्मोच्यते अनयोः शब्दयोः सामानाधिकरण्याद्ब्रह्मात्मैक्यमुच्यते ततश्च सोहं इत्यस्य परमात्माहमित्यर्थः यथा तथा प्रणवस्यापि तथा हि सोहमित्यत्र सकारयोर्लोपे कृते परिशिष्टयोरोअं इति अनयोः संधिं कृत्वोच्चारणे ओमिति शब्दो निष्पन्नः**

ति ईश्वरस्येति तज्जपस्तदर्थभावनमीश्वरप्रणिधानमिति सूत्रं तद्व्याख्यायति प्रणवेति॥ अनुसंधानप्रकारः प्रथमपरिच्छेदे निरूपितः प्रकारांतरेण सदृष्टांतं प्रणवार्थमाह अथवेति ननु दृष्टांते सोहमिति तदहमोः सामानाधिकरण्येन ब्रह्मात्मैक्यं प्रतिपाद्यतां तत्कथं दार्ष्टांतिक इत्याशंक्योपपादयति तथा हीति। पृषोदरादीनि यथोपदिष्टमिति न्यायेन लोपः एङः पदान्तादतीति संधिः तत्र संमतिमाह तदुक्तमिति अस्त्वेवं शब्दनिष्पत्तिः प्रकृते किमायातमित्यत आह ततश्चेति ततोपि किं तत्राह सर्वथापीति परमेश्वरेति अनुग्रहोऽभिध्यानं मनोगतेच्छा अस्याभिमतमस्त्विति अथवा भूमिकाजयक्रमेण समाध्यभ्यासः कर्तव्यः तथा च श्रुतिः यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि इति अस्यार्थः लौकिकवैदिकाभिलपनव्यव

पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युरिति पाणिनि०॥३॥ पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यादिति पाणिनि०॥३॥

हारहेतुभूतायावाक्तांमनसियच्छेत् ईकारः छांदसः प्राज्ञः पंडितो विवेकी वाग्व्यवहारंसर्वंसमुत्सृज्य मनोमात्रेणावतिष्ठेत् तथापिप्रणवजपोनत्याज्यो
यावत्समाध्युदयं तथाचस्मृतिः मौनयोगासनंयोगस्तितिक्षैकांतशीलतानिःस्पृहत्वंचसमत्वंचसप्तैतान्येकदंडिनामितियोगः प्रणवजपस्तदर्थभावनं
ततश्चगोमहिष्यादिवत्सम्यग्वाङ्निरोधः प्रथमाभूमिः तस्यांजितायांमनोनिरोधेद्वितीयभूमौप्रयतेत तत्संकल्पात्मकंमनोज्ञानात्मनिनियच्छेत् ज्ञानात्माविशे
षाहंकारः अमुष्यपुत्रोहमित्यादिः तन्मात्रेणावतिष्ठेत् सर्वसंकल्पविकल्पंत्यक्त्वाबालमूकादिवत् निर्मनस्ताद्वितीयभूमिः तस्यांजितायांविशेषाहंकारनिरो
धेतृतीयभूमौप्रयतेत ब्राह्मणोहंमनुष्योहमितिविशेषाहंकारस्तंमहतिनियच्छेत् ब्राह्मणोहमित्याद्यभिमानंत्यक्त्वाऽस्मिमात्रावशेषोभवेत् अहंकारस्यस
र्वावस्थाऽस्मिताऽहमेवमहत्तत्त्वंसामान्याहंकारइतिचोच्यते अलसोदासीनवद्विशेषाहंकाररहित्यंतृतीयभूमिः तस्यांजितायामस्मितामात्रावशेषमहो

तदुक्तं सकारंचहकारंचलोपयित्वाप्रयोजयेत् संधिंचपूर्वरूपाख्यंततोसौप्रणवोभवेदिति ततश्चॐमित्यस्यशब्दस्यपरमात्माहमि
त्यर्थः सर्वथापिप्रणवजपप्रणवार्थानुसंधानरूपेणेश्वरप्रणिधानेनपरमेश्वरानुग्रहात्समाधिलाभोभवत्येव॥ एवंसमाध्यभ्यासेनां
तःकरणस्यातिसूक्ष्मतापादनंमनोनाशइत्युच्यते अनेनसूक्ष्मेणमनसात्वंपदलक्ष्यसाक्षात्कृतेमहावाक्येनस्वस्यब्रह्मत्वसाक्षात्कारो
भवति नकेवलंसमाधिनैवब्रह्मत्वसाक्षात्कारः किंतुविवेकेनापिसंभवति॥ २ तमात्मानंशांतेचिदेकरसात्मनिनियच्छेत् ननुमहतोऽव्यक्तेनि
रोधःकुतोनोच्यतेइति चेन्नकार्यंकारणेनिरुध्यमानंलीनमेवस्यात् तथाचनिद्रास्यात् ननिरोधसमाधिः अतोमहांतमात्मानंचिदात्मनिनियच्छेत् चिदात्म
निसर्वात्मनाचित्तंनिरुद्धंचेदयमेवासंप्रज्ञातसमाधिश्चतुर्थभूमिः एवंभूमिकाजयेनसमाध्यभ्यासःकर्तव्यइति॥ ततःकिमित्यत आह एवमिति उक्तप्रकारेणा
गन्यतमेननुसूक्ष्मेणमनसाकिंभवतीत्याशंक्यतादृशमनसांतःकरणतद्वृत्तिसाक्षिणित्वंपदलक्ष्येप्रतीचिसाक्षात्कृतेऽनंतरंतत्त्वमस्यादिवाक्येनस्वस्यब्रह्म
त्वसाक्षात्कारोभवतीत्याह अनेनेतिनन्वेतेनैयोगः प्रत्युक्तइतिसूत्रकारेणयोगस्यदूषितत्वात् कथंसाक्षात्कारसाधनत्वेनसमाध्यभ्यासोनियम्यतेइति चेत्सत्यं त
त्रप्रधानकारणतावादनिराकरणाभिप्रायेणयोगशास्त्रंनिराकृतं नतुचित्तनिरोधलक्षणयोगनिराकरणाभिप्रायेणनिरुद्धचित्तस्यविषयप्रवणस्यब्रह्मसाक्षा रामः १०४
एतेनमत्वादिस्मृत्यनवकाशदोषात् सांख्यमतनिराकरणेनयोगः योगशास्त्रंप्रत्युक्तंनिराकृतंवेदितव्यमिति॥शा०॥सू०॥२॥

संराधनेभक्तिध्यानप्रणिधानाद्यनुष्ठानेतस्मिन्योगिनःप्रत्यक्षानुमानाभ्यांपरमात्मानंपश्यन्तिप्रत्यक्षंश्रुतिःकश्चिद्धीरःप्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नित्यादिःअनुमानंस्मृतिःयंविनिद्राजितश्वासाइत्यादिरि
त्कारासंभवाच्च किंचसमाध्यभ्यासाच्च अपिसंराधनेप्रत्यक्षानुमानाभ्यांनिदिध्यासितव्यःविज्ञायप्रज्ञांकुर्वीत ध्यानेनात्मनिपश्यंतिध्यानयोगेनसंपश्यन्नात्मन्यात्मा
नमात्मनेत्यादिसूत्रश्रुतिस्मृतिशतैर्योगस्यसाक्षात्कारसाधनत्वावगमात्समाध्यभ्यासोऽवश्यमपेक्षितएवमहावाक्याद्ब्रह्मसाक्षात्कारे — त्योनन्वेवंज
नकादीनांसिद्धगीताश्रवणमात्रेणब्रह्मसाक्षात्कारोजातइति प्रतिपाद्यतेवाशिष्ठादौसमाध्यभावेपितत्कथंस्यादित्याशंक्य बहुव्याकुलचित्तानांतदपे
क्षायामप्यव्याकुलबुद्धीनांविवेकेनमनसात्वंपदलक्ष्येसाक्षात्कृतेमहावाक्याद्ब्रह्मसाक्षात्कारोभवत्येवसमाधिंविना तदुक्तं अव्याकुलधियांमोहमात्रेण
च्छादितात्मनांसांख्यनामाविचारोयंमुख्योरूढिमितिसिद्धिदः१ इतिसमाधिविवेकयोरधिकारिभेदविषयतयाऽर्थवत्वेनानयोर्ब्रह्मसाक्षात्कारंप्रतिविकल्पे

अंतःकरणतद्वृत्तीनामवभासकोयश्चिदात्मासाक्षीतस्मिन्साक्षात्कृतेवाक्याद्ब्रह्मसाक्षात्कारःसंभवत्येव तदाह द्वौक्रमौचित्तनाशस्य
योगोज्ञानंचराघव योगोवृत्तिनिरोधोहिज्ञानंसम्यगवेक्षणं असाध्यःकस्यचिद्योगःकस्यचिज्ज्ञाननिश्चयःप्रकारौद्वौततोदेवोजगा
दपरमेश्वरइति ज्ञानंविवेकःतृतीतीयाध्यायेइंद्रियाणिपराण्याहुरित्यारभ्यकामरूपंदुरासदमित्यंतेनविवेकंषष्ठाध्यायेयोगंच
यत्सांख्यैःप्राप्यतेस्थानंतद्योगैरपिगम्यतेइतिवादेवःसर्वज्ञःपरमेश्वरोभगवानद्वौप्रकारौजगादइतिश्लोकार्थः॥ तदेवंतत्त्वज्ञान
वासनाक्षयमनोनाशाभ्यासाज्जीवन्मुक्तिःसिध्यतीतिसिद्धं तस्याजीवन्मुक्तेःपंचप्रयोजनानिसंतिज्ञानरक्षातपोविसंवादाभावोदुःख
निवृत्तिःसुखाविर्भावश्चेति॥ २ नसाधनत्वमित्यभिप्रेत्याह नकेवलमिति तत्रसंमतिमाह तदाहेति चित्तनाशस्यसूक्ष्मतापादनस्यद्वौक्रमावुपा
यौकारणेद्वैविध्यमाह योगइतियोगस्यलक्षणमाहयोगइति तस्यवृत्तीनांनिरोधस्तद्वृत्तिनिरोधःजडाजडौविविच्यसम्यगसंकीर्णतयाऽवेक्षणंदर्शनं
विवेकइत्यर्थः अनयोर्विकल्पेनमनोनाशद्वारासाक्षात्कारहेतुत्वमित्याह असाध्यइतिसंमतिंव्याचष्टे ज्ञानमितिकोसौदेवःपरमेश्वरःद्वौप्रकारौकुत्रजगा
देत्याकांक्षायांश्रीकृष्णोभगवान् गीतायांतौजगादेत्याह तृतीयइति॥ ननुयोगाभ्याससाध्यमनोनाशस्यब्रह्मसाक्षात्कारहेतुत्वेतयानेनब्रह्मसाक्षात्कारेस
तिनिखिलबंधनिवृत्त्यापुंसःसर्वकर्तव्यताहान्याकृतकृत्यत्वात्किंतदनंतरंतत्त्वज्ञानवासना॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अ० कौ० व० प्र० १०५

स्य मनोनाशाभ्यासेनेत्याशंक्य यस्य योगाभ्यासपूर्वकं ब्रह्मसाक्षात्कारो निर्वृत्तो वा केनेनस्य तदनंतरं तदपेक्षाभावेपि यस्य विवेकपूर्वकं वाक्याद्ब्रह्मसा-
क्षात्कारो निर्वृत्तस्तस्य तदनंतरं प्रबलप्रारब्धभोगापादितकर्तृत्वभोक्तृत्वादिलक्षणबंधप्रतिभासवारणस्य कर्तव्यशेषस्य विद्यमानत्वेन तत्त्वज्ञानवास-
नाक्षयमनोनाशाभ्यासोऽपेक्षित इत्यभिप्रायेणोपसंहरति तदेवमिति यदुक्तं जीवन्मुक्तिसिध्याप्रयोजनाभावात्तदर्थं यत्नो नापेक्षित इति तत्राह तस्या-
ति ज्ञानरक्षां निरूपयति तत्रेति तेषु पंचसु मध्य इत्यर्थः ननु प्रमाणोत्पन्नज्ञानस्य निश्चयत्वेन कथं तद्विषयसंशयविपर्यासप्रसक्तिस्तत्रश्च जीवन्मुक्त्य-
सेनाप्रसक्तयोस्तयोरनुत्पादः कथं रक्षा स्यादिति उच्यते यद्यपि प्रमाणकुशलानां मुख्याधिकारिणां संशयविपर्यासप्रसक्तिरेव नास्ति तथाप्यन्येषां सा-
स्त्येव किं तत्र निमित्तमिति चेत् शृणु अनंतानि निमित्तानि संति तथाहि साक्षात्कारानंतरं यथापूर्वं मनुष्योऽहमित्यादिव्यवहारदर्शनात् रागद्वेषाद्युपलब्धे-
स्त्वन्नं ज्ञानमापातरूपमेवेति केन चिद्विचारेणापादितस्य जीवन्मुक्त्यभ्यासाभावे संशयविपर्यासौ स्यातामिति केचित् अन्येत्वामरणं ब्रह्मसाक्षात्कार-

तत्रोत्पन्नब्रह्मसाक्षात्कारस्य पुंसः पुनः संशयविपर्ययानुत्पादो ज्ञानरक्षा तथाहि ज्ञानिनां शुकराघवनिदाघादीनामिव अकृ-
तोपास्तेर्ज्ञानिनोऽस्मदादेश्चित्तविश्रांत्यभावात्पुनः कदाचित्संशयविपर्ययौ संभवेतां॥

१ वनसंभवति वाक्यात्परोक्षमेव ज्ञानं जा-
तल्लिंगदर्शनात् किं च यदीदानीं ब्रह्मसाक्षात्कारः स्यात्तर्हि तेन —— सावरणाज्ञाननिवृत्त्या ईश्वरस्येव ज्ञानिनः सर्वज्ञत्वादिप्रसंगः स-
दीनां शुकादीनां च तथादर्शनात् न च सर्वज्ञत्वादेस्तपोयोगफलत्वात् ज्ञानफलत्वाभावान्नोक्तदोष इति वाच्यं तर्हि योगादिहीनस्य ज्ञानं वा कथं स्यात् प्र-
माणबलात्स्यादिति चेत् योगमंतरेण प्रमाणस्यापि साक्षात्कारजनकत्वायोगात्तस्मादुत्पन्नं ज्ञानमापातरूपमेवेति केनचिद्धूर्तेणापादितं प्रारब्धभोगवशेन वि-
क्षिप्तचित्तस्य ज्ञानिनः संशयादिः स्यादेवं तदभ्यासाभावे एवमन्यानि संशयनिमित्तान्यूहेनैव द्रष्टव्यानि तस्माज्जीवन्मुक्त्यभ्यासेनापरोक्षज्ञानिनोऽपि संभावितसंशयवि-
पर्यासानुत्पादो ज्ञानरक्षेत्युच्यते इममेवार्थं दृष्टांतमुखेनोपपादयति तथाहीति ज्ञानिनामपरोक्षज्ञानिनां शुकस्य प्रथमं स्वत एव विवेकेन ब्रह्मसाक्षात्कारो जातः
पश्चात्संदिहानेन दृष्टः पित्रा व्यासः पुत्राय तदुपदिदेश पुनश्च संदिहानं पुत्रं मत्वा जनकसमीपं गच्छेत्युवाच स तं गतः तेनानुशिष्टः निर्विकल्पकं समाधिं प्राप्य मुक्तिं गत इ- १०
कृतेपिश्रवणेऽगद्देषादीनां सत्वमबोधलिङ्गम्॥१॥ मनोनाशादि॥२॥ नर्केणा॥३॥

ज्ञानादैवकैवल्यं ब्रह्मवेदब्रह्मैव भवतीत्यादि शास्त्रविरोध इत्यर्थः॥२॥
ननु भवेतां संशयविपर्यासौ तावता को दोष इत्याशंक्याह अज्ञानवदिति तत्र भगवद्वचनमुदाहरति तदाहेति ननु जीवन्मुक्त्यभ्यासरहितस्य दृढापरोक्षज्ञानि-
नो मोक्षोऽस्ति न वा आद्ये जीवन्मुक्त्यभ्यासवैयर्थ्यं द्वितीये तु शास्त्रविरोधः सत्यं दृढज्ञानिनो मोक्षसिद्धेपि दृष्टसुखार्थं जीवन्मुक्त्यभ्यासोपपत्तेः जीवन्मुक्ताना-
मपि भूमिकातारतम्येन दृष्टसुखतारतम्यमस्त्येव तथा च श्रूयते आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति अस्यार्थः आत्मनि क्रीडा रमणं अप-
रोक्षानुभवो यस्य स तथोक्तः अयं ब्रह्मविदित्युच्यते आत्मनि रतिः विजातीयानुभवतिरस्कारेण साक्षात्कारो यस्य स तथोक्तः आत्मानंदापरोक्षानुभविता अयमे-
व ब्रह्मविद्वर इत्युच्यते क्रिया ब्रह्मध्यानं तदस्यास्तीति क्रियावान् ब्रह्मात्मैक्यसमाधिमानिति यावत् अयं ब्रह्मविद्वरीयानित्युच्यते अयं स्वतो नोत्तिष्ठति य-
स्वतः परतोपि —— नोत्तिष्ठते स ब्रह्मविदां वरिष्ठः एते चत्वार एव वसिष्ठेनोक्ताः सप्तसु योगभूमिषु चतुर्थभूमिमारभ्य प्रतिपादिताः सप्तभूमयो दर्शिताः ज्ञानभू-
मिः शुभेच्छाख्या प्रथमा समुदाहृता विचारणा द्वितीया स्यात् तृतीया तनुमानसा सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा

अज्ञानवत्तावपि मोक्षप्रतिबंधकौ तदाह भगवान् अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति ततश्च जीवन्मुक्त्यभ्यासेन संभवति संश-
यविपर्ययनिवृत्तिः ज्ञानरक्षा नाम प्रथमप्रयोजनं चित्तैकाग्र्यं तपः मनसश्चेंद्रियाणां चह्यैकाग्र्यं परमं तपः स ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते

१ इति स्मरणात्॥

स्मृतेति भूमिकाः तिस्रः श्रवणमनननिदिध्यासनात्मिकाः चतुर्थ्यां भूमौ साक्षात्कारोदयः अत एव चतुर्थभूमिनिष्ठो ब्रह्मविदित्युच्यते पंच-
म्यादिभूमिनिष्ठानां विश्रांतितारतम्येन दृष्टसुखतारतम्याद्वर वरीयो वरिष्ठा इत्युच्यंते एते त्रयोपि जीवन्मुक्ता एव ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः तेषामादित्य-
वज्ज्ञानं प्रकाशयति तत्परमित्यादिस्मृत्या ज्ञानेनाज्ञाननिवृत्तेः प्रतिपादनात् ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परमित्यादिश्रुत्या ब्रह्मज्ञानाद्ब्रह्मभावापत्तेः प्र-
तिपादनात् ब्रह्मविद्वरादीनां चतुर्णां मोक्षः समान एव दृष्टसुखं तु तारतम्येन भवति तदुक्तं तारतम्येन सर्वेषां चतुर्णां सुखमुत्तमं तुल्या चतुर्णां मुक्तिः स्यात् दृष्टसौ-
ख्यं विशिष्येत इति ज्ञानरक्षानिरूपणमुपसंहरति ततश्चेति जीवन्मुक्त्यभ्यासरहितस्य संशयादिप्रसक्त्या मोक्षप्रतिबंधः स्यात्तस्मादित्यर्थः जीवन्मुक्तीति तत्सा-
धनतत्त्वज्ञानाद्यभ्यासेनेत्यर्थः द्वितीयं प्रयोजनं तपो निरूपयति चित्तेति तत्र स्मृतिप्रमाणमाह मनसश्चेति अग्निहोत्रादिसर्वधर्मेभ्यः स चित्तैकाग्र्यलक्षण

अ·कौ· तिशेषः तदाह तपस्विभ्योऽधिकोयोगी ज्ञानिभ्योप्यधिकोमतः कर्मिभ्यश्चाधिकोयोगी तस्माद्योगी भवार्जुन इति॥ भवत्वेवंचित्तैकाग्र्यंतपःप्रारब्धभोगेनवि
स्व·प्र· क्षिप्तचित्तस्य तु ज्ञानिनस्तत्कथंस्यादित्याशंक्याह ज्ञानिन इति यद्यपि ज्ञानिनो प्रपंचमिथ्यात्वनिश्चयेन चिदात्मनः सत्यत्वावधारणाच्चित्तैकाग्र्यमस्त्येव
१०६ तथापिप्रारब्धभोगकाले आपाततोनामरूपादिप्रतिभाससंभवेनननिरंकुशंचित्तैकाग्र्यंतस्यजीवन्मुक्तस्यतुयोगाभ्यासेनमनःसोनष्टत्वेननिखिलवृत्तीनामनुद

ज्ञानिनोजीवन्मुक्तस्याखिलचित्तवृत्तीनामनुदयान्निरंकुशंचित्तैकाग्र्यंसंपद्यते तदेवतपस्तच्चलोकसंग्रहायभवति तदुक्तंलोकसंग्र
हमेवापिसंपश्यन्कर्तुमर्हसीति संग्राह्योलोकस्त्रिविधः शिष्योभक्तस्तटस्थश्चेति तत्रसन्मार्गवर्ती शिष्यः गुरूपदिष्टमार्गेणश्रवणादि
नाब्रह्मसाक्षात्कुर्वन्मुच्यते आचार्यवान्पुरुषोवेद तस्यतावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्य इतिश्रुतेः भक्तोपिज्ञानिनःपूज्यान्न
पानादिनाऽभीष्टंप्राप्नोति तथाचश्रुतिः यंयंलोकंमनसासंविभातिविशुद्धसत्वःकामयतेयांश्चकामान् तंतंलोकंजयतेतांश्चकामांस्त
स्मादात्मज्ञंह्यर्चयेद्भूतिकाम इति स्मृतिरपि यद्येकोब्रह्मविद्भुंक्ते जगत्तत्सर्पयतेखिलंतस्माद्ब्रह्मविदेदेयंयद्यस्तिवस्तुकिंचनेत्यादितट
स्थोद्विविधः सन्मार्गवर्त्यसन्मार्गवर्तीचेति तत्रसन्मार्गवर्ती मुक्तस्यसदाचारप्रवृत्तिंदृष्ट्वास्वयमपितत्रप्रवर्त्तते तदाह भगवान् य
द्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते असन्मार्गवर्तीतुजीवन्मुक्तस्यदृष्टिपातेनसर्वपापैःप्रमुच्यते
तथाचस्मृतिः यस्यानुभवपर्यंताबुद्धिस्तत्वेप्रवर्त्तते तद्दृष्टिगोचराःसर्वेमुच्यंतेसर्वकिल्बिषैरिति द्वेषिणस्तुज्ञानिनोदुष्कृतंसंभावितगृह्णं
ति तथाचश्रुतिः तस्यपुत्रादायमुपयांतिसुहृदःसाधुकृत्यांद्विषंतः॥ २१ यान्निरंकुशंचित्तैकाग्र्यंभवति तदेवतपइत्यर्थः ननुजीवन्मुक्तानांतपः
क्वोपयुज्यतइत्याशंक्याह तच्चेति तत्रभगवद्गीतासंमतिमाह तदुक्तमितिब्रह्मवित्पूजादिनाऽभीष्टप्राप्तौ प्रमाणमाह तथाचेति आदिशब्देनयत्फलंलभतेम
र्त्यः कोटिब्राह्मणभोजनैः तत्फलंसमवाप्नोति ज्ञानिनंयस्तुभोजयेत् ज्ञानिभ्योदीयते यच्चतत्कोटिगुणितंभवेदितिगृह्यते तत्वज्ञानिनोदृष्टिपातेनेतरेषांपापनि रामः
तस्यज्ञानिनः पुत्रास्तनयादायंलौकिकसम्पत्तिमुपयान्तिप्राप्नुवन्तीत्यर्थः॥ ३॥ १०६

दुःखनि·२
यःप्रयतेतार्थकर्मपरिसमाप्यतिसकर्मठइत्युच्यतेकर्मणिघटोऽठ चरति प्राणिनि स्मरणात् अपसदोनीचः असत्कृन्निष्फलकर्मकारीइत्येतैः प्रतिपादितनिन्दादिश्रवणेपीत्यर्थः॥ ५॥
दत्तोप्रमाणमाह तथाचेतिविसंवादाभावंतृतीयप्रयोजनंनिरूपयति जीवन्मुक्तस्येति॥ दुःखनिवृत्तिरूपंचतुर्थंप्रयोजनंविभज्यनिरूपयति दुःखेतिय
द्यपिज्ञानिनोपिदुःखनिवृत्तिरस्तितथापितस्यप्रारब्धभोगकालेवाधितानुवृत्त्यासुख्यहंदुःख्यहमित्याद्यनुभवसंभवात् ज्ञानिनोदुःखनिवृत्तिः सुरक्षिता
नभवतिजीवन्मुक्तस्यतुयोगाभ्यासेनाखिलवृत्तीनांनिरोधात्सासुरक्षिताभवति इतिदुःखनिवृत्तिप्रयोजनंजीवन्मुक्तेर्भवत्येव एतेनप्रयोजनाभावान्मुक्त्यभ्या
सोनिरर्थकइतिपरास्तंसुखाविर्भावंपंचमंप्रयोजनंनिरूपयति मुक्तस्येतिजीवन्मुक्तस्येत्यर्थः ज्ञानंब्रह्मसाक्षात्कारः योगोनिर्विकल्पकसमाधिपर्यंतोध्यान
नतपा०२
पापकृत्यामितिएवंजीवन्मुक्तस्यतपोलोकसंग्रहायभवतीतितपोनामद्वितीयंप्रयोजनंजीवन्मुक्तस्यव्युत्थानदशायांकर्मठापसदासत्कृ
तनिंदादिश्रवणेपिपाखंडीकृतनिष्ठुरादिदर्शनादावपिचित्तवृत्तेरनुदयाद्विसंवादोनभवति तथाहुः ज्ञात्वासदातत्वनिष्ठाननुमोदाम
हेवयंअनुशोचामएवान्यान्नभ्रांतैर्विवदामहे इतिविसंवादाभावोनामतृतीयंप्रयोजनं॥ दुःखनिवृत्तिर्द्विविधाऐहिकामुष्मिकभेदात्
तत्रज्ञानेनभ्रांतिनिवृत्तौयायोगाभ्यासेनाखिलवृत्तिनिरोधेचित्तस्यात्मैकाकारतयाऐहिकस्सत्तदुःखनिवृत्तिः प्रारब्धभोगेसत्यपितथा
चश्रुतिः आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदित्यादिनाऐहिकदुःखनिवृत्तिंमुक्तस्यदर्शय
ति ज्ञानेनाज्ञाननिवृत्त्यासंचितागामिकर्मणामश्लेषविनाशाभ्यामामुष्मिकदुःखानामपिनिवृत्तिः तथाचश्रुतिएतंहवावनतपतिकिम
हंसाधुनाकरवंकिमहंपापमकरवमितिदुःख निवृत्तिर्नामचतुर्थंप्रयोजनं मुक्तस्यज्ञानयोगाभ्यामज्ञानतत्कृतावरणविक्षेपनिवृत्त्या
वाधकाभावात्परिपूर्णब्रह्मानंदानुभवःसुखाविर्भावः॥ २२ योगः नायमर्थोऽस्मदुत्प्रेक्षामात्रसिद्धः किंतुश्रुतिसिद्धइत्याह इममितिइयता
प्रबंधेनोपपादितमर्थंउपसंहरति एवमितिप्रकरणप्रतिपाद्यमर्थंदृढीकृत्योपसंहारव्याजेनदर्शयति तस्मादितिब्रह्मविदःप्रारब्धक्षयेब्रह्मानंदात्मना
वस्थानेपुनरुत्थानाभावेचप्रमाणान्युपन्यस्यति नतस्येतितस्यज्ञानिनःप्राणानोत्क्रामंतियथाऽज्ञानांस्वकर्मफलोपयोगायवर्तमानशरीरारंभकेप्रारब्धेक्षी

ज्ञानिनः ३॥ संपद्य स्वप्रकाशभानात्मानं साक्षादनुभूय तेनैवात्ममात्रेणाविर्भावः अवस्थानवान्भवतिमुक्तः कुतः स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दादित्यर्थः पा॰ ४॥ सू॰ ॥ ५॥ | नान्युक्तविशेषणानींद्रियाणि षोडशकलात्मकसूक्ष्मदेहरूपाणि परे ब्रह्मणि लीयंते तथाह्याह श्रुतिः एवमेवास्येति॥ पा॰ ॥ सू॰ ॥ ३॥

णो प्राणा उत्क्रामंति परलोकजिगीषया तस्याभोगेन प्रारब्धस्य नष्टत्वात् ज्ञानेन संचितकर्मणः नष्टत्वादायामिकर्मणामश्लेषात् ज्ञानोत्पत्तित एवाज्ञानस्य नष्टत्वाज्जन्मबीजाभावात्प्राणा नोत्क्रमंतीत्यर्थः॥ तर्हि क्व तिष्ठंतीत्याशंक्याह अत्रैति अत्र प्रत्यगात्मनि प्राणाः समवलीयंते लयं प्राप्नुवंतीत्यर्थः तथा च श्रुत्यंतरं एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंतीति सूत्रकारोऽप्याह तानि परे तथाह्याहेति जीवदवस्थायामेव ब्रह्मसाक्षात्कारेणाज्ञाननिवृत्त्या ब्रह्मरूप एव सन् ब्रह्माप्येति प्रारब्धनिवृत्तौ ब्रह्मस्वरूपेणावतिष्ठत इत्यर्थः तथा च श्रुत्यंतरं एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यते उत्तमः पुरुष इति तथा च पारमर्षसूत्रं संपद्याविर्भावः स्वेन शब्दादिति तत्र विष्णुपुराणवचनमुदाहरति वि

इममेवार्थं श्रुतिर्दर्शयति समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्णयितुं तदा गिरा स्वयं तदंतःकरणेन गृह्यते इति सुखाविर्भावो नाम पंचमं प्रयोजनं एवं स्वरूपप्रमाणसाधनफलनिरूपणौ द्विविधा मुक्तिर्निरूपिता तस्मात् ब्रह्मविज्जीवन्मुक्तः भोगेन प्रारब्धे कर्मणि क्षीणे वर्तमानशरीरपातेऽखंडैकरसब्रह्मानंदात्मनाऽवतिष्ठते न तस्य प्राणा ह्युत्क्रामंति अत्रैव समवलीयंते ब्रह्मैव सन् ब्रह्माप्येति ब्रह्मविद्ब्रह्मैव भवति विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति १ तद्भावाभावमापन्नः ततोऽसौ परमात्मना भवत्यभेदी भेदश्चास्याज्ञानकृतो भवेत् २ इत्यादिश्रुतिस्मृतिशतेभ्यः॥ ११ भेदेति विरुद्धो भेदो यस्यासौ विभेदः अभेद इति यावत् तथा चाज्ञानेनाभेदजनके ज्ञाने नष्टे सत्यात्मनो ब्रह्मणोऽसंतमभेदं कः करिष्यतीति कश्चिन्मूर्खो योजयांचकार तद्वाक्यशेषापरिज्ञानदोषकृतमत एव तस्य मूर्खत्वमित्याह तद्भावेति ब्रह्मसाक्षात्कारादूर्ध्वभावापन्नो व्याससूत्रं संवादयति भगवानिति अस्मिन् ब्रह्मणि अस्य ब्रह्मविदः तद्योगं ब्रह्मभावापत्तिं शास्ति शास्त्रं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदतेऽथ सोऽभयं गतो भवतीत्यादि अस्यार्थः यदा यस्मिन्काले एषः साधनचतुष्टयसंपन्नोऽधिकारी श्रवणादिसाधनतत्परः अदृश्ये विलक्षणे प्रत्यग्रूपे नित्यापरोक्षे साक्षिणि यत्तदद्रेश्यमग्राह्यमस्थूलमनण्वह्रस्वमशब्दमस्पर्शमरूपमव्ययं स वा एष महानज आत्माजरोऽमरः स पर्यगाच्छुक्रमकायमव्रणं स एष नेति नेत्यात्मेत्यादि श्रुत्यंतरेभ्यः॥ असौ जीवोऽज्ञानवशात्तद्भावाभावमापन्नः ब्रह्मभावाभावमापन्नस्ततो ज्ञानात्परमात्मना सहाभेदी भवति यतो भेदश्चातस्स जीवस्याज्ञानकृत एवेत्यर्थ इति वाक्यशेषविरोधेन न सद्व्याख्यानं समीचीनमिति भावः॥ ११॥ 

नात्म्यं अनात्म्यं तस्मिन् स्थूलशरीरविलक्षणे अशरीरं शरीरेष्वनवस्थितेष्ववस्थितमिति श्रुत्यंतरात् न निरुक्तमनिरुक्तं तस्मिन् सूक्ष्मशरीरविलक्षणे इंद्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः प्राणा वै सत्यं तेषामेष सत्यमित्यादिश्रुत्यंतरेभ्यः निलीयंते अस्मिन् जगदिति निलयनं न निलयनमनिलयनं तस्मिन् त्रिविधविलक्षणे अक्षरात्परतः परः इति श्रुत्यंतरात्॥ एवं कार्यकारणविलक्षणे प्रत्यग्भूते सत्यज्ञानानंदैकरसे ब्रह्मणि अखंडैकरसब्रह्मात्मनावतिष्ठत इति परमप्रकृतमुपसंहरति तस्मादिति अत्र श्रुतिस्मृतिमुदाहरति नेति तथा व्यासोऽप्याह अनावृत्तिः शब्दादनावृत्तिः शब्दादिति तस्मान्मुमुक्षूणामिहैवोत्पन्नसाक्षात्काराणां ब्रह्मलोकं गतानां निष्कामानामुपासकानां वाऽनावृत्तिः आवृत्तिः शरीरांतरस्वीकारः न आवृत्तिः जन्ममरणनिवृत्तिः मोक्ष इति यावत् यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतो

भगवान् सूत्रकारोऽप्याह अस्मिन्नस्य च तद्योगं शास्तीति तस्मादहं ब्रह्मास्मीति तत्त्वमस्यादिवाक्यजन्यज्ञानाद्ब्रह्मभावलक्षणो मोक्षो भवतीति सिद्धम् न स पुनरावर्तते तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषा इत्यादिश्रुतिस्मृतिभ्यः श्रीमत्स्वयंप्रकाशास्मद्गुरुणा करुणावशात् उपदिष्टपरात्मैक्यतत्त्वमावेदितं मया १ ब्रह्मेशविष्ण्वादिसमस्तदेवाः स्वस्वाधिकारेषु विभीतचित्ताः आज्ञावशाद्यस्य वसंति सर्वे तं कृष्णमाद्यं शरणं प्रपद्ये॥ २॥ १२ भवन्त्यत्र ब्रह्म समश्नुते इति श्रुतेः अस्मिन् मनुष्यशरीरे उत्पन्नब्रह्मसाक्षात्काराणामत्रैव मोक्षो भवति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमित्यादिस्मृतेश्च ब्रह्मलोकं गतानां निष्कामानामुपासकानां तत्रैवोत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह मोक्षो भवति सकामानां तु ब्रह्मलोकगतानामपि पुनरावृत्तिरस्त्येव नेतरेषां इमं मानवमावर्तं नावर्तंत इति श्रुतेरिति सूत्रतात्पर्यार्थः इदं सर्वं परमरहस्यं परमकृपालुना गुरुणा मह्यमुपदिष्टं तदेवं मया प्रतिपादितमित्याह श्रीमदिति तत्त्वं याथात्म्यं परश्चात्मा च परात्मानौ तयोरैक्यं अथवा परात्मनो ब्रह्मणा ऐक्यं प्रतीचः तत्त्वं तत्त्वं च परात्मैक्यतत्त्वं उपदिष्टं च तत्परात्मैक्यतत्त्वं चेति तथा आवेदितं ज्ञापितं सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति भगवद्वचनानुसारेण भगवंतं श्रीकृष्णं शरणं यामि ब्रह्मेति मायोपहितस्य परकृतात्मानः प्राप्ततत्त्वसाक्षात्कारास्ते सत्यलोकनिवासिनः सर्वे प्रतिसंचरे प्राकृतप्रलये संप्राप्ते सति परस्य हिरण्यगर्भस्यांते मुक्तिसमये ब्रह्मणा सह परं पदं विदेहकैवल्यं प्रविशंतीत्यर्थः॥ ५॥

सात्मन एवांतर्यामिणः कृष्णशब्दार्थत्वाद्ब्रह्मादीनां तदाज्ञावशवर्तित्वमुपपद्यत इति भावः तदुक्तं भगवता अवजानंति मां मूढा मानुषीं तनुमाश्रितं परं भावमजानंतो मम भूतमहेश्वरमिति महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययमिति कृष्णस्तु भगवान् स्वयमिति श्रीमद्भागवते इदानीं स्वेष्टदेवतां वाग्वादिनीं नमस्करोति येति न तूदरमंतरं कुरुते अथ तस्य भयं भवतीति भेददर्शिनोऽनर्थश्रवणान्निर्गुणं ब्रह्मैवानुसंधेयमित्याशंक्य गुरुप्रसादादहमेव निर्गुणं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मानमतोऽन्यत्किंचिदस्ति दृश्यमाननामरूपयोर्वंध्यापुत्रवदत्यंतनुच्छत्वनिश्चितत्वादित्यभिप्रेत्याह आकाशेति श्रीगुरूणां पदारविंदभावनया प्रत्यगात्मानमद्वितीयं साक्षात्करोमि॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता।

याभारती शर्वविरिंचिविष्णुदेवादिभिर्नित्यमुपास्यमाना सदाक्षमालाविलसत्कराग्रां वाग्वादिनीं तां प्रणमामि देवीं ३ आकाशपुष्प-
मिव विश्वमिदं निरीक्ष्य मग्नोऽस्मि नित्यसुखबोधरसामृताब्धौ प्रत्यंचमद्वयमनंतसुखैकबोधं साक्षात्करोमि पदभावनया गुरूणां ४॥
यस्यादयुग्मकमलाश्रयणं विनाऽहं संसारसिंधुपतितः सुखदुःखभाक्स्यां यस्यादपद्मयुगलाश्रयणात्तु तीर्णस्तं देशिकांघ्रिकम-
लं प्रणतोऽस्मि नित्यं ५। परमसुखपयोधौ मग्नचित्तो महेशहरिविधिसुरमुख्यान् देशिकं देहमात्रं जगदपि न विजाने पूर्णसत्यात्मसं-
वित्सुखतनुरहमात्मा सर्वसंसारशून्यः ६ यदुकुलवररत्नं कृष्णमन्यांश्च देवान् मनुजपशुमृगादीन् ब्राह्मणादीन्न जाने॥ ॐ ॥

द्यर्थाः प्रकाशंते महात्मनः इति श्रुतेरिति भावः इममेवार्थमन्वयव्यतिरेकाभ्यां स्फुटीकरोति यस्यादेति गुरुचरणारविंदध्यानलब्धं ब्रह्मानुभवं प्रकटयति द्वाभ्यां श्लोकाभ्यां परमेत्यादिना प्रपंचमिथ्यात्वनिश्चयेन ध्यानयोगेन परमानंदाकारांतःकरणोऽस्म्यात्मसाक्षात्कारेणाज्ञाननत्कार्ययोर्बाधितत्वाद्ब्रह्मविष्णुमहेश्वरोपाधीनां गुणिमायाबोधेनतदुपाधीनां चवाधाज्जगदपि किंचिन्नजानइति संबंधः तर्हि कथं तिष्ठसीत्याकांक्षायां स्वावस्थितिं दर्शयति पूर्णेति पूर्णः अपरिच्छिन्नः सत्यात्मा कालत्रयाबाधितस्वरूपः संवित् चिद्रूपः सुखतनुः सुखस्वरूपः असंगो ह्ययं पुरुष इत्यादिश्रुत्याकर्तृत्वादिसर्वसंसारवर्जितः आत्माहमित्या रा
नुभवामीत्यर्थः भिन्नतयास्वेष्टदेवतामपि न पश्यामीत्याह यदुकुलेति तत्र हेतुमाह परमसुखेति उपासकानां हार्दस्य तमसो विनिवर्तकं श्रीकृष्णस्य गलेऽदै १०



तचिंतामकौस्तुभमर्पितं॥१॥ अध्यारोपापवादोन्मृदितजडतनुर्द्वैतहेतुः परात्माम्नायानैकगम्यः श्रुतिमतिसहितध्यानयोगेनबंधे क्षीणे साक्षात्कृतो यो मुनिवरनिकरैः शुद्धसत्वैरुदारैर्मर्त्यैर्गम्यो मुकुंदो यदुकुलतिलकः श्रेयसे भूयसेऽस्तु॥२॥ जिज्ञासितव्यो विमलांतरंगैरानंदविज्ञानसदेकरूपः वेदांतवेद्यो यतिवर्यगम्यो योगो पीजनेशः प्रदिशत्वभीष्टं॥३॥ वाणीनिवेदवचनानि वदंति देवीं या मात्मयोनिगृहिणीं हृदये स्मरंति॥ यच्चिंतया सकलशास्त्रकृतो भवंति तामा-

परमसुखसमुद्रे मज्जनात्तन्मयोऽहं गलितनिखिलभेदः सत्यबोधैकरूपः।७। ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्यश्री-
स्वयंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीविरचितं तत्त्वानुसंधानं समाप्तिमगात्॥

नतोऽस्मि सततं प्रणतेष्टदात्रीं॥४॥ दुरंतसंसारमहांबुराशेः समुद्धृतो येन दयालुनाहं मदंतमंतं पुरुषोत्तमं श्रीस्वयंप्रकाशं गुरुमानतोऽस्मि॥५॥ नामानिरूपाणि
निरस्य वेद्यो यद्ध्येयेन्नित्यनिरस्तमोहं साक्षिस्वरूपं परिपूर्णरूपमहं तदेवास्मि विमुक्तगम्यं॥६॥ ॐ तत्सदिति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्व-
यंप्रकाशानंदसरस्वतीपूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीमुनिवर्यचूडामणिविरचिते तत्त्वानुसंधानव्याख्यानेऽद्वैतचिन्ताकौस्तुभे चतुर्थः परि-
च्छेदः समाप्तोऽभूत्॥

वस्तुन्यवस्त्वारोपोऽध्यारोपः॥ तद्व्यतिरेकेण तदभावनिश्चयोऽपवादस्ताभ्यामध्यारोपापवादाभ्यामुन्मृदितं विनिष्टं यज्जडतत्त्वात्मकं द्वैतं तस्य हेतुः कारणं परात्मा प्रकृत्यनवच्छिन्नः तु चार्थः आम्नायानैकगम्यः वेदानैकवेद्यः मुनिवरनिकरैः मुननशीलैरखिलैः शुद्धसत्वैः स्वच्छस्वान्तैरुदारैर्महद्भिः श्रुतिमतिसहितध्यानयोगेन श्रवणमननसहकृतेन निदिध्यासनेन बन्धे क्षीणे जन्ममरणादिबन्धे विनष्टे सति साक्षात्कृतः प्रत्यगभिन्नत्वेन निश्चितः मुक्तैर्गम्यः जीवन्मुक्तैः प्राप्योऽसौ यदुकुलतिलको यदुवंशावतंसो मुकुन्दो मुक्तिप्रदः श्रीकृष्णोऽस्माकमिति शेषः भूयसे महीयसे श्रेयसे भव्याय अस्तु भूयादित्यर्थः॥ तातानुज्ञाद शास्यं योदेवैर्गन्धर्वकिन्नरान्॥ प्रार्थितः सानुजो दाबंद यांचक्रे सुवेनुतम॥१॥ यस्यादपद्मेरुहसन्नियोगान्म्लेच्छेज्यसद्म प्रकृतिं विहाय॥ प्रदक्षिणीकृत्य चखजे भूयसदा द्युतोऽहं दशकं नमस्ये॥२॥ यत्प्रसादादिदं भानि गुणिकाको द्दोपथा॥ शास्त्रनन्दावगाहस्तान् श्रीमतः स्तौमि सद्गुरून्॥३॥ ग्रन्थेऽस्मिन्नति सूरिभिर्विरचिते चिन्ताऽपरे कौस्तुभे॥ क्वाचित्कं यदिदं स्थले पुलभतेऽस्पष्टे पदे टिप्पणम्॥ गण्डासिंहमनीषिणा कृतमयो संशोधितं यत्नतः॥ सन्तव्योऽहमवेक्ष्य दोषमनघैर्धीरैरुपेन्द्रप्रियैः॥४॥ नत्पांसिनी र्यान्यघमर्षणानि शास्त्राणि यागादिककर्मसंघाः॥ श्रीमत्सतां पादपरागसाम्यं नो यान्त्यतो वै सततं नमस्तान्॥५॥ इति श्रीमन्निर्मलोदग्रपूज्यपादश्रीमन्निहालसिंहपादपाथोजभृङ्गगण्डासिंहसाधुकृतं द्वाचित्कास्पष्टपदटिप्पणं समाप्तम्॥

कौ०
प्रं०
०२

## विज्ञापनम्

इहखलु ऋगादिचत्वारोवेदा आयुरादिचत्वारउपवेदाव्याकरणादिषडङ्गानिभागवताद्यष्टादशपुराणानिमीमांसाशास्त्रम्न्याय
शास्त्रम्याज्ञवल्क्यादिधर्मशास्त्रञ्चेत्यष्टादशविद्याप्रस्थानानीतिव्यवह्रियन्तेतेषुचानीतानन्तसंसृतिकृताकामामितसुकृतैराग
द्वेषादियादोव्याकुलीकृतजगद्यादःपतितितीर्षुभिःपुम्भिर्वेदान्तशास्त्रमेवैकपरमात्माभिन्नाध्यात्मविद्यासम्पादकतयापोतरूपे
णाद्रियतइत्यत्युदग्रम्तत्रापिसत्स्वपिप्रमाणप्रमेयादिनानाविधविषयावबोधकेष्वसंख्यातपुस्तकेषुपरंयथेदंतत्त्वानुसन्धानम।
द्वैतकौस्तुभटीकासम्वलितमतिसरलसुगमरीत्याऽखिलवेदान्तोपयोगिपदार्थान्प्रतिपादयत्स्वकीयोत्कृष्टतामर्जतेनतथान्यत्
अतएवाभूतपूर्वममुद्रितञ्चेदमितिज्ञात्वा श्रीकाशीस्थितेनविद्वद्वरसंलापानुगृहीतेनगोवर्द्धनरामेणमयावेदान्तरसिकविदुषा
मनायासेनाल्पमूल्येनचलाभायस्वकीयहरिहराख्ययन्त्रालयेमुद्रयित्वाप्रकाशितम्तथाचानवरतवेदान्ताभ्यासावलम्बितचेत
सोमुमुक्षवोविद्वांसश्चभूयोऽवलोकनेनममप्रयत्नंसफलीकुर्वन्तुमामनुगृह्णन्तुचेतिप्रार्थनाममेत्यलम्॥ सम्वत् १९४८॥ रा० १०

सन् १८ ६७ को आकट २५ के अनुसार रजष्टरीकियाहै मिः अगहन वदि ३० दिसंबर १ तारीष श्रीसंबत् १९ ४८ मंगलवार शुभं
इदंपुस्तकं काश्यां गोवर्धनदासाभिधेयेनमयाहरिहररत्नाकराख्यस्वीययन्त्रालयेङ्कितम् यहपुस्तक काशीजीमें कुंजगलीके पश्चि
मफाटक पर गोवर्धनसाहुकेदुकानपरहै इसग्रंथको वनवाया गंडासिंहसे गोवर्धनरामको हमने कुल्ल हक्क देदिया० ॥
अखत्यार इनकोहै० ॥ ॥

पुस्तकं रजष्टरी कियहै